THE INSTITUTE FOR ADVANCED STUDIES OF WORLD RELIGIONS

FILM-STRIP NO.
MBB-1971-24-25

BUDDHIST SANSKRIT MANUSCRIPTS

IASWR

MICROFILM PROJECT MBB

MBB-1971-24
1. Film strip number

5
2. Source

KĀLACAKRA(ṬĪKĀ)
3. Title

LAGHUTANTRA, VIMALAPRABHĀ, MŪLATANTRĀNU-SĀRIṆĪ
4. Additional titles, shortened forms of title, etc.

N.S. + 880 = A.D.
5. Year in which MS was copied (Nepali Saṁvat and Christian Era)

6. Name of Scribe

NEPĀLĪ PAPER
7. Material (Palm leaf, etc.)

DEVANĀGARĪ
8. Script

14 cm. x 30 cm.
9. Size

11.
10. Lines to a page

332
11. Number of leaves in complete work

12. Missing leaves

13. Author and Date of composition (if given)

25.
14. Number of Chapters

15. Remarks Here is written that "Kālacakra Laghutāntra" is first of all told by Mañjuśrī. Then Sucandra wrote a commentary on it named Ṣaṭhī-sāhasrikā. Then again Pundarīka wrote a commentary on Laghutāntra. It is called Mūlatāntrānusāriṇī, Dvādaśasāhasrikā. The main god of Kalacakratāntra is Ādibuddha. To study the history of Vajrayānī buddhism, this book is very important.

August 3, 1971.
Date photographed

IASWR

MICROFILM PROJECT MBB

CONTENTS

Chapter 1. Sakalamāra vigghna vināśana parameṣṭa devatā saṃmārganiyamoddiśaḥ prathamaḥ 5 B 9
" 2 Abhidheyābhidheya sambandha prayojanamabhisaṃvṛkṣa bhagavatastantraśāstra boddeśo dvitīyaḥ 13 A 5
" 3 Deśakādhyeṣaka mūlatantra laghutantra-saṃbandhoddeśastṛtīyaḥ 17 B 10
" 4 Adhyeṣaka. sādhanoddiśaścaturthaḥ
" 5 Deśakādisaṃgrahoddeśaḥ → 26 B 5
pañcamaḥ 29 B 6
" 6 Maṇḍalābhiṣeka saṃgrahoddiśaḥ ṣaṣṭh 33 B 7
" 7 Lokadhātu saṃgrahoddiśaḥ saptamaḥ 42 A 7
" 8 Lokadhātu māna saṃgrahoddeśo 'ṣṭamaḥ 50 B 4

" 9 (1) Lokadhātu vinyāsaḥ 85 B 11.
10 (2) Kāyorakcittotpattiḥ 94 B 8
" 11 (3) Nāḍīkulotpatti 109 A 9
" 12 (4) Ariṣṭa maraṇa lakṣaṇaḥ 126 A 11.
" 13 (5) Kālacakraniyamaḥ 136 A 10
14 (6) Samāpteyaṃ ṭīkā 161 A 10
" 15 (1)
→ Abhiṣekapaṭalaḥ prathamaḥ 172 B 1
" 16 (2) Abhiṣeka paṭalo dvitīyaḥ 187 A 4
17 (3) Maṇḍala vartana 203 A 11
18 (4) Maṇḍalābhiṣekaḥ 221 B 1
19 (5) Gaṇacakravidhi yogacaryā 240 A 11
20 (6) Vīrabhojyavidhi 250 B 11.

IASWR

MICROFILM PROJECT MBB

CONTENTS

Chapter 20 (1) Sthāna rakṣā pāpadiśanādi 254 B 3
,, 21 (2) Utpatti kramena kāya nispatti 268 B 8
,, 22 (3) Prāṇa devatōtpatti 283 B 11
,, 23 (4) Utpanna krama sādhana 292 B 8
24 (Ṭīkā samāptaḥ 312 A 4)
,, 25 (5) Jñānapaṭalaḥ 332 B 6

ॐ नमो मञ्जुनाथाय॥ ॥नमः श्रीकालचक्राय शून्यताकरुणात्मने। त्रिभवोत्पत्तिक्षयाभाव ज्ञानज्ञेयैकमूर्त्तये॥ साकाराच्च निराकृति
र्भगवतो ज्ञानपालिङ्गित उन्माद भयवर्जितो ऽक्षरसुखो हास्यादिसौख्योज्झितः॥ उद्यानानन्तकस्त्रिकायसहितः स्वैकात्म्यसंवेदकः सर्वज्ञः परमादि
बुद्धभगवान् वन्देतमेवाद्वयं॥ ऊर्द्धं सिंहासनस्थं त्रिभुवनमहितं वज्रयोगं विशुद्धं तत्त्वं कामप्रभेदैरभव भवगतं षोडशाकारमेकं॥ ज्ञानज्ञेयैकमू
र्त्तं जिनवरसमयं द्वादशाकारमङ्गैः सत्वार्थं बोधिचित्तं जिनजनितपदं कालचक्रं प्रणम्य॥ सर्वज्ञो ज्ञानकायो जिनपतिसहजो धर्मकायस्तथा संभो
गनिर्माणकायैर्द्दिनकरवपुः पद्मपत्रायताक्षः॥ योगः शुद्धो विमोक्षैर्गगन भवविभवैः कायवाक्चित्तरागैः प्रज्ञोपायाद्वयो यो नभसर सम्भवतत्त्वं प्र
णम्यादिबुद्धं॥ शून्यताज्ञानसंशुद्धं विशुद्धज्ञानमक्षरं॥ अनिमित्तज्ञानसंशुद्धं धर्मात्माचित्तमद्वयं॥ वागप्रणिहितज्ञान शुद्धमन्त्रो ऽक्षयो ध्वनिः॥ एव
मनभिसंस्कार ज्ञानशुद्धो ऽसनाविलः॥ प्रज्ञोपायात्मको योगः संस्थानकायसृष्टिगः॥ वज्रसत्वो महासत्वो बोधिसत्वस्तथागतः॥ उक्तः समयस
त्वोऽयो भावाभावक्षयो विभुः॥ अनादिनिधनः शान्तो बोधिचित्तं प्रणम्यतं॥ निर्माणकायवाक्चित्तज्ञानैकं योगसम्वरं॥ सम्भोगकायवाक्चित्तज्ञा
नैकं योगसम्वरं॥ श्रीधर्मकायवाक्चित्त ज्ञानैकं योगसम्वरं॥ सहज कायवाक्चित्त ज्ञानैकं योगसम्वरं॥ जाग्रत्स्वप्नसुषुप्तेन तुर्यैर्ह्री द्विभुजः
सुखं॥ न ज्ञान चित्तवाक्कायः चतुःस्थानेषु संस्थितं॥ कर्मसंज्ञा परित्यक्तं ज्ञानसंज्ञाविवर्जितं॥ महासुखसमुत्पन्नं सहजं ज्ञानात्मया सह
विकल्पभावनातीतं महासुखाक्षरं सुखं॥ ग्राह्यग्राहकसंस्थान कल्पजत्यादिवर्जितं॥ गन्धर्वनगराकारं प्रतिसेना स्वरूपकं॥ प्रज्ञोपायात्मकं योगं

९

एवंकारं प्रणम्येनं ॥ परमाणुधर्मतातीतं प्रतिसेनाख्यरूपिणं ॥ सर्वाकारवरोपेतां महासुखां प्रणम्य तां ॥ जननीं सर्वबुद्धानां उत्पादक्षयवर्जितां ॥ चर्यां
समन्तभद्रस्य विश्वमातां प्रणम्य तां ॥ आलिकालिसमापत्तिं हूंफट्कारादिवर्जितां ॥ अभेद्योऽद्वयकायश्च कालचक्रं प्रणम्य तं ॥ सर्वज्ञं ज्ञानकायस्थमान्तं
रणवज्राधिभुं ॥ पद्मपत्रायताक्षन्तं नत्वं मोहशमेरतः ॥ चतुःकायात्मकं बुद्धं वज्रसिंहासने स्थितं ॥ सुरस्तुत्यासुरैर्नत्वा तु चन्द्राध्येषितं पुरा ॥ शुद्धज्ञा
नेकमेगो जिनवरसमयश्चित्तधर्मैकयोगः वाक्संभोगैकयोगस्त्रिभुवनमहितः कायनिर्माणयोगः ॥ ज्ञानं शेषाद्वयाख्यो गगनभवविभवो वज्रसत्वश्चध
र्मः प्रचेतामायात्मकं तं नृसुरदनुजनुतं वज्रयोगं प्रणम्य ॥ ॥ एकं परं वज्रमणौ रजोर्कैव लोषधुके शाशिनि द्वितीयं ॥ न्यस्तं सदा क्षयमभेद्यमिष्टं भ
र्तुस्त्रिलोकमहितं शिरसा प्रणम्य ॥ वाय्वग्निवार्यवनिमण्डलमेरुपद्मचन्द्रार्कतेजउपरीश्वरमारमूर्ध्नि ॥ न्यस्तं पदं भुवनमातृपरेन सार्द्धं भर्तुः सु
रेन्द्रनमितं शिरसा प्रणम्य ॥ एवं यो वज्रयोगाः परिमितसुगतैः सविनोदेशितश्च· संगीतिर्वाधिसत्वे वरकुलिशधरैर्मन्त्रविद्भिः समस्तैः ॥ तं योगं व
ज्रकायोऽक्षरपरमसुखं कालचक्रो जजोऽहं· आकाशेशाग्रगामी व्रजति खगपतिः किं नयान्यन्य पक्षी ॥ यस्मिन्समस्तभुवनं प्रकटं च देहे गीतं सम
स्तमलिविद्युधरैर्जिनेन्द्रैः ॥ तस्मिन्महाजलनिधौ प्लवितं प्रविष्टः पारं प्रयामि यदि तं तज्जिनानुभावः ॥ यस्मात्कृतं दशबलेन पुरा ल्पतन्त्रं सुयाधिपस्य ग
दितान्परमादिबुद्धात् ॥ तत्कालचक्रलघुतन्त्रमिदं कृतोपमंजुश्रियानिगदितं सकलं मुनीनां ॥ टीका तु चन्द्रलिखिता सर्वयानार्थसूचिका ॥ षष्टिसाहस्त्रि
का पासीत्पुण्डरीकेण सा मया ॥ लिख्यते लघुतन्त्रस्य महत्तन्त्रानुसारिणी ॥ ग्रन्थद्वादशसाहस्त्रीमनवज्रपदभेदिनी ॥ श्रुत्वा तन्त्रमिदं जिनोक्तविधिन

शेकं गृहीत्वोत्तरं योगी वा लघुतन्त्रराजमखिलं संतानमार्गे स्थितः ॥ त्यक्त्वा मान्यमनेकभोगविभवं चित्तगुरोरर्पितो॰ बुद्धत्वाय परोपकारच
रितः टीकां श्रणोति प्रभो ॥ यो ऽभिज्ञारहितः करोति महतीं श्रीवज्रयाने स्थितः शास्त्रानेकविकल्पधर्महृदय॰ पाण्डित्यवर्यान्वितः ॥ टीका सो
भगजश्रमत्त इव तत्तन्त्रं स्वकं ध्वंसयेत् ॥ शास्त्रोल्लंघनयापयात्स्थितमिदं मारस्य वध्यः सदा ॥ पाण्डित्येनाभिमानी जिनपतिवचना ज्ञानशीलः
स्पदाश्च टीकां कृत्वा श्रयाने प्रविशति नरकं पातयित्वा पराश्चान् ॥ कौष्ठल्यप्राणिघातापकशनमपि निस्त्रोऽसुखाढ्यचित्तः श्रीप्रज्ञासौख्यनष्टः कु
लिशपदहतो वा क्लभोगाभिभूतः ॥ शास्त्रान्वेऽसक्तताये जिनपतिसुखदे वज्रयाने समक्ता टीका संगीतिकारा बरकुलितिशावरा माध्यमा बोधिसत्वाः ॥ ने
स्मिन्बुधास्तु भावं ऽरुजगन्तुं ता पाच्कनार्थं श्रुवन्ति ॥ पंचाभिज्ञान येषामनन्तमितिजिनेन्द्राव यं ते श्रुवन्ति ॥ नानाबुद्धैरनापनेघ्नानि सन्तन कीदिश
स्त्रार्पिता॰ बौद्धानां परतर्कसङ्गमवशान्मिथ्याभविष्यन्त्यपि ॥ तर्कोदर्पितपानयेष्ठविषये ये मार्गसंदेशका तेषामेव कुबुद्धिदोषमपनी टीकामय
तिरक्तनो ॥ स्मान तजने विवेकरहितद्वेषादिनक्राकुले॰ मोहोर्मिप्रखरे गतागतघन श्रीलोभवेलानटे ॥ कोऽत्यादिवधादिकर्मवडवास्यावर्तरौद्रध्वने
टीकाकर्णधरा भवद्रवनिधौ श्रीवज्रयाने सदा ॥ सन्नैरात्म्यजनवपनाय महतां मार्गेण सानायिका॰ प्रज्ञावातपटेन शीघ्रगमिना निर्वाणपारार्पिनां ॥ मार
केशास मूहनाशान पयोः संज्ञानचिन्तामणेः॰ त्रैलोक्याधिपतिन्वदान्तारिमिका सर्वत्र संदर्शिका ॥ मुद्रावज्रधरस्य भैकमहती सर्वज्ञसौख्यप्रदा॰ स्कन्धा
ध्यावरणा प्रहीणविषयायाप्रसेनोपमा ॥ त्यक्त्वा नाथ तदु ध्वं वक्त्र हृदया मः कल्पितां सेवयेत् ॥ बुद्धत्वायतया विकल्पितधियावानीयते सत्स्थिति ॥

पायंरागविनाशनः प्रियमनसा द्वेषायतो जायते· द्वेषान्मोहहतः स्ववज्रपतनाच्चित्तस्य संक्षोभदा॥ अन्यस्मिन्विषये प्रवृत्तिरधिका सत्स्वानपानादिके
चित्तं नेन विडम्बितं हतसुखं यज्जन्मसु भ्राम्यते॥ शब्दाशब्दविचारणा न महती सर्वज्ञमार्गार्थिनां· नानादेशजभाषयापि महतां मार्गे प्रवृत्तिः सदा॥ सत्त्वा
नामधिगन्ति चित्तवशतः सर्वज्ञभाषापरा· अन्याव्याकरणोद्भवा हि रचिता शब्दादिवादार्थिनां॥ अयशब्दाद्यर्थमपियोगी गृह्णाति देशभाषातः॥ नोये
मयोनिविष्टं यिवन्ति हंसास्तु दुग्धं॥ परमार्थतत्त्वविषये न व्यञ्जनसरणता सदा महतां॥ देशसंज्ञाभिरर्थे ज्ञाते किं शास्त्रशब्देन॥ ज्ञानं न देवन
भवन्ति अदिते यस्यापशब्दः शब्दास्तु॥ सर्वज्ञस्य न भाषाया सा प्रादेशिकी जगति॥ परमाक्षरं चतुर्थं प्रज्ञाज्ञानं न तद्देवभुज्ञानां॥ यत्तत्तुनस्तभियं
स्वमहमुदाजिनेनोक्ता॥ क्षरति प्रज्ञा संगे यस्यास्मिन् नस्य केन सुखवृद्धिः॥ गुरुकं तव सत्तमङ्के पतति फलं केन चूतस्य॥ येनाक्षरं न लब्धं सक्षरं सोख्यं
समीहते दुःखी॥ सर्वो मृगपतिर्नो यं नृपितोपि न वानको भूस्थं॥ संसारसुखमनित्यम प्राप्तमपीहते महदुःखः॥ साम्राज्यसुखप्राप्तं विद्वान्सं त्यजति
मोक्षाय॥ वर्षावधेः कदाचित् त्यजति मृगपतिमृगाहारी॥ पाषाणकणाहारी नित्यं पारावतः कुरुते॥ उभयोस्तु न परमसुखं सक्तस्सदा अक्र
मातनोयद्वत्॥ नद्युत पश्चिकासुकयोः स्वमुञ्जायते क्षरणात्॥ सुप्तोपि सर्पदष्टो न जीवति अक्रमसंयमभावात्॥ यद्वत्दग्धस्तपस्यतेनावतायोम्
दरवशिखिनेव शिला वल्कलसूत्रं श्रुकं भवति शुद्धं॥ यद्वत्तद्वल्लं सा प्रज्ञा ज्ञानेन सच्चित्तं॥ अग्निस्पर्शात्सूतः प्रपलायति नाग्रहो भवति यद्वत्॥ तद्वद्यो
निस्पर्शाच्चक्षुरपनयापि नोनित्यं॥ औषधादिबलेन बलोपि संवध्यते ऽग्निसंपर्कैः॥ यद्वत्तद्वत्प्रज्ञा संपर्कैः अक्रमतियोगेः॥ काष्ठस्योपि सदाग्नि

र्निद्रूपने छिद्भेदनोपायैः॥ सरकाउपागि मथनानलस्थोपि सद्रूपतेयद्वत्॥ नद्दच्चिनाभासोनद्रूपतेकल्पभावनोपायैः॥ तत्रैवद्रूपतेसोज्ञान
नारसनैकयोगेन॥ मार्गउद्दितेनतत्वं प्राप्नोति नभागतेनयत्नोक्तं॥ षोडशाचतुःप्रभेदं विविधविकल्पादिमार्गेण॥ उत्पत्तिक्रमयुक्तं हूँकारादि
कल्पनारहितं॥ उत्पत्त्रक्रमयोगस्तत्वं तत्वस्यसाधनंनान्यत्॥ धूमादिनिमित्तेन प्राणायामेन मध्यवाहेन॥ विद्याव्रतेनवज्रापातेनैवो ह्यंकेण॥ म
र्गेणानेनसुखंयोगी प्राप्नोतिसर्वबुद्धानां॥ परमाक्षराभिधानं सहजंवासर्वहृतीनां॥ रूपादिसंकल्पनैर्मण्डलचक्रादिभावनाभ्यासैः सिध्यतिलौ
किकसिद्धिः किंपुनरियंमहासिद्धिः॥ मार्गः सद्गुरुप्रसादेनो भवति शुद्धशिष्याणां॥ येषां सत्वेषुकृपा परकार्यं उभोग्यमोनित्यं॥ अन्यस्मैदत्तमि
दंतुमार्गरत्नं प्रमत्तसत्वाय॥ ह्रियतेकुविमर्यचौरैः स्वगृहारण्यं प्रविष्टस्य॥ विचिकित्साकौकृत्यनिद्रानस्यो मत्यचौरैश्च॥ ह्रियतेसुमार्गरत्नंकु
स्वगहनं प्रविष्टस्य॥ प्राणातिपातमिथ्या अदत्तपरदाररुक्षपैशून्यसंभिन्नवचो मिथ्यामायादकुदृष्टिचौरैश्च॥ सत्वापकोपपातकहत्याद्रोहि
याभिसंसक्तिः॥ पंचकषं चाभिरेभिचौरैः रत्नंसदाह्रियते॥ अन्यतखानयानैर्नानाभोगैरनेकचौरैः स्तेः॥ वीर्यवतोपि ह्रियते प्रमादमूर्छागतस्यैव॥
स्वयमेववाञ्छि परीक्षकशतरस्य विटस्य प्रदर्शयेत्ज्ञानं॥ भवतिमहार्घं नभवति नक्षाकमात्तु श्चेतरत्नं॥ येभ्यः कारयतिमहारत्नपरीक्षाद्धुरत्नवे
त्भ्यः॥ तेषांविशुद्धवाक्यैः स्वकीयरत्नंहिविज्ञेयं॥ मारः करोतिविघ्नरूपैः संबुद्धवोधिसत्वानामपि तस्मात् गुरुहितभगिनिपुत्रभ्रातृइष्टभार्याणां॥
तस्मात्सद्गुरुदत्तं सुमार्गरत्नंहि यत्नतःशिष्यैः॥ कातन्त्रमतिजयन्त्रं चौरकस्यंचपरित्यज्य॥ वीरक्रमेनमार्गः स्वाधिष्ठानक्रमश्चमोक्षाय॥ स्वविशुद्धक्रम

एकोमेध्यायसंदर्शितोवुद्धैः॥ सौख्येनसंगृहीताः पञ्चानन्तर्यकारिणोयेन॥ सेकार्थेनजिनेन्द्रैः प्रज्ञोपायात्मकेतन्त्रे॥ वीरक्रमोनवाल्पेदेहे प्राणाक्षयो
त्पसखुक्तः॥ स्वाधिष्ठानंभूत्सेत्रैधातुकदर्शनंनाम॥ संसारेनिस्सारेखुतत्वंफलंनस्यान्नतःपुंसां॥ कदलीफलमिवपक्कंकदलीनाशेनसंभवति॥
इश्विककदलीरसाच्चामस्मात्सुखेविनाशिनस्तस्याः॥ एवंभवनिर्विनाशितश्योगचित्तंमायायाः॥ अद्वयमववनमनश्वयमिच्छंपरमाक्षरंमहारागं॥ भा
वाभावाभवंज्ञानसत्वसमन्तभद्रश्च॥ अरणोमहारागश्चसहजः श्रीवोधिचित्तविन्दुधरः॥ श्रीकालचक्रवज्रः प्रज्ञोपायात्मकोयोगः॥ करुणाभूत्मत
मूर्त्तिः कालः सर्ववित्सरूपिणी॥ भूत्मनाचक्रमित्युक्तःकालचक्रोऽद्वयोमतः॥ अस्यश्रीप्राप्तयेशीघ्रंयोगिनीचक्रशासनं॥ योयोगीध्यायतेनित्यंतस्यविघ्न
क्षयोभवेत्॥ शत्रुःसिंहोगजेन्द्रोहुतविरुरगपतिस्तस्कराः पाशबन्धः शुद्धाम्भोधिः पिशाचामरणभयकराव्याधिरिन्द्रोपसर्गः॥ दारिद्र्यंस्त्रीवियोगःक्षु
भिन्नृपभयंवज्रपातोऽर्थनाशः नाशंतस्यप्रयान्तिस्फुटमपिचरणौयःस्मरेद्योगिनीनां॥ मातङ्गस्यन्दनाश्वप्रचुरनरवरैः सर्वसंनद्धकायैः संग्रामे
लेर्गाचक्रासिधनुरिषुकरैः शत्रुभिर्हन्यमानः॥ सर्वाशांकास्त्रशस्त्रैर्दशविदिशिगतान्मृत्युपत्रीन्द्ररूपान् जित्वापादौसमन्ताल्लभतिजययशोय
स्मरेद्योगिनीनां॥ आकर्वन्त्रिंस्तनादस्फुविक्षतवदनस्तीक्ष्णदंष्ट्राकरालो ताडूलंस्फालमानः कुटिलनखनखैः खातमत्तेभकुम्भः॥ क्रुद्धोवालारु
णाक्षो ललदसिरसनः केशरीहन्तुकामो यःपादौयोगिनीनांस्मरतिभयहरौतस्यदूरंप्रयाति॥ नीलाभः पिङ्गनेत्रः प्रचुरमदजलापूरितोगण्डयु
ग्मा उन्मादस्फोटयन्त्यैर्विविधतरुवरान्मेघवद्गर्जमानः॥ वध्यंकृत्वाकरेणाप्रवरगजपतिर्भेदयन्दन्तकोट्यो यःपादौयोगिनीनांस्मरतिभयहरौतु

ध्वनितस्यकार्यं॥स्फूर्यज्ज्वालः समन्ताद्दिशिविदिशि महासर्वभक्षाश्चकारो· ग्रामारण्येपकसाहाद्रुडु पतनमिवप्रज्वमानः स्फुलिङ्गान्॥सत्वानास
त्कालं मरणभयकरः सर्वदिग्ग्रासवह्निः यः पादौ योगिनीनां स्मरति भयहरौ तस्यशीतत्वमेति॥ॐ धीनीलाञ्जनाभः अहिनगतितन्तु रौद्रस्तु
कालखन्तो· दंष्ट्रावक्त्रो द्विजिह्वो मरणभयकरो वायुवेगः प्रचण्डः॥ संप्राप्तः क्रूरदृष्टिः प्रबलदहनफणो दंशमानः फणीन्द्रो· यः पादौ योगिनी
नांस्मरति भयहरौ तस्यनाशंप्रयाति॥आरोपे उग्रचित्ताः करतलधनुषापूरिताकर्णबाणा· सद्यःसन्मार्गभूमिं दिशिविदिशिगताः सेवकाश्चक्रा॥नि
हुता॥संग्रामाग्रे भृनेत्राः पश्चिकगजनवरं तस्य खड्गारभमाना· यः पादौ योगिनीनां स्मरति भयहरौ तस्य दूरी भवन्ति॥ बालाः पाशैर्निबद्धाः प्रकम्प
नखड्गलेपूरितैः· श्वश्ववनाभिर्निगडकरौ कुष्टकः शुभजनविरहः शुष्ककायः क्षुधार्तः॥ आरक्षे रक्षमारो दिनानिशि समये स्वामिकोमापान्तया
ने· यः पादौ योगिनीनां स्मरति भयहरौ सोप्यतो मुक्तिमेति॥ आरूढोम्भोधियाने क्षुभितजलनिधौ चण्डपाते रजन्यां· रावर्ते नीयमाने मकरकवक्तै
र्थिचौरैर्निरुद्धे· उद्दिष्टैः सन्नायितैश्चैरनवरतमहावह्निदग्धोसमन्तात्· यः पादौ योगिनीनां स्मरति भयहरौ सोप्यतः पारमेति॥ पेदलौरभोमनादेज्व
दनलमुखैः कर्णिकाशक्तिहस्तैर्वेताडभीषयन्तो दशदिशिवलयेसंस्थिताः क्रूरचित्ताः॥ मांसाहाराः क्षुधार्तानररुधिररताः शुष्ककायाविव
त्त्रा· यः पादौ योगिनीनां स्मरति भयहरौ तस्यकुर्वन्ति रक्षां॥ नष्टकुष्ठप्रवृत्तः प्रतिदिनकचितानष्टनासोष्ठकर्णाः पूयक्लिन्नव्रणाभ्यः प्रवहति वक्त्रे
वक्त्रक्रपाग्रहस्ते॥ संस्पृष्टोवस्त्रवर्गैर्मतकनजरवह्निनगश्चप्रभावात्· रोगैर्मुक्तः सकामो भवति सुचरणौ यः स्मरेद्योगिनीनां॥ सज्ज्वालैःसतीक्ष्णप

द्रेः स्फुरितहरिसरभव्याघ्रमातङ्ग· वह्नि श्वक्रासीभत्रिशूलांकुशाकुविशकरैः सर्वदिक्षिन्दुदुर्गाः॥ बोधौध्यानैकनिष्ठं परमसुखगतं साधकं तर्जयन्ति:
येनाशं तेस्पयान्ति स्वमनसि चरणं यस्य योगेश्वरीणां॥ वार्षेभारं वहन्त्या नगरमपि वनात् कर्दमापूर्णमार्गे· हेमन्ते वक्त्रशैनो व्रजति हिमपथं याति
देशान्तरं च॥ ग्रीष्मे सूर्यांशुतप्तस्तभमयमहपथं निर्जलं योदरिद्रः· स्कन्धैः रेवैर्मुककामी भवति उ चरणौ ध्यायतां योगिनीनां॥ कर्णाक्षिश्रोत्रनासा
मुखनतु रखलतीव्रमायान्ति गर्भो· दौर्भाग्यं सर्वकालं सुरतविरहितं सर्वनारी वियोगात्॥ द्वेषः स्त्रीणां सदास्यादशुभफलवशात् येषु तेषां सम
स्तं· सौभाग्यवर्णं रूपं सुखवरदपदं ध्यायतां योगिनीनां॥ द्रोहात् शुध्यो नरेन्द्रः प्रलयसममहद्वान्यनमारैः कनिष्ठः सैन्यं संप्रेषयन्यो मरणभयक
रं येषु भूम्येषु शीघ्रं॥ तेषां सोपि प्रशान्तो भवति हि वरदः सर्वसम्मानदानैः सर्वत्रैलोक्यनाथं स्वमनसि चरणं ध्यायतां योगिनीनां॥ येषां वज्र
प्रपातः क्वचिदपि नभसः स्त्री प्रसङ्गाच्च नित्यं सत्त्वं मूर्ध्नि विरागं पुनरपि कुरुते जन्म जन्मान्तरेभ्यः॥ तेषां सोपि प्रशान्तो भवति निधनतां या
ति भूयो न जन्मी· श्रीकर्मज्ञानदिव्याङ्गकलिशपदं ध्यायतां योगिनीनां॥ येषां सर्वार्थनाशो भवति दिननिशं स्त्री प्रसङ्गे विरागात्· भूयो जान्य
न्तरेः सप्रभवति कुशावासनाक्लिष्टचित्तात्॥ सर्वार्थः सोऽविनाशी भवति जिनवरैः पूजितं संस्तुतं यत्· भक्तानां विश्वरूपं सममसममपदं ध्या
यतां योगिनीनां॥ योगिन्यो के तु राजन्त्रिविधमपगताः पिङ्गलेडावधूत्या· भावाभावप्रणष्टो समगति चरणौ तेन यो ज्ञानकायः॥ एको सा वक्षार
तत् सहजसुखपदं तैन तेष्व समेरे य अत्रोक्तं तस्य शीघ्रं सकलभमहरं स्यात्कृतजन्मनीरु॥ स्थानं श्रीयोगिनीनां ज्वालिशमणिगृहं तत्र वेशाय

मार्गो निःक्लेशैनष्टमारोगदितइह मया सोऽत्रपूर्वोजिनोक्तः।। येषां मार्गो विनष्टो ऽनुनतमसिसदा मारसङ्घैर्गतानां। तेऽनेनायान्तु हृष्टाःकालिशम
रिशांहृत् लब्धमार्गेणशास्त्रा।। यत्रिंशल्लक्षणाङ्कैः स्फुरितजगतः संस्थितोधर्मचक्रे देवानामौलिचूडामणिकरनिकरैः श्लिष्टितःपादपद्मः।। सन्मार्गद
र्शमानोदिवसकरइव ध्वस्तसर्वान्धकारो ध्यात्वाधूमादिमार्गैः सहजसुखपदं कालचक्रोभवेत्सः।। योदेवादिनराणां सुरेन्द्रमुकुटैः संघृष्टपादाम्बुजः स
म्यग्ज्ञानदिवाकरस्त्रिजगतः श्रीधर्मचक्रेस्थितः।। मारक्लेशमृगप्रचण्डवधकः श्रीशाक्यसिंहः सदा।। टीकांतन्त्रस्ययालिखामिजगतस्तन्त्रज्ञयाचोदितः
काकारात्कारणेशान्तेलकाराल्लयोनवै।। चकाराच्चलचित्तस्य ककारात्क्रमबन्धनात्।। कालोऽक्षरसुखज्ञानस्तूपायः करुणात्मकः।। क्रियाकारंज
गच्चक्रं श्रीप्रज्ञाशून्यतात्मिका।। अस्यश्रीकालचक्रस्य वज्रयोगस्यसर्वतः।। सत्यद्वयेस्थितस्यास्य अभिधानंवाचकंभवेत्।। अस्मिंस्तन्त्रेमयाटीका
सुगतव्याख्यतेनवै।। मञ्जुश्रीचोदितेनैव लोकनाथेनलिख्यते।। बालपाशुतमूर्खाणां तन्त्रेगुह्यप्रकाशिका।। हितामातेवपुत्राणां सुखार्थं
सर्वदेहिनां।। सन्मार्गंवज्रसत्त्वस्य मयाबिन्दन्तियोगिनः।। तस्मात्सालिख्यतेक्षिप्रंटीकेयंविमलप्रभा।। ।।इतिमूलतन्त्रानुसारिण्यां द
शसाहस्रिकायांलघुकालचक्रतन्त्रराजटीकायांविमलप्रभायांसकलमारविघ्नविनाशनःपरमेष्टदेवतासन्मार्गनियमोद्देशःप्रथमः।
।। १ ।। इहप्रथमंतावन्मूलमन्त्रानुसारेणाभिधेयाभिधानसम्बन्धादिकं लघुतन्त्रादिव्याकरणपद्यमुच्यते।। पश्चाल्लघुतन्त्रेप्रयोजनप्रयोजन
प्रयोजनादिकमुच्यतेति।। इहप्रथमंतावदभिधेयाभिधानसम्बन्धप्रयोजनप्रयोजनप्रयोजनान्यभिसंबोध्य वैनेयजनानां नियमरहितानां

स्वचित्ताभिप्रायेणेह जन्मनि बुद्धत्वफलप्रदं॥ महासुखावासे परमादिबुद्धं वज्रधातुमहामण्डले वज्रसिंहासनस्थेन बुद्धबोधिसत्वक्रोधराजदेवनागदेवतादेवतीगणपरिवृतेन त्रैधातुकवन्दितचरणारविन्देन त्रैधातुकैकचक्रवर्त्तिना॥ परमादिबुद्धेन निरश्चयेन श्रीकालचक्रभगवता सुचन्द्राध्येषितेन द्वादशसाहस्रं परमादिबुद्धं निरश्चयं कालचक्रं तन्त्रराजं वज्रधरज्ञानकायसाक्षिभूतया नामसंगीत्यालिङ्गितं सर्वतन्त्रेषु वज्रपदसाक्षिभूतं॥ उद्घाटितबुद्धरत्नकरण्डकं॥ लौकिकलोकोत्तरसत्याश्रितं चतसृभिः सम्बोधिभिश्चतुर्वज्रैः परिशुद्धं चतुःकायषट्कुलद्वादशसत्यषोडशानन्दषोडशशून्यताषोडशकरुणात्मकाभिधेयवाचकं॥ लौकिकदशलोकोत्तरैकादशाभिषेकप्रकाशकं॥ कर्म्ममुद्राज्ञानमुद्रामहामुद्रालौकिकलोकोत्तरसिद्धिप्रकाशकं॥ लोकधात्वध्यात्माभिषेकसाधनज्ञानपञ्चपटलात्मकं॥ पञ्चकल्पात्मकं वा॥ नरादिसकलसत्वानां सम्यक्तबुद्धत्वलाभाय देशितं॥ अतो लघुतन्त्रसंगीतिकरणाय मञ्जुश्रियशआगतव्याकरणं॥ अनागतेध्वनिम्लेच्छर्षीणांविनेयार्थं ममर्थीकाकरणाःसंःयच्च॥ अन्येषां यमान्तकादीनां तन्त्रदेशनार्थं॥ सम्भलविषयादिषु षण्णवतिकोटिग्रामनिवासिनां सर्वसत्वानां च मार्गलाभायेति॥ इह परमाणुसन्दोहपूर्वङ्गमो लोकधातुः॥ लोकधातुपूर्वङ्गमाः सत्वाः॥ सत्वपूर्वङ्गमोभिषेको लौकिकलोकोत्तरश्च॥ अभिषेकपूर्वङ्गमं पुण्यसम्भारं मण्डलचक्रभावनाभ्यासमक निष्कभुवनपर्य्यन्तलौकिकसिद्धिसाधनं लौकिकसिद्धिपूर्वङ्गमं पुण्यज्ञानसम्भाराभ्यां पूर्वजन्माभ्यस्तकरुणासंवृत्तिनिरालम्बवासनाबलेन परमाणुसंदोहानीतमण्डलादिविकल्प

१ प्रथमं तावल्लोकधातु पटले. सर्वज्ञेत्यादि देशाद[illegible] तया वास्थित: १८ पृष्ठे
स्थान निर्देश स्वभावतया वास्थित: , तदा पञ्चसंपत्स्व भावनयावस्थित:

८ पृष्ठे १६१।१४

भावनारहितं महाज्ञानमुद्रासिद्धिसाधनमिति॥ अतः प्रथमो लोकधातुकल्पः॥ ततोऽध्यात्मकल्पः॥ ततोऽभिषेककल्पः॥ ततो लौकिकसिद्धि
साधनकल्पः॥ ततः परमाक्षरज्ञानसाधनाकल्पः॥ एवं यथानुक्रमेण पञ्चकल्पात्मकं तन्त्रराजं पञ्चपटलात्मकं वा॥ अत्र प्रज्ञोपायात्मको ऽद्व
योग आदिबुद्धो निरन्वयः कालचक्रो भगवानभिधेयः॥ स चानया पञ्चपटलस्वभावनयावस्थितः॥ अध्येषकस्वभावनयावस्थितः॥ केन्द्रयोगाभि
धेयाभिधानप्रयोजनप्रयोजनादिपृच्छास्वभावनयावस्थितः॥ पञ्चाक्षरमहाशून्यादि विभेदोत्पादनमण्डलाभिषेकाध्येषणास्वभावनयावस्थितः
देशकप्रतिवचनस्वभावनयावस्थितः॥ लोकधातुमन्त्रग्रहनक्षत्रसत्त्वप्राणधृत्यादिसंग्रहस्वभावनयावस्थितः॥ वाय्वादिमण्डलसमुद्रद्वीपशैलसंख्या
स्वभावनयावस्थितः॥ एकत्रिंशज्ज्वस्वभावनयावस्थितः॥ महाचक्रवर्त्युत्पादस्वभावनयावस्थितः॥ सूक्ष्मनरादिश्वासादिनमानादिस्वभावनयाव
स्थितः॥ मञ्जुश्रीव्याकरणस्वभावनयावस्थितः॥ सिद्धान्तकरणज्योतिर्गणितस्वभावनयावस्थितः॥ मध्यनाडीश्वासेभ्यो ग्रहचारणा जन्मनक्षत्र
चरणस्वभावनयावस्थितः॥ द्वादशाकारराशिपृथ्वीगोलकस्वभावनयावस्थितः॥ स्वरोदयादिस्वभावनयावस्थितः॥ राहवादि भूमिवलस्वभावतयाव
स्थितः॥ दुर्गभेदरक्षणा यन्त्रस्वभावनयावस्थितः॥ चक्रवर्तिद्वादशभूमिलम्बभ्रमणस्वभावनयावस्थितः॥ म्लेच्छधर्मोत्पादनबुद्धधर्मप्रतिष्ठापनस्व
भावनयावस्थितः॥ सकलसत्त्वानां लौकिकलोकोत्तरसिद्धिमार्गदानस्वभावनयावस्थितः॥ मञ्जुश्रीलोकेश्वरपद्मायनोदेशकस्वभावनयावस्थितः॥ म
हाचक्रवर्त्यादि कल्किपर्यन्तं नराणां परमायुः स्वभावनयावस्थितः॥ ॥इति लोकधातुपटले॥ १ ॥ततोऽध्यात्मपटले॥ प्रथमं गर्भाधानसं

ग्रहस्वभावतयावस्थितः॥ रजःशुक्रात्मविज्ञानज्ञानसंयोगस्वभावतयावस्थितः॥ प्रत्येकैकमासेन गर्भोत्पादस्वभावतयावस्थितः॥ मत्स्यादिदशावस्थास्वभावतयावस्थितः॥ चतुःकायचतुर्वज्रशुद्धिस्वभावतयावस्थितः॥ चतसृभिर्भंबोधिभिः गर्भोत्पत्तिस्वभावतयावस्थितः॥ षड्धातात्मकैकविंशतिसहस्रश्वासग्रासप्रतिनाडीसहस्रषष्ठ्युत्तरत्रिशतसन्धिप्रदेशषड्धातुषड्रसषडिन्द्रियषड्विषय। षट्कर्मेन्द्रिय। षट्कर्मेन्द्रियविषयषड्विज्ञान। षट्संस्कार षड्वेदना षट्संज्ञा षड्रूपसञ्ज्ञान षट्काय षड्गुणताधर्मस्वभावतयावस्थितः॥ नाभ्यादिदलेषु नासारन्ध्रयोः पञ्चस्कन्धपञ्चधातुवामसव्यमरुणलप्रवाहस्वभावतयावस्थितः॥ मध्यमायां सकलमन्त्रनिर्गमस्वभावतयावस्थितः॥ प्राणादिवायुकृत्यस्वभावतयावस्थितः॥ धातुभ्यो देवतानिर्होत्पादस्वभावतयावस्थितः॥ चन्द्रार्कास्मरिष्टस्वभावतयावस्थितः॥ कर्मविपाकषड्गतिसृत्पादस्वभावतयावस्थितः॥ नाडिकादिग्रहचरणाछ्रस्वभावतयावस्थितः॥ एवं मध्यमाप्रवेशानन्दादिभिरारिष्टमरणवञ्चनस्वभावतयावस्थितः॥ बाह्यलौकिककार्यसाधनस्वभावतयावस्थितः॥ सर्वदर्शनानुमानपरीक्षास्वभावतयावस्थितः॥ नानासत्त्वानुमतधर्मप्रतिष्ठानस्वभावतयावस्थितः॥ ॥ ॥ इत्यध्यात्मपटलो॥ २१ ॥

मन्त्रोऽभिषेकपटलो॥ प्रथमं गुरुपरीक्षास्वभावतयावस्थितः॥ उत्तमाधममध्यमशिष्यपरीक्षासंग्रहस्वभावतयावस्थितः॥ कर्मप्रसरसाधनाय ग्रामादिदिग्विभागभूम्यादिलक्षणास्वभावतयावस्थितः॥ कुण्डहोमद्रव्याक्षसूत्रासनकीलककलसरजःसूत्रयन्त्रन्यासलक्षणास्वभावतयावस्थितः॥ भूमिपरिग्रहमण्डलालेख्यदशानन्तपरिज्ञानस्वभावतयावस्थितः॥ लौकिकलोकोत्तरा

भिषेकदानस्वभावतयावस्थितः॥ सर्वप्रतिष्ठासमाधिस्वभावतयावस्थितः॥ समयचक्रेमेलापकसमयपूजास्वभावतयावस्थितः॥ वज्रिंद
कुलदेवीमुद्रादृष्टिचिन्हसमयसंकेतजात्यादिस्वभावतयावस्थितः। मण्डलचक्रविसर्जनस्वभावतयावस्थितः॥ महानयादौ स्वस्वगृहे रंगोगणचक्र
विसर्जनपूजास्वभावतयावस्थितः॥ श्रीगुरुसर्वदानैः सन्तोषणस्वभावतयावस्थितः॥ ॥इत्यभिषेकपटलो॥ ॥ततः साधनापटलो॥ अथ
मंरक्षाचक्रादिपुरवविशुद्धिस्वहृच्चन्द्रबीजरश्मिभिस्समागतस्फरणास्वभावतयावस्थितः॥ अनन्तरपूजापापदेशनापुण्यानुमोदनात्रिशरणगम
नात्मनिर्यातनबोधिचित्तोत्पादनमार्गाश्रयणाशून्यतालम्बनादिस्वभावतयावस्थितः॥ उत्पत्तिक्रमेणागमरत्नराजाद्यौ कर्मराजाद्यौ बिन्दुयोगसूक्ष्मयोगा
दिसाधनस्वभावतयावस्थितः॥ दानादिपुण्यसंभारस्वभावतयावस्थितः॥ प्रत्यक्षपरोक्षचित्तभावनास्वभावतयावस्थितः। ॥इति साधनापट
लो॥ ॥ततो ज्ञानपटले॥ अथ बाह्यलौकिकसिद्धिसाधनस्वभावतयावस्थितः। मन्त्रादिविधानस्य तत्वज्ञानषडङ्गयोगादिसाधनस्वभावतया
वस्थितः॥ अथ मंशरीरास्थ्यादिधातुविशुद्धिमण्डलस्वभावतयावस्थितः॥ कायवाक्चित्तषट्कुलदेवतास्वभावतयावस्थितः॥ आदिकादिव्यन्त्र
कतस्वभावतयावस्थितः॥ षाड्गुंश स्रोतोपायतन्त्रस्वभावतयावस्थितः॥ प्रज्ञोपायक्रियायोगानुविद्धमहासुखरवबुद्धवर्णिस्फरणास्वभाव
तयावस्थितः॥ चतुर्थाभिषेकपरमाक्षरमहामुद्रासिद्धिसाधनस्वभावतयावस्थितः॥ ज्ञानमण्डलस्फरणास्वभावतयावस्थितः॥ बोधिचित्तसे
वासाधनस्वभावतयावस्थितः॥ सर्वाकारज्ञानज्ञेयात्मिकामहामुद्रासिद्धिस्वभावतयावस्थितः॥ सर्वकायवाक्चित्तरहस्यपरीक्षास्वभावतयाव

पटलो ॥

७

स्थितः॥ चतुरशीतिसहस्रधर्मस्कन्धदेशनास्वभावतयावस्थितः॥ बुद्धक्षेत्रसंहारस्वभावतयावस्थितः॥ आकाशधातौसुमेरुपरमाणुरजःसमैर्बो
धिसत्वैर्महासत्वैःसार्द्धंविहरणास्वभावतयावस्थितः॥ बुद्धक्षेत्रोत्पादस्वभावतयावस्थितः॥ बुद्धक्षेत्रेवज्राधिष्ठानस्वभावतयावस्थितः॥ नानाधिमु
क्तिसत्वाशयवशेनधर्मदेशनास्वभावतयावस्थितः॥ रसरसायनादिशरीरसिद्धिसाधनस्वभावतयावस्थितः॥ परमाक्षरसुखेनसर्वसत्वार्थकर
णास्वभावतयावस्थितः॥ धर्मसंग्रहगाशीतसंज्ञासंग्रहस्वभावतयावस्थितः॥ पञ्चाक्षरमउक्षरमहाशून्यबिन्दुशून्यरुतिस्वभावतयावस्थितः।
इतिज्ञानपटलो॥ ॥अतउक्तादनेनक्रमेणपञ्चपटलस्वभावतयावस्थितः॥ कालचक्रोभगवानत्राभिधेयः॥ अस्यप्रतिपादकंपटलसू
त्रहंतंत्रराजमभिधानं॥ अनयोरभिधेयाभिधानयोःपरस्परंवाच्यवाचकलक्षणःसम्बन्धः॥ वाच्योभगवान्कालचक्रःपञ्चपटलस्वभावतयाव
स्थितः॥ वाचकंकालचक्रमभिधानंपञ्चपटलात्मकं अथादिबुद्धोभगवान्वाच्यः॥ वाचकमादिबुद्धमभिधानमितिवाच्यवाचकलक्षणः।
अभिधेयाभिधानसम्बन्धः॥ अतोमण्डलप्रवेशो लौकिकाभिषेकदानेनपुण्यसंभारार्थकरणं प्रयोजनंमहाप्रज्ञाचतुर्थलोकोत्तराभिषेक
दानेननिरन्वयमहामुद्रासिद्धिलाभायपुण्यज्ञानसम्भारार्थकरणंप्रयोजनप्रयोजनमिति॥ एतान्येवाभिधेयलक्षणान्यधिसंवीक्ष्यविनेयज
नानांनियमरहितानांस्वचित्ताभिप्रायेणोक्तानि॥ नियमःश्रावककोटिसम्वरःपञ्चकामोपभोगरहित शीलसम्वरइतितेनरहितानियमरहिताः
तेषांस्वचित्ताभिप्रायःपञ्चकामोपभोगाभिलाषः तथा द्वीन्द्रियेणमहासुखाभिलाषइतिस्वचित्ताभिप्रायोनियमरहितानामिति॥ अनेन

स्यान्नाभिप्रायेणोक्तजन्मनि बुद्धत्वफलप्रदमिति ॥ इह तु जन्मनि मनुष्यजन्मनि बुद्धत्वफलप्रदं तन्त्रराजं ॥ न पुनर्देवादि पञ्चगतिषु जन्मनि ।
तत्कस्य हेतोः ॥ अकर्मभूमिजातित्वादिति ॥ इह देवादीनामपि मनुष्यजन्मलाभाद् बुद्धत्वफलप्रदं भविष्यतीति नियमो भगवतः ॥ पुण्यज्ञानसं
भाराभ्यां षडान्वात्मकेन महापुरुषगुणेनेति ॥ न चान्यथाकुशलकर्मणा मनुष्यजन्मनीह तु बुद्धत्वफलप्रदं भविष्यतीति नियमस्तथागतस्य ॥ अथा
स्मिन्मन्त्रयाने बुद्धभगवतोक्तं ॥ तद्यथा ॥ चण्डालवेणुकाराद्याः पञ्चानन्तर्यकारिणः ॥ जन्मनीहैव बुद्धाः स्युर्मन्त्रचर्यानुचारिणः ॥ इति भगवतो वा
क्यसत्यं ॥ इह तु जन्मनि यत्प्राक्कृतं पञ्चानन्तर्यादिकं रौद्रकर्म नस्तस्मिन्मन्त्रयाने महामुद्राक्षरसुखसमाधिनाध्वंसयित्वा अपरागत्वकाकुशलाप्रवेश
य वज्रधर्मोदयगृहे चतुर्मारविज्ञाप्तिप्रवेशद्वारेषु मैत्रीकरुणामुदितोपेक्षाधर्मकथां दत्वा तत्र वज्रसत्वं साधयित्वा महामुद्रया सार्द्धं पञ्चानन्तर्य
कारिणोपीह जन्मनि बुद्धत्वफललाभिनो भवन्तीति तथागतनियमः ॥ न पुनर्मन्त्रयाने प्रविष्टाः सन्तः पञ्चानन्तर्यादिकं रौद्रकर्म कुर्वन्तोपीह जन्म
नि बुद्धत्वफललाभिनो भवन्तीति तथागतमतं ॥ इह यानत्रयेऽपि भगवतो वाक्यं ॥ आदौ कल्याणं मध्ये कल्याणं पर्यवसाने कल्याणमिति भगव
तो वचनात् ॥ न मन्त्रयाने प्रविष्टाः सन्तः पापकर्म कुर्वन्तोपि बुद्धत्वफललाभिनो भवन्तीति तथागतनियमः ॥ अथेह मन्त्रयाने भगवतोक्तं योगिनां
मांसभक्षणं ॥ तदेव प्राणातिपातेन सदा भवति ॥ कस्यचित्प्राणातिपातेन विनाशो भवति ॥ यदि भक्षको नास्ति वधकोपि न विद्यते ॥ अतो न भक्षकवध
कयोः प्राणातिपातः स्यात् ॥ इह प्रत्यहं समयचतुष्टयं मन्त्रिणा कर्तव्यमिति तथागतनियमः ॥ तत्सत्यं तस्मात्कारणान्निमित्तसावद्येन प्राणातिपा

नो भवति ॥ तस्मात्कारणान्नु योगिनामनिमित्तं निरवद्यं गोक्ष्वादिकं भक्ष्यं भगवतोक्तं ॥ इह यस्मिन्देशे यदभक्ष्यं यदविक्रेयं लोकानां गोक्ष्वादिकं स्व
कर्मणा मृतं संग्रामे अन्यकर्मणि मारितं स्वदोषेण वा तस्करादिकं तत्सर्वं योगिनां भक्ष्यं तथागतेनोक्तं न द्रव्यैः क्रीतं न पित्रादियज्ञादिकार्ये मारितं
स निमित्तं मांसं भक्ष्यमिति तथागतेनोक्तं ॥ अथ प्रत्यहं समयचतुष्टयं यत्कर्त्तव्यं ॥ तन्निरवद्यैर्गोक्वादिभिः पञ्चभिर्वैरोचनादिभिः पञ्चभिः सर्षपप्र
माणगुलिकाः प्रत्यहं समयसेवार्थं कर्त्तव्याः ॥ मद्यं स्त्री सदा निरवद्या भावनाय अमूर्द्धधर्मेणोक्ता ॥ मूलतन्त्रेऽपि भगवतानाह ॥ तद्यथा ॥ देवस्य भ
यपवित्रस्य सिद्ध्यर्थं विक्रयायत्त ॥ ना पराधीरत्नसत्वो उदीनैः पापकारिभिः ॥ सावद्यं तस्य तन्मांसं क्रीतं अकं समीहितं ॥ अस्यात्तत्पतितं पात्रे
निरवद्यं तदेव हि ॥ स्वदस्य प्राणिनो मांसं वज्रभिर्भक्षितं वरं ॥ नानेकप्राणिनां मांसं मजेनैवेन भक्षितं ॥ भोक्तव्यं योगयुक्तेन करुणामुन्म
यतन्त्वतः ॥ निर्विकल्पेन चित्तेन निरवद्यं नान्यदेव हि ॥ कुलग्रहविनाशाय अन्नपानं च सर्वदा ॥ अङ्गनाभिगमनं प्रोक्तं वज्रिणा तत्त्वदर्शिना नि
एवं सत्त्वक्रमेण नियमरहितानां बुद्धत्वफलप्रदं तन्त्रराजं ॥ बुद्धत्वं सर्वज्ञता सर्वाकारज्ञता मार्गज्ञता मार्गाकारज्ञता दशबलवैशारद्यादिगुणा
विभूतयः ॥ तां ददातीति बुद्धत्वफलप्रदं ॥ महासुखावासद्मनि ॥ महासुखावासो धर्मधातुराकाशलक्षणोऽसंकीर्णो धर्मोदयो बोधको यमामानिक्रा न
समन्तभद्रो महासुखावासः ॥ परमाद्विशुद्धवज्रधातुमहामण्डले निरन्वये ज्ञानज्ञेयैकलोलीभूते अच्छेद्येऽभेद्ये सर्वाकारधातुलक्षणे ॥ आदर्शप्रति
सिनातुल्ये ॥ तस्मिन्वज्रधातुमहामण्डले वज्रसिंहासनस्थेन ॥ वज्रसिंहासनं चन्द्रसूर्याग्निमण्डलमच्छेद्यमभेद्यं ॥ एकारो वा आकाशधातुर्वज्रासिंहास

न तस्मिन्स्थितो वज्रसिंहासनस्थः कायवाक्चित्तज्ञानात्मको वँकारः॥ तेन वज्रसिंहासनस्थेन॥ बुद्धबोधिसत्वक्रोधराजदेवनागदेवतादेवीगणापरिवृतेनेति॥ बुद्धा अक्षोभ्यादयः॥ बोधिसत्वाः समन्तभद्रादयः। क्रोधराजा उष्णीषादयः॥ देवा ईश्वरादयः। नागा अनन्तादयः॥ देव्यो वज्रधात्वीश्वर्याद्याः॥ धर्मधात्वाद्याः। अतिनीलादयः॥ चर्चिकादयः॥ गौर्यादयः श्वानास्यादयः॥ एषां समूहो गणः॥ तेन परिवृतो देवतादेवीगणपरिवृतः॥ तेन देवतादेवीगणापरिवृतेनेति॥ त्रैधातुकवन्दितचरणारविन्देनेति॥ त्रैधातुकं कामरूपारूप्यं॥ तेन वन्दितं चरणारविन्दं यस्यासौ त्रैधातुकवन्दितचरणारविन्दः॥ तेन त्रैधातुकवन्दितचरणारविन्देनेति॥ त्रैधातुकचक्रवर्तिनेति॥ त्रैधातुके धर्मचक्रं युगपद्यस्य प्रवर्तते॥ असौ त्रैधातुकचक्रवर्ती तेन त्रैधातुकचक्रवर्तिनेति॥ परमादिबुद्धेनेति परमादिबुद्धः॥ एकक्षण पंचाकार विंशत्याकारमायाजालाभिसंबोधिलक्षणोऽक्षरसुखः परमस्तेनादिबुद्धः परमादिबुद्धः॥ तेन परमादिबुद्धेनेति॥ निरन्वयेनेति॥ अन्वयः प्रज्ञोपायात्मको यानत्रयादेकलक्षणो धर्मः॥ सोऽन्वयो निरस्तो येनासौ निरन्वयः॥ तेन निरन्वयेनेति॥ कालचक्रभगवतेति॥ कालः परमाक्षरो महासुखक्षणः॥ तेनोत्पादितं निरावरणं स्कन्धधात्वादिकं चक्रं यस्य शरीरं असौ कालचक्रः॥ अन्यच्च प्रत्येकैकाक्षरेण॥ ककारात्कारणे शान्ते लकाराच्चलयो त्रवै॥ चकाराच्चलचित्तस्य क्रकारात् क्रमबन्धनात्॥ क्रमः कामादीनां बिन्दूनां॥ एवं तस्य बन्धः सहजसुखेनेति कालचक्रः॥ भगवतेति॥ मारक्लेशभञ्जनाद्भगः॥ सर्वज्ञैश्वर्यादिगुणसमूहः॥ स भगोऽस्यास्तीति भगवान् तेन कालचक्रभगवतेति॥ सुचन्द्राभिषिक्तेनेति॥ शोभनश्चासौ चन्द्रश्चेति सुचन्द्रः सर्वतथागतश्रोत्रभूतः॥ क्लेशरजविमलप्रभः॥ सर्वसत्वभाषान्तरेणानभागतोक्तधर्माणां संग्राहक

त्वात्॥सर्वतथागतकरीभूतः॥गुह्याधिपतिः॥गुह्यं श्रावकप्रत्येकयानयोस्तत्तरं वज्रयानं॥तस्मिन्संगीतिकारकत्वेनाधिपतिर्गुह्याधिपतिः॥तथा वा से
लोकसंवृत्या गुह्यशब्देन यक्षाभिधानमधिपतिः गुह्यकाधिपतिः॥अडकवती निवासी॥वाह्ये अडकशब्देन नष्टप्राणो मृतकसमूहः॥सोऽस्यामस्तीति अ
डकवती श्मशानभूमिः॥तस्यां महायक्षाः सत्वानां विहेठका अनेकविघ्नकर्त्तारः तेषां वधकः॥अडकवतीनिवासीति॥अथ मार्गाधिपतिरिव अ
डकवतीनिवासी महायक्षाधिपतिरिति॥अध्यात्मनि। अडक इति। षट्शताधिकैकविंशतिसहस्रश्वासप्रश्वासानां षड्विंशच्छतोनानां निरोधः॥सो
ऽस्यामस्तीति धर्ममेघाभूमिः॥तस्यां निवासी अडकवतीनिवासी॥मारक्लेशज्ञेयसमापत्त्यावरणयक्षाणां वधको यक्षाधिपतिः॥तथागतदेशितधर्मसिंह
नादेन सर्वसत्वानां प्रत्येकस्मै धर्मप्रवर्त्तकः॥तेन निर्मितकायेन वज्रपाणिना॥सुचन्द्रराज्ञाध्येषितेनेति॥द्वादशसाहस्रिकमिति॥चतुरशीतिसहस्राधिक
त्रिलक्षाद्यसमूहं द्वात्रिंशत्सहस्रानूनं आद्यं द्वादशसाहस्रिकमिति॥परमादिबुद्धमिति॥परमादिबुद्धाभिधेयवाचकत्वात्॥अस्याभिधेयस्याभिधान
स्वभावतयावस्थितत्वादिति॥परमादिबुद्धं कालचक्रं॥कालचक्राभिधेयवाचकत्वात्कालचक्राभिधानमिति॥निरन्वयमिति निरन्वयाभिधेय
वाचकत्वात्॥इहान्वयः प्रज्ञापक्ष उपायपक्षश्च॥सोऽन्वयोऽभिन्नपक्षो निरस्तो यस्मात्तत्तन्त्रं निरन्वयं॥प्रज्ञोपायात्मकं योगतन्त्रं भिन्नमद्वयमुच्यते जि
नेनेति॥इह प्रज्ञोपायात्मकाभिधेये तन्त्रराजे॥प्रज्ञोपायपक्षभेदात्॥प्रज्ञोपायात्मकाभिधेयाभावो भवति॥प्रज्ञोपायात्मकाभिधेयाभावात् अद्वयज्ञा
नाभावः॥अद्वयज्ञानाभावाद्बुद्धत्वस्याप्यभावः॥बुद्धत्वाभावात्संसार इति॥इहाभिधानाभिधेयसम्बन्धेन विना प्रज्ञोपायात्मकोऽद्वययोगो वाच्यवाच

कलक्षणो न भवति ॥ योयं तंत्र उपायनाम्नि ॥ न च योगशब्द उपायार्थवाचकः प्रज्ञार्थवाचको वा । योगशब्दः प्रज्ञोपायार्थवाचक इति ॥ तथा चाह यो
गोनोपायस्य कस्पिन्नैकया प्रज्ञया भवेत् ॥ प्रज्ञोपायसमापत्तिर्योग उक्तस्तथागतैः ॥ अतो यस्मिन् तन्त्रे प्रज्ञोपायात्मकोऽभिधेयो भवति ॥ तत्तन्त्रं न प्रज्ञातंत्रं
नोपायतंत्रं परमार्थतः ॥ लोकसंवृत्या प्रज्ञातन्त्रादिभेदेन धातुस्कन्धविशुद्धितः ॥ प्रज्ञोपायपक्षद्वयोक्तो मन्त्र उभयात्मकवशात्तथागतेनेति ॥ एवं योगिनी
तान्यपि ॥ इह योगिनीत्वमस्यास्तीति योगी ॥ एवं योगिनी च । अतो योगतन्त्रं योगिनीतन्त्रं च भवति ॥ परापेक्षिकत्वात् । तस्मात्प्रज्ञोपायात्मकतन्त्रं यो
गतन्त्रं निरन्वयं कालचक्रं परमार्थसत्यमत इति ॥ वज्रधरज्ञानकायसाक्षिभूतया नामसङ्गीत्यालिङ्गितमिति । आदिबुद्धाभिधानत्वात् ॥ इह यथा नामसंगी
तिरतीतानागतप्रत्युत्पन्नैस्तथागतैर्भाषिता भाषिष्यते भाष्यते तथादिबुद्धमपि । आदिशब्दोऽनादिनिधनार्थः ॥ अनादिकाले अनादिबुद्धदेशितं देश
यिष्यते देश्यत इति ॥ नैकेन शाक्यमुनिना दीपंकरतथागतेनापीति ॥ अत्र वज्रपाणिराह ॥ यातीतैर्भाषिता बुद्धैर्भाषिष्यन्ते ह्यनागताः ॥ प्रत्युत्पन्नाश्च संबुद्धा
या भाषन्ते पुनः पुनः ॥ मायाजालमहातन्त्रे या चास्मिन् संप्रगीयते ॥ महावज्रधरैर्हृष्टैरमेयैर्मन्त्रधारिभिः ॥ अतो नामसंगीतिकाभिधेयवचनात् ॥ सर्वतथागतै
स्त्रियानं देशितमिति ॥ इह यत्समाले ॥ दीपंकरशाक्यमुनिमध्ये । न केनचित्तथागतेन मन्त्रयानं देशितं तेन कालेन तेन समयेनेति ॥ आर्यविषयधर्मदेशना
कालेन । आर्यविषयपर्यन्तेन देशितं ॥ चतुर्वर्गाभिमाना भव्यसत्त्वाशयवशादिति ॥ न पुनरल्पकालेनान्यविषये लोकधातुपर्यन्तेन देशितमिति ॥ अतस्त
थागतप्रवचनात् ॥ सर्वतथागता यानत्रयदेशकाः ॥ अन्यथा सर्वज्ञताभावो मन्त्रयानादेशकत्वादिति ॥ अतः सर्वतथागता यानत्रयदेशकाः श्रूतरा इति

धर्मस्याश्च देशकाः सत्वाशयवशादिति ॥ अतो वज्रधरज्ञानकायमाक्षिभूतयानामसङ्गीत्यालिङ्गितमिति ॥ सर्वतन्त्रराजेषु वज्रपदसाक्षिभूतमि
ति ॥ इदं वज्रयानि सत्वाशयवशेन सर्वतन्त्रराजेषु वज्रपदं गुप्तं ॥ चतुर्थं तत्त्वं न लभ्येति तथागतवचनात् ॥ चतुर्थं तृतीयेन भवति ॥ चतुर्थमिति वचन
म् ॥ तत्त्वं न लभ्येति वचनात् ॥ प्रज्ञाज्ञानं तदेव चतुर्थं मतो भगवतो वचनात् ॥ वज्रपदं गुप्तमिति सर्वतन्त्रराजेषु वज्रपदं प्रकटं न भवति ॥ गुरुपारंप
र्यक्रमेणावगन्तव्यं ॥ तत्र तत्त्वावतारेणावबोध्यमिति तथागतवचनात् ॥ इह मन्त्रनये द्विधा वज्रपदं एकं लौकिकसंवृत्या द्वितीयं परमार्थतः ॥ तयोर्लौ
किकसंवृत्या वज्रपदं मारणादीकर्मशीतिमयसिद्धिदायकं ॥ परमार्थसत्येन वज्रपदं चतुर्थं तत्त्वं नाम महामुद्रासिद्धिफलदायकमिति ॥ अनय एवास्मिन्नादि
बुद्धे वज्रपदं प्रकटस्तु देशन्निर्दिष्टप्रतिनिर्देशे भगवता प्रकाशितं ॥ अस्यैव साधनाय महामुद्राभावना धूमादिनिमित्तमार्गः प्रकाशितः ॥ अस्ये एकाग्रम
तः कल्पादिनमेकं परीक्षयेदिति ॥ अतो भगवतो वचनात् । परमादिबुद्धे वज्रपदं महामुद्राभावनामार्गो धूमादिकः प्रकटः ॥ गुरुपारंपर्यक्रमेणागतः
साधिष्ठानित्यवर्त्तयेत् ॥ अस्य च मार्गस्य प्रत्ययोऽस्ति ॥ असन्त्रिंशद्दिनमेकं परीक्षयेदिति भगवतो वचनात् ॥ इह न चान्यत्र आदिसाधनं धूमादिनि
मित्तं विहाय यदि नैकेन योगिना परीक्षणीयं । निमित्तमपि त्रिधा ॥ आदिनिमित्तं मध्यनिमित्तं अन्तनिमित्तं चेति ॥ आदिनिमित्तं धूमादिमार्गः ॥ षडङ्ग
योगेन बिम्बनिष्पत्तिरक्षरक्षणलाभः ॥ मध्यनिमित्तं परमाक्षरक्षणैरष्टादशशतैरादिभूमिलाभः ॥ पञ्चाभिज्ञा दृष्टार्थसंदर्शनं लौकिकसिद्धि
प्राप्तिरिति ॥ अन्तनिमित्तं तु फलं वज्रधरत्वमेकविंशतिसहस्रैः षट्शताधिकैः परमाक्षरक्षणैः द्वादशभूमिलाभान्महामुद्रासिद्धिरिति एतद्वज्रपदादिकं

निमित्तपूर्वकं प्रवर्त्तनं तन्त्रराजे परमादिबुद्धे भगवता देशितत्वात् अतः सर्वतन्त्रराजेषु वज्रपदसाक्षिभूततन्त्रं तन्त्रान्तराणां प्रकाशकमिति ॥ उद्घाटितवज्र
रत्नकरण्डकमिति ॥ वज्ररत्नं परमाक्षरस्वरूपं करण्डकं वज्रमायापद्ममिति वज्ररत्नकं ॥ तमेवोद्घाटितं येन तन्त्रराजेन तदुद्घाटितं वज्ररत्नकरण्डकमिति ॥
लौकिकलोकोत्तरसत्याश्रितमिति ॥ लौकिकसत्यं मण्डलचक्रविकल्पभावना लौकिकसिद्धिसाधनमुत्पत्तिक्रमेणेति ॥ लोकोत्तरसत्यं धूमादिनिमित्तेन
निर्विकल्पचिन्तेन उत्पन्नक्रमेण महामुद्रासिद्धिसाधनमिति ॥ उत्पन्नक्रमः सहजो निर्विकल्पः सर्वाकारो मुखभुजवर्णसंस्थानकल्पनारहित इति ॥ अ
न्ये ॥ सत्यद्वयाश्रितं लौकिकलोकोत्तरसत्याश्रितमिति ॥ मार्गद्वयदर्शनादिति ॥ चतसृभिरभिसंवोधिभिः श्रुतवज्रैर्विशुद्धमिति ॥ एकक्षणाभिसंवोधि
पञ्चाकाराभिसम्बोधिः ॥ विंशत्याकाराभिसम्बोधिः ॥ मायाजालाभिसंवोधिः ॥ एभिः परिशुद्धं गर्भजात्यतिक्रमेण धूमादिविम्बोत्पन्नक्रमेण ॥ एवं चतसृ
भिरभिसंवोधिभिः परिशुद्धमिति ॥ चतुःकायषट्कुलद्वादशसत्यषोडशतत्त्वषोडशशून्यताषोडशाकारेण लौकिकलोकोत्तराभिषेकदर्शनज्ञानमहामु
द्रासिद्धिमार्गप्रकाशकमिति ॥ चतुःकायाः शुद्धधर्मसंभोगनिर्माणा इति ॥ गर्भजस्य तुर्यसुषुप्तस्वप्नजाग्रदवस्थालक्षणाः ॥ ते च शुद्धा निरावरणा
इति ॥ षट्कुलानीति ॥ अक्षरसुखं ज्ञानधातुः ॥ विज्ञानमाकाशधातुः ॥ संस्कारो वायुधातुः ॥ वेदना तेजोधातुः ॥ संज्ञा तोयधातुः ॥ रूपं पृथ्वीधातुरिति ॥ गर्भ
जानां सावरणानि ॥ बुद्धानां निरावरणानीति द्वादशसत्यानीति ॥ अविद्यासंस्कारविज्ञाननामरूपषडायतनस्पर्शवेदनातृष्णोपादानभवजातिजरा
मरणानीति द्वादशसत्यानि गर्भजानां सावरणानि ॥ बुद्धानां निरावरणानीति ॥ द्वादशसंक्रान्तिभेदेन प्राणवायुप्रवाहात् ॥ सावरणानि गर्भजानां बु

ज्ञानानि निरावरणानि। द्वादशाङ्गनिरोधादिति॥ षोडशतत्त्वानीति। निर्माणकायो निर्माणवाक् निर्माणचित्तं निर्माणज्ञानं॥ संभोगकायः संभोगवाक् संभोगचित्तं संभोगज्ञानं॥ धर्मकायो धर्मवाक् धर्मचित्तं धर्मज्ञानं॥ सहजकायः सहजवाक् सहजचित्तं सहजज्ञानमिति॥ आनन्दपरमविरमसहजभेदेन षोडशतत्त्वानि॥ गर्भजानां सावरणानि षोडशार्धार्धबिन्दुमोचनत्वादिति॥ बुद्धानां निरावरणानि षोडशार्धार्धबिन्दुधरत्वादिति॥ षोडशशून्यतेति कृष्णपक्षः सूर्यः प्रज्ञा षोडशकरुणेति॥ शुक्लपक्षश्चन्द्रमा उपायः॥ शून्यतायास्त्रयो भेदाः॥ शून्यता महाशून्यता परमार्थशून्यता चेति॥ तत्र शून्यता पञ्चस्कन्धशून्यता॥ कृष्णप्रतिपदाद्याः पञ्चतिथयः॥ महाशून्यता पञ्चधातुशून्यता॥ षष्ठ्याद्याः पञ्चतिथयः। परमार्थशून्यता पञ्चेन्द्रियशून्यता॥ एकादश्याद्याः पञ्चतिथयः॥ तेन पञ्चदशतिथयः पञ्चदशशून्यता॥ अमापर्यन्तं। अमान्ते शुक्लप्रतिपत्प्रवेशो ययोर्मध्ये षोडशी शून्यता सर्वाकारा॥ एवं करुणा त्रिधा॥ सत्त्वावलम्बिनी धर्मावलम्बिनी अनावलम्बिनी चेति॥ तत्र सत्त्वावलम्बिनी शुक्लप्रतिपदाद्याः पञ्चतिथयः। धर्मावलम्बिनी षष्ठ्याद्याः पंचतिथयः। अनावलम्बिनी एकादश्याद्याः पञ्चतिथयः पूर्णिमापर्यन्तं॥ पूर्णिमान्ते कृष्णप्रतिपत्प्रवेशो ययोर्मध्ये षोडशी करुणा। अनयोरैक्यं षोडशशून्यताषोडशकरुणात्मकमभिधेयं तस्य वाचकमिति॥ लौकिकलोकोत्तराभिषेका इति॥ लौकिका यावत्॥ उदकं मुकुटः पट्टः वज्रघण्टा महाव्रतं नाम अनुज्ञा कलशो गुह्यं प्रज्ञाज्ञानमिति॥ गर्भजानां लोकसंवृत्त्या दशाभिषेकाः॥ कायवाक्चित्तज्ञानधातुस्कन्धायतनकर्मेन्द्रियादिपरिशुद्ध्येति॥ लोकेन र एकादशमश्चतुर्थं तत्त्वतत्त्वेति नियमात्॥ महामुद्रापरमाक्षरज्ञानलाभो गुरुवक्त्रात् कायवागादिनिरावरणत्वेन शोधक इति॥ कर्मज्ञानमह

मुद्रासिद्धिरिति ॥ कर्ममुद्रा स्तनकेशवती ॥ ज्ञानमुद्रा स्वचित्तपरिकल्पिता ॥ महामुद्रा विकल्परहिता प्रतिसेनास्वरूपिणीति आसां त्रिविधा सिद्धिः कामा
वचरा कर्ममुद्रासिद्धिः ॥ रूपावचरा रूपभवभावलक्षणा ज्ञानमुद्रासिद्धिः ॥ भावाभावरहिता सर्वाकारवरोपेता महामुद्रासिद्धिरिति ॥ एषां चठः काया
दीनां लौकिकलोकोत्तरमार्गप्रकाशकं परमादिबुद्धमिति ॥ एवमुक्तक्रमेण ॥ लोकधात्वध्यात्माभिषेकसाधनज्ञानपञ्चपटलात्मकं ॥ पञ्चकल्पा
त्मकं वा । नरादिसकलसत्वानां सम्यक्तत्वज्ञानलाभाय संदेशितं ॥ समिति सम्यक्प्रकारेण वज्रपदगुप्तप्रकारेणेति ॥ अतः परमादिबुद्धाल्लघु
तन्त्रसंगीतिकरणाय मञ्जुश्रियस्त भगवता व्याकरणंमेव च टीकाकरणाय ॥ यमान्तकादीनां तन्त्रदेशनाय च ॥ अनागते धनिब्रह्मक्षत्रवीराणां वैनेया
र्थं सम्भलविषयादि षण्णवतिग्रामकोटिनिवासिनां सर्वसत्वानां महायानमार्गलाभायेति ॥ अतो द्वादशसाहस्रिकात् परमादिबुद्धात् लघुतन्त्रं संग
तिकरणाय मञ्जुश्रीसम्भागतेन व्याकृतः ॥ अनागते धनिसार्धत्रिकोटीनां ब्रह्मक्षत्रवीराणां कलापग्रामनिवासिनां वैनेयार्थं ॥ अहमपि लोकेश्वरो लघुत
न्त्रटीकाकरणाय व्याकृतोऽन्यपित्रयोविंशति क्रोधराजबोधिसत्वाः षण्णवतिग्रामकोटिनिवासिनां सर्वसत्वानां निर्माणकायेन लघुतन्त्रदेशकाः
व्याकृता महायानमार्गलाभायेति ॥ महायानमार्ग इति ॥ मञ्जुश्रियो वज्रकुलेन कलशगुह्यप्रज्ञाज्ञानाभिषेकः ॥ तस्य लाभाय महायानमार्गलाभ
येति ॥ अतः कलशगुह्यप्रज्ञाज्ञानाभिषेकतः ॥ सर्ववर्णानामेककल्को भवति ॥ स कल्कोऽस्यास्तीति कल्की ॥ तस्य गोत्रं कल्किगोत्रं वज्रकुलाभि
षेकतः सकलमन्त्रिणामिति नीतार्थः ॥ एवं मञ्जुश्रीयशाः कल्की व्याकृतोऽस्य पुत्रोऽस्मिन्गोत्रेऽहं लोकेश्वरो द्वितीयः कल्की व्याकृत इति ॥ एवं च पञ्चक

नता। समन्तकाद्यो दश क्रोधराजाः क्षितिगर्भादयस्त्रयोदश बोधिसत्त्वाः॥ तेषां त्रयोदशबोधिसत्त्वानां यमान्तकादिक्रोधराजानामनन्तरे स्याश्चाष्ट
ता॥ निर्माणकायेन षण्णवतिकोटिग्रामनिवासिनां राजानः सकलसत्त्वानां तथागतधर्मप्रवर्तकाः॥ म्लेच्छादिकधर्मविध्वंसका द्वात्रिंशन्महापुरु
षलक्षणाः पंचाभिज्ञा षडैश्वर्यगुणपरिपूर्णा इति॥ अतः परमादिबुद्धाल्लघुतन्त्रसंगीतिकरणाय॥ मञ्जुश्रीव्याकरणमसुरादिकारणाय च यम
न्तकादीनां धर्मदेशनायेति॥ इति मूलतन्त्रानुसारिण्यां द्वादशसाहस्रिकायां लघुकालचक्रतन्त्रराजटीकायां विमलप्रभायां अभिधेयाभिधेयसम्ब
न्धप्रयोजनप्रयोजनप्रयोजनमभिसंवीक्ष्य भगवतस्तन्त्रदेशनोद्देशो द्वितीयः॥ २ ॥ इदानीं पुनर्देशकाध्येषकसम्बन्धोऽत्रोच्यते॥ कदाचित्पूर्व
परन्तु टीकाऽश्रुतस्य वचनं भविष्यति॥ इह नतु वज्रयाने अडकवतीनिवासी मलयपक्षाधिपतिर्महाबोधिसत्त्वो वज्रपाणिस्तथागतस्याध्येषकः सङ्गीति
कारश्च॥ कथं सम्भलविषये कलापग्रामाधिपतेः सूर्यप्रभस्य विजयादेवीगर्भसंभूतः सुचन्द्रो राजाध्येषकः क्वचित्तन्त्रान्तरे न श्रूयते न व्याकृत इति
परस्परं देशकाध्येषकसम्बन्धो विरुद्धः। तस्मादुच्यते॥ इह हि यत्केनचित्कस्य मन्त्रनये गर्भोत्पन्नस्तथागतस्याध्येषको न भवतीति तन्न। कस्माद्भ
गवतोऽपि गर्भोत्पन्नत्वात्। इह मन्त्रनये यदि गर्भोत्पन्नस्तथागतस्याध्येषको न भवति संगीतिकारश्च। तदा शाक्यकुले शुद्धोदननरेन्द्रस्य महामायादेवी
कुक्षिसंभूतः शाक्यमुनिः सर्वज्ञो देशको न स्यात् गर्भोत्पन्नत्वादिति॥ अथ कस्यचिद्वचनं प्रोक्तो न मारभङ्गः कृतः। बोधिवृक्षादिनान्तः सर्वज्ञो धर्मदेश
कोऽभूत्। पश्चान्मारनिर्वृतस्य पुनर्गर्भावक्रमणाभाव इति वचनात् परमाविरोधः स्वसमसिद्धस्य परसाधकत्वात्॥ भूतदोषोद्भलाभेन कोऽपि मारभङ्ग

क्षोभति देवासुरमनुष्याणां मध्ये ॥ आद्यभिसंबुद्धोपि न करोति सर्वावरणाभावात् ॥ युगपच्च न करोति यस्मिं क्षणे मारस्तस्मिन् क्षणे बुद्धत्वं न स्यात् ॥
मावद्यक्षिप्तात् ॥ यस्मिन् क्षणे बुद्धत्वं तस्मिन् क्षणे मारो नास्ति निरावरणत्वाच्चित्तादिति ॥ किं चान्यत् ॥ इह कर्मभूम्यां भगवतो विना ।नान्यस्मुना ॥ गर्भजातस्य
द्वात्रिंशन्महापुरुषलक्षणान्यशीत्यनुव्यञ्जनानि द्वात्रिंशद्वर्णा परिमण्डलं षडभिज्ञो भवति ॥ तस्मात् मारो नाम सत्वानां संसारचित्तवासनामलं ॥ बुद्ध
नाम संसारवासनारहितं चित्तं ॥ तथा च भगवानाह । प्रज्ञापारमितायां ॥ प्रकृतिप्रभास्वरं तद्देव संसारवासनारहितं ॥ अतो मारः समलं चित्तं ॥ बु
द्धो विगतमलं चित्तं ॥ इह बुद्धस्य वाक्ये मारभङ्गः ॥ ते सत्वानां स्वचित्तैः अभिनिर्वृत्तं यच्चित्तमचित्तमिति ॥ तत्स्वचित्तप्रतिभासइति ॥ परमार्थ
तस्तथागतहृदये पंचमे पटले विस्तरेण वक्तव्यमिति ॥ इह संसारे सत्वार्थाय बुद्धबोधिसत्वानां प्रवेशः संसारिणामवाच्यः ॥ उक्तं यमहर्षैर्यमराणां च स
त्वार्थं नरकप्रवेशकाले मम लोकेश्वरस्य स्तोत्रं ॥ ये बुद्धा भवबन्धनेऽपि भवं गच्छन्ति सत्वार्थिनः कालात्कर्मफलं तज्जनिताहितं भूत्वार्थसंदेशकाः ॥ सं
ज्ञानानलदग्धचित्तकल्मषाः सम्यक्त्वपार्श्वः सदा भ्रान्सत्वार्थं पुनः नानतर्कचचिन्ताः बुद्धान्त्वमात्मावयमिति ॥ अतः सत्वार्थं प्रति बुद्धबोधिसत्वानां गर्भप्रवेशो नर
कगमनं वा बालजनैर्वितर्कयितुं न शक्यते ॥ एकोपि बोधिसत्वो दशपारमितानिर्यातो दशभूमीश्वरो दशवशिताप्राप्तः ॥ त्रैसाहस्रमहासाहस्रे लोक
धातावनेकनिर्माणकायैर्बोधिसत्ववैनेयानां सत्वानां बोधिसत्वधर्मं देशयति ॥ न समर्थो बोधिसत्वो निकः एवं बुद्धो भगवान् पूर्वप्रणिधानवलेन पुण्यज्ञा
नसंभारपरिपूर्णः सर्ववैशारद्यैश्वर्यगुणसम्पन्नो बुद्धक्षेत्रे त्रैसाहस्रमहासाहस्रे लोकधातुष्वनन्तानन्तमायानिर्माणकायैर्निरावरणो रनन्ता

नन्तसत्त्वानामनन्तानन्तरूपैर्नानाधिष्ठकैरधिष्ठितः सन् सर्वज्ञभामया सर्वसत्त्वरुतप्रवर्त्तिन्या लौकिकलोकोत्तरं धर्मं देशयति ॥ न सर्वज्ञो नैकः ॥ यथा कश्चिन्मायापुरुषोऽनेकमायारूपाणि निर्म्मापयति । तेन तानि निर्म्मितरूपाणि । वृक्षांश्चोन्मूलयन्ति । पर्वतशिखराण्यपि चालयन्ति । सहदेवरूपाणीव विद्युमिव देवस्थानादिकं वन्धयन्ति । न स मायापुरुषोऽनेक एवं बुद्धबोधिसत्त्वानां मायानिर्माणकायैस्त्रिभवे सत्त्वार्थं कुर्वन्ति । तेन सर्वसत्त्वानां लौकिकलोकोत्तरधर्म्मदेशनाय बुद्धो भगवान् शाक्यो दशभूमीश्वरो महामायाधरो विद्यमान महामायेन्द्रजालिकः ॥ आर्यविषये लुम्बिन्यां श्रीकपिलवस्तुनि शुद्धोदननरेन्द्रस्य महामायादेवीकुक्षिसंभूतः सिद्धार्थः कुमार इति ॥ सम्भलविषयेपि कलापग्रामे सूर्यप्रभस्य विजयादेवीगर्भसंभूतो दशभूमीश्वरो वज्रपाणिः सुचन्द्र इति ॥ उभौ भगवान् बुद्धक्षेत्रे लौकिकलोकोत्तरधर्मदेशनार्थं शाक्यमुनिर्जातो दशभूमीः साक्षात्कृतेति । श्रीनान्यद्युत्तरे सुचन्द्रो वैनेयानां षण्णवतिकोटिग्रामनिवासिनां परमादिबुद्धतन्त्रराजेन सम्यक्त्वबुद्धमार्गेणाभाषत् सुचन्द्रो राजाऽभूत् ॥ बोधिसत्त्वो वज्रपाणिरिति ॥ अनयोर्बुद्धबोधिसत्त्वयोर्देशकाधिष्ठकसत्त्वश्चो निर्माणकायैः सम्भोगकायैर्वा पूर्वापराविरोधतः ॥ तेन निर्मितकायेन वज्रपाणिना सुचन्द्रराज्ञा सर्वसत्त्वानां लौकिकलोकोत्तरसिद्धिसाधनार्थं तथागतोऽध्येषितः ॥ तथागतेनापि श्रीनान्यद्युत्तरे सम्भलादिविषयेषु षण्णवतिकोटिग्रामनिवासिनामासन्नभव्यताचित्तविशुद्धिं दृष्ट्वा वज्रपदानुघ्वान्नरहितं वज्रपदप्रकाशकं द्वादशसाहस्त्रिकं परमादिबुद्धं संदेशितं ॥ अस्माद् द्वादशसाहस्त्रिकतन्त्रराजात् लघुतन्त्रं करणाय । मूलतन्त्रराजदेशनायच्च । अनागतेऽध्वनि सार्द्धत्रिकोटीनां म्लेच्छऋषीणां परिपाकं दृष्ट्वा षण्णवतिकोटिग्रामनिवासिनां च ॥ तथागतेन मञ्जुश्रीर्व्याकृतो वज्र

ज्ञाभिषेकेण सर्ववर्णानामेककल्ककरणाय यशः कल्कीति । अहमपि टीकाकारः पुण्डरीको द्वितीयः कल्की व्याकृतः । अतो मम पश्चात् यमा
न्तकादयो व्याकृता इति ॥ अत्र भगवानाह ॥ आयाब्दात् षड्शीतेर्वर्षैः सम्भलाख्ये भविष्यति ॥ ऋषीणां पालनार्थाय मञ्जुघोषो यशो नृपः ॥ तस्य ना
म्ना हादेवी पुत्रो लोकेश्वरोऽब्जधृक् ॥ स च सुतवंशे मेशा कामवंशसमुद्भवे ॥ वाग्मी वज्रकुले येन तेन वज्रकुलीयशाः ॥ चतुर्वर्णैककल्केन कल्की
वज्रकुलेन च ॥ एवं मया श्रुतानेन ऋषीणां धर्मदेशना ॥ पश्चात्तान् सर्वज्ञ इति वासो भविष्यति ॥ येन येन प्रकारेण सत्वानां परिपाचनं तेन तेन प्रका
राज्ञत्याद्धर्मस्य देशना ॥ योगीशब्दाय शब्देन धर्मं ख्याति नियतं ततः ॥ देशाशब्देन लब्धेऽध्वे शास्त्रशब्देन तन्त्रकं ॥ यथा रत्नस्य मे दिव्या नामभेदः पृथक्
पृथक् ॥ देशदेशवशात् श्रोको रत्नभेदेन च क्वचित् ॥ एवं मे बुद्धधर्मस्य नानासंगीतिकारकैः ॥ सत्वाशयवशाज्ज्ञाता नानासंज्ञा पृथक् पृथक् ॥ तेनेदं लघु
सारार्थं सर्वं तन्त्रादिमेमतं ॥ श्रीतन्त्रं ग्रन्थ्यावृन्तैस्त्रिंशच्चाधिकद्विशतेः ॥ परैतैः पञ्चभिः पूर्णावादि राष्ट्रदेशाद्भविष्यति ॥ सङ्गीतिकारकश्चायं टी
काकारः सिताब्जधृक् ॥ न त्रेस्मिन्नृषिकृता पीनां वज्रमार्गप्रकाशकः ॥ चन्द्रः सुरेश्वरस्तेजी सोमदत्तः सुरेश्वरः ॥ विश्वमूर्त्तिः सुरेशानः यशाः पुण्डरीकः
क्रमात् ॥ सूर्यप्रभो गतो राजा विष्णुशाक्यः स निर्मितः ॥ वज्रपाणिः सुचन्द्रस्य क्षितिगर्भोऽप्य मानकः ॥ सर्वनिवरणाविष्कम्भी जम्भको मानकः क्रमात्
खगर्भो मञ्जुघोषश्च लोकनाथो यथाक्रमात् ॥ यमार्यादिदशक्रोधा बोधिसत्वास्तदन्तरे ॥ कल्किगोत्रे भविष्यन्ति त्रयोदशान्ये क्रमेण ते ॥ यशः
कल्कीन्वगोत्रं च कल्की पुण्डरीकस्ततः ॥ भद्रः कल्की तृतीयश्च चतुर्थो विजयस्तथा ॥ सुमित्रो रक्तपाणिश्च विष्णुगुप्तश्च सप्तमः ॥ अर्ककीर्त्तिः सुभद्रश्च

समुद्रविजयो ऽजः॥ कल्की द्वादशमः सूर्यो विश्वरूपः शशिप्रभः॥ अनन्तश्च महीपालः श्रीपालो हरिविक्रमः॥ महाबलो ऽनिरुद्धश्च नरसिंहो महेश्व
रः॥ अनन्तविजयः कल्की यशाः कल्की जिनः पुनः॥ तस्य पुत्रो महाचक्री रौद्रकल्की भविष्यति॥ म्लेच्छधर्मान्तकृद्वाग्मी पद्मनाभसमाश्रिना॥ येन स
रुभादीनां वाग्मीशास्त्रा भविष्यति॥ सुचन्द्रमूलतन्त्रे च तेन संगीतिकारकः॥ टीकाकारस्त्वमेवात्र सत्त्वानां परिपाचकः॥ लघुतन्त्रे मञ्जुघोषः टी
काकारो ऽहं स्वयमिति॥ मूलतन्त्रे यथोक्तक्रमेण बोधिसत्त्वाः क्रोधराजाश्च व्याकृताः यशावतिग्रामकोटिनां चक्रवर्तिनो मन्त्रनये देशकालभाग
तेन व्याकृता इति॥ अतस्तथागतनियमान् द्वादशसाहस्रिकं मूलतन्त्रराजं॥ सम्भलादिविषयभाषान्तरैः पुस्तके लिखित्वा षष्टिसाहस्रिका टी
काश्च॥ सुचन्द्रराज्ञा यशोवतिकोटिग्रामनिवासिभ्यः प्रकाशितं॥ एतद्देवतदक्षमुक्तौ :सत्वैः श्रुतं वाचितं धारितं स्वचित्ते परेभ्यश्च विस्तरेण संप्रका
शितं॥ अतस्तन्त्रदेशनाकालात् द्वितीयवर्षमासपूर्णचन्द्रे स्पर्शयित्वा निर्माणकायेन यस्मादागतः॥ तत्रैव संभोगकायेन गतः॥ सत्त्वानां सिद्धिहेतुना वै
तनः सुरेश्वरेणा वर्षशतं॥ यावत्तन्त्रदेशना कृता॥ एवं तेन जिनासामदत्तेन॥ सुरेश्वरेण विश्वमूर्तिना सुरेशानेन च॥ अस्य सुरेशानस्य खगर्भस्य निर्मित
कालस्य विश्वमातादेवीगर्भे मञ्जुश्रीर्यशो राजाभूत्॥ तस्मिन्बोधिसत्त्वसिंहासने धर्मदेशको वर्षशतं यावत्॥ ततो वर्षशते पूर्णसति तथागतव्याक
णाधिष्ठानबलेन ऋषीणां परिपाचनाकालं दृष्ट्वा पश्चादभिज्ञाबलेन सन्मार्गलाभं ज्ञात्वा यशोराज्ञा नियमं दातुकामेन सर्वेषामामन्त्रणं कृतं॥ कलाप
ग्रामदक्षिणेन मलयोद्यानं द्वादशयोजनायामं कलापग्रामस्य॥ तस्य पूर्वेण मानससरो द्वादशयोजनायामं॥ पश्चिमेन पद्मपुण्डरीकसरस्तत्प्रमाणं

नयोर्द्वयोर्मध्ये मलयोद्यानं ॥ मलयोद्यानमध्ये सुचन्द्रराज्ञा कृतं कालचक्रभगवतो मण्डलचक्रं पञ्चरत्नमय परिघटित देवतास्वरूपात्मकं चतुरस्र
चतुःशतहस्तायामं बाह्ये कायमण्डलं चतुरस्रं चतुर्द्वारं चतुस्तोरणाष्टश्मशानाद्यविभूषितं पञ्चप्राकारवेष्टितं ॥ बाह्ये पृथिव्यादि चतुर्वलय वज्रावली
भूषितं । वज्रावलिपर्यन्तं अष्टशतहस्तायामं ॥ कायमण्डलार्द्धमानेन मध्ये चतुरस्रं वाङ्मण्डलं ॥ चतुर्द्वारं चतुस्तोरणभूषितं । पञ्चप्राकारवेष्टितं ॥ वा
ङ्मण्डलार्द्धमानं चित्तमण्डलं चतुरस्रं चतुर्द्वारं चतुस्तोरणभूषितं त्रिःप्राकारवेष्टितं ॥ तदर्द्धेन ज्ञानचक्रं । षोडशस्तम्भोपशोभितं । एतदर्द्धेनाष्टद
कमलं । कमलत्रिभागा कर्णिका ॥ एवं कायवाक्चित्तमण्डलानि । सर्वलक्षणपूर्णानि । हारार्द्धहारलम्बयुक्तानि । रत्नपट्टिका वेदिका । वकुलिका सो
पानानि । दर्पणार्द्धचन्द्रचन्द्रघण्टाविराजितानि ॥ अस्मिन् त्रिमण्डलात्मके मण्डलस्थे फाल्गुनपूर्णिमायां । सूर्यरथप्रमुखानां सार्द्धत्रिकोटीनां ब्रह्मऋ
षीणां यशोराज्ञा नियमो दत्तः ॥ हे सूर्यरथादयो ब्रह्मऋषयः शृणुत मम वचनं सर्वज्ञसम्भूतं ॥ इतश्चैत्रपूर्णिमामासमध्ये युष्माकं वेदस्मृतिनियम
पालकानां शासनं दातव्यं ॥ तेन ये नानादेशपत्तने कुलीना ब्राह्मणास्ते पृथक् कृत्वा भवद्भिर्मम दर्शनीयाः ॥ तेन वाक्येन नानादेशाचारेण विचार्यमा
णाः परस्परविरोधेन सर्वेऽपि ते पतिताः कापालिकभक्षणगोमांसमहिषमांसभक्षणेन मद्यपानेन मात्रादिग्रहणेन देशाव्यवहारेण ॥ एवं तेषां विरोधं
दृष्ट्वा यशोराज्ञोक्तं ॥ इदं मयास्मिन् कालचक्रभगवतो मण्डलगृहे प्रवेशः कर्तव्यो युष्मभ्यो लौकिककृतो को नराभिषेको दातव्य इति ॥ अन्यच्च ममाज्ञया
भवद्भिर्वज्रकुलेन सार्द्धं खानपानं कर्तव्यं विवाहसम्बन्धश्चेति ॥ अथ ममाज्ञां यूयं न कुरुत तदास्मदीयान् षण्णवतिकोटिग्रामान् त्यक्त्वा यत्र कुत्र

१५

विज्ञवतांप्रतिभाविनत्रभवतोगच्छन्तु ॥ अन्यथाष्टशतवर्षगतेसतियुष्मत्पुत्रपौत्रादयोम्लेच्छधर्मेप्रवृत्तिंकृत्वासम्भलादिषुसम्भवतिमहा
विषयेषुम्लेच्छधर्मदेशनांकरिष्यन्ति ॥ म्लेच्छदेवताविषविल्लामन्त्रेणकर्त्तिकयाग्रीवायांपशुंहत्वा ॥ तेनमेवाख्यदेवतामन्त्रेणहतानांपशूनांमांसं
भक्षयिष्यन्ति ॥ स्वकर्मणामृतानांमांसममभक्ष्यंकरिष्यन्ति ॥ सोपिधर्मोयुष्माकंप्रमाणं ॥ पाणाश्चयज्ञार्थाःसृष्टाइतिस्मृतिवचनात् ॥ म्लेच्छधर्मवेदधर्म
योर्विरोधोनास्तिप्राणातिपाततः ॥ तस्मात्युष्मत्कुलेपुत्रपौत्रादयः ॥ तेषांम्लेच्छानांमतापदेशात्संग्रामेमारदेवतावतारंवाऽनागतेऽध्वनि ॥ अष्टवर्ष
शतेगतेसतिम्लेच्छाभविष्यन्ति ॥ तेषुम्लेच्छेषुजातेषुसत्सुसम्भवतिकोटिग्रामनिवासिनोपिचतुर्वर्णादयःसर्वेम्लेच्छाभविष्यन्ति ॥ महाजनोयेनगतः
सपन्थाइतिअस्मऋषिवचनात् ॥ इहम्लेच्छधर्मेवेदधर्मेऽपिदेवतापित्रर्थंप्राणातिपातःकर्तव्यः ॥ क्षत्रधर्मेपिच ॥ तर्पयित्वापितॄन्देवान्खादन्मांसं
नदोषभागितिब्राह्मणवचनात् ॥ नभादोषंतत्रनपश्यामियोऽध्वेऽध्वमाचरेदिति ॥ एवंवेदधर्मप्रमाणीकृत्यम्लेच्छधर्मपरिग्रहंकरिष्यन्ति ॥ तेनका
रणेनानागतेऽध्वनिम्लेच्छधर्माप्रवेशाययुष्मभ्योमयानियमोदत्तः ॥ तस्माद्वज्रिर्ममाज्ञाकर्तव्येति ॥ एवमुक्तेनानेनयशोराज्ञोवचनेनसद्गुणतास
हितेनशिरसिविद्युत्पातितेनेवब्रह्मऋषिभिःसूर्यरथउक्तः ॥ हेसूर्यरथत्वंयशोनरेन्द्रंविज्ञापय ॥ नास्माकंवज्रजलाभिषेकधर्म्मप्रवृत्तिर्वेदोक्तजा
तिधर्मंविहायेति ॥ तस्माद्वयंतवाज्ञयावरमार्यविषयंगमिष्यामः ॥ शीताहिमवतोर्दक्षिणांलंकाद्वीपोत्तरमिति ॥ तेषांब्रह्मऋषीणांवचनेनसूर्यर
थोयशोनरेन्द्रंविज्ञापयति ॥ हेमहाराजाधिराजपरमेश्वरद्वात्रिंशन्महापुरुषलक्षणाशीत्यनुव्यञ्जनाङ्गपरिपूर्णश्रीशाक्यकुलतिलकपरमेका

रुशिफकन्दराणां कुरुध्व कुशलधर्मैः प्रवर्त्तितानां॥ अथास्माभिरवश्यं नवान्ना कर्त्तव्या॥ नरा वयं वज्रकुलाभिषेकप्रवृत्तिं न करिष्यामः॥ नवान्नतया वरं शी
तानदीदक्षिणेऽहिमवतोऽलंकाद्वीपस्य मध्ये आर्यविषयं गमिष्याम इति॥ अथ सूर्यरथवचनात् यशोराजा आह॥ शीघ्रं संभलविषयान्निर्गच्छत भवन्तो
येन दीनान्युत्तरे षण्णवतिकोटिग्रामनिवासिनः सर्वे सत्वाः प्राणातिपाताद्यकुशलकर्मपथात् परित्यज्य कालचक्रभगवतोऽधिष्ठानेन सम्यग्ज्ञा
नमार्गलाभिनो भविष्यन्तीति॥ तेन यशोराजाज्ञया सर्वे अमीत्रसङ्क्षयः कलापग्रामान्निर्गताः॥ दशमे दिने वनान्तरं प्रविष्टाः॥ तेषां वनमध्ये प्रवि
ष्टानाम् अश्वाभिज्ञाबलेन यशोराज्ञा ज्ञातं॥ यथैषां सङ्क्षयीणाम् आर्यविषयगमनेन षण्णवतिकोटिग्रामनिवासिनां सर्वसत्वानां वैषम्यचित्तं भ
विष्यति॥ इत्येन कारणेन वज्रयानोक्तः सम्यग्ज्ञानमार्गो न भवति॥ तेन कारणेन अमीत्रक्षयः श्रीयशोराज्ञो भयेन स्वस्थानं परित्यज्य स्वकुटुंब
ं गृहीत्वा आर्यविषयं गताः॥ सर्वे मोक्षाभिन इति क्षत्रियादयो जनाश्चिन्तयन्तो दुर्भगा भविष्यन्ति॥ गम्भीरोदारधर्माभाजना अभव्यचित्ता नृ॥
एवं सर्वजनानां स्वचित्ताभिप्रायं ज्ञात्वा यशोनरेन्द्रः सर्वविद्युत्प्रलद्ध्वजनमोहनं नाम समापन्नः॥ तेन समाधिना देवताधिष्ठानबलेन सर्वे तेऽक्षमय
तस्मिन्नेव वने मोहिताः सन्तः तस्मिन्वननिवासिभिः शवरादिभिः सर्वे ऋषयो बन्धयित्वा पुनरेव महामण्डलगृहमानीताः॥ यशोनरेन्द्रस्य पा
दमूलेषु प्रक्षिप्ताः सन्तः प्रबुद्धाः यशोनरेन्द्रं पश्यन्ति॥ तद्देवमण्डलगृहं मनयोऽध्याने तद्दृष्ट्वा विस्मयमापन्ना इदं वचनमाहुः॥ अहो महाश्चर्यमिदं॥ व
यं महावनात् प्रबुद्धाः सन्तः केनानीता महामण्डलगृहे॥ इत्येवमेतद्वचनं श्रुत्वा ब्रह्मऋषीणां यशोराज्ञो मन्त्रिणा॥ निर्मलकाव्येन सागरमतिनोक्तं॥ हे ऋ

र्यरथादयो ब्रह्मऋषयो मा विस्मयं कुरुत ॥ अयं यशोराजा प्रादेशिको न भवति ॥ कोऽपि महाबोधिसत्वो ऽयं युष्माकमनुग्रहार्थी बुद्धाधिष्ठानेनाभूत् । तस्मा
दस्य पादयोः शरणं गत्वा आदिबुद्धतन्त्रराजे लौकिकलोकोत्तरसिद्धिसाधनमार्गाभिषेकाध्येषणां कुरुतेति ॥ अथ तेन सागरमतिवचनेन बुद्धाधिष्ठा
नेन सूर्यरथादयो ब्रह्मऋषयः प्रबुद्धा इदं वचनमाहुः ॥ साधु साधु सागरमते येन तव वचनेनास्माकं चित्तप्रबोधो ऽभूत् ॥ तस्मादिदानीं रत्नत्रय
शरणं गत्वा कालचक्रतन्त्रराजे लौकिकलोकोत्तरसिद्धिसाधनमार्गाभिषेकाध्येषणां कुर्य्याः ॥ सकलसत्वानां सम्यक्संबुद्धत्वलाभायैव जन्म
नाति ॥ एवमुक्ता तैर्ऋषिभिर्ब्रह्मकुले सूर्यरथो राजामन्त्रितः ॥ हे सूर्यरथ त्वं वेदादिशास्त्रे कुशलः सर्वलौकिकलोकोत्तरशास्त्रप्रमेयज्ञ आ
कुलस्यः ॥ तेनास्माकमध्येषणावचनेन यशोराज्ञो ऽध्येषणां कुरु ॥ वयमपि भवन्तं पूर्वंगमं शरणं गत्वा सर्वे ऽध्येषणां करिष्यामः ॥ अथ तेन ब्र
ह्मऋषिवचनेन सूर्यरथो रत्नसुवर्णमयैः पुष्पैर्मण्डलं कृत्वा यशोनरेन्द्रस्य पादमूले रत्नपुष्पाञ्जलिं प्रक्षिप्य जानुयुग्मेन भूगतेन हस्तयु
ग्मेन शिरसिगतेन ब्रह्मऋषिभिः सार्द्धं यशः पादौ प्रणाम्य दक्षिणं जानुमण्डलं पृथिव्यां संस्थाप्य ललाटे करपुटं दत्वा यशोनरेन्द्रमध्येषयति ।
देशय त्वं भगवान् तन्त्रराजमादिबुद्धं ॥ यस्मिन् बुद्धत्वाय पश्चात्तन न यत्नकारिणोपि क्रिया कृता इहैकजन्मनि वज्रधर भगवता परमाक्षरसुखेन संगृहीत
महामुद्रालाभिनो व्याकृताः ॥ इयं यत् द्वादशसाहस्रिकां आदिबुद्धं सुचन्द्रराज्ञस्तथागतेन देशितं ॥ तदेवालम्ब्य येनादिबुद्धमहातन्त्रराजं संगीति
कृत्वोपदेशय त्वं ब्रह्मऋषीणां शास्यति ॥ अथ सूर्यरथाध्येषणां श्रुत्वा ब्रह्मऋषीणामधिमुक्तिं चित्तवशात्तथागताधिष्ठानबलेन लघुसंगीतिकार

क्वचिन्नस्वरघोषावृत्तैः सर्वं तद्देशकादिसंग्राहकं तन्त्रराजं देशयन्ति ॥ तेषां च शुद्धशब्दवादिनां सुशब्दत्वं विनाशाय अर्थशरणानामाश्रित्य । क्वचिद्व
ते ऽपशब्दः ॥ क्वचिद्वृत्तेयतिभङ्गः ॥ क्वचिदविभक्तिकं पदं ॥ क्वचिद्विसर्गात्स्वरलोपः ॥ क्वचिद्वृत्ते दीर्घो ह्रस्वः ॥ ह्रस्वोऽपि दीर्घः ॥ क्वचित्पञ्चम्यर्थे सप्तमी ॥ च
तुर्थ्यर्थे षष्ठी ॥ कुत्रचित्परस्मैपदादिनि धातावात्मनेपदं ॥ आत्मनेपदादिनि परस्मैपदं ॥ क्वचिदेकवचने बहुवचनं ॥ बहुवचने एकवचनं ॥ पुं
ल्लिङ्गे नपुंसकं ॥ नपुंसके पुंल्लिङ्गं ॥ क्वचित्तालव्यशकारे दन्त्यमूर्द्धन्यौ ॥ क्वचिन्मूर्द्धन्ये दन्त्यतालव्यौ ॥ क्वचिद्दन्त्ये तालव्यमूर्द्धन्यौ ॥ एवमन्येष्व
सर्वभाषासु तन्त्रदेशकोपदेशकेनेति ॥ तथा मूलतन्त्रे भगवानाह ॥ सुचन्द्र सर्वबुद्धानां देयं नित्यं स्वबालकं ॥ शिष्ये भिक्षुरुद्राणां स्वभार्या दुहितृ
पुत्रकं ॥ गन्धो भवति मेदिन्यां तोये रूपं रसोऽनले ॥ वायौ स्पर्शोऽक्षोऽशब्द धर्मधातुर्मलानभे ॥ गन्धभूषादिदीपेभिः खानपानादिवाससैः ॥ पूजयि
त्वा मरुद्गुग्रं यंत्रोर्द्ददति सत्कृतः ॥ इत्येवमाद्योऽन्येऽपि ऽपशब्दा योगिनावगन्तव्या आगमपाठादिति ॥ एवं टीकायामपि सुशब्दाभिमानिना
शानि लिखितव्यं मयार्थशरणानामाश्रित्येति ॥ अथ येनान्येन प्रकारेण कलिविद्यासु शब्दाभिमानक्षयो भवति ॥ तेनानेन प्रकारेणार्थशरणा
नामाश्रित्य बुद्धानां बोधिसत्वानां धर्मदेशना देशभाषान्तरेण शब्दशास्त्रभाषान्तरेण मोक्षार्थं ॥ ॥ इति मूलतन्त्रानुसारिण्यां लघुका
लचक्रतन्त्रराजटीकायां द्वादशसाहस्रिकायां विमलप्रभायां देशकाद्येषकमूलतन्त्रलघुतन्त्रसम्बन्धोद्देशस्तृतीयः ॥ २ ॥ इदानीं म
ञ्जुश्रीनिर्मितयशो नरेन्द्रसूर्यरथदेशकाद्येषकादिसम्बन्धादिना लघुतन्त्रराजं वितनोमीति ॥ इह महाश्रीमति कालचक्रमण्डलगृहे पूर्वद्वा

राव साने॥ महा मणि रत्न मण्डपे महारत्नसिंहासनस्थो देवासुरनागनिर्मितकायैः षसावतिमहाराजेन प्रसूतैर्महारत्नमुकुटवद्धैः कोटिकोटियामाधिपतिभिर्नमस्कृतचरणारविन्दः सर्वतथागतप्रत्तार्चितैः सूर्यरथाध्येषितो यशोनरेन्द्रः सूर्यरथमिदमवोचत्॥ साधुसाधु सूर्यरथ येन त्वं त्रसत्त्वाधिकजनादीनां सर्व सत्वानां सम्यक्त्वबुद्धत्वमार्गलाभाय परमादिबुद्धतन्त्रराजसद्भावश्रोतुं मनः समुद्यतः॥ तेन साधु तेऽहं यत्परमादिबुद्धतन्त्रराजसद्भावं लौकिकलोकोत्तरसिद्धिसाधकं कालचक्रवज्रयोगं त्वयापृष्टं तत्सर्वमहं देशयामि संगीतिकारकत्वेन त्वमप्येकाग्रमनाः शृणु प्राग्व्याकृतेन भागनाधिष्ठानवलेन लघुतन्त्रराजसद्भावं प्रज्ञोपायात्मकं योगं स्रग्धरावृत्तसंगीत्या महातन्त्रराजाउद्धार्यमाणं॥ सम्यक्त्वं बुद्धसुचन्द्रदेशकाध्येषकसम्बन्धेन महायशो राजेति॥ अथ मञ्जुश्रीर्भगवान्निर्मितकायो यशोनरेन्द्रो देशकादिसंग्रहवृत्तं प्रथमं परमादिबुद्धात्तथागतेन व्याकृतमाह॥ ॥ ॥ ॥ ॥ ॥ ॥

सर्वज्ञं ज्ञानकायं दिनकरवपुषं पद्मपत्रायताक्षं बुद्धं सिंहासनस्थं सुरवरनमितं मस्तकेन प्रणम्य ॥ पृ
च्छेद्राजा सुचन्द्रः करकमलपुटं स्थापयित्वोत्तमाङ्गे योगं श्रीकालचक्रे कलियुगसमये मुक्तिहेतोर्नराणां ॥ १ ॥
इह तन्त्रराजे देशकादीनां संग्रहार्थमिदमादिवृत्तं भगवता सङ्गीतमिति ॥ अत्र देशकादयः ॥ देशकः । स्थानं । महापर्वत् । अध्येषकः धर्मदेश
ना । प्रयोजन प्रयोजन प्रयोजनमिति ॥ एषु देशकसंग्रहस्तावत् ॥ सर्वज्ञं ज्ञानकायं दिनकरवपुषं पद्मपत्रायताक्षं बुद्धमित्येभिस्त्रयोविंशत्य
क्षरैर्देशकसंग्रहः कृतो भगवता ॥ सिंहासनस्थमित्येभिः पञ्चाक्षरैः स्थानसंग्रहः कृतः ॥ सुरवरनमितमित्येभिः सप्ताक्षरैर्महापर्वतसंग्रहः कृ
तः ॥ मस्तकेन प्रणम्य पृच्छेद्राजा सुचन्द्रः करकमलपुटं स्थापयित्वोत्तमाङ्गे इत्येभिरष्टाविंशत्यक्षरैरध्येषकसंग्रहः कृतः ॥ योगं श्रीकालचक्रे
कलियुगसमये इत्येभिश्चतुर्दशाक्षरैर्धर्मदेशनासंग्रहः कृतः ॥ मुक्तिहेतोर्नराणामित्येभिः सप्ताक्षरैः प्रयोजन प्रयोजन प्रयोजनसंग्रहः कृ
तः ॥ इत्येभिर्यथानुक्रमेण चतुरशीत्यक्षरैः देशकस्थानमहापर्वत् । अध्येषकधर्मदेशना । प्रयोजन प्रयोजन प्रयोजनसंग्रहः कृतः ॥ मूलतं
त्रराजानुकूल्य मञ्जुश्रीभगवतानागतव्या कृतेनेति ॥ ननु सर्वतन्त्रराजेषु एवं मया श्रुतमित्यादिना वज्रधरभगवतो किजलहारस्थाननिर्देश
स्थागतेनोक्तः ॥ कथमिदं तन्त्रराजं सर्वज्ञ इत्यादिना एवंमयादिरहितं बुद्धभगवतास देशितं भवति । एवंमयादि किजहारस्थाननिर्देशाभा
वादिदं तन्त्रराजं बुद्धभगवता देशितं न भवतीह कस्यचित् संत्रास्य ज्ञानशरणाश्रितस्य वचनं भविष्यति ॥ तस्मादुच्यते । इह यद्वत्वमनागते

ध्वनिवालजनैर्व्यञ्जनसंज्ञाशरणाश्रितैः सर्वतन्त्रराजेषु एवंमयाश्रुतमित्यादिनावज्रधर भगवतोविजहारस्थाननिर्देशस्तथागतेनोक्तः॥ तन्न
कस्माद्धर्मदेशकस्यार्थशरणतामाश्रितत्वात्। सङ्गीतिकारशरणामपिनानादेशभाषान्तरेणासंगीतिकरणादिति॥ इहय एवंमयाश्रुतमि
त्यादिनासंस्कृतवचनेनकण्ठताल्वादिप्रयत्नतोजनितेन प्रादेशिकेन तथागतस्यधर्मदेशना॥ तदा चतुरशीतिसहस्रधर्मस्कन्धाननेकका
लेऽर्पितभागतोदेशयितुं नशक्नोति। संगीतिकारकश्च लिखितुं प्रादेशिकैकसंस्कृतवचनादिति॥ इहानन्तनिर्माणकायाभावादनन्तानन्तलो
कधातुषु अनन्तानन्तसत्वहृन्नैर्युगपच्च धर्मदेशकोनस्यात्॥ चतुरशीतिसहस्रधर्मस्कन्धदेशनाभावात्॥ सर्वज्ञोनभवति॥ नचैवं। इहाप्र
माणोबुद्धः प्रमाणोधर्मः। अप्रमाणाःसंघः। अतस्तथागतवचनात्। नैकःसर्वज्ञोदेशकः। नैकासर्वज्ञभाषाया सर्वसत्वहृतेऽर्थप्रतिपादिका
नैकोविजहारस्थाननिर्देशः। नैकःश्रावकसंघोऽध्येषकः॥ तथागतस्येति। इहसत्वानांनानाधिमुक्तिवशादनेकःसर्वज्ञः। अनेकासर्वज्ञभा
षाऽनेकंविजहारस्थानं। अनेका अध्येषकाः। अनेकाधर्मदेशनेति॥ अतःसर्वतन्त्रदेशना नैवंमयाश्रुतमित्यादिना एकदेवभाषयाकण्ठता
ल्वादिप्रयत्नतोजनितयातथागतस्येति। इह प्रथमंतावच्छ्रावकनयेमगधभाषयाधर्मदेशनापिटकत्रयादौ॥ तद्यथाइत्यपिसोभगवान्स
मासंबुद्धो विद्याचरणसंपन्नः सुगतोलोकविद् अनुत्तरो इत्यादिनाधर्मदेशना॥ तथाशीतानद्युत्तरे चम्पकविषये कोटिग्रामभाषयाधर्मदेश
ना॥ तद्यथा। अकर्ष। मच्छक। गगल्कु। जिरामक। विजिरिक्का। उउरूपक इत्यादिना॥ तथारूक्षस्योत्तरे सुरम्भविषये कोटिग्रामभाषयाध

र्मदेशना ॥ तद्यथा । अक्षमपलत् । वलदत्त किरट । मनिक । अङ्कुर । वरदत्त । जिणिन वरदत्त इत्यादिना धर्मदेशना ॥ एवमनेकदेशविषया यानत्रयदेशना तथागतस्यैव कथा एवं मया श्रुतमित्यादिना संस्कृतभाषयेति ॥ अथ संस्कृतभाषयापि सङ्गीतिकारकैर्लिखितेषु तन्त्रराजेषु । कुत्रचित् एवं मया श्रुतमित्यादिना विजहारस्थाननिर्देशः ॥ कुत्रचिन्न । प्रथमं तावत् एवं मया श्रुतमित्यादिना विजहारस्थाननिर्देशः ॥ पञ्चविंशतिसाहस्रिके श्रीसमाजे षोडशसाहस्रिके मायाजाले इत्याद्यनेकतन्त्रराजेषु । कुत्रचिन्नापि ॥ प्रथमं तावत् द्वादशसाहस्रिके परमादिबुद्धे । षट्त्रिंशत्साहस्रिके योगान्तविद्धे महालक्ष्माभिधाने ॥ एवमनेकतन्त्रराजेष्वपि ॥ तथा मूलतन्त्रराजेषु तथा उद्धृतेष्वपि लघुतन्त्रेषु कुत्रचिदेवं मयादिना देशना । कुत्रचिन्नस्यादिति ॥ इह श्रीसमाजे भगवानाह ॥ एवं मया श्रुतमेकस्मिन् समये भगवान्सर्वतथागतकायवाक्चित्तवज्रयोषिद्भगेषु विजहारेति ॥ विजहारस्थाननिर्देशः ॥ एवं मायाजालेऽपि । एवं मया श्रुतमित्यादिना विजहारस्थाननिर्देशः । एवमन्येष्वपि मूलतन्त्रलघुतन्त्रराजेषु विजहारस्थाननिर्देश इति ॥ इह परमादिबुद्धे भगवानाह ॥ सर्वज्ञोद्यानकायो योमान्तरएव वज्रमय पद्मपत्रायताक्षः श्रीबुद्धः सिंहासने स्थितः ॥ कायवाक्चित्तरागात्मसत्त्वसन्तोऽधिदेवता ॥ कायवाक्चित्तरागेशो कायवाक्चित्तमण्डले ॥ अभेद्यो वज्रयोगोऽसौ कालचक्रोऽक्षरः सुखः ॥ अनादिनिधनो बुद्ध आदिबुद्धो निरन्वयः ॥ सर्वतो वज्रसौभाग्यः सर्वतो विश्वसम्वरः ॥ द्वादशाकारसत्यार्थः षोडशाकारतत्त्वदृक् ॥ इत्यादि विजहारस्थाननिर्देशः ॥ परमादिबुद्धे तथा षट्त्रिंशत्साहस्रिके योगान्तविद्धे ॥ भगवानाह ॥ डाकिनीवज्रपञ्चकं एकेसावधिदेवता ॥ सहजानन्दरूपेण संस्थितस्त्रिभवात्मनि ॥ इत्य

दिनाक्विजहारस्थाननिर्द्देशो योगाजविद्धे ॥ तथा लक्षाभिधाने भगवानाह ॥ रहस्ये सर्वदूतीनां सर्वसत्वात्मनि स्थितः ॥ सर्वदूतीमयः सत्वो वज्रसत्वो महासुख इत्यादिना क्विजहारस्थाननिर्द्देशः सच गुरूपदेशास्वगन्तव्य इति ॥ तथाध्येषकः श्रीसमाजे ॥ अथ स वज्रपाणिर्वज्रधरो भगवताऽधिष्ठितः ॥ सच्चैवमाह ॥ देशयतु भगवान्महातन्त्रराजं सर्वतन्त्रनिरुत्तरं ॥ सर्वबुद्धानां श्रीसमाजं सर्वबुद्धाभिधानकमिति ॥ एवमादिना वज्रपाणेरध्येषणा ॥ एवं मायाजालेऽपि वज्रपाणिरध्येषकः ॥ प्रसिद्धो नामसंगीत्यामिति ॥ इह परमादिबुद्धे अध्येषकः ॥ सत्वानां क्लेशनाशाय भगवता चोदितः सन् कायवाक्चित्तयोगेन शास्तुः पादाम्बुजद्वयं रत्नपुष्पैः समभ्यर्च्य सबुद्ध्यात्मजविनायनः ॥ शिरसा जानुयुग्मेन भूगतेन त्राणम्यत्व ॥ ततो भूम्यां समस्थाप्य दक्षिणं जानुमण्डलं ॥ ललाटे करद्वयं दत्वाध्येषणां कृतेन च ॥ देशास्त्वादिलक्षाभा सर्वतन्त्रनिरुत्तरं ॥ आदिबुद्धं सदा सर्वसिद्धिसंदोहलक्षणं ॥ योगं श्रीकालचक्रेऽस्मिन्नालिकेलि समन्विते ॥ एकाक्षराणि मंत्रञ्च चतुःक्षणविभेदितं ॥ चतुर्भेदं परं तत्वभिन्नं षोडशभेदतः ॥ शून्यं ज्ञानञ्च बिन्दुञ्च वरं वज्राक्षरं महत् ॥ पञ्चाक्षरं महाशून्यं बिन्दुशून्यं षडक्षरं ॥ बुद्धदेवासुरानेव बाह्ये देहे च रिशश्च ॥ उपदेशप्रश्नानिश्चैवं पञ्चविंशतिमपरं ॥ देहे विश्वस्य मानं यत्त्रैलोक्यात्मनिकारणं ॥ अर्किदेवासुरादीनां सर्वमेतन्नृयथास्फुटं ॥ इत्येवमाद्यध्येषणा ॥ सुचन्द्रगतः परमादिबुद्धे ॥ तथा योगाजविद्धे विश्वरूपिणी आह ॥ श्री विश्वरूपिणी नत्वा प्रचण्डे वज्रभैरवं ॥ तत्र योगाजविद्धे वज्रसत्वः परमसुखमित्याद्यध्येषणा ॥ योगाजविद्धे ॥ तथा लक्षाभिधाने वज्रवाराही आह ॥ प्रणम्य वज्रवाराही हेरुकं त्रिभवात्मकं ॥ तत्रं लक्षाभिधानं वि

वज्रसत्वः परदुःखमित्याद्यध्येषणा लक्षणाभिधाने ॥ एवमन्येष्वपि तन्त्रराजेषु योगिनाध्येषणा ज्ञातव्येति ॥ अतो भगवतोऽनन्तधर्मदेशकत्वात् ॥ वै
दैर्नवक्त्रस्य एवं मयाश्रुतमित्यादिना सर्वतन्त्रराजेषु द्विजहारस्थाननिर्देश इति ॥ अनेन प्रादेशिकसंस्कृतवचनेन नु बुद्धोपि प्रादेशिको भवति ॥ सर्व
सत्वरुतस्वभावित्वात्सर्वज्ञभाषयाविना ॥ इहार्थविषये शब्दवादिनां नाभिकानां परिगृहीतानामभिमानं दृष्ट्वा बालमतीनां बोधनानामभिप्रायः ॥ यथा
ह्यत्र हरिहरादयः संस्कृतवक्तारो वा सत्वाणवैष्णवशैवादीनां इष्टदेवता तथास्मदीया इष्टदेवता उद्बोधिसत्वाः संस्कृतवक्तारो भवन्तीति ॥ इह
तन्त्रे अनेन प्रादेशिकासंस्कृतवचनेन सर्वसत्वरुतैर्धर्मदेशकाः सङ्गीतिकारका भवन्ति ॥ उद्बोधिसत्वाः सर्वज्ञभाषयाविना ॥ अतोद्वज्रा
ति प्रतिबद्धा प्रादेशिकाश्च बोधिसत्वानां नस्यादिति ॥ नानासत्वरुतधर्मदेशकत्वात् ॥ इह मन्त्रनये एवं संज्ञानभावः ॥ एकस्यापि भावस्याने
काः संज्ञाः संज्ञावकृत्वात् ॥ न चैका संज्ञा प्रधाना स्यात् ॥ सर्वसंज्ञानात्मकाभावप्रतिपादकत्वात् ॥ यथा स्त्री नारी युवतीत्यादीनां नैका स्त्रीसंज्ञा प्र
धाना स्यात् सर्वासामनेकेशावती भावप्रतिपादकत्वात् ॥ तथा एकार । रहस्य । पद्म । धर्मोदय । खधातु । महासुखावास । सिंहासन । भगरुसु संज्ञा
नां मध्ये नैका एकारसंज्ञा प्रधाना सर्वासां सर्वाकारशून्यता प्रतिपादकत्वात् ॥ तथा वंकार । महासुरत । महाराग । सहज । परमाक्षर । बिन्दुः त
त्वं ज्ञान । विशुद्धचित्तसंज्ञानां मध्ये न एका वंकारसंज्ञा प्रधाना ॥ सर्वासामहासुखज्ञा सहजानन्दापरसुख प्रतिपादकत्वादिति ॥ एवमिकारवंका
रयोः सर्वाकारवरोपेता शून्यता सर्वधर्मनिरालम्बकरुणा ऽभिन्नबोधिचित्तभाव प्रतिपादकत्वात् ॥ एवंकारो वज्रसत्वो बोधिचित्तं कालचक्र

आदिबुद्धः प्रज्ञोपायात्मको योगः ॥ त्रैयज्ञानात्मकः । अद्वयः । अनादिनिधनः । शान्तः । समाजः । सम्बरः । एवमाद्यनेकसंज्ञाभिः प्रज्ञोपायात्मकोऽद्व
द्वयो योगो निरन्वयो योगिनाऽवगन्तव्य इति ॥ इह मत्समाजादौ तन्त्रराजे ॥ एकारो वंकारस्तन्त्राद्ये भगवता निरुक्तिरूपेण निर्दिष्टः ॥ न देवानां देवरुते न
याचनाय । संगीतिकारकेणापि न ग्रन्थादौ लिखितं ॥ अतोऽस्याक्षरद्वयस्य समाजाद्ये तन्त्रराजेऽभिन्नेष्यते । न चेदक्षरद्वयं भगवता तत्त्वादिना देशि
तं न चाश्रुत्वा सङ्गीतिकारेण लिखितमिति । अतोऽस्याक्षरद्वयस्य समाजाद्ये तन्त्रराजेऽपि नेष्यते ॥ नीतार्थ उच्यते ॥ पूर्वोऽकारः खधातुरुत्पलकमलं
ततो विसर्गः सूर्यो रजः ॥ ततोऽकारो राऊविज्ञानं सुखाधिष्ठितं ॥ ततोऽनुस्वार चन्द्रः शुक्रं ॥ अनयोरकारयोः खधात्वराऊविज्ञानयोर्मध्ये विसर्गी
सूर्यः रजः उत्वमापद्यमापद्यते ॥ ततो विसर्गे सूर्यरजसि उत्वमापन्ने सति परमार्थसत्येऽकारा भावः ॥ अकाराभावा ध्वशादेवाः स्यादिति ॥ पराका
रेण राऊविज्ञानेन सह बन्धं । अनुस्वारः चन्द्रशुक्रेण संयोगः अतो वंकारः ॥ तथा पूर्वोऽकारः खधातुरुत्पलकमलं सम्प्रम्पनो अकारः परः इकारेण स
हृयगीभवति । अतः एकारः ॥ अस्मिन्नेकारे खधातौ आधारे । वंकार आधेयविसर्गोकारानुस्वारः सूर्यस्तु चन्द्रः । रज आलयविज्ञानं शुक्रं मे
कोमध्ये ॥ वात्येदे हे परे चावगन्तव्य इति ॥ इह मूलतन्त्रे भगवानाह ॥ एकारमध्ये वकारः सर्वबुद्धसुखालयः ॥ खधातौ वज्रसत्त्वोऽयं कायवाक्चित्त
योगतः ॥ कायो बिन्दुस्तु शुक्रं च वाग्विसर्गो रजो रविः ॥ चित्ताकारस्तमी प्रोक्तः खधातौ व्यवस्थितः ॥ कायवाक्चित्तयोगेन कायवाक्चित्तमण्डले ॥
कायवाक्चित्तरागेण संस्थितास्त्रिभवात्मनि ॥ इत्यनेन हेतुना देवानां परियाचनाय सम्पवक्तं तु तत्त्वताभामत्र समाजादिके तन्त्रराजे एवं मया

कोत्तरधर्मदेशनाकर्तृमहात्मा: ॥ तेन विट्शूद्रादीनां प्रतिषेधं कुर्वन्ति ॥ इह मते विट्शूद्रादिभिर्निकृष्टयोनिजातैर्वेदाध्ययनं न कर्तव्यं ॥ प्रश्रुत्यादस्तुग्रह
णश्चेति ॥ एकः शब्दः सुप्रयुक्तः स्वर्गेकामधुगिति मिथ्याहंकाराभिभूतानामभिप्रायः सर्वज्ञभावाऽभावात् ॥ इह मते लोके यदि सर्वे मनुष्या वेदगीतासि
द्धान्ततर्कशास्त्रविदो भवन्ति अध्याप्याः ॥ तदा ब्राह्मणानां को गौरवं करिष्यति ॥ विद्याधर्मज्ञानसाधारणापरिज्ञानात् ॥ सर्वेषां गृहवासिनां संसारभोगास
क्तानां ब्राह्मणानां विशेषस्यणाभावात् ॥ इति ज्ञात्वा उत्कृष्टऋषिभिर्दम्भलुब्धैः संस्कृतभाषया गीतासिद्धान्तपुराणादयो धर्माः पुस्तके लिखिताः ॥ वेदा
श्चपुस्तकपाठे नाध्ययनीया इति ॥ नियमः कृतो बालजनानां महामोहजनक इति ॥ असर्वज्ञादेशनाभिप्रायः ॥ इह पूर्वकाले वेदगीतासिद्धान्तपुराणधर्मा
पुस्तके लिखिताः सन्ति ॥ यतीनां मुखे तिष्ठन्ति ॥ ततः पश्चद्दुःषमायकालवशात्पुस्तके लिखिताः अज्ञाहीनत्वा यतिभिरिति ॥ इह प्रादेशिकी हरिहरादीनां धर्मदे
शना बौद्धैर्नानुमोदनीया सर्वसत्वकृपयारहिता ॥ संसारदुःखदायिकी मिथ्याहंकारकारिणी जातिवादाभिमानिनीति ॥ इह त्रैधातुकेपि सर्वज्ञेन सर्वज्ञभा
षादेशिता धर्मा नानासत्वभाषान्तरेण संगीतिकारकैः पुस्तके लिखिता वेदादिलौकिकार्थप्रतिपादकाः यानत्रयार्थप्रतिपादका लोकसंवृतिसत्येन
परमार्थसत्येन देशिताः सर्वसत्वानां श्रवणाध्ययना यत्र न श्रद्धभक्तिकाः सत्वास्तान् सर्वज्ञदेशितान् चतुरशीतिसहस्रधर्मस्कन्धान् लौकिकलो
कोत्तरार्थप्रतिपादकान् शृण्वन्ति पठन्ति वाचयन्ति धारयन्ति परेभ्यश्च विस्तरेण संप्रकाशयन्ति प्रतिष्ठापयन्ति पूजयन्ति नानापुष्पैर्नानागन्धै
र्नानाधूपैर्नानाचूर्णैर्नानावस्त्रैर्नानाध्वजाभिर्नाना। पताकाभिर्नानाचामरैर्नानाछत्रैर्नानावितानैर्नानापुष्करणैर्नानारत्नैर्नानाप्रदीपैर्नानारत्नाभ

रोः पूजयित्वा तेभ्यः पश्चाद् प्रणामं कुर्वन्ति ॥ एवं ते सर्वज्ञदेशिता धर्माः परोपकारिणो ऽभिरुचिवशात् ॥ परोपकारार्थं न कस्यचिज्ज्ञानान्यजातिव
शान्ते विदिताः प्रतिषेधिताश्च आगते तेन स्वयापि नानन्दानंगताः ॥ तिष्ठन्तनावदन्यविषयान्तरं ॥ २ तथागताभिसम्बुद्धे आर्यविषये भगवति परिनिर्वृ
तिमति संगीतिकारकैर्यानत्रयं पुस्तके लिखितं तथागतनियमेन पिटकत्रयं मगधभाषया सिन्धुभाषया सूत्रान्तं संस्कृतभाषया पारमितानयं ॥ मं
त्रनयं तन्त्रतन्त्रान्तरं संस्कृतभाषया प्राकृतभाषया अपभ्रंशभाषया ऽ संस्कृतशावरादिम्लेच्छभाषया ऽन्येवमादिः सर्वज्ञदेशितो धर्मः संगी
तिकारकैर्लिखितः ॥ तथा भोटविषये यानत्रयं भोटभाषया लिखितं । चीने चीनभाषया । महाचीने महाचीनभाषया । पारसिकदेशे पारसिकभा
षया ॥ मीनानगुत्तरे चम्पकविषयभाषया ॥ वानरविषयभाषया ॥ सुवर्णाख्यविषयभाषया । तथा नीलानगुत्तरे ह्लाविषयभाषया । सु
रम्याविषयभाषया ॥ एवं कोटिकोटि यामान्तके ऽपि सम्भवति विषयेषु सम्भवति विषयभाषया लिखितं ॥ एवं द्वादशखण्डेषु स्वर्गमर्त्यपाता
लेषु नानासत्वरूपैः संगीतिकारकैर्यानत्रयं लिखितमिति । श्रावकैः श्रावकयानं । प्रत्येकैः प्रत्येकयानं । बोधिसत्वैः पारमितामहायानं ॥
मन्त्रमहायानं । हेतुफलात्मकं नानासंगीतिकारकैः सत्वानां वैनेयार्थमिति । अनया नानासंगीतिकारकैर्नानाविषयभाषया लिखितागमन
युक्त्या विचार्यमाणो बुद्धो भगवान् सर्वज्ञः सर्वज्ञभाषया धर्मदेशकः ॥ नान्यो हरिहरादीनामिति ॥ अथ हरिहरादीनामध्ये रभिज्ञैः परिपूर्ण
कश्चिदस्ति सो ऽप्यस्माकं वन्दनीयः पूजनीयो माननीयश्चेति सर्वथा । भक्तिर्ज्ञेषु साधुना न बुद्धेनेश्वरादिषु ॥ अतो ऽद्यापि या भक्तिः सा जडा ऽशुभ

ज्ञानसहजानन्दः ॥ एवं षोडशाकारतत्त्वं यदा योगी वेत्ति तदा षोडशाकारतत्त्वविदित्युक्तो भगवता ॥ तदेव तत्त्वं सहजकाय इत्युच्यते ॥ ततो धर्मकायस्ततः सम्भोगकायः ततो निर्माणकायः ॥ एवं सहजवाक् । सहजचित्तं । सहजज्ञानं ॥ धर्मवाक् । धर्मचित्तं । धर्मज्ञानं ॥ सम्भोगवाक् । सम्भोगचित्तं । सम्भोगज्ञानं ॥ निर्माणवाक् । निर्माणचित्तं । निर्माणज्ञानमिति ॥ चित्ताधिसङ्केवशात्सत्त्वाना प्रतिभासते ॥ षोडशाकारतत्त्वमिति स एव सहजकायः ॥ शून्यताविमोक्षविशुद्धो ज्ञानवज्रः सर्वज्ञः ॥ प्रज्ञोपायात्मको विशुद्धयोग इति ॥ स एव धर्मकायो ऽनिमित्तविमोक्षविशुद्धचित्तवज्रज्ञानकायः प्रज्ञोपायात्मको धर्मयोग इत्युक्तः ॥ स एव सम्भोगकायो ऽप्रणिहितविमोक्षविशुद्धो वाग्वज्रो दिनकरवद् प्रज्ञोपायात्मको मन्त्रयोग इत्युक्तः ॥ स एव निर्माणकायो ऽनभिसंस्कारविमोक्षविशुद्धः कायवज्रः पद्मपत्रायताक्षः प्रज्ञोपायात्मकः संस्थानयोग इत्युक्तः ॥ एवमेनं वज्रयोगं चतुर्विधं बुद्ध्वं यच्छेद्वज्रपाणिरिति ॥ शून्यताविमोक्षविशुद्धो ज्ञानवज्रः प्रज्ञोपायात्मकः ॥ सहजकायः सर्वज्ञताप्राप्त सर्वज्ञः सर्वदर्शित्वात् ॥ अनिमित्तविमोक्षविशुद्धः ॥ चित्तवज्रः प्रज्ञोपायात्मको धर्मकायो मार्गाकारज्ञताप्राप्तो ज्ञानकायः ॥ परमाक्षरसुखेनावस्थितत्वात् ॥ अप्रणिहितविमोक्षविशुद्धो वाग्वज्रः प्रज्ञोपायात्मकः सम्भोगकायो मार्गज्ञताप्राप्तो दिनकरवदनन्तानन्तसत्त्वसुखैर्युगपल्लौकिकलोकोत्तरधर्मदेशकत्वादिति ॥ अनभिसंस्कारविमोक्षविशुद्धः कायवज्रः प्रज्ञोपायात्मको निर्माणकायः सर्वाकारज्ञताप्राप्तः पद्मपत्रायताक्षः ॥ अनन्तानन्तनिर्माणकायैर्युगपत्सर्वाकारकायव्यूहर्द्धिस्फुरणादिति ॥ एवमेकक्षणाभिसंबुद्धो ज्ञानवज्रः सर्वार्थदर्शी ॥ पञ्चाकाराभिसंबुद्धश्चि

त्तवज्रः परमाक्षरसुखः ॥ विंशत्याकारसंबुद्धो वाग्वज्रो घोषशब्दाकारः सत्वार्थः सर्वसत्वरुतैर्द्धर्मदेशकः ॥ मायाजालाभिसंबुद्धः कायवज्रः षोडशाकार
नन्तविदनन्तमायाजालैः स्फुरितकाय इति ॥ इह चतुर्विधं चित्तवज्रं विशुद्धं चतुःकायलक्षणं भवति ॥ उभयरागमनावनिष्टोभयेन्द्रियात्मकतुर्यचित्ता
भावचित्तं स्वाभाविककायः सर्वज्ञ इति ॥ तमोभिभूतसुषुप्तचित्ताभावचित्तं धर्मकायो ज्ञानकाय इति ॥ प्राणोत्पादितसदसद्रूपस्वप्नचित्ताभावचित्तं सं
भोगकायो दिनकरवदिति ॥ अनेकविकल्पभावसंस्कारजाग्रच्चित्ताभावचित्तं निर्माणकायः पद्मपत्रायताक्ष इति ॥ एष वज्रयोगो ज्ञानपटले विस्तरेण
वक्तव्यः ॥ अस्मिन् लोकधातुपटले उद्देशमात्रेणोद्दिष्ट इति ॥ एवं ज्ञानचित्तवाक्कायात्मकं योगं पृच्छेत् श्रीकालचक्रे तन्त्रराजे किंभूते कलियुगसमये
कलियुगसमय इति ॥ को ऽलिः कलिः । ककारादिव्यंजनपंक्तिरिति ककारो मुखं सर्वव्यंजनानामादौ निर्दिष्टत्वात् ॥ रजःस्वभावाद्वा वेदितव्य इति ॥ तथा
अस्य समयो ऽसमयः स्वरमेलापक उच्यते ॥ अत्र को ऽलिः । कखगघङ् चछजझञ् टठडढण् तथदधन् पफबभम् यरलव शषसह क्ष इति कालिर्व्यंजन
पंक्तिः ॥ अत्रासमयः ॥ अआइईऋॠउऊऌॡ अंअः ॥ अआएऐअर्आर्ओऔअल्आल् अंअः ॥ हहाययाररावववाललाहंहः इति असमय
स्वरमेलापकः ॥ अस्मिन्नसमये कलिं युनक्तीति कलियुगसमयः ॥ तस्मिन्कलियुगसमये कालचक्राभिधाने आदिकादि प्रज्ञोपायात्मके योगतन्त्रे आ
दिबुद्धे निरन्वये कालचक्रमभिधेयं वज्रयोगतन्त्रस्वभावं यथावस्थितं आदिबुद्धं पृच्छेत् सुचन्द्र इति धर्मदेशनासंग्रहः ॥ इदानीं प्रयोजनप्रयोजनप्र
योजनसंग्रह उच्यते ॥ मोक्षहेतोर्नराणामिति । मोक्षहेतोर्नराणां प्रथमं तावन्मण्डलप्रवेशादिना सत्वार्थकरणं प्रयोजनं ततः परं स्मादेशासरणं न

रचिन्हस्योत्तरे ॥ अस्य संज्ञाचिन्हं पवर्गात्मकं पकार व्यंजन मन्त्रस्वार्यं चतुर्थं बिन्दुशून्यमिति ॥ रूपस्कन्ध । पृथिवीधातु । कायेन्द्रियगन्ध । पाश्चात्यापदः
एषांनिरावरणशून्यतासर्वाकारा पश्चिमचिन्हस्य पश्चिमे ॥ अस्य संज्ञाचिन्हं तवर्गात्मकं तकारव्यंजनमन्त्रस्वार्यं पञ्चमं बिन्दुशून्यमिति ॥ ज्ञानस्क
न्ध । ज्ञानधातु मनः शब्द दिव्येन्द्रियमूत्रश्राव । एषांनिरावरणशून्यतासर्वाकारा मध्यानाहतचिन्हस्याधः ॥ अस्य संज्ञाचिन्हं सवर्गात्मकं सका
र व्यञ्जनमन्त्रस्वार्यं षष्ठं बिन्दुशून्यमिति ॥ एवं बिन्दुशून्यषडक्षरोर्ध्वे मींदमः कालिशाधर एकारशून्यता सातत्या प्रतिसेनास्वरूपिणीति ॥ अत्र व्यं
जनानि स्कन्धधात्वादीनां ॥ ॥ कखगघङ चछजझञ टठडढण पफबभम यरदधन स ष्पसहक्ष इ य लु व ल क्ष इति एषां अनः स्वर
व्यञ्जनानां ह्रस्वदीर्घभेदेन स्कन्धधात्वादिभेदो ज्ञातव्य इति ॥ कायभेदेन स्कन्धेन्द्रिया ह्रस्वस्वरव्यञ्जनधर्माः ॥ धातुविषया दीर्घस्वरव्यञ्जनधर्माः ॥ ष
डुसाधातुविकारभेदेन षात्रिंशद्धातवो भवन्ति ॥ षट्स्कन्धाः षडिन्द्रियादिभेदेन षात्रिंशत्स्कन्धा भवन्ति ॥ तद्यथा षड्रसाः । षड्धातवः । षडिन्द्रिया
णि । षड्विषयाः । षट्कर्मेन्द्रियाणि । षट्कर्मेन्द्रियविषयाइति ॥ षड्रसधातुविकाराः श्रोत्रविज्ञानादि षड्विज्ञानानि । एवं षट्संस्काराः । षट्वेदनाः ॥ ष
ट्संज्ञाः । षड्रूपस्कन्धाः । षट्ज्ञानस्कन्धा इति ॥ स्कन्धविकारा व्यपसारेण विस्तरेण वक्तव्याः ॥ अत्रोद्देशमात्रेण दर्शिता इति ॥ इत्ययं चाक्षरो महाशून्य
स्वरसमूहः शुक्रचन्द्र इत्युच्यते । बिन्दुशून्यः षडक्षरो व्यञ्जनसमूहो रजः सूर्य इत्युच्यते ॥ अत्र शुक्रं चन्द्रो वंकारो वज्रं । रजः सूर्य एकारः पद्मं ॥ अन
योर्वज्रपद्मयोरेकत्वं वज्रसत्त्व इति ॥ वज्रं परमसुखं एवं ज्ञानं शुक्रं । सत्त्वः सर्वाकारप्रज्ञा बिम्बं रजः रविः ॥ ज्ञानविज्ञानाधिष्ठितनिरावरणमेकत्वीभूतं

तत्वं जगद्दर्भकारि भवति । एतदेव कायवाक्चित्तज्ञानैकयोगं चतुर्वक्त्राकारं भवति ॥ ज्ञानं पश्चिमवक्त्रं पीतं । विज्ञानं पूर्ववक्त्रं कृष्णं । चन्द्रः कायवक्त्रं सितमुत्तरं । सूर्यो वाग्वक्त्रं दक्षिणो रक्तमिति ॥ अनयोश्चन्द्रार्कयोः षड् षड् धातवो गौणमुख्यभेदेनावगन्तव्याः ॥ ते च पृथ्वी आपस्तेजो वायुरसमहारसाश्च इति ॥ शुक्रे त्रय उद्भूतास्त्रयोऽनुद्भूताः ॥ पृथ्वीधातुः ॥ तेजोधातुः । महारसधातुः । एते धातवो रजसि उद्भूताः अत्र महारसस्थाने ज्ञानधातुर्भवतीति ॥ अवशेषाः शुक्रे रजसि चानुद्भूताः ॥ तोयधातु वायुधातु रसधातुः । एते धातवः शुक्रे उद्भूताः ॥ उभयोराकाशधातु संतेति । रजसि त्रय उद्भूताः ॥ त्रयोऽनुद्भूताः ॥ एवं चन्द्रार्कयोरुद्भूतास्त्रयो धातवः कायवाक्चित्तानि यथाक्रमेण भवन्ति गर्भजानामिति ॥ चन्द्रस्य धातव उपायस्य कायवाक्चित्तानि । सूर्यस्य धातवः प्रज्ञायाः कायवाक्चित्तानि शुक्ररजउद्भूतकारणादिति ॥ एते धातवः षडिन्द्रियादीनां षट्कुलनामीति ॥ एवं कायवाक्चित्तकुलानि स्वभावकुलेन सार्द्धं चतुःकुलानि भवन्ति ॥ कायत्रयं कायचतुष्कं भवति ॥ अवस्थात्रयमवस्थाचतुष्कं भवन्ति ॥ एवं पञ्चधातुकुलानि ज्ञानधातुना सह षट्कुलानि भवन्ति । तथा पञ्चस्कन्धकुलानि । ज्ञानस्कन्धेन सार्द्धं षट्कुलानि भवन्ति । गर्भजानामिति ॥ कन्यायां द्वादशाब्दैः । पुंसः षोडशाब्दैः । कन्यायाः रजःकालं यावत्त्रिकुलं पञ्चकुलं वेदितव्यं ॥ पुरुषस्य शुक्रच्युतिकालं यावत्त्रिकुलं पञ्चकुलं वेदितव्यं । ज्ञानधातूद्भूतकाले उभयोश्चतुःकुलं षट्कुलं नामकरणादिति । तथा मूलतन्त्रे ॥ भगवानाह ॥ त्रिकुलं पञ्चकुलं चैव स्वभावैकं शतंकुलमिति ॥ इदानीं कुलकुलीना उच्यते ॥ कुल इत्यादि । इह स्कन्धा ज्ञानविज्ञानादयः । षट्स्कन्धा इति ॥ देवासुराश्चेति ॥ चकारात् बोधिसत्वा मनुष्यि

भवन्ति। सप्ताराणाम् स्थानसंस्थानवातप्रभावतः॥ द्वीपशैलाः समुद्राः द्वीपानि सप्त शैलाः सप्त। समुद्राः सप्त॥ ऋक्षाणीन्द्वर्कताराग्रहगता ऋषयस्तृ नि
ऋक्षाणि सप्तविंशतिः। नक्षत्रस्थानान्यन्तराणि॥ इन्द्वर्कौ मसृणाकारौ॥ ताराग्रहगणास्तथैव तारकाकारो मङ्गलादिरिति। ऋषयः सप्ततारकाः। देवभू
ताश्च नागाः। देवाश्चातुर्महाराजकायिकादयः। भूता अपराजितप्रेतादयः। नागा अनन्तादयः। तिर्यग्योनिश्चतुर्धा अण्डजा गरुडादयो वायुयोनिः। ज
रायुजा गजेन्द्रादयो ऽग्नियोनिः। संस्वेदजाः कीटपतङ्ग कृम्यादयो जलयोनिः। उपपादुकाः वृक्षादयो भूमियोनिरिति॥ तथा महीपपादुकारसयोनिः।
त्रिविधमहीतले महीत्यागमपाठः। त्रिविधाश्च सा मही चेति त्रिविधमही सप्तद्वीपस्वभावा पादशरवरउस्वभावा तस्यास्तलं त्रिविधमहीतलं नाग
भुवनं सप्तनरकभुवनं॥ तस्मिंस्त्रिविधमह्यां मनुष्याः। तले नरके नारकाः। चकारः समुच्चयार्थ इति। संभूताः भूम्यमध्ये लवणाभिवज्रलोहरागज
श्चाणुमध्ये इति। अत्र दृष्टान्तः। स्थावराणां सन्मन्नतैलवर्णा। जङ्गमानाभन्ननये अणु। चकारः समुच्चये यथा आतपसंयोगात्। लवणाउदकपाम
गावो लवणाकठिनत्वमाप्ति। तथामेवादयः। स्थावरा इति॥ यथा शुक्रं द्रवपरमाणवो ऽणुमध्ये सुखकायाद्यवयवत्वं गताः वृक्षा जङ्गमसत्वा वेदित
व्याः॥ अस्यतो कथातोऽविस्तरेणोत्पादः पश्चमपञ्चेव वक्तव्यः॥ इति लोकधातुसंग्रहोद्देशः॥ ॥ इदानीमनुक्रियापूर्वकमेराद्देशितं वज्रकायसंग्रह
तं पंचमं विननोमीति॥

काये ज्ञाने स्वरे वै पवनहुविजले भूस्थिते सङ्गमे च दिव्यादृष्टौ च सृष्टौ दशविधभुवने वर्णिते वज्रकाये॥
संभूतिर्मन्त्रयोनिर्भवति नरपते सत्किरन्त्रैव भूयः एवं योऽवेत्ति सम्यक् न स भवति पशुश्चित्तसंकल्पमुक्तः॥ ५ ॥

कायइति चन्द्रो निरावरणं ।ज्ञानइति सूर्यो निरावरणः ।अम्बरमित्याकाशधातु निरावरणः ॥एवंवायुधातुस्तेजोधातुरुदकधातुः पृथिवीधातु
स्थिरइतिपञ्चात्मकः ॥स्थावरधातुर्निरावरणः ॥जङ्गमइतिषडात्मकः ।षडङ्गधातुर्निरावरणः ॥ दिव्यादृष्टिश्चभव्याचेति ।दिव्याचसाऽदृष्टिश्च
भूष्टिः ॥तस्यादिव्यादृष्टौ चभृष्टौऽरूपभवेविज्ञाना हकारमात्रे आकाशानन्त्यायतनादिके चतुःप्रकारे ॥ एवंकायादिके दशविधभुवने ।वज्रज्ञाना धा
रवर्णि तेनभागेन वज्रकाये संभूतिर्मन्त्रयोनेर्बिन्द्वादिके [illegible]वातिनरपते अत्रमन्त्रयोनिः ॥चन्द्राद्बिन्दुः ।सूर्याद्विसर्गः ।आकाशधातोः अ ।वायुधा
तोः इ ।तेजोधातोः ऋ ।उदकधातोः उ ।पृथिवीधातोः ऌ ।स्थावरधातोर्मव्यञ्जनं ।जङ्गमधातोः क्षव्यञ्जनं ।अरूपधातोः हकारव्यञ्जनं । एतानि
मन्त्रपदानि ।वामावर्तेन स्थापयेत् ।ततः पूर्वव्यञ्जनस्य परव्यञ्जनोर्ध्वगमनं लकारादीनां इकोयणाचीति यणादेशः ॥अन्ते अकारेण संयो
गो विसर्गो अर्द्धचन्द्राकारो बिन्दुर्दन्तोत्तानं शिखाकारमिति ॥मन्त्रयोनिर्गणा हूंआदीनां मन्त्राणां ॥तद्यथा ह क्षम् ल उ ऋ इ अः ०ऽ  इति
लोकधातुकायो वज्रकायः ।आकाशधातोर्यकारो वायुमण्डलं ।तदुपरि रकारो अग्निमण्डलं ।तदुपरि वकारो जलमण्डलं ।तदुपरि लका
रो भूमिमण्डलं ।तदुपरि मकारो मेरुः पद्माकारः ।तदुपरि क्षकारः षड्भव पदेशेन जङ्गमकायः ॥तदुपरि अरूपकायो हकारात् ॥विसर्गः सूर्यः ॥ च
न्द्रो बिन्दुः ।नादोवज्रचित्तैकभूकं ॥एवं वज्रकायो लोकधातुर्मण्डलाकारो वक्ष्यमाणेन वक्तव्यः ॥एवं संभूतिमन्त्रयोनेर्युक्तिरत्रैव भूयइति ॥अ
न्तः संहारकाले मुक्तिर्दृश्ये अत्रैव भवतीति ॥एवंयोवेत्ति सम्यगिति ।एवमनेनोक्तक्रमेणायं कश्चिद्वेत्ति निरावरणेन वज्रकायं ॥न सम्भवति पञ्चरत्ति

नान्वर्गान्काद्यान्समात्रान्॥ मात्रा अकारादयः पञ्च ह्रस्वाः पञ्च दीर्घा दशमिलिता भवन्ति॥ ह्रस्वान्ते अनुस्वारमात्रा षष्ठी दीर्घान्ते विसर्गमात्रा षष्ठी
ति च यः अनुस्वारसंयोगेनोच्चारणीयः॥ ताभिर्मात्राभिर्युक्तान्समात्रानिति॥ चरतीति दिनकरः शून्यषड्वर्गहीनमानैः षष्ठ्युत्तरविंशतिमानैरिति॥ तैः शून्यषड्व
र्गहीमानैः षोडशमासैरयनद्वयश्च भवति॥ अन्येकेऽयने दक्षिणोत्तरे॥ अ शीतोष्णरात्रिदिनमानं भवति॥ कर्कटादौ दक्षिणायने आकाशादि पृथिवीक्रमेण॥ ष
ड्ह्रस्वमात्रासहितान्षड्वर्गान् षण्मासैः सूर्यश्चरति संक्रान्तिमासभेदेन॥ ततः पृथिव्यादिभेदेन उत्तरायणे दीर्घमात्रासहितान्षड्वर्गान्षण्मासैश्चरति।
यत्र ह्रस्वमात्रासहिताश्चरति। तत्र रात्रेर्वृद्धिर्भवति। यत्र दीर्घमात्रासहिताश्चरति तत्र दिनवृद्धिर्भवति॥ अत्र दक्षिणायनं चन्द्रः। उत्तरायनं सूर्यः। एक
व्यञ्जनं चन्द्रः। संयुक्तव्यञ्जनद्वयं सूर्यः। व्यञ्जनत्रयसंयुक्तो राहुरिति॥ एवं ह्रस्वस्वरश्चन्द्रः। दीर्घः सूर्यः। प्लुतो राहुरिति॥ सर्वत्र भवति॥ एवं राहोः प्लुत
त्वात्त्रिधा तमो मृदुमध्याधिमात्रात्मकमिति॥ अत्र कर्कटसंक्रान्तिदिने पृथिव्यादिभेदेन कवर्गस्य ङकारं अकारसहितं चरति सूर्यः। द्वितीये ङिः। तृतीये
ङीः। चतुर्थे ङुः। पंचमे ङूः। षष्ठे ङः॥ एवं सप्तमदिनादिक्रमाद्द्वादशदिनान्तं घकारं चरति। यथा ङकारं विचचार॥ एवमष्टादशदिनपर्यन्तं गकारं सम
न्चरति। चतुर्विंशतिदिनं यावत् खकारं चरति॥ एवं त्रिंशद्दिनानि यावत् ककारं समात्रं चरति॥ शून्यदिनं क्वचिदनाहतं। एवं सिंहसंक्रान्तिमासदिनै
स्त्रिंशद्भिश्चकारादीन्समात्रांश्चरति। कन्यासंक्रान्तिदिनैः टकारादीन्समात्रान्चरति॥ तुलासंक्रान्तिदिनैः तकारादीन्समात्रांश्चरति। वृश्चिकसंक्रान्ति
दिनैर्पकारादीन्समात्रांश्चरति॥ धनुःसंक्रान्तिदिनैः यकारादीन्समात्रान् व्यञ्जनानि चरति। एवं दक्षिणायने षण्मासदिनैः षड्वर्गान्समात्रान् शीतोत्तरायणं तमस्व

श्चरति । चन्द्रस्वभावेन रात्रिवृद्धिभेदेनेति ॥ ततः उत्तरायणभेदो विलोमेन मकारादिना उच्यते । मकारादिसंक्रान्तिमासदिनभेदेन सूर्यः षड्वर्गान् समात्रांश्च
रति । संहारक्रमेण दीर्घमात्रासहितान् वर्गानिति ॥ अत्र मकरसंक्रान्तिदिने स्वाः । समात्रं चरति । द्वितीये स्वॄ मात्रां स्वृ तृतीये स्वॄ । चतुर्थे स्वृ । पंचमे स्वी
षष्ठे स्वा । एवमपरत्र दिनेः ॥ श्वाः श्वॄ श्वृ श्वॄ श्वी श्वा ॥ एवं षतवाश । एवं । फाः फॄ फृ फॄ फी फा ॥ इति मकरसंक्रान्तिदिने त्रिराशिः सवर्गः समात्रं
चरति ॥ एवं कुम्भमीनमेषवृषभमिथुनसंक्रान्तिदिने सवर्गं । पवर्गं । टवर्गं । च फां फॄ फृ फॄ फो फा वर्गं । कवर्गं । चरति समात्रं अथ स्वनरवात दिने
रिति कर्कटसंक्रान्तियावद्दिवावृद्धिः ॥ दिवावृद्धौ सूर्यः संहारस्वरूपेणावेष्टितव्य इति । अत्र रात्रिदिवावृद्धिस्वभावा षाराशिः । तद्यथा । रात्रिवृद्धि । ङः ङि ङृ ङु ङ्लृ ङं
घघि घृ घु घ्लृ घं ॥ गगि गृ गु ग्लृ गं ॥ खखि खृ खु ख्लृ खं ॥ ककि कृ कु क्लृ कं ॥ इति कर्कटे वृद्धिः ॥ ञञि ञृ ञु ञ्लृ ञं ॥ झझि झृ झु झ्लृ झं ॥ जजि जृ जु ज्लृ जं ॥ छ
छछि छृ छु छ्लृ छं । चचि चृ चु च्लृ चं ॥ इति सिंहवृद्धिः ॥ णणि णृ णु ण्लृ णं ॥ ढढि ढृ ढु ढ्लृ ढं ॥ डडि डृ डु ड्लृ डं ॥ ठठि ठृ ठु ठ्लृ ठं ॥ टटि टृ टु ट्लृ टं ॥ इति कन्यावृद्धिः ॥
ममि मृ मु म्लृ मं ॥ भभि भृ भु भ्लृ भं ॥ बबि बृ बु ब्लृ बं ॥ फफि फृ फु फ्लृ फं ॥ पपि पृ पु प्लृ पं ॥ इति तुलावृद्धिः ॥ ननि नृ नु न्लृ नं ॥ धधि धृ धु ध्लृ धं ॥ ददि दृ दु द्लृ दं
थथि थृ थु थ्लृ थं ॥ तति तृ तु त्लृ तं ॥ इति वृश्चिकवृद्धिः ॥ कं किं कृ कु क्लृ कं ॥ शशि शृ शु श्लृ शं ॥ षषि षृ षु ष्लृ षं ॥ खखि खृ खु ख्लृ खं ॥ ससि सृ सु स्लृ सं ॥ इ
ति धनुसंक्रान्तौ रात्रेर्वृद्धिः ॥ दिनक्षयः ॥ एवमासीद्दिनेरिति ॥ ततो मकरादिना दिवावृद्धिः ॥ स्वाः स्वॄ स्वृ स्वॄ स्वी स्वा ॥ श्वाः श्वॄ श्वृ श्वॄ श्वी श्वा ॥ ष्वाः ष्वॄ ष्वृ
ष्वॄ ष्वी ष्वा ॥ ह्वाः ह्वॄ ह्वृ ह्वॄ ह्वी ह्वा ॥ क्वाः क्वॄ क्वृ क्वॄ क्वी क्वा ॥ इति मकरे वृद्धिः ॥ ताः तॄ तृ तॄ ती ता ॥ थाः थॄ थृ थॄ थी था ॥ दाः दॄ दृ दॄ दी दा ॥ धाः धॄ
फं क्लॄ क्लृ कॄ कं कं

श्रुतमित्यादिना किंजशरस्थानानिर्देशः तथागतेनोक्त इति ॥ एवमित्यनयासंतायायोभावः श्रीसमाजाद्युक्तः ॥ सएवभावोलक्षाभिधा
नादेनतन्त्रराजेऽकुस्मेत्यादिना तभागतेनोक्तः ॥ सचगुरूपदेशात्तन्त्रान्तराले संध्याभाषान्तरेणावगन्तव्य इति ॥ अत्रसूत्रतन्त्रे भगवानाह ॥ संध्या
भाषंतथानैवरुतंचैवतथानच ॥ नेयार्थंनचनीतार्थंतन्त्रंषट्कोटिलक्षणं ॥ अतोभगवतोवचनानैकान्तताप्रधानत्वादिति ॥ इहमन्त्रनयेत्रि
विधः प्रत्ययो भगवतोक्तः ॥ प्रथमतावत्तन्त्रप्रत्ययः ॥ ततोगुरुप्रत्ययः ॥ ततआत्मप्रत्ययः ॥ एभिस्त्रिभिः प्रत्ययैः परिशुद्धः सम्यक्तदुद्धमार्गो भवति
अन्यथात्रिभिः प्रत्ययैर्विनायोमार्गोऽस्त्रराम्बध्यते ॥ शिष्यस्य सम्यक्सुउत्तम्फलदायकोनभवति शिष्यस्यअप्रज्ञाजडत्वात् ॥ लौकिकंफल
भवति सवृत्तिसम्पेनेति ॥ इहतन्त्रान्तरे भगवता प्रतिज्ञाद्धता ॥ विकल्परहितेनचित्तंकृत्वादिनमेकं परीक्षयेत् निमित्तं यदि तत्रोक्तविधिना गुरु
रूपदेशेनशिष्यस्य प्रत्ययोन भवति तदाभगवतोमृषावचः ॥ अथगुरुर्न तत्रोक्तविधिना शिष्यस्यमार्गदायकोन भवति ॥ तदानभगवतः प्रति
ज्ञामृषाभवतिगुरोर्मार्गापरिज्ञानात् ॥ विपरीताविशुद्धमार्गभावना प्रतिपादकत्वादिति ॥ इह न चान्यमंगुलचक्रसाधनानिमित्तंदिनमेकं
परीक्षयेत् ॥ धूमादिनिमित्तविशुद्धय भगवतोवचनमिति ॥ अत्र त्रिकुलात्मके तन्त्रराजे कायवाक्चित्तकुलात्मकोऽभिधेयः त्रिमुखः चतुः
कुलात्मके कायवाक्चित्तज्ञानात्मकोऽभिधेयश्चतुर्मुखः । स्वभावैकेनकुलेनसह चतुःकुलात्मकंतन्त्रंभवति ॥ अभिधेयश्च ॥ तथा
पञ्चकुलात्मकं स्वभावैकेनसार्धं षट्कुलात्मकंभवति ॥ अत्र चतुःकुलात्मकेतन्त्रे चतुःकुलात्मकोऽभिधेयः सूर्यचन्द्रराहु अग्नि

स्त्रः शुक्रचित्तज्ञानैकयोगादिति ॥ इह नामसङ्गीत्यां प्रकटः सङ्गीतौ वज्रयोगस्तथागतैरिति । प्रत्यवेक्षणाज्ञानस्तवे त्रयस्त्रिंशत्तमादिश्लो
केन त्रयेण ॥ तद्यथा ॥ वज्रसूर्यमहालोको वज्रेन्दुविमलप्रभः ॥ विरागादिमहारागो विश्ववर्णोज्ज्वलप्रभः ॥ संबुद्धवज्रपर्यङ्को बुद्धसंगीतिध
र्मधृक् ॥ बुद्धपद्मोद्भवः श्रीमान्सर्वज्ञज्ञानकोशधृक् ॥ विश्वमायाधरो राजा बुद्धविद्याधरो महान् ॥ वज्रतीक्ष्णो महाखड्गो विशुद्धः परमाक्षर इ
ति ॥ अतो भगवतो वचनात् चतुःकुलात्मकोऽभिधेयो वज्रसत्त्वो विशुद्धधर्ममंत्रसंस्थानात्मकः ॥ कालचक्रो भगवानिति । एवं पंचकुलात्म
कः स्कन्धधातुभेदेन ॥ तथा मायाजाले भगवानाह ॥ पंचाननः पञ्चशिखः पञ्चचीरकशेखरः ॥ महाव्रतधरो मौञ्जी ब्रह्मचारी व्रतोत्तमः ॥ एवं स्क
न्धधातुभेदेन षट्कुलात्मकोऽभिधेयः ॥ शतकुलात्मकोऽपि वक्त्रभेदेन भगवतोक्त इति विशुद्धधर्मधात्वन्तिमश्लोकपादेन सार्द्धं आदर्शज्ञा
नस्तवे प्रथमश्लोकेन । तद्यथा । वज्रभैरवभीकरः ॥ क्रोधराट् षण्मुखो भीमः षण्नेत्रः षड्भुजो बली ॥ दंष्ट्राकरालकंकालो हलाहलशतानन इ
ति ॥ अतो भगवतो वचनात्त्रितत्त्वात्मकोऽभिधेयस्त्रिमुखश्चतुर्मुखः पञ्चमुखः षण्मुखः शतमुखोऽवगन्तव्य इति ॥ इह समाजादिके । एकारेणा
यत्स्थानं भगवतोक्तं तद्देवस्थानं रहस्येत्यादिशब्देन तत्त्वाभिधानादिके भगवतोक्तं । सोऽवंकारेणाभिधेयस्तूक्तः सत्त्वमहासुखशब्देन व
ज्रसत्त्व उक्त इति ॥ एवमुक्तक्रमेण चतुःकुलात्मके परमादिबुद्धे षट्कुलात्मके चतुःकुलात्मकोऽभिधेयः षट्कुलात्मकश्चेति ॥ सर्वज्ञत्वा
दिभिः त्रयोविंशत्यक्षरैर्भगवतोद्दिष्टः शून्यताकरुणाभिन्नो बोधिचित्तवज्रो महासुख इति ॥ इह सिंहासनशब्देनाकाशधातुः सर्वालयः ॥

कर्मणा॥ सत्वोपकारिणो धर्मो देशिताः श्राद्धैरपि॥ प्रियामेऽप्रियाविद्धिर्द्दीनाः सत्वहिंसकाः॥ मातापि राक्षसी लोके स्वपुत्रभक्षणाद्वाया।
यस्यानास्तिदयाऽपत्येकृत: तस्याः परेजने॥ पितृमातृवधो यत्र धर्मो यागादिहेतुके॥ वक्तुः स्वार्थपरैर्विप्रैः परेषां तत्र का कथा इति॥ अतः सर्वज्ञो
बुद्धो भगवान्। सर्वसत्वकारुणिकः सर्वज्ञः सर्वहितैर्धर्मदेशकः॥ तथाऽत्र चन्द्रो वज्रपाणिर्दशभूमीश्वरोऽध्येषकः सङ्गीतिकारकः परमादि
बुद्धे प्रसिद्धः॥ ॥ इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां विमलप्रभायां सर्वज्ञेत्यादिना तन्त्रराजेदेशकाध्येष
कसाधनोद्देशाधिकारार्थः॥ ॥ इदानीं वज्रयोगसंग्रह उच्यते॥ योगं श्रीकालचक्र इत्यादि। इह मन्त्रनये लौकिकलोकोत्तरसत्यमाश्रि
त्यबुद्धभगवता द्विधा तन्त्रे तन्त्रान्तरे चार्थो निर्दिष्टः॥ एको लोकसंवृत्या द्वितीयः परमार्थत इति॥ तत्र यो लोकसंवृत्या निर्दिष्टः स नेयार्थः॥ यः
परमार्थतः स नीतार्थः॥ एतौ द्वावर्थौ गुरूपदेशतो वगन्तव्यौ शिष्यैः॥ एवं सर्वतन्त्रान्तरेष्वभिधेयो द्विधा एको लोकसंवृत्या द्वितीयः परमार्थतः।
यो लोकसंवृत्या स वर्णभुजचिह्नसंस्थानलक्षणः॥ यः परमार्थसत्यतः स वर्णभुजचिह्नसंस्थानरहितः॥ अनयोर्यो लोकसंवृत्या देवताबाह्ये
ऽध्यात्मनि लौकिकसिद्धिसाधनाय स्वचित्तपरिकल्पनाधर्मी लौकिकसिद्धिफलदायक इति॥ यः परमार्थसत्येन देवतानः। स लोकोत्तर सर्वा
कारवरोपेत महामुद्रासिद्धिसाधनाय स्वचित्तपरिकल्पनाधर्मरहितः प्रत्यक्षः स्वचित्तप्रतिभासो योगिनां गगने प्रतिभासते॥ कुमारिकाया आ
दर्शादौ प्रतिसेनावदिति। इष्टार्थफलदः फलमक्षरसुखज्ञानचित्तं॥ अनयोर्भिन्नयोरेकत्वं प्रज्ञोपायात्मको वज्रयोगो महार्थः परमाक्षर आदिबु २८

षो निश्चयः कालचक्रो भगवान् वज्रसत्त्वः सर्वतन्त्रान्तरे प्रसिद्ध इति तस्यैव भगवान्पारमितानये हेतुलक्षणे प्रज्ञापारमितायाः स्वाभाविककाय इ
त्युक्तः ॥ तथाभिसमयालंकारकारिकायां चतुःकारित्रनिर्णये मैत्रेय आह ॥ स्वाभाविकः सुसम्भोगो नैर्माणिकोऽपरस्तथा । धर्मकायः सकारित्रः च
तुर्धा समुदीरित इति । स एव भगवान्मन्त्रनये फललक्षणे ॥ सहजानन्दः सहजकाय इत्युक्तो ग्राह्यग्राहकवर्जितो विज्ञानधर्मतातीतो भवनि
र्वाणाप्रतिष्ठितो बुद्धानां समाजो देवीनां सम्बरश्च ॥ अनेन ज्ञानकायेन सहजसमयसत्त्वमिति नीतार्थः ॥ इहास्य वज्रयोगस्य निरन्वयस्य शाश्वतो
च्छेदवर्जितस्य लोकायमामतिकानन्तस्य अजिनानास्तिबुद्धिपरित्यक्तस्य कुमारिकाया आदर्शप्रसेनावत् स्वचित्ताकल्पितस्य प्रत्यक्षदृष्टस्य
अनन्यार्थस्य सर्वाकारस्य गगनोद्भवस्य समन्तभद्रस्य सर्वेन्द्रियस्य सर्वसत्त्वात्मनिष्ठितस्य सहजानन्दस्य हेतुदृष्टान्तविवर्जितस्य भावाभावै
कत्ववैधर्म्यादृष्टान्तो भवति सर्वपक्षग्रहविनाशाय योगिनामिति ॥ यथा लौकिकदृष्टान्तः ॥ घटे वैधर्म्यात् खपुष्पं नास्ति सर्वभावतः । एवं खपुष्पे वैध
र्म्यान्न घटोऽस्ति सर्वभावतः ॥ उच्छेदशब्देन निर्वाणमभावलक्षणमिति ॥ तथा लोके दृष्टान्तोऽनयोर्घटखपुष्पयोरेकसत्त्ववैधर्म्याद्भवति अनयो
र्घटखपुष्पयोर्लोकसंवृत्या ; इत्यनयोः परस्पर वैधर्म्यादृष्टान्तो भवति ॥ एवमुच्छेदवैधर्म्याद्भावोऽस्ति सर्वभावतः ॥ भाववैधर्म्यादुच्छेदो नास्ति
सर्वभावतः ; एकत्वं नास्ति परस्परविरोधात् ॥ येनान्यत्वं तत्सदसन्न भवति यदसत्तत्सन्न भवति ॥ भावाभावस्वरूपतः ॥ येन सल्लक्षणं चित्तं भवति
तेनासल्लक्षणं न भवति । येनासल्लक्षणं चित्तं भवति तेन सल्लक्षणं न भवति विरोधादिति ॥ इह पुनः शून्यताकरुणात्मकस्य विश्वस्य विश्व

त्रकारूपभावनाबलेन लौकिकसिद्धिसाधनमाधिष्ठान भावनाबलेनच प्रयोजनं वीरक्रमाधिष्ठान क्रमेणेति ॥ ततउत्तरोत्तरं प्रयोजनस्यापि
प्रयोजनमिति प्रयोजनप्रयोजनं ॥ इह आकाशधातोर्निर्विकल्पचित्तेन धूमादिनिमित्तेन मन्त्र[illegible]सर्वाकार[illegible] विश्वबिम्बरूपेण भावितेन परमाक्षर
सुखसाधनेनबुद्धत्वं वज्रसत्वत्वं नेति ॥ उपपत्तानसम्भारान्मानरागामिहजन्मनीति ॥ प्रयोजनप्रयोजनप्रयोजनसंग्रहः ॥ एतत् पद्मादिबु
प्रयोगमतीतबुद्धैर्देशितं वर्तमानैर्देश्यते अनागतैर्देशयिष्यते ॥ अतीतवर्तमानानागतकोटिरतीतवर्तमानानागतसमयैः पर्यन्तिरित्यनन्ताव
नन्तबुद्धक्षेत्रेष्वनन्तानां सत्वानां अनन्तानन्ततथागतैर्बुद्धाय संदेशितो देश्यते देशयिष्यत इति ॥ ॥ इति मूलतन्त्रानुसारिण्यां लघुकाल
चक्रतन्त्रराजटीकायां विमलप्रभायां देशकादिसंग्रहोद्देशः पंचमः ॥ ॥ इदानीं मूर्खरपाश्रोतृजनः सम्बुद्धार्थं भगवान्निर्मितकायो यशोनरे
न्द्रः परमादिबुद्धात्तथागतवाक्यमञ्जुवज्राधिप्रायां द्वितीयवृत्तेनाह ॥

भूर्म्भज्वालनंचबिन्दु व[illegible]ढिवाधर[illegible]द्वाभ्डराश्च वा से दे दे [illegible] प्रज्ञ
निष्ठ उडष पंचविंशात्मकश्च ॥ देहे विश्वस्य मानं त्रिभुवनरचनाशक्तिदेवाडयाणामेतच्छास्त्र ॥ दे सम्यग्[illegible] स्थान[illegible]मराठं नाभिषेकं ॥ २ ॥
इह श्लोषणार्थत्वं पश्चाक्षरमहाशून्यं बिन्दुशून्यं षडक्षरं प्रज्ञा[illegible]नां संग्रहार्थं भगवतोक्तमिति तदिदं विवृणोमि शून्यमित्यादिना ॥ इह प्रथमम
भिषेणोकृतेन तन्त्रतन्त्रार्थः प्रकाशितः सन् वक्ष्यमाणो[illegible]गमो भवतीति बालमतीनां ॥ तेनादौ टीकायां संक्षेपतो वक्तव्य इति ॥ इह शून्यमित्यादि

संज्ञाभिरदृष्टदृष्टभावाः प्रकाशिताः अप्रत्येकेन्द्रियाणामगोचराः प्रत्येकेन्द्रियाणां गोचरा इति ॥ सर्वत्रासतिसति भावेपि संज्ञापूर्वको व्यवहारः
खपुष्पादौ घटपटौ यथा ॥ इह खपुष्पसंज्ञयोद्दिष्टो ऽभावो न भावो भवति ॥ एवं घटपटसंज्ञयोद्दिष्टो भावो नाभावो भवति ॥ स्वसंज्ञयाऽक्त इति ॥ सु
मतन्त्रतन्त्रान्तरेषु शास्त्रसंज्ञाभिर्देशसंज्ञाभिर्मन्त्राक्षरसंज्ञाभिरेकैकाक्षरसंज्ञाभिर्यथागतेन भावा निर्दिष्टाः सङ्गीतिकारकैश्चातिरिक्त
तिसर्वे योगिभिर्नेयार्थेन नीतार्थेनावगन्तव्या इह कस्याप्यभावस्य भावस्य च नाना संज्ञाः ॥ तस्मान्नानासंज्ञाभिर्निर्देशितस्यैकस्यापि भा
वस्य योगिभिः संज्ञाविरुद्धरूपो न कर्तव्यः सद्गुरूपदिष्टस्य तु वर्णावन्तु परीक्षितस्यार्थ शाश्वताश्रितत्वादिति ॥ इह शून्यादिसंज्ञाभिश्च च
तुरयं महाशून्यपर्यन्तः संगृहीतः ॥ शून्यं ज्ञानं च बिन्दुं वरजातिशाश्वरमित्येभिश्चतुर्भिरक्षरैः ॥ तद्यथा ज्ञानस्कन्धविज्ञानस्कन्धं ज्ञानधात्वाकाशधातु
मनः श्रोत्रशब्दधर्मधातुद्विषेन्द्रिय । भगमूत्रश्रावअर्कज्ञातिश्च ॥ एषां निरावरणता समरसत्वं एकलोलीभूतत्वं शून्यमित्युच्यते ॥ न सर्वाभा
वरातियोगित्वसंवेद्यत्वात् । तदेवानाहतमुक्तं जिनैः ॥ अस्यानाहतस्य संज्ञाचिह्नं मध्यवामपूर्वापरमध्ये कर्णिकाकाररेखामात्रमत्र आर्यं प्रथ
माक्षरं महाशून्यमिति ॥ ततो ज्ञानं चेति अत्र चकारः समुच्चयार्थ उद्दिष्टः ॥ समुच्चयार्थप्रतिपादकत्वात् ॥ ज्ञानमित्यनया संज्ञया तृतीयं शून्यमि
त्यवगन्तव्यं ॥ तद्यथा ॥ वेदनास्कन्धं तेजोधातु । चक्षुरूपारागतिश्च । एषां निरावरणता समरसत्वमेकलोलीभूतत्वं ज्ञानं तृतीयाक्षरं महाशून्य
मिति ॥ अस्य संज्ञाचिह्नं मध्यानाहतचिह्नस्य दक्षिणो बिन्दुद्वयमत्र आर्यमिति ॥ बिन्दुमित्यनया संज्ञया चतुर्थशून्यमवगन्तव्यं पूर्ववच्चकारात् ॥ तद्य

यादयः षट् । एवं षड्ज्ञानवः षड्विषयाः । तथा षट्कोशाः षट्कर्मेन्द्रियाणि । षट्कोशदेव्यः षट्कर्मेन्द्रियक्रियाः ॥ देवाः षोडश हस्तपादसन्धौ च स्पन्दनाः
णा इति । एवं योगिन्यश्चर्चिका अष्टौ । अष्टा नागराजानः ॥ ध्यानास्वादयो देव्य इति ॥ इदानीं तीर्थिकावतारणाय प्रकृतिभेदमुच्यते ॥ तथाह भ
गवानन्तान्तरे ॥ महामाया महारौद्रा भूतसंहारकारिणी ॥ स्वयं कर्त्री स्वयं हर्त्री स्वयं राज्ञी स्वयं प्रभुरिति स्मृता ॥ परमार्थतः कर्ता हर्ता नास्ति ॥ अ
न्यायिनीर्थिकैः परिकल्पितो धर्मः प्रकृतिभेदस्याह्निक इति ॥ तीर्थिकानां प्रकृतिश्चतुर्विंशत्यात्मिका पुरुषः पंचविंशतिम इति ॥ तत्र मूलप्रकृति
रविकृतिरिति ॥ गुणावस्थागतानां जनिका आकाशधातुरिति । महदाद्याः प्रकृतिविकृतयः सप्त इति ॥ पृथ्व्यप्तेजोवायुमनोबुद्ध्यहंकारश्चेति ॥
षोडशकास्तु विकारा इति । पञ्चेन्द्रियाणि पंचविषयाः पञ्चकर्मेन्द्रियाणि दिव्येन्द्रियं चेति ॥ चतुर्विंशति प्रकृतिभेदस्तेन प्रकृतिर्न विकृतयश्चे
ति ॥ इह भेदस्तेषां मायिकत्वात् प्रकृतेर्न विकृतिः स्वभावरहितमिति ॥ बाह्ये देहे परे च पंचविंशत्यात्मकानि सिद्धाः ॥ बाह्ये तु पञ्च धातवः ॥ राजसूर्यश्च
न्द्रा इत्यष्टौ प्रकृतीः । मङ्गलादयः पञ्च ग्रहाः पञ्चेन्द्रियाणि । पञ्चविषयाः । पृथिव्यादीनां षड्ना इति षोडश विकाराः । अथैके इन्द्रियादयः ॥ षड्
जीवकाया इति ॥ एवं देहे विश्वस्य मानं अध्यात्मपटलेव काव्यं । त्रिभुवनरचनामिति ॥ इह बाह्ये त्रिभुवनमिति लोकधातुः ॥ अध्यात्मनि शरीर
तस्य रचनावक्ष्यमाणक्रमेण व्याख्यास्यति इति क्रियानियमः ॥ भक्तिदेवाङ्गनाणामिति । इह देवानां दिवा भक्तिरङ्गनानां रात्रिभक्तिः ॥ तथा उत्तरा
यणं दक्षिणायनं ॥ एतत् व्याख्याहि सम्यक् त्रिदशानन्दो मङ्गलवाभिषेकमिति ॥ इह लौकिकसंज्ञेन ज्ञानमण्डलमारभ्याह रजःसूत्रपातेनेति

परमार्थसत्येन पुनः सूत्रपातरहितं रजःपातरहितं वर्णाभिज्ञसंस्थानरूपदेवताविकल्पभावनाचित्तरहितं सर्वाकारमाकाशधातावादर्शप्रतिसेनोपममिति ॥ तथा लौकिकाभिषेकाः । उदक । मकुट । पट्ट । वज्रघण्टा । महाव्रत । नाम । अनुज्ञा । सप्तेति ॥ तथोत्तराः ॥ कलशः । गुह्यः । प्रज्ञाज्ञानमिति । लोकोत्तराभिषेक एकादशमश्चतुर्थ इति । सर्वं सम्यग्व्याख्यातं । तत्कस्य हेतोः । इहार्यविषये ह्यनागते ऽध्वनि दुष्टाचार्याः वज्रघण्टका भविष्यन्ति ॥ द्रव्यार्थं द्रव्याभिमानिना सेश्वराणां गृहं गत्वा धर्मविक्रयं करिष्यन्ति ॥ अभव्यानां द्रव्यलोभेन लोकोत्तराभिषेकं दास्यन्ति । राजादीनां च किंकराः पश्चाद्गुरवो भविष्यन्ति ॥ अन्येषां द्रव्यहीनानां भवचिन्तानामपि दशाकुशलकर्मपथपरित्यक्तानां लोकोत्तराभिषेकं न दास्यन्ति ॥ तेषां क्लेशमुत्पादयिष्यन्ति । द्रव्यवशाद्वज्रपदं दुष्टसत्त्वेभ्यः प्रकाशयिष्यन्ति ॥ अन्येऽपि वज्रपदमज्ञायमानाः परस्परं विवादं करिष्यन्ति ॥ पण्डिताभिमानिनस्तन्त्रार्थमजानन्तोऽपि तन्त्रटीकां करिष्यन्ति ॥ मारकायिकाः सत्त्वानां गुरवो भूत्वा वज्रपदं विपरीतं देशयिष्यन्ति ॥ उत्तमज्ञानं शीघ्रसिद्धिफलं सुखं बालमतीनां प्रकाशयिष्यन्ति ॥ तृतीयं प्रज्ञाज्ञानं चतुर्थं तदेव तत्पुनस्तथाशब्देन तृतीयं ज्ञानं उत्तमज्ञानं वदिष्यन्ति । हेतुफलयोरभेदेन भगवतोक्तमिति ॥ एवमनागते ऽध्वनि दुष्टाचार्यप्रवर्तनं दृष्ट्वा बुद्धभगवता चतुर्थं प्रज्ञाज्ञानाभिषेकं सर्वतन्त्रान्तरेषु नोक्तानीकृतं ॥ यत् आर्यविषये पण्डिताभिमानिनः पुस्तकं दृष्ट्वा विनाभिषेकेन वज्रयानदेशका भविष्यन्ति ॥ ततः सर्वलघुतन्त्रमूलतन्त्रेषु चतुर्थं प्रज्ञाज्ञानं महामुद्राभावना धूमादिमार्गः गुप्तः । क्वचिन्मूलतन्त्रेषु प्रकट इति अत्र पुनः परमादिबुद्धे मूलतन्त्रे लघुतन्त्रेऽपि चतुर्थं प्रज्ञाज्ञानं प्रकटं ॥ महामुद्राभावना धूमादिमार्गश्च प्रकट

स्थरत्नानी चिन्तसंकल्पप्रभुक्त इति । संकल्पो मनःपूर्वकल्पना धर्मस्तेन युक्त कश्चित्त संकल्पप्रयुक्तः ॥ अस्य दशाकारस्यो देशः सुविशुद्धधर्मधातुस्त
वि तथागतेनोक्तः ॥ तद्यथा । दशाकारो दशार्थार्थो मुनीन्द्रो दशबलो विभुः ॥ अशेषविश्वार्थकरो दशाकारवशी महान् ॥ अनादिर्निष्प्रपञ्चात्मा शुद्धात्मा
तथतात्मकः ॥ भूतवादी यथावादी तथाकारी अनन्यवाक् ॥ अद्वयो द्वयवादी च भूतकोटिव्यवस्थितः ॥ नैरात्म्यसिंहनिर्नादः कुतीर्थमृगभीकर
इति ॥ वज्रकायसंग्रहो द्वादशः ॥ ॥ इतनीरागाद्युत्पाद संग्रह वृत्तं षष्ठं वितनोमीति ॥ ॥

वामाङ्गे श्वेतदीप्तिर्जगदमृतकलादक्षिणे रक्तवर्णा अ अः कालाग्निचन्द्रौ रविशशितनयो भौमशुक्रौ गुरुश्च ।
केतुर्मन्दश्च दृष्टिः पविजलशिखिनः सप्तग्रहमानि लोके दीप्तानां चिह्नमानानि विगततमो ग्रहभेदन्तमोन्ते ॥ ८ ॥ ३८

वामाङ्गे श्वेतदीप्तिरिति ॥ वामाङ्गे अवक्तस्यानाहतस्य मध्ये [illegible] तस्य अर्द्धवज्रचिह्नसंज्ञितस्य बिन्दुरेकः स च श्वेतदीप्तिः श्वेतरश्मिरिति । जग
दमृतकला सा एव दक्षिणे रक्तवर्णा इति ॥ तस्यानाहतस्य दक्षिणे विसर्गचिह्नसंज्ञिता रक्तदीप्ती रक्तरश्मिरिति । तयोर्बाह्ये वामे च दक्षिणे च यथा
संख्यं अ अः कालाग्निश्च भवति । तत्र चन्द्रः सूर्यश्च भवति । एवं बुधो मंगलः शुक्रो बृहस्पतिः केतुः शनिः । दृष्टिः विद्युज्जलमग्निरिति सप्तग्रहमानि लोके
लोकयतो विद्यमानानि ॥ तु नियमार्थं । सप्तमन्त्रपदानि यथासंख्यं वामे च दक्षिणे च । अं अः उ ऋ ऊ ॠ ओ अर् । औ आर् । बर वारा । इति सप्तग्र

ग्मानि सप्तवाराणामधिदेवता इति ॥ विगततमोयुग्ममेकं तमोन्ते । तमोरहितं श्वेतरक्तज्ञानरश्मिरूपं अनाहतस्य वामे सव्ये अनाहताङ्कज्ञान्यादिति ॥

पृष्ठे पीता च तारा क्षुरधरवनेसाच्चतुर्द्धा द्विभेदा प्राणो नामैकवायुर्भवति दशविधो मूर्द्ध्नि मूले च पूर्वे ॥ मध्ये वज्रो
र्द्ध्वबीजे ग्रहगणसहितासंस्थिताधःक्षुशान्तिर्ज्ञानं सर्वत्र शून्यं शिवपदसहितं सर्वभावैर्विमुक्तं ॥ ॥

पृष्ठे पीता चेति चकारात् पीतज्ञानरश्मिरित्यर्थः ॥ पृष्ठे अनाहतस्य लत्वाकृति चिन्हसंहिता तस्या वामे साकारा पश्चिमे पीतदीप्तिः ॥ ततः सूक्ष्मतारा बृहत्तारा । एवं क्षुरधरः । अवनिर्द्विधा मृतपाषाणरूपा । एवं सा पीतादीप्तिश्चतुर्द्धा द्विधा भवति ॥ प्राणो नामैकवायुर्भवति दशविधो मूर्द्ध्नि मूले च पूर्वे इति ॥ तस्यानाहतस्योर्द्ध्वं श्यामरश्मिः ॥ वामे शून्यबीजसम्भवः प्राणवायुः ॥ अधो नीलरश्मिः ॥ वामे ज्ञानबीजसम्भूतो ऽपानवायुः । पूर्वे ह्ललरश्मिः ॥ वामे समानो नाम वायुः ॥ ततः उदानः ॥ एवं व्यानो नागः कूर्मः कृकरः देवदत्तो धनञ्जयश्चेति ॥ दशवायवः ॥ एषामधऊर्द्ध्वमेकयुग्मं पूर्वापरं वायुभूमौ ॥ सप्तयुग्मानि धनञ्जयो नपुंसको मृतकस्यापरित्यागादिति ॥ एषु मन्त्रपदानि ऊर्द्ध्वाधः ॥ हहा । तथा पूर्वापरं यथासंख्यं । अआ । इत्ल । ईॡ ऋअॡ । ऐआॢ । यवयाला । भवन्ति सप्तयुग्मानि । पूर्वापरं । ऊर्द्ध्वाध एकं युग्मं । तमोन्ते । सप्तयुग्मानि सप्तवाराणामधिदेवता चतुःसन्ध्याभेदेन आदित्यवारे अर्द्धरात्रे पूर्वोदये अ । दक्षिणोदये अः । पश्चिमोदये आ । उत्तरोदये अं । सोमे इऋॡउ । मङ्गले ईॠॢऊ । बुधे एअर् अल् ओ । बृ

धृ धॄ धी धा ॥ न्ना: न्नृ न्नृ न्नॄ न्नी न्ना ॥ जन्मे वृद्धिः ॥ प्पा: प्पृ प्पृ प्पॄ प्पी प्पा ॥ फ्फा: फ्फृ फ्फृ फ्फॄ फ्फी फ्फा ॥ ब्बा: ब्बृ ब्बृ ब्बॄ ब्बी ब्बा ॥ भ्भा: भ्भृ भ्भृ भ्भॄ भ्भी भ्भा ॥ म्मा:
म्मृ म्मृ म्मॄ म्मी म्मा ॥ इति मनि वृद्धिः ॥ द्दा: द्दृ द्दृ द्दॄ द्दी द्दा ॥ ठ्ठा: ठ्ठृ ठ्ठृ ठ्ठॄ ठ्ठी ठ्ठा ॥ ड्डा: ड्डृ ड्डृ ड्डॄ ड्डी ड्डा ॥ ढ्ढा: ढ्ढृ ढ्ढृ ढ्ढॄ ढ्ढी ढ्ढा ॥ स्सा: स्सृ स्सृ स्सॄ स्सी स्सा ॥ इति मे
षे वृद्धिः ॥ च्चा: च्चृ च्चृ च्चॄ च्ची च्चा ॥ छ्छा: छ्छृ छ्छृ छ्छॄ छ्छी छ्छा ॥ ज्जा: ज्जृ ज्जृ ज्जॄ ज्जी ज्जा ॥ झ्झा: झ्झृ झ्झृ झ्झॄ झ्झी झ्झा ॥ ञ्ञा: ञ्ञृ ञ्ञृ ञ्ञॄ ञ्ञी ञ्ञा ॥ इति वृषे वृद्धिः ॥
क्का: क्कृ क्कृ क्कॄ क्की क्का ॥ ख्खा: ख्खृ ख्खृ ख्खॄ ख्खी ख्खा ॥ ग्गा: ग्गृ ग्गृ ग्गॄ ग्गी ग्गा ॥ घ्घा: घ्घृ घ्घृ घ्घॄ घ्घी घ्घा ॥ ङ्ङा: ङ्ङृ ङ्ङृ ङ्ङॄ ङ्ङी ङ्ङा ॥ इति मिथुने द्विवा वृद्धिः ॥ एव म
या नन्दनो हानिरिति ॥ एवं दक्षिणायने ह्रस्वस्वरसंयुक्तं व्यञ्जनमुभयं चन्द्रलक्षणं ॥ उत्तरायणे संयुक्तं व्यञ्जनद्वयं दीर्घस्वरसंयुक्तं उभयं सूर्य
लक्षणं भवति ॥ एकव्यञ्जनं दीर्घस्वरसंयुक्तं चन्द्रसूर्यात्मकं भवति ॥ एवं संयुक्तं व्यञ्जनद्वयं ह्रस्वस्वरसंयुक्तं सूर्यचन्द्रात्मकं भवति ॥ एवं स्वरव्यञ्ज
नभेदेन चन्द्रो द्विधा सूर्यो द्विधा । तत्प्रभेदात्पृथक्संयुक्तमन्त्रं वेदितव्यं ॥ इत्ययनभेदेन सूर्यस्य चरतां मात्राभेदनः ॥ अपरो मात्राभेदः ॥ आकाशादि
पञ्चमण्डलप्रवाहेन षड्गुणतरभेदभिन्नो वक्ष्यमाणो वक्तव्य इति । अस्योद्देशः मन्त्रराजे मायाजाले भगवतोक्तः धर्मदेवक्षणालवे ॥ सर्वबुद्धमहाचित्तः सर्व
बुद्धमनोगतिः ॥ सर्वबुद्धमहाकायः सर्वबुद्धसरस्वती ॥ वज्रसूर्यमहालोको वज्रेन्दुविमलप्रभः ॥ विरागादिमहारागो विश्ववर्णोज्ज्वलप्रभ इति ॥ अत्र
रागः पञ्चमी दशमी पूर्णिमा शुक्लपक्षे ॥ विरागः पञ्चमी दशमी अमावास्या कृष्णपक्षे ॥ अनयोर्द्वयोर्मध्ये त्रिपूर्णा वर्धमाने हीयमाने महाशून्यं पञ्चाक्षरमे
कलोलीभूतं योगेन आगतानां हृदयं ॥ अतः सर्वबुद्धमहाचित्तश्चन्द्रः षोडशामलात्म महाशून्य । सर्वबुद्धमनोगतिरमावास्यान्ते प्रथमकलोदयाभिसन्धौ सूर्य

लमः षोडशानो विन्दुशून्यः षडक्षर इति ॥ एवं सर्वबुद्धमहाकायो महाशून्यः सर्वबुद्धसरस्वतिर्विन्दुशून्य इति ॥ वज्रसूर्यो महानोको विन्दुशून्यः षडक्षरः ॥ वज्रे
दुविमलप्रभः ॥ पंचाक्षरो महाशून्य इति प्रज्ञोपायधर्मो न क्षमारो ॥ किन्नरे गवक्तव्यः ॥ अनक्षरो मन्त्रयोनिर्महामन्त्रजवनत्रयो निःसरेरोगाति ॥ इदानीं प्रतिदिन
रात्रिदिवानाड्य उच्यन्ते छायामात्राश्च नाड्य इति ॥ रात्र्याश्चैते मात्राश्च छायामात्राश्च कारा अञ्जनाम्येते षोडशमात्रासहिताः षष्ठिमात्रा भवन्ति ॥ तत्र हृ
स्वमात्रा सङ्क्रामन्त्यान्हादर्धरात्रं यावत् ॥ रात्रिवृद्धौ त्रिंशन्मात्रात्मका भवन्ति ॥ अर्धरात्रान्मध्याह्नं यावद्दीर्घमात्राः सङ्क्रान्ताः ॥ त्रिंशद्दिवावृद्धौ भवन्ति ॥ एवं प्रतिदिने रा
त्रिदिवावृद्धिर्वोद्धव्या ॥ अत्र मन्त्रपदानि सृष्टिक्रमेण रात्रिवृद्धौ संहारक्रमेण दिवावृद्धौ ॥ तद्यथा ॥ ह हि हृ हु ह्लृ हं ॥ य यि यृ यु य्लृ यं ॥ र रि रृ रु र्लृ रं ॥ व वि
वृ वु व्लृ वं ॥ ल लि लृ लु ल्लृ लं ॥ इति रात्रिप्रज्ञाभावभेदेनेति ॥ कायभेदेनोपायः ॥ लाः ल्लृ लु लृ ली ला ॥ वाः व्लृ वु वृ वी वा ॥ राः र्लृ रु रृ री रा ॥ याः य्लृ
यु यृ यी या ॥ हाः ह्लृ हु हृ ही हा ॥ इति दिवा उपायो भावभेदेन कायभेदेन प्रज्ञा ॥ प्रज्ञाभावसंभूतत्वात् शुक्रचन्द्रः प्रज्ञा ॥ उपायकायसंभूतत्वात् उपाय
इति ॥ एवमुपायभावसंभूतत्वाद्रजः सूर्य उपायः ॥ प्रज्ञाकायसंभूतत्वात् प्रज्ञा ॥ एवं सर्वत्रानुगन्तव्यम् इति ॥ इदानीं स्थावरजङ्गमत्रैधातुकस्य मन्त्रा उच्य
न्ते ॥ सुरनरफणिनो भूतयोनिश्च मन्त्रा इति ॥ सुराः कामरूपारूपाः ॥ असुराश्च तदन्तर्वर्तिनः ॥ नागाः फणिनश्च पातालस्था अनन्तादयः ॥ भूतयोनिश्च चतुर्विधा भू
वीक्ता ॥ स्थावरयोनिर्महावृक्षादयः ॥ सर्वे ते मन्त्रा भवन्ति ॥ मंत्र मन्त्रपा संज्ञिना इति ॥ अत्र त्रैधातुके यस्य यस्य नाम तस्य तन्नाम मन्त्रसाधनाय संकेतकं भवति ॥ आ
यक्षरत्वेन वीजं भवति ॥ समस्तनामजापमन्त्रो भवति ॥ विश्वार्थसाधनाय अनन्तमन्त्रा अनन्तसत्त्वनामभेदेनावगन्तव्याः ॥ यथा नात्र भाष्यभेदेन राशि

तस्मिं सिंहासने स्थितः सिंहासनस्थः। हुंहुं इति वज्रसत्त्वः। योग इति महार्थः परमाक्षर इति॥ असौ योगो नाम संगीत्यां वज्रधातुमण्डलसंबे चतुर्द
शश्लोकैः संगीतः। तद्यथा भगवान् बुद्धः संबुद्धोऽकारसंभवः॥ अकारः सर्ववर्णाग्र्यो महार्थः परमाक्षरः॥ महाप्राणो ह्यनुत्पादो वागुदाहारव
र्जितः॥ सर्वाभिलापहेत्वग्र्यः सर्ववाक्सुप्रभास्वर इत्यादिना॥ महाविद्योत्तमो नाथो महामन्त्रोत्तमो गुरुः॥ महायाननयारूढो महायाननयो
त्तम इति पर्यन्तं सर्वतन्त्रान्तरेषु असावभिधेयो भगवता संगीतः। स्तु मध्ये ज्ञानसत्त्वा इत्यवधानेनेति। तथा शून्यतानं चेत्यादिभिश्चतुर्द
शाक्षरैः षडङ्गनात्मकोऽभिधेयः॥ स एव संगीतो नाम संगीत्यामपि ज्ञानसत्त्वाख्यानज्ञानसत्त्वे द्वितीयश्लोकेनोक्तः॥ तद्यथा। सर्वमन्त्रार्थज
नको महाविन्दुरनक्षरः॥ पञ्चाक्षरो महाशून्यो विन्दुशून्यः षडक्षर इति। अतोऽनन्तसत्त्वाभिः धर्मदेशकत्वादेवं मया श्रुतमित्यादिना दे
शितं तन्त्रराजं तथागतदेशितं भवति रहस्येत्यादिना सर्वज्ञत्वादिना च देशितं तथागतदेशितं न भवतीति बौद्धैर्न वक्तव्यं स्वसिद्धान्ते परसिद्धा
न्ते दोषग्रहणात् पश्चात्सत्यापत्तिर्भवति॥ तस्मात्तन्त्रान्तरे पूर्वापरसम्बन्धं ज्ञात्वा गुणदोषावगन्तव्याः॥ अन्यथाऽदृष्टदोषग्रहणादवीचिगमनं
भवति। अस्माच्चार्याणां तथागतहृदयवासभूतानां विषयेन्द्रियोपभोगाशङ्का नाभिध्याप्रव्यापिनां इति॥ एवमुक्तक्रमे॥ परं आगमस्तुः
त्ता पूर्वापराविरुद्धं सर्वज्ञेत्यादिना परमादिबुद्धं तन्त्रराजं भगवता संदेशितमिति॥ ननु यः सर्वज्ञः स एव बुद्धो भगवान् द्वाभ्यां संज्ञाभ्यां
एकभाव प्रतीत्यादक्त्वादिति भावः॥ इदं किमर्थं पुनरुक्तवचनं भगवतो बुद्धमितीह कस्यचिदभिप्रायो भविष्यति॥ तस्मादुच्यते। इहलम

तिन एव वचनं यः सर्वज्ञः स बुद्धो भगवानिति निर्वचनं । इह नान्यः सर्वज्ञो मैत्रेयाद्य केऽपि हरिहराणां मध्ये यः सर्वधर्माणां सर्वसत्वहितैकदेशक इति ॥ इ
ह कस्मात्तेषां मध्ये सर्वज्ञः सर्वसत्वहितैषीः । किं तर्हि अन्येऽपि हरिहरादयः सर्वज्ञत्वेन बालजनैः परिकल्पिताः ॥ तेषां सर्वज्ञतानिराकरणाय सर्व
ज्ञो बुद्धो भगवानिति । सर्वधर्मदेशको न भवतीत्युच्यते ॥ इह षड्गतिसंसारे देवजातौ हरिहरादीनां संभूतत्वात् ॥ बुद्ध भगवतः संसारपारको
टिप्राप्तस्थितत्वादिति ॥ इह नामसंगीत्यां तथागतेनोक्तं । विशुद्धधर्मधातुस्तवे त्रयोदशमेन श्लोकेन ॥ तद्यथा ॥ संसारपारकोटिस्थः कृतकृ
त्यस्थले स्थितः ॥ कैवल्यज्ञाननिष्ठ्यूतः प्रज्ञाशस्त्रो विदारण इति । अतः सर्वज्ञो बुद्धो भगवान् बुद्ध इति पुनर्वचनं न भवतीति ॥ ननु यः सर्व
ज्ञः स एव ज्ञानकायः किमर्थं ज्ञानकाय इति पुनर्वचनं भगवतः ॥ तदेवोच्यते ॥ इह यः सर्वज्ञः स एव ज्ञानकाय इति तत्सत्यं ॥ किं तर्हि अ
न्येऽपि बुद्धाः श्रावकप्रत्येकाः सन्ति । तेषां सम्यक्संबुद्धत्वनिराकरणाय सर्वज्ञो ज्ञानकायः सम्यक्संबुद्धो भगवान् ज्ञानकाय इति पुनरुक्त
वचनं भगवतः । इह श्रावकप्रत्येकबुद्धानां मध्ये न कश्चिज्ज्ञानकायः सम्यक्संबुद्धोऽभूदिति ॥ इह कस्मान्न श्रावकप्रत्येकबुद्धानां मध्ये का
श्चित्सम्यक्संबुद्धोऽभूदित्युच्यते ॥ इह श्रावकबुद्धानां सोपाधिनिर्वाणेऽस्थितत्वादिति ॥ सम्यक्संबुद्धस्य सर्वोपाधिविनिर्मुक्तत्वात् ॥ तथा च
नामसंगीत्यां भगवतोक्तं प्रत्यवेक्षणाज्ञानस्तवे एकादशमश्लोकेन ॥ तद्यथा । सर्वोपधिविनिर्मुक्तो व्योमवर्त्मनि सुस्थितः । महाचिन्तामणिधरः
सर्वरत्नोत्तमो विभुरिति ॥ अतः सर्वज्ञो ज्ञानकायः सम्यक्संबुद्धो भगवान् ज्ञानकाय इति पुनरुक्तवचनं भगवत इति । ननु यो ज्ञानकायः

भासंज्ञात्मकं भूमितोयधातु जिह्वारूपपादादानश्च ॥ एषां निरावरणता समरसत्वमेकलोलीभूतत्वं बिन्दुमिति चतु[illegible]शून्यमिति ॥ अस्मत्सं
ज्ञाचिन्हं मध्यचिन्हात् वामेन बिन्दुमेकमत्र न्यास्यमिति ॥ वरजबिन्दुधरमिति । वरश्च वरश्च [illegible] वरजबिन्दुधरः स्वच्छत्वात् ॥ पूर्वं चकारात् ॥
अमी त्रयः शून्यसंज्ञाः स्युः ॥ प्रथमवरसंज्ञया द्वितीयशून्यमुक्तः । तद्यथा [illegible] वेदनास्कन्ध अप्धातु घ्राणायतनं स्पर्श घ्राणेन्द्रिय विट्स्राव । एषां
निरावरणता समरसत्वमेकलोलीभूतत्वं वरमिति ॥ द्वितीयाक्षरशून्यं । अस्मत्संज्ञाचिन्हं मध्यानाहतचिन्हात् ॥ पूर्वेण दण्डाकाररेखामात्रम
त्र न्यास्यमिति ॥ द्वितीयवरसंज्ञया पञ्चमशून्यमित्युक्तं ॥ तद्यथा ॥ रूपस्कन्ध । पृथिवीधातु । कायेन्द्रिय । गन्धा[illegible] ॥ एषां निरावरणता
समरसत्वमेकलोलीभूतत्वं वरमिति पञ्चाक्षरशून्यं । अस्मत्संज्ञाचिन्हं मध्यानाहतचिन्हात् पश्चिमेन [illegible]मत्र न्यास्यमिति ॥ एवमुक्तक्रमेण
सर्वैरभिरेकलोलीभूतैः पञ्चाक्षरो महाशून्यो वँकारो वज्रसत्वो महासुखवज्रधर इत्युच्यते ॥ अत्र पञ्चाक्षरराशि स्वरसंज्ञा अत्र न्यास्यानि ॥ तद्यथा
मध्ये अकारशून्यं कर्णिकाकारं ॥ दक्षिणे ऋकारशून्यं बिन्दुद्वयं ॥ वामे उकारशून्यं बिन्दुमेकं । पूर्वे इकारशून्यं दण्डाकारं । पश्चिमे लृकारशून्यं [illegible]
ताकृतिः ॥ एवं दीर्घ[illegible] वृद्धिपराः [illegible] विकाराज्ज्ञातव्या इति ॥ एवं वँकारः पञ्चाक्षरो महाशून्यो निरावरणैकरसात्मकः ॥ परमार्थधर्मतातीतः प्रति से
नाख्य सहयोगिगम्य इति ॥ अत्र ज्ञानविज्ञानस्कन्धादीनां स्वराः ॥ तद्यथा । ज्ञानस्कन्धो अं ॥ विज्ञानस्कन्धो अ । ज्ञानधातु अः । आकाशधातु आ । म
नइन्द्रियं अं । श्रोत्रं अ । शब्द अः । धर्मधातु आ । भगोद । मूत्रभग्नोदः । दिव्येन्द्रियं ऐ ॥ अन्यान्यपि ह ॥ एतेन मध्यानाहतानि निरावरणाः कर्णिकाकारं सं

चिन्हेनावगन्तव्या इति ॥ संस्कारस्कन्ध इ । वायुधातु ई । घ्राणेन्द्रियं ए । स्पर्श ऐ । वागिन्द्रियं य । विट्श्वासो या ॥ एते पूर्वे निरावरणा दण्डाकार चिन्हेनावगन्त
व्या इति ॥ वेदनास्कन्ध ऋ । तेजोधातु ॠ । चक्षुरिन्द्रियं अर् । रूपं आर् । पाणीन्द्रियं र । गमनं रा । एते दक्षिणे निरावरणा बिन्दुद्वय चिन्हेनावगन्तव्या इति ।
संज्ञास्कन्ध उ । तोयधातु ऊ । जिह्वेन्द्रियं ओ । रूपविषयं औ । पादेन्द्रियं ल । आदानं ला । एते निरावरणा मध्य चिन्हात् उत्तरेण बिन्दु चिन्हेनावगन्तव्या इति
रूपस्कन्ध ऌ । पृथ्वीधातु ॡ । कायेन्द्रियं अल् । गन्धविषय आल् । पायिन्द्रियं ल । आलापो ला । एते पश्चिमे निरावरणा हलाकृति चिन्हेनावगन्तव्या इति
एतेनाद्रिंशक्षेद भिन्नाः स्वरस्य गणवृद्धि यणादेशविकाराः ॥ पञ्चस्कन्धाः पृथक् षड्त्रिंशाङ्गैर्भिन्ना भवन्ति ॥ तत्र स्कन्धे स्थाने पञ्च सार रस्मनी ॥ अम्ल कटु
य तिक्त कटुक मधुर लवणाश्चेति ॥ अ उ इ ऋ ऌ ल्व इति षड्रसाः ॥ शेषस्कन्ध विधिना । एतदेव पञ्चाक्षरमहाशून्य षट्त्रिंशदात्मक उ लिङ्ग उच्यते जिनैः
निधरत्नीति ज्वलितशेखरः । बिन्दुशून्यः षडक्षर एकाराधर्मोदयः । सर्वाकारशून्यताकूप इति ॥ तद्यथा । विज्ञानस्कन्धः । आकाशधातुः श्रोत्र । धर्मधातु भ
श्रक्राति । एषां निरावरणाः शून्यता सर्वाकारा मध्यान्तहृत स्थार्दे ॥ अस्य संज्ञाचिन्ह कवर्गात्मकं ककार व्यञ्जन पञ्च स्थाने प्रथम बिन्दुशून्यमिति । तत्स्क
रस्कन्ध । वायुधातु घ्राण स्पर्श । वाग्विसर्गश्चाव । एषां निरावरणाः शून्यता सर्वाकारा पूर्व चिन्हस्य पूर्वे अस्य संज्ञाचिन्ह चवर्गात्मकं चकार व्यञ्जनमत्व द्वि
र्यं द्वितीयं बिन्दुशून्यमिति । वेदनास्कन्ध । तेजोधातु । चक्षुरूप । पाणिगति ॥ एषां निरावरणाः शून्यता सर्वाकारा दक्षिणा चिन्हस्य दक्षिणे ॥ अस्य संज्ञा चिन्ह
टवर्गात्मकं टकार व्यञ्जन मत्र चार्यं तृतीयं बिन्दुशून्यमिति ॥ संज्ञास्कन्ध । तोयधातु । जिह्वारस । पादेन्द्रियादानं ॥ एषां निरावरणाः शून्यता सर्वाकारा उत्त

इति वज्राचार्यपारंपर्यक्रमेणागतः ॥ यथामन्त्रदेवतावाप्तिसिद्धिसाधनं वीरक्रमस्वाधिष्ठानक्रमं च गुरुपारंपर्यक्रमेणागतमिति ॥ इदं विश्व-
कर्ममहामुद्रासिद्धिदायकं परमादिबुद्धे प्रकटं पुण्डरीकेण लिखितं ॥ श्रीतन्त्रोत्तरे भव्यसत्वानां चिन्ताधिष्ठंगीतान्वा भगवतादेशितं । वज्रपाणि-
नाडस्तके लिखितं नामसङ्गीतिप्रमाणाच्छन्द ॥ सत्वा येन निःसंदेहा भविष्यन्ति । तेन सर्वं मू त्रं न येनान्यथे मन्त्रयानस्य नामसंगीत्या भगवता संदेशि-
तो वज्रपाणेरिति ॥ अतो ये परमादिबुद्धं न जानन्ति ते नामसंगीतिं न जानन्ति ॥ ये नामसंगीतिं न जानन्ति ते वज्रधरज्ञानकायं न जानन्ति ॥ ये वज्रधरज्ञा-
नकायं न जानन्ति ते मन्त्रयानं न जानन्ति ॥ ये मन्त्रयानं न जानन्ति ते संसारिणः सर्वे वज्रधरभगवतो मार्गरहिताः ॥ एवं परमादिबुद्धो मोक्षार्थिभिः स-
च्छिष्यैः श्रोतव्यः सद्गुरुणा देशयितव्यमिति ॥ ॥ इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां द्वादशसाहस्रिकायां विमलप्रभायां म-
ण्डलाभिषेकादिसंग्रहोद्देशः षष्ठः ॥ ॥ इदानीं भगवान् अतीत परमादिबुद्धात् षड्भिः यासंगीतिकारेणानन्तो यद्बुद्धं तेन संगीतं तदेव वितनोमीति ॥ ३२

तुष्टोहं ते सुचन्द्र प्रवरसुरनरैः राध्यसे दैन्यरागैः ज्ञानं वीतरागैः परमजिनकृतैर्यत्त्वयापृष्टमेतत् ॥ निर्वाणार्थं
धर्माणां पदगतिसहितं देहमध्ये समस्तं । योगं व्याख्यायमानं शृणु सुनरपते मण्डलं चाभिषेकं ॥ १ ॥

तुष्टोहं ते सुचन्द्र इत्यामन्त्रणं हे सुचन्द्र तुष्टोऽहं ते । ज्ञातः । यतो यत्त्वयापृष्टमेतत् कालचक्रयोगं ननु प्रवरसुरनरादिभिर्न ज्ञातमतस्तुष्टो

हामिति ॥ अत्र प्रवरसुराश्चाष्टमहाराजकायकादिनैवसंज्ञानासंज्ञायतनोपगान्ताः ॥ नराश्चक्रवर्त्यादयः । राक्षसा नैर्ऋत्यादयः । दैत्या अपराजि
तादयः । नागा अनन्तादयः । वीतरागा आर्यानन्दादयः ॥ परमऋषयो नारदादयः ॥ एवमुक्तैरेभिः प्रवरसुरनरादिभिर्नतानतं कालचक्रयोगं निर्वा
णाद्यं धरान्तं ॥ निर्वाणं ज्ञानधातुर्यस्यादिः ॥ अन्ते धरा पृथिवी मध्ये उत्क्रमादाकाशवायुतेजस्तोयधातवः ॥ एते धातव आकाशाद्या व्याप्यव्यापका
ज्ञानधातोः ॥ एवं व्याप्यव्यापकलक्षणो योग इति ॥ तथा भगवानाह ॥ पृथिव्यापस्तथा तेजो वायुराकाशधातुकं ॥ विज्ञानं षड्धात्वाख्यो महापुरुषपुङ्ग
व इति ॥ पदगतिसहितमिति ॥ पदं द्विधा ॥ आलिकाल्यात्मकं । तयोर्गतिः पदगतिः कण्ठतालुमूर्द्धौष्ठदन्तस्थानेषु चारः स्वरव्यञ्जनानामिति । तथ
तासहितं प्रत्याहारमन्त्रसंकेतेनेति ॥ अत्र संकेतकं द्विधा । एकं मन्त्रसंकेतकं । द्वितीयं तथतासंकेतकं ॥ तत्र मन्त्रसंकेतकं प्रत्याहारो लौकिकं ॥ तथ
ता पारमार्थिकं वागुदाहारवर्जितं ॥ यत्र प्रत्याहारसंकेतकं तत्र ॐ आः हूँ इत्यादिमन्त्रसंज्ञा ॥ यत्र तथतासंकेतकं तत्र अकारो मुखः सर्वधर्माणा
माद्यनुत्पन्नत्वादिति ॥ तथा षोडशसाहस्रिके मायाजाले भगवानाह ॥ तद्यथा भगवान्बुद्धः संबुद्धो ऽकारसंभवः ॥ अकारः सर्ववर्णाग्र्यो महार्थः पर
माक्षरः ॥ महाप्राणो ह्यनुत्पादो वागुदाहारवर्जितः ॥ सर्वाभिलापहेत्वग्र्यः सर्ववाक्सुप्रभास्वर इति ॥ पुनस्तत्रैव समाधिराजपटले ॥ अनक्षरो मन्त्र
योनिर्महामन्त्रकुलत्रयः ॥ पञ्चाक्षरो महाशून्यो बिन्दुशून्यः षडक्षर इति । तथता पारमार्थिकसंकेतं मन्त्रयाने भगवतोक्तं ॥ एवं निर्वाणं ज्ञानधातुरना
हतं । नोच्चारितं नोच्चारितस्वरव्यञ्जनलक्षणामिति ॥ आकाशधात्वाद्यं मन्त्रसंकेतकं प्रत्याहारलक्षणं कण्ठाद्युच्चारितधर्मो भगवतोक्तः ॥ अत्र प

हृस्मैनौ ऐ आर् आल् औ । ॐकै पर लव । शनैश्चरो याराबावा । इतिसप्त वा रारा सन्ध्या वीजानि यथाक्रममिति ॥ मध्ये वज्रोर्द्ध वीजमिति । उर्द्धाधः पूर्वदक्षिणप
श्चिमोत्तर वीजानां मध्ये अनाहतं वज्रकर्णिकाकारं तस्योर्द्ध वीजमनुस्वारं वामाङ्गे यत्स्थितं तत्तु परि भवति ॥ उराणारा सहिता संस्थिताधः स्वशक्तिः । तस्या
अनुस्वारस्य शक्तिर्विसर्गः । तस्मात्तराणारण्यकार इसयः । तैः सहिता शक्तिः ॥ यरागरा सहिता अधो ऽनुस्वारस्यार्द्ध चन्द्राकृतिः । स्थितास्य शक्तिरिति । पूर्वापर
चिन्हं पादे शिरसि अनाहतस्य अनुक्तत्वादिति ॥ एवं पञ्चाक्षरो महाशून्योऽवं कारो वज्रसत्वविषये । हुँकारो वज्रानङ्गसाधने इति । तस्य नाले षडक्षरो विन्दु शून्य
आधार इत्युच्यते वँकारपक्षे हुँकारपक्षे क्षकारो योनिरिति ॥ वज्रं पद्म इत्योति ॥ ज्ञानं सर्वत्र शून्यमिति ॥ ज्ञानशब्देन विसर्गः ॥ अनाहतार्द्ध सर्वचन्द्राकृतिः सर्वत्र सर्वस्मि
न् वाग्सवर्णो भवति । शून्यं सर्वत्र विन्दुरिति । शिवपदस्य हितं सर्वभावैर्विमुक्तमिति ॥ शिवमनाहतं तस्य पदं पूर्वापरचिन्हं तेन सहितं शिवं सर्वभावे विमुक्तं तदेव सर्वत्र
सर्वस्मिन् वाग्सवर्णो धर्मे पादे शिरसि वाङ्पृथिव्यो यथासंख्यं शिरउपरिकला । कलो परिविन्दुः ॥ विन्दूपरि नादो नाहताख्य इति ॥ अस्य मन्त्रपदानि ॥ एँ वँ क्षँ
हँ अँ अः आँ अँ इँ ईँ ऋँ ॠँ लृँ ॡँ उँ ऊँ एँ ऐँ अरँ आरँ अलँ आलँ औँ औ हँ हाँ यँ याँ रँ राँ वँ वाँ लँ लाँ क्षँ ॥ एवं सर्वमन्त्रपदेष्वाप्यस्य पञ्चाक्षरो महाशून्यो
व्यापको वेदितव्य इति ॥ अस्योद्देशतन्त्रराजे मायाजाले भगवतोक्तः ॥ विश्वमायाधरो राजा बुद्धविद्याधरो महान् ॥ वज्रनीशो महारक्तो विश्वकः परमाक्षरः ॥ त
था निष्कलः सर्वगो व्यापी सूक्ष्मो वीजमनाश्रवः ॥ अरजो विरजो विमलो वान्तदोषो निरामय इति ॥ राहुलगुप्तपाद संग्रहो देशः ॥ ॥ इदानीं चन्द्रकला
वृद्धि सूर्यायनां त्रिदिनवृद्धि हान्यादि संग्रहवृत्तमष्टमेवितनोमीति ॥

आद्यास्त्रिंशत्स्वराद्ये हयरवलङ्णाः सैकनेन्द्रादिग्भिश्च कायान्वर्णान्समात्रां श्वरनिदिनकरश्रूल्यपद्वन्द्विमौनैः॥ हाद्या
मन्त्राश्चनाद्याः सुरनरफणिनो भूतयो निश्चमन्त्राः इत्यादौ कादिपुक्तो भवति खलु नृपोन्यत्तरे वा त्रिधातोः॥ ८ ॥

आद्यास्त्रिंशत्स्वराद्ये हयलवलङ्णाः सैकनेन्द्रैरिति॥ अकारआदिर्येषामिवारादीनां ते चाद्याः हयरवलङ्णाः ह्रस्वदीर्घप्लुतवृद्धि ह्रादिस्वरादिशा ह्रस्वदीर्घभेदेन त्रिंशद्भवन्ति॥ ते चेन्दोः कलावृद्धिक्षयहेतुभूताः॥ प्रतिपदाद्याः पञ्चभेदास्त्रिधा भवन्ति नन्दादिभेदेन। त्रिधा नन्दा। त्रिधा भद्रा। त्रिधा जया। त्रिधा रिक्ता। त्रिधा पूर्णा। तमोरजःसत्वभेदेन मृदुमध्याधिमात्रभेदेन चेति॥ पंचदश वृद्धिकलाः शुक्लपक्षे आकाशादिधातुस्वभावेनावस्थितास्त्रिधा अत्र प्रतिपत् अ। द्वितीया इ। तृतीया ऋ। चतुर्थी उ। पञ्चमी लृ। नन्दा भद्रा जया रिक्ता पूर्णा आकाशवायुतेजउदकपृथिवीधातवो यथासंख्यं तमस उद्घाटन प्रथम मृदुमात्रेति। ततो द्वितीयप्रक्रमो गुणभेदः षष्ठी आ। सप्तमी ई। अष्टमी ॠ। नवमी ओ। दशमी ॡ। नन्दा भद्रा जया रिक्ता पूर्णा आकाशवायुतेजउदकपृथिवीधातवः॥ तमउद्घाटनप्रथमं मृदुमात्रा पूर्वकाण्डस्य या मध्यमात्रा सा भूता॥ रजउद्घाटनमात्रा मृदुरिति॥ ततः। तृतीयेकाण्डे सदयोग्यस्वरादेशाः एकादशी ए। द्वादशी ऐ। त्रयोदशी ओ। चतुर्दशी औ। पूर्णिमासीव। नन्दा भद्रा जया रिक्ता पूर्णा आकाशवायुतेजउदकपृथिवीधातवः सत्वउद्घाटन मृदुमात्रा॥ द्वितीयकाण्डे रजोमात्रा मध्यमा। प्रथमकाण्डे अधिमात्रा। अस्यापञ्चधा भेदः॥ एकादश्यां सत्वगुणभेदेन प्रथमप्रतिपत्कलाधिमात्रा बाला द्वादश्यां कुमारी। त्रयोदश्यां युवती। चतुर्दश्यां वृद्धा। पञ्चदश्यां परिपाकं गता॥ एवं प्रतिपत्कला पञ्चदश्यां परिपक्वा पूर्णात्मभिधीयते॥ एवं शुक्लपक्षे

श्रभाश्रभफलार्थं सर्वनामाक्षरैरपि ध्यानमात्राभिकोयोधः ॥ तथा प्रथमाक्षरे याः सर्वनाम्ना च यथावन्नाना मकार्यसिद्धिरिति । एतेनात्मकस्तत्वादे व्याप्तिर्नास्ति । अपितु नाहिमशिरोमन्त्रौषधीनां प्रभावः स्वाभिन्नपरिणामाज्जवतीति ॥ तत्रादौ कादिसृष्टौ आदौ अकारादिः स्वरसमूहः कादिसृष्टौ ककारादिमन्त्रजनस्तत्र भवति खलु तत्पाममन्त्ररण उत्पत्तिः । एवमनेनोक्तक्रमेण मन्त्रधातोः कामरूपात् प्रधानोऽस्तीति ॥ ॥ वृन्दकलादिविश्वमन्त्रसंग्रहे द्रमाः ॥

जन्मस्थानं स्वराणां कचटतपयुतं कादिसंयोजितानां कण्ठस्तालूर्द्धभागो रदपवनहृदिजेष्वोष्ठदन्तौ हृदूष्माः ॥ आदि
क्षीपचक्रे हृदिगतशिरसो नाभिचक्रे च वृत्ते विश्वे दृक्षेचरत्ते श्रीशिकनकनिभे क्षेत्रधात्वादि दैवी ॥ ९ ॥

इदानीं स्वराणां जन्मस्थानादि संग्रहतत्त्वं विवृणोमि ॥ जन्मस्थानमित्यादिना । जन्मस्थानं स्वराणां कचटतपयुतं कादिसंयोजितानामिति ॥ ४१
हृस्वराः पूर्वोक्ता अकारादयः । अ इ उ ऋ ऌ पञ्चस्वराणां जन्मस्थानं पञ्चधा यथासंख्यं किंभूतानां । कचटतपयुतानां कादिसंयोजितानामिति ॥ यथासं-
ककारादिवर्णसंयोजितानामिति ॥ कादि अन्येका स्वरयोजितानां कशष य स संयोजितानामिति ॥ आदिग्रहणात् स्वरवर्णसहितानामिति ॥ नभाव-
ह ॥ अकुहविसर्जनीयाः कण्ठ्याः ॥ इचुयशास्तालव्याः ॥ ऋटुरषा मूर्द्धन्याः ॥ उपूपध्मानीया ओष्ठ्याः ॥ लृतुलसा दन्त्या इति ॥ जन्मस्थानं कण्ठतालूर्द्ध-
भागे रदपवनहृदिजे स्थाने ॥ ओष्ठदन्तौ अहुभूम्यौ जन्मस्थाने ॥ तत्राकारादीनां यथासंख्यं जन्मेति तत्स्थानेषूच्चारितानां शब्दार्थप्रतिपत्तिरिति ॥ अत्र

शब्दार्थप्रतिपत्तिरिति ॥ अत्र मन्त्रजापविधिनिमित्तं जन्मस्थानं वेदितव्यं । अपरं भावनास्थानार्थं कायचक्रभेदेनोच्यते ॥ आदेरुष्णीषचक्रे हृदिगल
शिरसोर्नाभिचक्रे क्रमेण । आदेरिति । अकारादेः स्वरस्य यथासंख्यं आकाशादिजातिभेदेन । यथासंख्यं उष्णीषादिचक्रभावनार्थं जन्मस्थानं वेदि
तव्यं ॥ अतो ष्णीषचक्रे अजहविसर्जनीया भाव्याः ॥ इउयशा हृच्चक्रे ॥ ऋऌरषाः कण्ठचक्रे ॥ उअवोपध्मानीया ललाटचक्रे ॥ ऌखुलसा नाभिचक्रे भावनी
या इति विश्वे विश्ववर्णा हरिते उष्णीषचक्रे । कृष्णे हृच्चक्रे । रक्ते कण्ठचक्रे । शशिवर्णा ललाटचक्रे । कनकनिभे नाभिचक्रे ॥ स्कन्धधात्वादिदैवे यथा
संख्यं विज्ञानस्कन्धाकाशधात्वादिदैवे । उष्णीषचक्रे । संस्कारवायुधात्वादिदैवे हृच्चक्रे । एवं वेदनातेजोधात्वादिदैवे कण्ठचक्रे । संज्ञाउदकधात्वादिदै
वे ललाटचक्रे । रूपपृथिवीधात्वादिदैवे नाभिचक्रे ॥ इति स्कन्धधात्वादिदैवे वक्ष्यमाणे अङ्गन्यासादिकं वेदितव्यमिति । ॥ स्वराणां जन्मस्थाननिर्देशः ॥
इति श्रीपरमादिबुद्धोद्धृते श्रीकालचक्रतन्त्रराजटीकायां द्वादशसाहस्रिकायां विमलप्रभायां लोकधातुसंग्रहोद्देशः सप्तमः ॥

वास्वर्ज्वालान्मेरुसीमो नरकफणिपुरं योजनानां द्विलक्षं मेरोर्लक्षं प्रमाणं ग्रहगतानिलयाः सार्धविंशत्सहस्रं ॥ ग्रीवा पश्चा
घ्राणस्य ध्रुवमपरमचलं पञ्चविंशत्तथैव नष्टाख्ये शून्यमेकं त्रिभुवनरहितं निर्गुणं न क्षयीनं ॥ १० ॥

इदानीं सत्त्वाशयवशेन लोकधाउमानं भगवतोक्तं । परमादिबुद्धानन्तश्रिया सर्वाकारवरेण द्वादशमाद्यवृत्तैः सञ्जातेन न देव वितनोमीति ॥ वाय्व

स एव दिनकरवपुर् अज्ञानान्धकारध्वंसकत्वात् ॥ किमर्थं पुनर् उक्तं वचनं दिनकरवपुर् इति भगवतः इति कस्यचिद् वचनं भविष्यति ॥ तस्माद् उच्यते ॥ इह सत्यम् इदं वचनं योऽज्ञानकायः स एव दिनकरवपुर् अज्ञानान्धकारध्वंसकत्वाद् इति ॥ किं तर्हि अन्येऽपि विज्ञानवादिनो बौद्धाः सन्ति तेषां विज्ञानधर्मतानिराकरणाय ज्ञानकायो दिनकरवपुः विज्ञानधर्मतातीतः सम्यक्संबुद्ध इति ॥ पुनर् उक्तं वचनं दिनकरवपुर् इति । इह विज्ञानवादिनां मध्ये कश्चिन् ज्ञानकायो दिनकरवपुः सम्यक्संबुद्धोऽभूत् ॥ इह कस्माद् विज्ञानवादिनां मध्ये कश्चिन् न च ज्ञानकायो दिनकरवपुः सम्यक्संबुद्धोऽभूद् इत्य् उच्यते ॥ इह विज्ञानवादिनां विज्ञानधर्मे स्थितत्वात् सम्यक्संबुद्धस्य विज्ञानधर्मतातीतत्वाद् इति ॥ तथा च नामसंगीत्याम् अनागतेनोक्तं प्रत्यवेक्षणाज्ञानस्तवे त्रयोविंशतितमेन श्लोकेन । तद् यथा ॥ विज्ञानधर्मतातीतो ज्ञानम् अद्वयरूपधृक् ॥ निर्विकल्पो निराभोगस् त्र्यध्वसंबुद्धकार्यधृग् इति ॥ अतो ज्ञानकायो दिनकरवपुः सम्यक्संबुद्ध इति पुनर् उक्तं वचनं भगवतः ॥ नन्वयः तत्रेऽभिधेयः सज्ज्ञानकायो अरूपी यश् च पद्मपत्रायताक्षः सरूपी । किमर्थं पद्मपत्रायताक्षम् इति भगवतो वचनम् इह कस्यचिद् अभिप्रायो भविष्यति । तस्माद् उच्यते । इह स्थित्य वक्तव्यं वा तज्जनैः पद्मपत्रायताक्षः तत्रेऽभिधेयो ऽरूपी तन्त्रे । इह पद्मशब्देन नीतार्थेनाकाशधातुर् उच्यते ॥ तस्मिन्न् अभ्रखधातौ पद्मपत्राणीव [illegible]दीर्घस्वभावत्वेनावस्थिताः सत्त्वा इति पद्मपत्राणि तेषाम् अनन्तयावत् । शता[illegible]णि यस्य भगवत आयतानि स पद्मपत्रायताक्ष इति । अत्र ह नामसंगीत्याम् उक्तं भगवता । आदर्शज्ञानस्तवे षष्ठश्लोकेन ॥ तद् यथा । वज्रज्वालाकरालाक्षो वज्रज्वालाशिरोरुहः ॥ वज्रावेशो महावेशः शताक्षो वज्रलोचन इति ॥ अतो भगवतो वचनात् पद्मपत्रा

यताक्षः सम्यक्संबुद्धो भगवान्नृपाहित इति ॥ तं बुद्धं सिंहासनस्थं । सिंहासनं खधातुः ॥ अपरं च चन्द्रसूर्याग्निमण्डलं सिंहासनं तस्मिन्स्थितः सिंहासन
स्थ इति । इत्युक्तं तन्त्रे भगवानाह ॥ एरहस्ये खधातो वा भगे धर्मोदये भुजे ॥ सिंहासने स्थितो वज्री उत्तरासंत्रान्तरे मया ॥ वं वज्री वज्रसत्वश्च वज्र
भैरव ईश्वरः ॥ हेरुकः कालचक्रश्च आदिबुद्धादिनामभिः ॥ नानाविषयसंज्ञाभिः स्थानमाधारलक्षणं ॥ आधेयश्च मया प्रोक्तो नानासत्वाशयेन
च ॥ सर्वज्ञो वज्रधृग् शास्ता बुद्धः सिंहासने स्थितः ॥ देशकः कालचक्रस्य सुचन्द्राध्येषितस्त्वया ॥ अतः सर्वज्ञो बुद्धो भगवान् लौकिकलोकोत्तरधर्म
देशको देवासुरमनुष्याणां शास्ता परमकारुणिकोऽकारणवत्सलः सर्वावरणनिर्मुक्त इति ॥ अथ हरिहरादीनामपि बुद्धो भगवान् शास्ता सर्व
ज्ञः ॥ नान्यः कश्चित् त्रिसाहस्रमहासाहस्रे लोकधातुषु अनन्तानन्तसत्वानां अनन्तानन्तरूपैर्युगपच्च लौकिकलोकोत्तरधर्मदेशकः ॥ कस्मात्प्रा
देशिकैर्देवदैत्यजातौ संभूतत्वादिति ॥ प्रादेशिकैः संस्कृतवचनात् ॥ न तेषां सा सर्वज्ञभाषा नानाधिमुक्तिकानां सत्वानां स्वस्वभाषान्तरेण लौ
किकलोकोत्तरधर्मं प्रतिपादयन्तीति ॥ इह मर्त्यलोके प्रत्यक्षं इदमेते संस्कृतभाषया ये देशिता गीतासिद्धान्तपुराणधर्माः सर्वे प्रादेशिकाः ॥ च
तुर्वेदाश्च । कुतः ब्राह्मणक्षत्रियवेदाध्ययनतः । इह ब्राह्मणक्षत्रियाभ्यां वेदाध्ययनं कर्तव्यं न हि विट्शूद्रादिभिरिति । तथा गीतासिद्धान्तपुराणाध
र्मा ब्राह्मणक्षत्रियविट्शूद्रैश्चतुर्वर्णैः श्रोतव्या ब्राह्मणादयस्त्वतः प्रव्रज्याग्रहणाच्च न कैवर्तादिभिरिति ॥ अतो धर्मप्रतिषेधवचनान्नै देशिता धर्माः
प्रादेशिकाः सर्वसत्वोपकारिणो न भवन्तीति । इह मर्त्ये येन कारणेन प्रादेशिकसंस्कृतभाषया नानाधिमुक्तिकानां सत्वानां नानारूपैर्लौकिकलो

कविनस्य कुमारिकाप्रतिसेनोपमस्य न रूपलक्षणं परमाणोरभावात् || नारूपलक्षणं शून्येऽपि विद्यमानत्वात् || अतः संवृतिः शून्यतारूपिणी || शून्यता सं-
वृतिरूपिणी लोकोपमामतिक्रान्तत्वादस्ति न स्त्रिचय चिन्त्यमचिन्तत्वा श्वतोच्छेदधर्मलक्षणापगतं शून्यताकरुणाभिन्नमिति || परमार्थसत्यत उभ-
यचित्तयोर्वैश्वरूप्यादस्तिनास्तिव्यतिक्रान्तो भावाभावक्षयो वज्रयोगो ऽक्षय इति तथागतवचनं निरन्वयत्वात् || अत्र मूलतन्त्रे भगवानाह || अस्तिनास्ति-
व्यतिक्रान्तो भावाभावक्षयो ऽक्षयः || शून्यताकरुणाभिन्नो वज्रयोगो महासुखः || परमाणुधर्मतातीतः शून्यधर्मविवर्जितः || शाश्वतोच्छेदनिर्मुक्तो वज्र-
योगो निरन्वय इति || एवं मन्त्रानन्तरेण वज्रयोगस्याभिधानेनोक्तो महामुद्रासिद्धिविषय इति || असौ विशुद्धो वज्रयोग एकक्षणाभिसंबुद्धः [illegible]
परमाक्षरः | स सहजानन्दः निकाम भवे स्थितः || न रूपभवे स्थितो नानारूपभवे स्थितः || निकामनिर्वाणे स्थितो न रूपनिर्वाणे स्थितो नारूपनिर्वाणे स्थि-
तः भवनिर्वाणाप्रतिष्ठितत्वात् || नोभये स्थितः परस्परविरोधात् || भवनिर्वाणयोरन्ये ऽस्प छायातपयोर्यथा || यथाग्निनीरयोरन्यतो न सदकारणे स्थितो
नउदकरूपव्यापाने स्थितः || एवं सर्वत्र वज्रयोगो बाह्ये ऽध्यात्मनि परे योगिना ऽवगन्तव्य इति | सैकक्षणाभिसंबोधिर्नाम परमाक्षरसुखक्षण
इति || असौ एकक्षणासंबुद्धः सर्वक्षणाविभावको भवति श्वाससंख्यान्तं यावत् || ततः पूर्णे तस्मिन् क्षणे ऽभिसंबुद्धः सम्यक्संबुद्ध इति || इह यस्मि-
न् क्षणे धर्माणामुत्पादो भवति || न तस्मिन् क्षणे स्थितिर्भङ्गः || इह यस्मिन् क्षणे स्थितिर्भवति तस्मिन् क्षणे न भङ्गो नोत्पादः || इह यस्मिन् क्षणे भ-
ङ्गः सर्वधर्माणां भवति तस्मिन् क्षणे नोत्पादो न स्थितिर्भवति | एवं यथाक्रमेण सर्वधर्माणां क्षणोत्पादः क्षणस्थितिः क्षणभङ्गो न स्यादिति

ङ्गापत्त्वनसंभवति सर्वधर्माणां ॥ अनेककाले उत्पादस्थितिभङ्गक्षणानां नैका ॥ अथ यथाक्रमेणोत्पादक्षणात् स्थितिक्षणाः स्थितिक्षणाद्भङ्गक्षणाः ॥ भङ्गक्षणात् उत्पादक्षणो भवति ॥ एतदेव परमार्थं युक्त्या न घटते ॥ इह प्राक्क्षणादनिरुद्धादपरक्षणो न भवति ॥ तथा निरुद्धान्न भवति ॥ यथा न नष्टबीजादङ्कुरो नानष्टबीजादङ्कुरो भवति ॥ एवं परमार्थसत्ताभावादेव क्षणानामिति ॥ एकानेकवियोगादिति ॥ इह यदेकक्षणाभिसंबद्धः सर्वक्षणाविभावक इति ॥ तत्र प्रथमपरमाणोरेकक्षणाभिसंबद्धः सन् ॥ एकविंशतिसंख्यया पश्चात् परमाणोरेकक्षणाभावकः ॥ तदुपरि सर्वक्षणाभाव एकानेकरहितः ॥ परमाणुद्वययोगोत्पन्नानां परमार्थः सत्ता सत्तारहितत्वात् । यावत् लौकिकसत्ता तावदेकानेकविचारो धर्माणां क्षणिकचित्ते प्रतिभासनात् ॥ यदा क्षणधर्मरहितं चित्तं तदा निःस्वभावमित्युच्यते ॥ अतो निःस्वभावपक्षो ऽपक्षो भगवतो ऽपक्षः ॥ पक्षो नाम भावो ऽभावः ॥ सदसत् ॥ अस्तिनास्ति ॥ एको ऽनेकः ॥ शाश्वत उच्छेदः ॥ भवो निर्वाणं ॥ रूपमरूपं ॥ शब्दो ऽशब्दः ॥ क्षणो ऽक्षणः ॥ रागो ऽरागः ॥ द्वेषो ऽद्वेषः । मोहो ऽमोहः ॥ इत्येवमादिपक्षः परस्परापेक्षिकत्वादिति ॥ अनेन पक्षेण रहितमप्रतिष्ठितनिर्वाणं ज्ञानं निःस्वभावमिति ॥ एकानेकक्षणारहितं ज्ञानमनन्तमित्युच्यते जिनैः ॥ तदेव सत्त्वानां स्वचित्ताशयवशात् चतुर्विधं प्रतिभासते ॥ षोडश ॥ कथं तत् । आनन्दपरमविरमसहजभेदेन चतुर्विधं ॥ तत्र कायानन्दो वागानन्दश्चित्तानन्दो ज्ञानानन्दः ॥ एवं कायपरमानन्दो वाक्परमानन्दश्चित्तपरमानन्दो ज्ञानपरमानन्दः ॥ एवं कायविरमानन्दो वाग्विरमानन्दश्चित्तविरमानन्दो ज्ञानविरमानन्दः ॥ एवं कायसहजानन्दो वाक्सहजानन्दश्चित्तसहजानन्दो

र्विन्दुस्पोत्तरे ॥ अस्य संज्ञा चिन्हं पवर्गात्मकं मकारं व्यञ्जनमण्डलमार्यं चतुर्थं विन्दुश्शून्यमिति ॥ रूपस्कन्धः। पृथिवीधातुः। कायेन्द्रियगन्धः। पादप्रधानादयः
ट्या निरावरणा शून्यता पञ्चाकारा पश्चिमे चिन्हं स्यात् पश्चिमे ॥ अस्य संज्ञा चिन्हं तवर्गात्मकं नकारं व्यञ्जनमण्डलमार्यं पञ्चमं विन्दुश्शून्यमिति ॥ ज्ञानस्कन्
धः। ज्वालधातुः मनः शब्दादिर्वेन्द्रियं मूत्रस्रावः। एषां निरावरणा शून्यता सर्वाकारा मध्ये नाहत विन्दुस्वभावः॥ अस्य संज्ञा चिन्हं सवर्गात्मकं सका
रं व्यञ्जनमण्डलमार्यं षष्ठं विन्दुश्शून्यमिति ॥ एवं विन्दुश्शून्यषट्कं कायादिभेदेन [illegible] षट्कारः शून्यता सा [illegible] प्रतिसेना स्वरूपिणी ॥ अन्य व्य
ञ्जनानि स्कन्धधात्वादीनां ॥ ॥ क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह क्ष [illegible] इ ए ल [illegible] स्वर
व्यञ्जनानां ह्रस्वदीर्घभेदेन स्कन्धधात्वादिभेदो ज्ञातव्य इति ॥ कायभेदेन स्कन्धेन्द्रिया ह्रस्वस्वरव्यञ्जनधर्माः ॥ धातुविषया दीर्घस्वरव्यञ्जनधर्माः ॥
तु माधातुविकारभेदेन षड्भेदा भवन्ति ॥ षट्स्कन्धाः षडिन्द्रियादिभेदेन षड्विधाः स्कन्धा भवन्ति ॥ तद्यथा षड्रसाः षड्धातवः षडिन्द्रिया
णि। षड्विषयाः। षट्कर्मेन्द्रियाणि। षट्कर्मेन्द्रियविषया इति ॥ षड्रसधातुविकाराः श्रोत्रविज्ञानादिषड्विज्ञानानि। एवं षट्संस्काराः। षड्वेदनाः। षट्
संज्ञाः। षड्रूपस्कन्धाः। षड्ज्ञानस्कन्धा इति ॥ स्कन्धविकाराः [illegible] विस्तरेण [illegible] अत्रोक्तानुक्रमेण [illegible] इति ॥ इदं च [illegible]
स्वरसमूहः शुक्रचन्द्र इत्युच्यते। विन्दुशून्यषट्कं व्यञ्जनसमूहो रजः सूर्य इत्युच्यते ॥ अत्र शुक्रं [illegible] एवंकारो वज्रं। रजः सूर्य एकारः पद्मं ॥ अन
योर्वज्रपद्मयोः कालवज्रलग्न इति। वज्रपरमस्थ [illegible] उक्तं। [illegible] सर्वाकारप्रज्ञाविम्बं [illegible] ॥ ज्ञानविज्ञानाधिष्ठितनिरावरणा [illegible]

नत्वं जगद्दर्पणकारि भवति । एतदेव कायवाक्चित्तज्ञानैकयोगं चतुर्वज्रकारणं भवति ॥ ज्ञानं पश्चिमवक्त्रं पीतं । चित्तं पूर्ववक्त्रं कृष्णं । चन्द्रः का
यवक्त्रं सितउत्तरं । सूर्यो वाक्वक्त्रं दक्षिणे रक्तमिति ॥ अनयोश्चन्द्रार्कयोः षड्धातवो गोत्रभेदेनावगन्तव्याः ॥ तेच पृथ्वी आपस्तेजो वायु
रसमहारसाश्चेति ॥ एषु शुक्रे त्रयउत्पन्नास्त्रयोऽनुत्पन्नाः ॥ पृथ्वीधातुः ॥ तेजोधातुः । महारसधातुः । एते धातवो रजसि उत्पन्नाः अत्र महार
सस्य स्थाने धातुसंज्ञेति ॥ अवशेषाः शुक्रे रजसि चोत्पन्नाः ॥ तोयधातु वायुधातु रसधातुः । एते धातवः शुक्रे उत्पन्नाः ॥ उदसभागोरा काशधात सं
ज्ञेति । रजसि त्रयउत्पन्नाः ॥ त्रयोऽनुत्पन्नाः ॥ एवं चन्द्रार्कयोरुत्पन्नास्त्रयो धातवः कायवाक्चित्तानि यथाक्रमेण भवन्ति गर्भजानामिति ॥ चन्द्रस्य
धातव उपायस्य कायवाक्चित्तानि । सूर्यस्य धातवः प्रज्ञायाः कायवाक्चित्तानि शुक्ररजउत्पन्नकारणादिति ॥ एते धातवः षडिन्द्रियादीनां षट्कुला
नीति ॥ एवं कायवाक्चित्तकुलानि स्वभावकुलेन सार्द्धं चतुःकुलानि भवन्ति ॥ कायत्रयं कायचतुष्कं भवति ॥ अवस्थात्रयमवस्थाचतुष्कं भव
ति ॥ एवं पञ्चधातुकुलानि ज्ञानधातुना सह षट्कुलानि भवन्ति । तथा पञ्चस्कन्धकुलानि । ज्ञानस्कन्धेन सार्द्धं षट्कुलानि भवन्ति ॥ गर्भजानामि
ति ॥ कन्याया द्वादशाब्दैः । पुंसः षोडशाब्दैः । कन्याया रजःकालं यावत्त्रिकुलं पञ्चकुलं वेदितव्यं ॥ पुरुषस्य शुक्रच्युतिकालं यावत्त्रिकुलं पञ्चकु
लं वेदितव्यं । ज्ञानधातूत्पन्नकाले तु अभ्यासे षट्कुलं षट्कुलमामरणादिति । तथा मूलतन्त्रे ॥ भगवानाह ॥ त्रिकुलं पञ्चकुलं चैव स्वभावैकं शतंकु
लमिति ॥ इदानीं कुलकृतीनाम उच्यते ॥ वज्रमित्यादि । इह वज्रखान्तानवित्तानादयः । षट्स्कन्धा इति ॥ देवाङ्गनाश्चेति ॥ चकारात् बोधिसत्त्वा मनःप्र

अहविसर्जनीयाः कण्ठ्याः ॥ इचयशास्तालव्याः ॥ ऋटरषा मूर्द्धन्याः ॥ उपूपध्मानीया ओष्ठ्याः ॥ लृतलसा दन्त्याः ॥ एवमुभयस्थानीयाः ॥ त्रिस्थानीयाः ॥ चतुःस्थानीयाः ॥ पंचस्थानीयाः ॥ मन्त्राः कृत्रिममन्त्राश्च वैदिकाः ॥ व्याहारमन्त्रसंकेतेनेति । तेन सर्वसंज्ञारूपैः संहितानां भावानां प्रतिपादको लौकिकसिद्धिसाधनाय । नभूतसंकेतकं व्यवहारवर्जितं पारमार्थिकं महामुद्रासिद्धिसाधनाय कर्ममुद्राज्ञानमुद्रासिद्धिरहितं भगवता सर्वतन्त्रराजेषु निर्दिष्टमिति ॥ देहमध्ये समस्तमेतद्योगं व्याख्यायमानं मया शृणु त्वं हे नरपते मरणं चैवाभिषेकं वक्ष्यमाणक्रमेण सर्वसत्त्वानां निरावरणपदप्राप्त्यर्थमिति भगवतः प्रतिवचनसंग्रहोद्देशः ॥ ॥ इदानीं भगवतो लोकधातुसंग्रहं मञ्जुश्रियासंगीतिकारेण परमादिबुद्धादुद्धृतेनोद्देशेन विवृणोमि ॥

कालाग्निर्मेरुवाय्वग्निजलधराद्वीपशैलाः समुद्राः ऋक्षताराऽर्कचन्द्रग्रहगणऋषयो देवभूताश्च नागाः ॥
तिर्यग्योनिश्चतुर्धा विविधमपि हि ते मातृगा नारकाश्च संभूताः शून्यमध्ये लवणमिव जले त्वण्डजाश्चाम्बुमध्ये ॥ ४ ॥

अत्र मन्त्रनये । यानत्रितयनिर्जातं एकयानफलस्थितो मन्त्री भगवतोक्तः ॥ यः पुनर्यानत्रितयाभिसन्धं न वेत्ति स कालात्सर्वज्ञमार्गनष्टो भवति । मन्त्रयाने संध्याभाषान्तरमजानमानः प्राणातिपातादिकं । मठविहारद्रव्योपभोगं कृत्वा मार्गभ्रष्टो वेदपक्षग्रहणेन बाह्यविषयोपभोगासक्तः सन्नरकं याति । आचार्यव्यपदेशेन रत्नत्रयं विडम्बयित्वा ॥ अत्र चत्वारो वृद्धाः परलोके इहलोकार्थमाराधनीयाः सत्त्वैः ॥ एकज्ञानवृद्धोऽभिज्ञाभिः संपादितायु

मि माश्रोवस्त्राचार्यो भिक्षुर्गृहस्थो वा पूज्यो दशादिक्षु भगवतोक्त इति ॥ तस्याभावे तपोवृद्धः काषायधारी काषायधारिणां वषाग्रेण । मन्त्रिणामभिषेकेण गृहस्थाचार्याणां सर्वे वयस्तपोवृद्धत्वात् ॥ गृहस्थानामभिज्ञाभावात् । श्रुतवृद्धः परिणतः प्रज्ञः शासनोद्योतकः परवादिनामारकापिकानां दमकः । एते परलोकार्थमाराधनीयाः सर्वैरिति ॥ धनवृद्धो राजा । इहलोकभोगार्थिभिराराधनीयः । एवं चत्वारो वृद्धा आराधनीयाः सर्वैरिति । अतो यानत्रयज्ञाता न तपोवृद्धः । गृहस्थस्य श्रावकस्याने प्रातिमोक्षश्रुताधिकारो नास्ति यावत्तपस्वी न भवति । अतो गृहस्थो वृद्धो न भवति । अभिज्ञतया विना न च गृहस्थानां प्रव्रज्यारहितानां मठविहारोपभोगः छत्रचिंयाने भगवतोक्त इति ॥ अतो यानत्रयपरिज्ञाता यत्र धर्मं वैभाषिकामनमाश्रितं परमाणुसंकोहात्मक लोकधातुरस्ति ॥ तथाहि पुर्गलो भारवाहो न नित्यो नानित्यो भगवानीति भगवतो वचनात् लोकधातूत्पादनिरोधौ वेदितव्याः ॥ संवर्त्तो विवर्तकालश्चेति ॥ अतः संवर्तोत्पादकालवशात् भूतेभ्यो भवतीति । भूतानीति लोकव्यवहारेण चक्षुरादीनामिन्द्रियाणामगोचराणि ॥ परमाणुरूपेणावस्थितानि ॥ पृथिव्यप्तेजो वायुरसद्रव्याणि ॥ पञ्चचतुस्त्रिद्व्येकगुणात्मभावानि ॥ षष्ठो गगनो धर्मधातुः सर्वत्रव्यापक इति भूतानि ॥ तेषु भूतेषु परमाणुभूतादकालवशात् सन्तीति । तेषु परमाणुष्वमध्ये प्रथमं तावत् वायुपरमाणवो ऽन्योन्याश्लिष्टा भवन्ति । तस्मात्संयोगात्कम्पश्च चञ्चलतागमना वायुरित्युच्यते ॥ एवमग्निपरमाणवः आश्लिष्टाः सन्तो वायुसंयुक्ता विद्युदग्निरित्युच्यते ॥ एवं तोयपरमाणव आश्लिष्टाः सन्तो वाय्वग्निसंयुक्ता वृष्टिजलमित्युच्यते ॥ एवं पृथिवीपरमाणव आश्लिष्टा इन्द्रचापं गगने दृश्यमिधरा इत्युच्यते ॥ रसपरमाणवः सर्वत्रव्यापकाः ॥ एवं पञ्चभूतेषु वायुज्वलनजलधरा

चन्द्रकला वृद्धिः ॥ पञ्चदशभेदभिन्नानन्ते कृष्णप्रतिपदादौ तमःप्रवेशकालः षोडशी कलोच्यते ॥ तस्यास्तेष्वेकाप्रति प्रतिपत्कलायाः ॥ कृष्णप्रतिपदि तमसि प्रवेशो भवति ॥ द्वितीयायामेककला परिपक्वा भवति ततो द्वितीयायां द्वितीयापि तमसि प्रविशति । तृतीया परिपक्वा भवति ॥ एवं कृष्णतृतीयायां सापि तमसि प्रविशति ॥ एवं चतुर्दश्याः पञ्चदश्याः कलापर्यन्तं परिपक्वा तमसि प्रविशति ॥ ततोऽमावास्यायां प्रथमकलोदयाभिमुखी षोडशांशोदयादिभागे राहुप्रवेशो भवति ॥ एवं द्विधा ग्रस्ता चन्द्रमसः पूर्णिमायां पूर्णा कलान्तं ग्रसति । अमावास्यां प्रथमकलोदयादि राहुरिति । अत्र कृष्णपक्षे संहारक्रमेण तमसः प्रवेशः । पृथिव्यादिना । ततः सृष्टिक्रमोदितानां पञ्च कृष्णप्रतिपदि पृथिवी तमसि शुक्लप्रतिपदाकाशधातुर्दल प्रविष्टा तमसाच्छादिता भवति ॥ द्वितीयायां वायुकला उदकतमसाच्छादिता भवति । तृतीयायां वह्निकला वह्नितमसाच्छादिता भवति ॥ चतुर्थ्यामुदककला वायुतमसाच्छादिता भवति । पञ्चम्यां पृथिवीकला आकाशधातुतमसाच्छादिता भवति ॥ एवं प्रथमकाण्डे तमःप्रवेशमात्रा मृदुर्भवति ॥ ततो द्वितीयकाण्डेऽप्युत्क्रमेण तम आच्छादनक्रिया ॥ तस्मिन्द्वितीयकाण्डे तमो मृदुमात्रा । पूर्वकाण्डे मध्यमात्रा । एवं तृतीयकाण्डेऽपि तम आच्छादनक्रिया । तस्मिन्काण्डे मृदुमात्रा द्वितीयकाण्डे मध्यमात्रा ॥ तृतीयाधिमात्रा ॥ तत्राधिमात्रायाः पञ्चधा भेदः । एकादश्यां बालः । ततोऽधिमात्राभेदेन । द्वादश्यां कुमारः । त्रयोदश्यां युवा । चतुर्दश्यां वृद्धः । अमावास्यां परिपक्वो भवति । एवं द्वितीयकाण्डे मध्यमात्रायाः ॥ तृतीयकाण्डे तमो मृदुमात्रायाः ॥ ततः शुक्लप्रतिपदागमे पक्वतमसः पृथिवीधातुलक्षणायाः पश्शरणं भवति ॥ द्वितीयायामुदकतमसः । तृतीयायां वह्नितमसः । चतुर्थ्यां वायुतमसः । पञ्चम्यामाकाशधातुतमसः ॥ एवं प्रथमकला मृदु

मात्रा। पृथिवीपूर्णा पक्षा भवति। द्वितीया वृद्धा। तृतीया युवती। चतुर्थी कुमारी। पञ्चमी बाला॥ षष्ठ्यादयोऽस्तंगता तिष्ठन्ति॥ एवं मूडका ऐकलायां मृ
त्पाकेन च तमःप्रवेशः स्यात्॥ कृष्णपक्षे यावत् तृतीयाधिमात्रा पाकेनागच्छतीति। आसां प्रत्येकं पञ्चदशकलानां षोडशमे दिने अस्तंगतानामुदयः।
उदितानां षोडशमे दिने अस्तंगमनं॥ एवं चन्द्रकला आद्यास्त्रिंशत् स्वराः संज्ञाः कलाः शुक्लाः तमःप्रविष्टाः॥ कृष्णा उपचारेणासंज्ञिन्यः॥ आसां स्वरा मंत्र
पदानि शुक्लकृष्णानां। प्रतिपदादीनां॥ अँ इँ ऋँ उँ लृँ अँ एँ अरँ औँ अलँ हँ यँ रँ वँ लँ १५ लाः वाः राः याः हाः आलः औः आरः ऐः आः लृः उः ऋः इः
आः। १५। इति शुक्लपक्षे चन्द्रो बिन्दुविभूषितः॥ पञ्चदशकलात्मा॥ सूर्यः कृष्णपक्षे विसर्गभूषितः पञ्चदशकलाच्छादकः॥ ह्रस्वश्चन्द्रो दीर्घः सूर्यः
एवं शुक्लाश्चन्द्रो वृद्धिः सूर्यः॥ पूर्ववत् हादय इति कादयो वर्गान्समात्रांश्च रतिदिनवत्। अन्त्यषड्वर्गिमोनेरिति। इह ककारो येषां वर्गाणामादिरिति ककारा
दयो वर्गाः॥ वर्गा इति पञ्चाक्षरसमूहः॥ पञ्चाकाशादिपृथिव्यादिभेदेन पठ्यते। स्वरसमूहः सर्वदाकाशादिभेदेन पठ्यते। अत्र प्रत्याहारो ज्ञापकः सव
र्व्यञ्जनपाठे अत्र शुद्धव्यञ्जनानि त्रिंशत्॥ यकारादीनि स्वरविकाराणि॥ अन्यत्र ककारादिना व्यंजनपाठेन संगृहीतानि॥ आदिस्वरकारेण पठितानीति
तद्यथा॥ अइऋउलृक्॥ अएअरओअलच्॥ हयवरलञ् इति॥ ततोऽङञणमनन्॥ घझढभधध्॥ गजडबदद्॥ खछठफथथ्॥ कचटपतत्॥ शष
थ स्पृष्टिनिप्रथमानां पाठात्॥ यकारादीनि ककारादिवर्गमध्ये न भवन्ति॥ संप्रसारणेन स्वरधर्मित्वात्॥ तस्मात्त्रिंशद्व्यंजनात्मकाः कादयः षड्वर्गाः कच
टपतसाः। आकाशवायुतेजउदकपृथिवीज्ञाने धातुस्वभावाः कण्ठतालुमूर्धोष्ठदन्तोच्चारणवशादिति॥ षष्ठः प्रत्येकोच्चारणेन पञ्चधात्मकः।

ज्ञानेन ह्रसीयस्त्व इति । वा सत्त्वानेन ह्रसीयस्तोऽनरकक्रुशिखरं योजनानां द्विलक्षमिति ॥ इह लोकसंवृत्या नानाधिमुक्तिसत्त्वाशयवशेन मानं सत्त्वानां देशितं प्र
तिभासेन लोकधातोः परमार्थतो मानोन्मानं लोकधातोर्न संभवति । सत्त्वानां पुण्यपापवशादिति ॥ इह यस्माद्गुहायां पञ्चहस्तप्रमाणायां वीतरागो बोधि
सत्त्वो वा वसति । तस्मात्तथागतसंघुराप्रज्ञानभाजनस्य प्रभावेन न क्लिष्टत्वेन न तेसे सचक्रवर्ती आगतः प्रविशति न च सा केनचिद्विसारिता । न च न स्यां
गुहायां प्रविष्टस्य चक्रवर्तिसैन्यस्य संकीर्णता भवति ॥ एवं लोकधातुमानमपि परमार्थतो वेदितव्यं ॥ अनन्तलोकधातुमानं तथा वासितेन भादेहे
इति वचनात् लोकधातुमानं लोकधातुमपरगुणार्थं कायधातुर्मानं कायमपरगुणार्थं कायमपरगुणमिति वचनात् ॥ यथा वासेन ह्लौकिकमानेन
लक्षयोजनोच्छ्रयः ॥ तथा शरीरं कालं हस्तमेकं उच्छ्रयेण हस्तमानेन कायश्चतुर्हस्तः । मेरोर्लक्षयोजनमानेन लोकधातुश्चतुर्लक्षो भवति ॥ अन्यथा
यथा वासेन भादेहो न भवति । तेषमस्यात् ॥ एवं लोकधातुमानं । संवृत्या यथा तथा भवतु । अत्र प्रतिज्ञानस्य भगवतस्तावपोह्य दादित्याद्या ॥ किं च प्रतिज्ञा
पुरापज्ञानसम्भारविषये । यतो लोकधातुमानविषये कोशमतं नानाविधं वेदसि नानाभिप्रायेण ॥ एकत्र मारुणकोटियोजनायामभिजित्स्य वचन
न ॥ सर्षपस्थादीनामपि भावनाय तत्र मारणमानविध्वंसनार्थं यद्गणितानन्तराशिगोचरा अनन्ता लोकधातुमानं प्रतिष्ठापितं ॥ अतोऽत्र माने बोद्धव्यो आग्रहश्
भ्रान्तिरियं न कर्तव्या ॥ यथा भगवता लोकधातोर्मानं नमश्चिन्त्यलक्षमभिकृतं ॥ कथं लोकधातोश्चतुर्लक्षयोजनमानं । अत्र किं भगवान् सत्त्वानां दीनिका
स्यान्निश्चितं भवति । तद्वचनं पालितैर्न मन्तव्यं सत्त्वाशयवशेनेति ॥ तथा चाह ॥ नानाधिमुक्तिकाः सत्त्वा नानासिद्धान्तवेदकाः ॥ नानामार्गसमारूढा नाना

हंकारमानिनः॥तेषांस्वपरसिद्धान्तं यावत्सुगतमानदर्पिते॥तावन्नेनवशीयाणि सर्वज्ञस्यापिमानिनः॥सत्वोपकारतोऽसत्यं उत्तमसंभारहेतुकं॥परोपकार
तः सन्मवीर्याद्रि प्रत्ययकं। गृहावासमगातारः प्रेताः पश्यन्ति पर्वतं॥सूक्ष्मं तं पर्वताकारं भवनं पापकारिणः॥सच्छिद्रं छिद्रतां भूमिं सिद्धाः पश्यन्ति स
र्वतः॥यानात्तासिद्धिमापन्ना अम्बरः स्वरगामिनः॥अनिलोकधातुमानं सत्वानां यच्चित्तवासनावशेन तथागतेनोक्तं प्रतिभाषते॥न चकश्चित्तभागः
वोऽभिनिवेशेन लोकधातुं दृष्ट्वा ग्राह्यग्राहकरूपेण वस्तुमानेन कल्पयति। एवं सर्वं परित्याज्य ऋषीणां परिपाचनार्थं लोकधातुमानं कथयतु तथाग
तेनोक्तमिति। इह वायुमण्डलान्मेरुसीमा पृथ्वी तोयतेजो मण्डलानां। अधोकाशमण्डलमाकाशधातावावस्थितं॥तस्माद्वायुमण्डलान्मेरुं यावत् सप्तनरकाणि
अष्टमं पृथिवीपुरमिति॥नरकपृथिवीपुरं योजनानां द्विलक्षं भवति॥अत्र वायुमण्डलेन पञ्चाशत्सहस्रं भवति॥तस्मिन् महारौरवनाम महान्धकारे नर
कद्वयं पञ्चविंशत् पंचविंशत्सहस्रयोजनविभागमधऊर्ध्वतिर्यग्मानेन। पृथिवीवलयप्रमाणं॥एवमग्निवलयेन रकर्द्दमं॥अग्निनरकमेकं। तस
परितीव्रधूम्रनरकं॥तथोदकवलये नरकद्वयं पश्चात् पश्चोदकसंयुक्तं वालुकाम्भो वालुकोदकसंयुक्तं महाशीतं। पृथ्वीवलये शर्कराम्भो नरकं
पञ्चविंशत् सहस्रयोजनं तत्परिपृथिवीपुरं पञ्चविंशतिसहस्रयोजनमधऊर्ध्वं। तद्देवमानं द्विधा। अर्द्धं असुरभुवनं। अर्द्धं नागभुवनमिति। एवं शरी
रपादतलात् कटिं यावत् हस्तद्वयं॥तद्देव हस्तद्वयं अष्टविभागं कृत्वा एकैकभागे यथाक्रमेण नरकपृथिवीपुरराशिं वेदितव्यानीति॥मेरोर्लक्षं प्रमा
णं। तस्माद्भूमण्डलान्मेरोरधऊर्द्धमानं लक्षयोजनमिति। शरीरहस्तमेकं कण्ठाः करठोयावत् तत्रैव ग्रहगणं भ्रमति। तस्माद्ग्रहगणानि तस्यान्तं च

विंशल्लक्षं । ग्रीवा मेरोः । शरीरे षडङ्गुलं ॥ ततः पञ्चाशल्लक्षं मेरोः ग्रीवा पातालतलाद्यावत् शरीरे द्वादशाङ्गुलमिति । तस्माद्ध्रुवपदमव
नस्तु लोपे पञ्चविंशल्लक्षमिति ॥ शरीरे षडङ्गुलमानं तत्तालुच्छिद्रस्थानं यावदिति । तत्रोर्ध्वे शून्यमेकं त्रिभुवनरहितं निर्गुणं तल्लक्षं नन्तधि
ति ॥ अधो वातमण्डलोर्ध्वं ह्यीषयोर्बाह्ये शून्यमेकं प्रत्येकं परमाणुरूपं धातुरूपाद्रूपादिकं शून्यमिति ॥ नाकाशं सर्वव्यापकमित्येकशून्येनावग
न्तव्यं । एवं चतुर्दशलोकव्याप्तेर्मानं । शरीरे चतुर्हस्तं । हस्तोपि चतुर्विंशत्यङ्गुलात्मक इति ॥ १० ॥

बाह्ये नाभ्याद्यसीम्नः स्थिरधरणितले द्वीपशैलाः समुद्राश्चत्वार्यर्द्धं द्विलक्षं शिखिवलनवलयं योजनानां द्विलक्षं ॥
मध्ये मेरोर्यदूर्ध्वं भ्रमति दिननिशं राशिचक्रं सतारं षड्भागेक्षिद्विलक्षं त्रिभुवनसकलं कालयोगात्प्रजातं ॥ ११ ॥

दीनां तिर्यग्गमनमिहोच्यते । बाह्यतो नाभ्यादिसीम्नि चत्वारि लक्षाणि वायोर्बाह्यतः पूर्वाद्यपरवायुवलयान्तं यावत् । एवं दक्षिणोत्तरान्तं यावदिति । स्थि
रधरणितले द्वीपशैलाः समुद्रा इति ॥ ततो वायुमण्डलाभ्यन्तरे वह्निमण्डलं वलयाकारं । एवमग्निवलयमध्ये तोयवलयं तोयवलयमध्ये पृथ्वीवलयं
तदेव स्थिरं धरणितलं तस्मिन् सप्त द्वीपाः सप्त शैलाः सप्त समुद्राः ॥ सप्तमेनोदकवलयेन सहिता सप्त समुद्राः सप्तमेन जम्बुद्वीपेन सहिताः सप्त द्वीपाः वज्र
पर्वतेन सार्द्धं सप्त पर्वता वज्रपर्वतो बाडवाग्निः ॥ क्षारसमुद्रतोयवलयान्ते अधसि तिर्यग्विभागेन स्थितः पृथ्वीमण्डलजम्बूद्वीपान्ते सर्वदिक्षु अधसि

वध्यास्समुद्रोऽवस्थितः। लवणसमुद्रान्नाल्लवणसमुद्रं। अर्द्धचतुर्लक्षाणां॥ चत्वार्यर्द्धद्विलक्षमिति। मेरोर्मध्यात् सव्यावसव्ये क्षारसमुद्रवलमानं। द्विलक्षं सव्येनैकलक्षं अवसव्येनैकलक्षं॥ एवं पूर्वापरं वाम्यव्याग्नेयं। नैरृत्यैशानं॥ शिखिचलवलयं योजनानां द्विलक्षमिति॥ तस्मात् क्षारोदकवलयात् सव्यावसव्ये। शिखिवायुवलयं द्विलक्षं भवति सव्येनैकलक्षं अवसव्येनैकलक्षं उत्तरेणालक्षमेकमेवं सर्वदिक्षु॥ मध्ये मेरुर्यद्दृर्द्ध्वं भ्रमति दिननिशं राशिचक्रं सतारमिति॥ मध्ये मेरुः किंभूतः सपर्यस्योर्द्ध्वं राशिचक्रं द्वादशारं अनन्ततारा राशिसहितं सतारं दिवानिशं भ्रमतीति। अत्र केयं वाचोयुक्तिः किमपरोऽपि मेरुरस्ति येनेदं वाक्यमित्युच्यते॥ अत्र मन्दिरोऽपि मेरुसंज्ञाया गृहीतस्तेन मन्दिरपृथक्करणाय इयं वाचोयुक्तिरिति॥ यज्ञाङ्गे द्विद्विलक्षमिति॥ इह हि कक्रमेण अथ स्थितवृद्धि पूर्वपश्चिमदक्षिणोत्तरे यज्ञाङ्गे पृथिवीवलयमध्यात् द्विद्विलक्षं त्रिभुवनसकलं स्वर्गमर्त्यपातालत्रिभुवनं त्रिभुवनं सकलं कालयोगात्सञ्जातं सम्यक्तोत्पत्तिकालवशात्। संधारणमस्थानसंस्थानवायुकालसंयोगाज्जातसत्वानां शुभाशुभकर्मफलोपभोगार्थमिति॥

तिर्यग्मानस्य वृत्तं त्रिगुणमपि भवेल्लोकधातोः समन्तात् भूमेर्वृत्तं त्रिलक्षं जलशिखिमरुतां षन्नवार्कक्रमेण॥
तद्वास्यलक्षमेकं त्रिभुवननिलये योजनानां नवत्तं तद्देहे तत्तमेकं क्षितितलनिलये स्वस्वमानेन सम्यक्॥ १२॥
मानं

इदानीं वृत्तमानमिहोच्यते॥ तिर्यग्मानस्य वृत्तं त्रिगुणमपि भवेल्लोकधातोः समन्तादिति॥ इह लोकधातोः सर्वत्र तिर्यग्मानस्य वृत्तं त्रिगुणं भवति॥ स

सर्वं कैकं सहस्रं षडपि जलधयः चन्द्रचन्द्रैकहीनाः एकाधिकशतेनोनं सहस्रं प्रत्येकं सप्तद्वीपा भवन्तीत्यर्थः॥ द्वीपानेवं षड्वरकुलगिरयः॥ षडेवं॥ एषामष्ट
दशानां तु समानं द्वीपसमुद्रौ नाना॥ तदेव सूक्ष्मत्वेन षोडशसहस्रेभ्यो ऽष्टादशभागलब्धं स्कन्धं भवति॥ चन्द्रचन्द्रैकहीनमिति॥ स्थूलमानसंक्षेपतउक्तं
अत्र मेरोर्मध्ये तलस्थानादधो भागे सर्वदिक्षु योजनाष्टसहस्रं चक्रवाडस्यैकं भवति॥ नवसहस्रयोजनानां॥ बाह्ये षोडशसहस्रयोजनानां यावत्॥ म
हीपादयः स्थिताः॥ अतोऽष्टादशभागलब्धं षोडशसहस्रेभ्यो मानं स्कन्धं भवतीति॥ तद्बाह्ये पञ्चविंशत्सहस्रं जम्बूद्वीपं विशालं वलयाकारं मेरोरष्टदि
क्षु। तद्बाह्ये लवणजलनिधेरर्धलक्षं प्रमाणं भवति सर्वदिक्षु। तद्बाह्येऽग्निवलयस्य वायुवलयस्य त्रिभुवनधरणस्यापि तिमस्य प्रमाणमिति॥ एवं मेरोर्मूलस्
थानात्सर्वदिक्षु द्विद्विलक्षं योजनमानं भवति॥ शशिरविगौरर्धं पृथ्वीवलयं॥ वारुदकवलयं तु पवाज्वरग्निवलयं मणिवज्रात् करात् वायुवलयं॥ एवं लोक
धातुमानमिति॥

ब्रह्माण्डे कालचक्रं जिनवरसहितं संस्तुतं देववृन्दैर्मेरोर्गीर्वाणचक्रं त्ववनितलगगनं पञ्चवर्णात्महीनां॥ श्रीमेरोः
सर्वदिक्षु क्षितिवलयगगनं सर्वपीठोपपीठं क्षेत्रं छन्दोहमेलापकचितिश्मवनं वह्निवाय्वन्तसीम्नः॥ २० ॥

इदानीं कालचक्रदेवनागपीठोपपीठादीनां स्थानमुच्यते॥ ब्रह्माण्डे कालचक्रमित्यादिना ब्रह्माण्डे बाह्यशरीरे। उष्णीषमेरौ कालचक्रमेव संस्तुतं जि न
वरसहितं सर्वबुद्धैः सहितं समाजमेकत्रीभूतं देववृन्दैर्बोधिसत्त्वैर्ब्रह्मादिभिः संस्तुतमिति॥ मेरौ गीर्वाणचक्रं ब्रह्मादीनामिति॥ अवनितलगगनं पंचवर्णा

मुहीनां चक्रमिति ॥ श्रीमेरोः सर्वदिक्षु क्षितिवलयगतं सर्वपीठोपपीठमिति ॥ पीठं चतुर्दिक्षु वाय्वम्बुदहनपृथ्वीस्वभावेनावस्थितं । पूर्वविदेहं । नमुजम्बूद्वीपं
उत्तरकुरु । अपरगोदानीयमिति । उपपीठं तत्स्वभावेन चतुर्विदिक्षु । आग्नेयनैऋत्यईशानवायव्यदिक्षु ॥ एवं क्षेत्रोपक्षेत्रं सप्तद्वीपाब्धि ॥ छन्दोहोपछन्दो
हं समुद्रस्यापरार्द्धं ॥ मेलापकोपमेलापकमग्निवलयार्द्धं ॥ विश्मोपवेश्ममध्येरपरार्द्धं ॥ श्मशानोपश्मशानं बाह्यवलयार्द्धं ॥ अष्टौ महाश्मशानानि बाह्य
वलयानि ॥ एवं पीठादयो दश भूमयो विदितव्या इति ॥ शरीरे च पीठादयो भूमयो हृत्पादयोर्मध्यस्थाः सप्तधेति ॥ ॥

पूर्वे शक्रोऽग्निरग्नौ यमइहवरुणा याम्यदैत्यापरेषु· वायुर्यक्षोऽनलस्थानिधनदहरे मूर्द्धभागेल्वधश्च ॥ ब्र
ह्माविष्णुः समस्ताः परिजनसहिताः स्वस्वदिग्रक्षपालास्तन्मध्ये कालचक्रो जिनवरजनकोऽनाहतो वज्रकायः ॥ २१ ॥

इदानीं दिग्पालस्थानमुच्यते ॥ पूर्वे शक्र इति । पूर्वे शक्रो मेरोर्मूर्ध्नि । पूर्वदिशि शक्रः ॥ अग्न्यामग्निः । यमो याम्ये दक्षु दैत्ये वरुणोऽपरे । वायुरनिले यक्षो धनदे ह
रो हरे । ऊर्द्धभागे ब्रह्मा । अधो विष्णुः ॥ एते शक्रादयः समस्ताः परिजनसहिताः स्वस्वदिग्रक्षपाला इति ॥ तेषां मध्ये कालचक्रो जिनानां जनकोऽनाहतो वज्र
कायो दिग्पालानां प्रभुरित्यर्थः ॥

मेरोः पक्षेषु दिक्षु भ्रमति खविवरे ऽर्ज्जयोत्तानवानां· यत्किं कर्मा विनष्टा वहति कविषुगं तत्र पूर्वं प्रयाति ॥
हत्वा म्लेच्छांश्च षड्भिर्विचरति भुरतः स्थापयित्वा स्वधर्मं· कृत्त्रेताख्यपरं वै कलियुगमपरं वर्तते कालयोगात् ॥ २२ ॥

तः सर्वग्रहभोगो ऽत्रधो ऽभूदिति ॥ इह परेषामज्ञानहेतोर्यत्कारणादिकं रचितं उक्तं तीर्थिकैस्तदेव कालवशात्तेषामपरिज्ञानं जातं परापकारत इ
ति ॥ अतः परापकारः सर्वत्र विरुद्ध इति ॥ इह ग्रहाणां प्रतिदिनभोगसंक्षेपकावक्ष्यमाणो विज्ञातव्या इति ॥ २९ ॥

०धौ वर्षे रवेर्बार्हविमिश्रं प्रभवमुखगतं स्पष्टवर्षं प्रसिद्धं · उक्तं स्पष्टेऽब्दवर्षे कारफणिशशिनाशेषमस्मादिहोक्तं ॥ मि र्व
श्रे चैत्रादिमासैः स्वरगुणसहितं स्वाग्निचन्द्रैर्विभक्ते · लब्धं मूर्ध्नि प्रविष्टं भवति नरपतेर्मासपिण्डं विशुद्धं ॥ ३० ॥

हणानां कष्टकरणानावक्ष्यते ॥ वर्षे रवेर्बार्हविमिश्रमिति ॥ इह ध्रुवको ऽतिमलत्वन्त्र सन्ति षष्टिसंवत्सराणि ऽनुद्धवकारचरणादिति ॥ इहतन्त्रभागतका
लात् पञ्चषष्ट्यागतैर्गतश्रीकालः करणेध्रुवः ॥ तस्माद्दृष्टान्तवर्षैः स्पष्टकालः ॥ तस्मात् स्पष्टकालात् अत्रात्पक्षिकशतेन रेतो भजकल्की
कालो येनाजेन तत्प्रकारणं विशोधितं ॥ स एव कालः करणे ध्रुवको भवति स्पष्टवर्षादिति ॥ प्रभवमुखगतमिति ॥ प्रभवोऽस्य मादिर्येषां षष्टिसंव
त्सराणां ते प्रभवमुखाः ॥ तेषु गतैकवर्तमानवर्षस्य पूर्ववर्षं प्रभवमुखगतमिति ॥ तन्मिश्रं साधिकचतुःशतवर्षराशौ स्पष्टवर्षं प्रसिद्धं भवति ॥ ए
कवर्षमादिं कृत्वा यावत् षष्टिवर्षं तावद्विमिश्रं प्रभवमुखगतं भवतीति ॥ तद्ध्रुववर्षं सर्वकरणान्तरे प्रसिद्धं भवतीत्यादित्यादिवारवत् ॥ तेन विमिश्रितं त्र
विक्रमतः शतवर्षराशाविति ॥ स्पष्टवर्षं प्रसिद्धं स्पष्टेऽत्र मध्यमतो रत्नरणावतारो स्पष्टधर्मदेशको ऽस्पष्टानां तापितानां गुरुः स्वामी ॥ उक्तं स्पष्टेऽब्दवर्षे करफ

रिणराशिना अशीत्याधिकशतेनोनं ॥करकृतिघ्नराशिनोनमिति॥सम्भवविषये अजकन्यकाकालवर्षं तदेव वस्वकरो वर्षपिण्डमिति॥शेषमर्कहृतं स्यात्तदे
वर्षपिण्डं अशीत्याधिकशतेनोनावशेषं मासपिण्डं निमित्तमकर्त्ता ॥ एतं द्वादशगुणितं मासपिण्डं भवति॥मिश्रं चैत्रादिमासैरिति तदेव मासपिण्डं चैत्रादि व
र्त्तमानमासैर्मिश्रं भवति वर्त्तमानमासार्थमिति॥अधस्त्वगहृतमिति॥तदेव मासपिण्डमधउपरिराशौ अधोराशौ मासपिण्डं कृत्वा अधिकमासस्य हृतपा
र्थयुगहृतं चतुर्गुणितं भवति॥रवाग्निचन्द्रैर्विभक्तमिति॥अत्रसूर्यस्यद्वात्रिंशान्तार्द्धमासैरधिकमासेऽमावास्या संक्रमणाभावात्॥तेनभागेनस्यात् तस्मात्
राशिश्चतुर्गुणिता भागराशिर्भवति॥भागराशेश्चतुर्गुणितेसति निमित्ताभावे नैमित्तिकस्याभाव इति न्यायात् विभज्यराशिश्चतुर्गुणो भवति॥तस्माद्विभज्य
राशेर्भागराशिना लब्धं फलं भवति॥लब्धं मूर्द्ध्नि प्रविष्टं तदेव लब्धमधिकमासपिण्डं मूर्द्ध्नि मासपिण्डराशौ प्रविष्टं भवति॥तद्युतेमासपिण्डं विशुद्धं वर्त्तमानमासै
त्रिंशात्तिथिगुणितार्थमिति॥

मासास्त्रिस्थानभूताः करशिखिगुणिता मध्यराशौ स्थिता ये मूलैः षड्भागलब्धं भवति च तदग्रं मध्यमेशौ
धनीयं॥ऊर्द्ध्वेधोत्रिंशनेत्रं त्रकृष्टपतिधनं मिश्रितं षष्ठभागैर्लब्धं मूर्द्ध्नि प्रविष्टं भवति शनिवरै श्चेद्दिनः शेषवारः॥ १८ ॥

इदानीं मासध्रुवकमुच्यते॥मासास्त्रिस्थानभूताः करशिखिगुणितानां मध्यराशौ स्थिता य इति॥अत्रोक्ता मासास्त्रिस्थाने कृत्वा मध्यराशौ ये मासाः स्थिता
नेत्रतिमासवारघटिकार्थं करशिखिगुणिता द्वात्रिंशद्गुणिता भवन्ति॥मूलैः षड्भागलब्धमिति॥मूलराशौ षड्भागेन लब्धं मध्यमे राशौ क्षेपणं भवति॥मध्यरा

वक्तव्यमिति ॥ इत्थाभोगेन नाडीः सरत्नराशिभिर्भागलब्धं सभोगं । देयं हेयं च सूर्येऽल्पमनगतिवशान्नूनाल्पभावश्चिरस्तीति ॥ इदं वचनं नियमार्थमि
भागगते वारभोगेन इत्थालाउलिनः सरत्नराशिभिरिति एकराशौ घटिकापिण्डमत्र त्रिंश वृश्चिकराशौ तेन भागेन लब्धं ॥ घटिकापिण्डं घटिकास्थाने धृतं भ
वति ॥ अथ नगतिवशात् ह्रासश्च भवति ॥ मकरादौ धनं कर्कादौ ऋणं भवतीति ॥ अथ नगतिवशात् ऋणं हे अश्विनी नभाकारणो कतिविधिनेति ॥ अत्र कर्करा
शौ विधिरुच्यते ॥ सूर्ये कालो रसद्विति । कर्कादौ ऋणं प्रभभमभेकादशति निशा घटिका ॥ रसत्र्यत एह द्वितीयकर्कादिपक्षे ॥ एवं मिथुने अश्विन्यादश
इति ॥ नभाकम्पापा हर एकादश मर्कस्य एकादश ॥ नगरतुलायां एकादशा दिगिति दश इत्येवं वृश्चिकेनाग इत्यष्टषट् ॥ २४ ॥

वह्निः खखाग्न्यनलो भवति धनमृणं चोत्तरे दक्षिणे च मकरमासैः पक्षभे दैश्वरति दिनकरो माससंक्रान्तिभेदात् ॥ दत्वा
सूर्ये निशीथाद्यधररसकृता वारभोगनामिश्राः तुलीभूताः शशाङ्को भवति नरपते मिश्रसूर्येन्दुयोगः ॥ २५ ॥

ततो धनुषि वह्निरिति त्रिसः खखाग्नीति शून्यमयनान्ते । एवं मकरादौ धनमिति कर्को । नसि धाने अभिश्राप सर्वत्र । एवं यन्मासं नक्षभे दैश्वरति दिन
करो माससंक्रान्तिभेदादिति ॥ ॥ इदानीमिन्दुभोगउच्यते ॥ दत्वा सूर्ये इति । सूर्यभोगे निशीथ दत्वा अधररसकृताश्चिन्वीत भवति वाञ्छितं हता ॥ वारभोगेन
मिश्रा वारभोग घटिकादिभिर्मिश्रा तुलीभूता घटिकास्थाने शशाङ्कभोगो भवति ॥ मिश्रसूर्येन्दुयोग इति । सूर्येन्दुभोगो मिश्रो योगो भवति ॥ २५ ॥

अक्ष्णातिथ्याहृतं यज्जलं शशिकरणं सप्तभागावशेषं शुद्धाद्यानागमिश्राः खखजलाधिहृताः शेषितानागमिश्रैः ॥
शैलेन्द्वग्निप्रभक्ता गगनरसहृतो नाडिका याविभक्ताः द्वात्रिंशद्वारनाड्यो ध्रुवकमिह हृतं चाब्दसंक्रान्तिमासैः ॥ २८ ॥

अक्ष्णातिथ्या हृतं यज्जलं शशिकरणमिति । अक्ष्णा द्वाभ्यां तिथिस्तु हृतं सैकं रहितं सप्तभागावशेषं करणं भवति । वारभोगेन भोगो भवति ॥ अत्र पञ्चाङ्गानि वारतिथिनक्षत्रयोगकरणानीति ॥ अत्र वारः आदित्यसोममङ्गलबुधबृहस्पतिशुक्रशनैश्चराः प्रतिपदः । प्रतिपदाद्याः पञ्चदश इति ॥ नक्षत्राणि ॥ अश्विनी भरणी कृत्तिका रोहिणी मृगशिरा आर्द्रा पुनर्वसु पुष्य अश्लेषा मघा पूर्वफाल्गुनी उत्तरफाल्गुनी हस्ता चित्रा स्वाति विशाखा अनुराधा ज्येष्ठा मूला पूर्वाषाढा उत्तराषाढा श्रवणा धनिष्ठा शतभिषा पूर्वभाद्रपदा उत्तरभाद्रपदा रेवतीति सप्तविंशतिः ॥ तथा योगाः ॥ विष्कम्भः प्रीतिः आयुष्मान् सौभाग्यः शोभनः अतिगण्डः सुकर्मा धृतिः शूलः गण्डः वृद्धिः ध्रुवः व्याघातः हर्षणः वज्रः सिद्धिः व्यतीपातः वरीयान् परिघः शिवः साध्यः शुभः शुक्लः ब्रह्मा ऐन्द्रः वैधृतिरिति सप्तविंशतियोगा इति ॥ ॥ शुक्लप्रतिपदपरार्द्धे करणं प्रथमं बवः ॥ द्वितीयायां पूर्वापरार्द्धे बालवं कौलवं ॥ तृतीयायां पूर्वापरार्द्धे तैतिलं गरजं । चतुर्थ्यां पूर्वापरार्द्धे वणिजं विष्टिरिति ॥ एवं पञ्चम्यां बवं बालवं । षष्ठ्यां कौलवं तैतिलं । सप्तम्यां गरजं वणिजं अष्टम्यां पूर्वार्द्धे विष्टिरिति ॥ अष्टम्यां परार्द्धे बवं । नवम्यां पूर्वापरार्द्धे बालवं कौलवं । दशम्यां पूर्वापरार्द्धे तैतिलं गरजं । एकादश्यां पूर्वापरार्द्धे वणिजं विष्टिरिति ॥ पुनर्द्वादश्यां पूर्वापरार्द्धे बवं बालवं । त्रयोदश्यां कौलवं तैतिलं । चतुर्दश्यां गरजं वणिजं ॥ पूर्णिमास्यां पूर्वार्द्धे विष्टिरिति । अपरार्द्धे बवं ॥ कृष्णप्र

वेषामेवांदिवासुवलयानामानां दीपशैलसमुद्रादीनामिति ॥ भूमेर्दत्तानिलक्षं भूमेर्भूमिवलयस्यानिर्गमानमेकलक्षं वृत्तमानंत्रिलक्षंभवति ॥ घ
नजलशिखिमरुतामिति ॥ जलशिखिमरुतांवलयानांस्वस्ववलयालात् स्वस्ववलयान्तयावत् द्विलक्षांत्रिलक्षं चतुर्लक्षाणिनिर्गमानं ॥ वृत्तमानंघ
नार्द्धत्रिक्रमेणेति ॥ घनस्कन्धादकवलयस्य नवलक्षं अग्निवलयस्य ॥ अर्द्धाष्टादशलक्षंवायुवलयस्य क्रमेणवेदितव्यमिति ॥ यद्यस्तिलक्षमेकंद्वि
वनतिलयेयोजनानानतेरेन्द्र । नदेहेहस्तमेकंक्षितितलनिलये स्वस्वमानेनसम्यगिति ॥ यथासेवोकधानोतलक्षमेकंयोजनानां तत्स्वशरीरेस्वहस्तेनैक
कहस्तमानंभवतीतिपूर्वोक्तक्रमेणेति ॥

सूक्ष्मैरष्टाभिरेकोणुरिदमणुभिः सूक्ष्मवालाग्रमेतौ राजायूकाययवैश्चांगुलंउरगयवै
रंगुलैरर्द्धयुग्मैः ॥ हस्तो हस्तैश्चतुर्भिर्दडुरितधनुमान्यासहस्रद्वयेन क्रोशः क्रोशैश्चतुर्भिर्दिविभवगगने योजनंतेनमानं ॥ १२

इदानीं परमाणवादिना योजनमुच्यते ॥ सूक्ष्मैरित्यादिना । सूक्ष्मैरष्टाभिरेको अणुरिति । इह सूक्ष्मैरष्टभिः परमाणुभिः पंक्तमास्थितैरेकोणुरिति । अणु
मानंभवति । एभिर्वालाग्रमतस्यानां अष्टभिरष्टाभिर्भवति ॥ एभिर्वालाग्रैरष्टभिः पंक्तमास्थितं राजीमानं । ताभिर्यूकामानं ताभिर्यवमानं । तैरुरगमवैरष्टभि
रंगुलंभवति । अंगुलैरर्द्धयुग्मैरिति । अर्द्धाष्टद्वा उभयमाद्विधा । चतुर्विंशतिरिति ॥ चतुर्विंशत्यंगुलैः पंक्तमास्थितैर्हस्तमानंभवति ॥ तैश्चतुर्भिर्दण्डं भव
ति । इह धनुषां मान्यात् ॥ सहस्रद्वयेन क्रोशो भवति ॥ तैश्चतुर्भिर्योजनंभवति ॥ तेनयोजनेनदिविमानं देवानां उविमानं मरुत्स्यादीनां गगनेमानं चन्द्रार्क
दीनां भ्रमणार्थमिति ॥

आदौ सौधर्मकल्पं युगभुगभुगलं ब्रह्मलोकोत्तरं च श्रीकल्पं श्वेतकल्पेषु वसितभुवनात्कामभेकादशांशं ॥ चत्वा
रश्चाद्यरूपो हमिथुनरहिता षोडशाद्यादिरूपाः हायालाक्षाश्चकामाः प्रकटदशविधा व्यञ्जनान्येककः सः ॥ १४ ॥

रधानी अरूपभवालेयकाविंशत्र्वा उच्यन्ते ॥ आदौ सौधर्मकल्पमिति ॥ आदौ प्रथमं सौधर्मशब्देन अरूपभवमुच्यते ॥ कल्पमिति पश्चिमकल्पश्च देवावसः
ति । तत्स्थानं सौधर्मकल्पमिति । स्वर्गभूमिः ॥ युगभुगभुगलमिति । युगं द्वौ न येर्युगलं चत्वारः ॥ युगभुगभुगलमरूपभवस्थानं चतुर्विधमित्यर्थः ।
एकं महाकल्पं द्वौ त्रयश्चत्वारः कल्पनामुपरिमभिप्रायः ॥ मेरोरुपरि पाथः कटिस्थानश्रूलस्कन्धं चतुर्विधं भावितानामिति ॥ एवं युगभुगभुगलं ब्रह्म
स्थानं ब्रह्मकल्पं वासुस्कन्धं चतुर्विधं भावितानामिति ॥ एवं ब्रह्मलोकोत्तरं । युगभुगभुगलं नासिकास्थानं चतुर्विधं मणिस्कन्धं भावितानामिति ॥ ए
वं श्रीकल्पं । युगभुगभुगलं नासिकाधः चित्तुकान्तस्कन्धं चतुर्विधं भावितानां ॥ एवं श्वेतकल्पं कल्पस्थानं युगभुगभुगलं पृथिवीस्कन्धं चतु
र्विधं भावितानामिति ॥ एवं षोडशारूपिणां षोडशाकल्पाः षोडशकल्पमारभ्य एककल्पं यावदारोहेति ॥ ततः अवशिष्टषड्भुवानकारणादूर्ध्वमारभ्य
यावदधोवाड्भवलस्थानमेकादशाकामभवाः ॥ त्रिभुवनभुवनात्कामभेकादशमित्युच्यते ॥ कामभेकादशभेदभिन्नमित्यर्थः ॥ चत्वारश्चाद्यरूपा ह
मिथुनरहिता इति ॥ इहाद्यरूपा दीर्घा बीजाक्षराणि ॥ अकारादयः स्वराश्चत्वारः तेन हकारद्वयरहिताः ॥ मेरुशून्यासक्यावचनमिति ॥ षोडशाद्यादिरूपा
इति । इह अकार आदिर्येषां षोडशस्वराणामिमान्यत्र शब्दत्र अन्ते । षोडशाद्यादिरूपा इति ॥ हायालाक्षाश्चकामाः प्रकटदशविधाः हकार आदिर्लकारान्ताः

इदानीं महाचक्रवर्तिभ्रमणं द्वादशभूमिखण्डेषु सूच्यते ॥ मेरोः पृष्ठे क्षिमादि । मेरोः पृष्ठे सुरदिक्षु भ्रमति यावनतले ऊर्जयोदानवानां हे चक्रनायस्मिन्भूखण्डे न पातालधर्मो विनश्यते या । विपर्यासधर्मो वर्तते ॥ तस्मिन्भूमितले भ्रमति चक्री कालियुगे सएवाधर्मप्रवृत्तिः ॥ कलियुगं वहतीत्यर्थः तदेवाधर्मात्मकं कलियुगं ॥ यत्र यत्र हि उद्धर्मं वहति खण्डे । तत्र तत्रैव खण्डे प्रकर्षेण याति भ्रमतीति ॥ हन्मा हे खण्डश्चकाराधानवार्धी खण्डे विचरति यतः स्थापयित्वा स्वधर्मेण तान् हे क्षाद्वीन्द्र त्रेता चापरवे कलियुगममपरं वर्तते कालयोगात् ॥ अत्र युगं कृतयुगादिकमपरं मता कृतयुगादिकं तत्र भवतीत्यर्थः ॥ एतत् युगं कालयोगाद्वर्तते ॥ कालो द्वादशाराधीनचक्रं तस्य योगात्कालयोगात् वर्तते चतुःसंख्याभेदेनेति ॥ २२ ॥

यस्मिन्खण्डे स चक्री भ्रमति अतिबलवान्कृतयुगं तत्र याति त्रेता पृष्ठे च राज्ञः कलिरपि उरतो द्वापरश्चापि मध्ये ॥
विंशतिकसहस्रं सशतसहितं वर्षमानं युगानां एकैकस्य प्रमाणं भवति नरमते मानवादेशतं यत् ॥ २३ ॥

यस्मिन्खण्डे स चक्री भ्रमति अतिबलवान्कृतयुगं तत्र याति कृतयुगं नाम सम्पूर्णचतुर्धर्मं यातीत्यर्थः ॥ त्रेता पृष्ठे च राज्ञः त्रेतापृष्ठे राज्ञो भवति । धर्मस्यैकपादाभावः कथ्यते ॥ त्रेतायां द्विपादस्य भावः कलिरपि उरतो राज्ञो धर्मस्य चत्वारः पादाभावः कथ्यते ॥ द्वापरं चापि मध्ये इति ॥ कलित्रेतयोर्मध्ये द्वापरं धर्मस्य त्रिपादाभाव इति ॥ विंशतिकंसहस्रं सशतसहितं ॥ रस इति । षट्पंचाशताधिकैकविंशति सहस्रं वर्षमानं युगानां चतुर्णां मानं भवति ॥ एकैकस्य प्रमाणं

युगशरगुणितानमिति ॥ युग इति चत्वारः शर इति पञ्च । तैः चतुः पञ्चाशद्भिर्गुणितं युगशरगुणितानमिति ॥ मानवा दैशतं मदिति । वर्षशतं गुणितं चतुःशताधिकं सहस्रपञ्चकं भवति ॥ प्रत्येकयुगमानं तुल्यमिति ॥ २३ ॥

सूक्ष्मोच्छ्वासअसुनाडीदिनयुगसहस्रैकैकविंशच्छतैश्च षड्भिर्मानं क्रमेणान्वहमनुजन्तूणां भूतदेवासुराणां ॥
शतैर्भर्तुर्दिनैकं वहति भवति तद्वक्ति मानं युगानां स्वेरुपु स्वेरुपु वचक्री क्रमति शिवपदं ब्रह्मशार्कादिनैके ॥ २४ ॥

इदानीं मनुष्यतनुजादीनां स्वस्वश्वासमानमुच्यते ॥ सूक्ष्मोच्छ्वासेत्यादि ॥ सूक्ष्म इति मनुष्यश्वासनिःश्वासस्य एकस्य षट्शताधिकएकविंशत्सहस्रमृतस्य एकांशः सूक्ष्मश्वासः ॥ तेन श्वासषट्केन तनुजानां कमिजनादीनां । एकंपाराणीपलं षष्टिभिः पाराणीपलैः घटी घटीभिः षष्टिभिर्दिनमिति ॥ दिनं नाम तनुजादीनां षट्शताधिक एकविंशत् सहस्रश्वासनिःश्वाससंख्यानैकृतुश्वासैर्गतैर्नराणां स्वदिनं भूतप्रेतानां अभिः स्वदिनं भवति । मनुष्यश्वासस्य त्रिंशद्गुणाः श्वासः कृष्णपक्षो दिवा । शुक्लपक्षो रात्रिः । प्रेतानां पितॄणां स्वदिनमिति ॥ नाडीभिर्मनुष्याणां षष्ठ्युत्तरत्रिशतश्वासो देवानामेकश्वासः । दिनमिति । मनुष्याणां षट्शताधिक एकविंशत्सहस्रश्वासा असुराणामेकश्वासः ॥ असुरिति मनुष्याणां वर्षः । शतैरेकश्वासः शक्तिरित्येकनिष्कलानिः ॥ युग इति मनुष्याणां षट्शताधिक एकविंशत् सहस्रवर्षपरिमितं भर्तुरेकश्वासः । भर्तुरिति नैव संख्यानासंख्यास्य तनोपगजानेरिति ॥ सूक्ष्मोच्छ्वासअसुनाडीदिनयुगसहस्रैक

शेषोऽतः शोधनीयं स्यात् गतान्दात् । उर्व्वरि रवेनेन त्रिंशद्भागान् पृथक् स्थाप्यानि धनं मिश्रितं ॥ इदं ध्रुवकं मकरादिकं अतो मनकरणागत मनन आदित्यायस्य करणार्थं सूर्य्य रा
शेषो वारद्वयं धनं भवति ॥ अघोरात्रौ त्रिंशद्घटिका धनं भवति ॥ अतो मिश्रमूर्ध्वाधो यथासंख्यं ने त्र्यश्वत्रिंशद्ध्वने त्र्यंशत्याधिकेति ॥ षष्ठिभागैर्लब्धं ॥ मूलध्रुवपि
कारांशो षष्ठिभागेन लब्धं वारपिण्डं भवति ॥ अवशेषघटिकापिण्डं वारभोगे भवति ॥ सूर्य्यप्रविष्टनदेव सप्तभागेन लब्धं वारपिण्डं सूर्य्यप्रविष्टवार
राशौ भवति ॥ तानिवैः सप्तभिः छेदनो विभक्तः सन् शेषो वार एव स इति ॥ मास ध्रुवको वारो सूर्य्यस्थानव्यः ॥ वाराद्यो घटिकापिण्डमिति ॥ २८ ॥

द्विस्थानेऽर्केन्दुमिश्रं कृतमनुगुणरविणा भूनमिश्रं समलं देयं तन्सूर्य्यराशौ प्रथमककरहृते पिण्डमष्टद्विभक्तं ॥ त्रिस्था
मध्ये हतेनाप्तलब्धं न करणेऽभागलब्धं विमिश्रं उक्तं मध्ये पर्यन्ते कृतमपि भवनं सूर्य्यराशौ विहत्वा ॥ २९ ॥

इदानीं वारपदान्युच्यन्ते ॥ द्विस्थानेऽर्केन्दुमिश्रमिति ॥ तदेव मासपिण्डमर्केन्दुमिश्रं द्वादशोनरसांतमिश्रं ॥ अर्केन्दुरिति करणापेक्षा न सिद्धान्तापेक्षयेति ।
द्विस्थाने भवति ॥ कृतमनुगुणरविणा ॥ अधो मासपिण्डं हृतं षष्ठिशत्याधिकशतेन लब्धं सूर्य्यराशौ धनं भवति ॥ प्रतिमासपिण्डक्षयार्थं सूर्य्यराशौ देयं भवति ॥
प्रथमंकरहृते पश्चाद्देयं भवति । भूनमिश्रं समलमिति । करणापेक्षात्र कृतरविणा भागलब्धं सिद्धान्त ॥ यतः षष्ठिशत्याधिकमासस्थानेन एकपिण्डं पि
ण्डुस्थाने अधिकं भवति ॥ चन्द्रगुणावमादिति पिण्डमष्टद्विभक्तमिति ॥ अष्टाविंशतिभिर्भक्तं पिण्डं भवति ॥ सप्तवारपदत्वादष्टाविंशतिभिर्भागः स्या

त्तेन भागेन लब्धं प्रतिमासं वारपदं भवति ॥ वारघटिकाद्यः ॥ अत्र रविराशिभागेन लब्धावशेषं पिण्डावयवं भवति ॥ पिण्डाधःस्थापनीयमिति ॥ ॥ इदानीं सूर्यनक्षत्रध्रुवकमुच्यते ॥ त्रिस्थानमध्ये हतेशाहृते ॥ नेत्रचन्द्रमासात्त्रिस्थामूर्द्ध्वमध्ये अधसि भवति ॥ मध्ये येमासास्तेईशैर्हृता एकादशाहृताश्चेति । करणापेक्षा न सिद्धान्तापेक्षेति । अधरनवत्यौर्भागलब्धं द्विमिश्रमिति ॥ अधोराशेर्नवत्यंशरैकोनचत्वारिंशद्भिर्भागलब्धं द्विमिश्रमिति करणापेक्षया क्षेपकः ॥ अन्तमध्ये मध्यराशौ हीनं कर्तव्यमित्यर्थः ॥ घटीभिर्हीनमपि द्वेधनमिति ॥ मध्यराशेर्घटीभिः षष्टिभिर्हृतं लब्धं नक्षत्रपिण्डमूर्द्ध्वराशौ धनं भवति ॥ षष्टिभागावशेषं नक्षत्रघटिका भवन्ति ॥ नदेवधनमूर्द्ध्वराशौ क्षिपेत्वा ॥

युक्तं चर्क्षप्रभक्तो भवति तु परवेशेषमृक्षादि भागे वारे वारं प्रदेयं द्विगुणनृपघटी
पिण्डके द्वेत्वधश्च ॥ द्वे चर्क्षे रुद्रनाड्यः प्रकटयति धनं सूर्यभोगे प्रदेयं एतन्मासध्रुवं स्यात्कथितमपि उनमासि मासि प्रदेयं ॥ २० ॥

युक्तं चर्क्षप्रभक्तं सप्तविंशतिभिः प्रभक्तो भवति । तपामत्र शरेवः शेषमृक्षादिभोगः अत्र मूर्द्ध्वनक्षत्रपिण्डमधोनक्षत्रघटिकापिण्डमिति ॥ पुनरस्य ध्रुवा ध्रुपक्षमासध्रुवकं वा तानां प्रतिबोधनार्थं रचितं ॥ वारे वारं प्रदेयं वारस्थाने वारमेकं देयं । द्विगुणनृपघटीनृप इति । षोडशद्विगुणनृपघटी द्वात्रिंशद्घटी घटिकास्थाने देयाः पिण्डके द्वेत्वधश्चेति । घटिकाधःपिण्डस्थाने द्वे देये भवतः । द्वे चर्क्षे नक्षत्रस्थाने । रुद्रनाड्यो नक्षत्रघटिकास्थाने । रुद्र इति ॥ एकादशनाड्यो देयाः इति धनं प्रकटयति सूर्यभोगे प्रदेयं नक्षत्रादिकं ॥ तस्मात्मासध्रुवकस्यापि कथितमपि उनमासि मासि प्रदेयं ॥ प्रत्येकमासि प्रदेयमिति मासध्रुवकं क

तिपदि । पूर्वापरार्द्धे बालवं कौलवं । द्वितीयायां पूर्वापरार्द्धे तैतिलं गरजं । तृतीयायां पूर्वापरार्द्धे तैतिलं गरजं । तृतीयायां पूर्वापरार्द्धे वणिजं विष्टिरिति । एवं चतुर्थ्यां बवबालवं । पञ्चम्यां कौलवं तैतिलं । षष्ठ्यां गरजं वणिजं । सप्तम्यां पूर्वार्द्धे विष्टिरिति । अपरार्द्धे बवं । अष्टम्यां बालवं कौलवं ॥ नवम्यां तैतिलं गरजं । दशम्यां पूर्वापरार्द्धे वणिजं विष्टिरिति ॥ एवं एकादश्यां बवं बालवं । द्वादश्यां कौलवं तैतिलं । त्रयोदश्यां गरजं वणिजं । चतुर्दश्यां पूर्वार्द्धे विष्टिरिति । सप्तकरणापरिभोगः । ततः कृष्णचतुर्दश्या परार्द्धे शकुनिः । अमावास्यां पूर्वार्द्धे चतुष्पदं । अपरार्द्धे नागं । शुक्लप्रतिपदि पूर्वार्द्धे किंस्तुघ्नं । अपरार्द्धे तु नवं बवमिति ॥ एवमेकादशकरणानीति पञ्चाङ्गक्रमः ॥ अश्विनी भरणी कृत्तिकापादमेषः । एवं नवनवपादैः द्वादश मेषादयो राशयो वेदितव्याः ॥ अङ्गारकशुक्रबुधशशिरविबुधशुक्रभौमगुरुशनिसौरिगुरवश्चैते यथाक्रमं मेषादिषु राशिषु क्षेत्रिण इति ॥ रुषतो नाडिकानां राशय इत्यर्थं नामाक्षरकल्पनोच्यते ॥ इह जातकस्य मरणजन्मस्वरलग्नपरिज्ञानार्थं भिन्नामाक्षरकल्पना रचिता ॥ तद्यथा ॥ अ इ उ ए कृत्तिका । ओ वा वि उ रोहिणी । वे वो का की मृगशिरा । कु घ ङ छ आर्द्रा । के को हा हि पुनर्वसु । हु हे हो डा पुष्या । डि डु डे डो अश्लेषा । म मि मु मे मघा । मो ट टि टु पूर्वफाल्गुनी । टे टो पा पि उत्तरफाल्गुनी । पु ष ण ठ हस्ता । पे पो रा रि चित्रा । रु रे रो त स्वाति । ति तु ते तो विशाखा । ना नि नु ने अनुराधा । नो या यि यु ज्येष्ठा । ये यो भा भि मूला । भु ध फ ढ पूर्वाषाढा । भे भो जा जि उत्तराषाढा । जु जे जो खा श्रवणा । खि खु खे खो अभिजित् । ग गि गु गे धनिष्ठा । गो सा सि सु शतभिषा । से सो दा दि पूर्वभाद्रपदा । दु थ झ ञ उत्तरभाद्रपदा । दे दो चा ची रेवती । चु चे चो ला अश्विनी । लि लु ले लो भरणीति ॥ द्वादशराशिनामभेदाक्षराणि ॥ एभिरक्षरैः सत्त्वानां राशिर्ज्ञातव्या । तेन शुभाशुभफलं ज्ञानमिति ॥ तीर्थिकानां नाभिप्रायोऽप्यस्ति सूत्रमिति ॥ परमार्थतः शु

भाशुभस्य कर्मवशाद्भवति ॥ तथा चाह ॥ वारतिथिश्च नक्षत्रं योगः करणमेव च ॥ वसंक्रान्त्यर्कैश्चैतन्न कल्याणउपकारिणां ॥ एकश्चरा प्रसूतानां जनकानां पृथक्पृथक् ॥ फलं नैकफलं तेषां स्वस्वकर्मोपभोगतः ॥ संग्रामे वनमध्ये हे [illegible] नां ज्वालवश्येन । मरणं योगपद्येन च हृवोयान्ति देहिनः ॥ उपेना शुभं तं वास्वं वृद्धिसौभाग्यरूपता ॥ पापेन दुःक्षयो वार्यं वृद्धिर्हानिश्च देहिनामिति ॥ पश्चाङ्गकरणोद्देशः ॥ ॥ इदानीं करणे वर्षसंक्रान्तिध्रुवकमुच्यते ॥ शून्याब्धानागमिश्रा इति ॥ शून्याब्धाः करणवर्षाः नागमिश्रा अष्टभिर्मिश्राः स्वरकजलधि हृता इति । स्वरभिः शतैस्तैर्विरहिता भवन्ति ॥ शोधितानां नागमिश्रैरिति ॥ अष्टमिश्रितैः करणवर्षैः शोधिता ऊनीकृताः शैलेन्दुयुक्तपश्चकाद्यति । सप्तदशाधिकशततत्रयेण भक्ता वा भवन्ति ॥ गगनरसहृता इति ॥ उनभागावशिष्टा घटिकार्थं षष्ट्याहृता नाडिका अब्यादिना भक्ता भवन्ति ॥ त्रित्रिंशद्वारनाड्यो ध्रुवकमिह युतं ॥ इदमङ्कबाद्धिध्रुवकमादिन्यादिकरणार्थं वारस्थाने शेषे घटिकास्थाने त्रिंशदिति ॥ षष्टिभागेन लब्धो वारो भवति ॥ अवशेषा वारघटिका । सप्तभागावशेषा वारस्थाने वारो दस्य संक्रान्तिर्नामो भवतीति न्यायः ॥

मेषादौ वारनाड्यः क्रमपरिरचिताः क्षेपकाः शाब्दसौना चन्द्राद्यौ भूतवेदैस्तणाश्वरशशिनः शैलचन्द्रस्तनीयः ॥
वेदाग्नीभूतवन्हीनयनकरभुजंगमीनगेरोर वेश्च षण्मासहानिवृद्धिर्भवति दिननिशायाश्च सूर्यप्रचारैः ॥ २१ ॥

इदानीं मेषादिसंक्रान्तौ क्षेपरोक्षेपकाः शाब्दयवर्षध्रुवके उच्यते ॥ मेषादौ वारनाड्या मिति ॥ वारस्थाने घटिकास्थाने वारनाड्यः क्रमपरिरचिताः क्षेपको

म शास्त्रे यानि का उत्तीर्णा भवन्ति ॥ नक्षत्रभोगार्थं खाद्रिभागेन चक्षीखा द्विति शून्यादिना मस्थुत्तर चत्र शतभागेन लब्धं स्पष्टं भवति ॥ उत्तरं तत्रोपाशिष्या अथ्या
हृतायै तेनैव भागेन लब्धा घटिका भवन्ति ॥ एवं अस्या हृता लेनैव भागेन लिप्ता भवन्ति ॥ अष्टि हृता लेनैव भागेन श्वासा भवन्ति ॥ चक्रं वध्वो न वक्रं ॥ अत्र यत्नवल्लभो
भिन्ना लब्धं नक्षत्रादिकं तच्चक्रे समाविंशतिनक्षत्रात्मके उत्तीर्णे ते चक्रवक्रं भवति । वक्रं न नक्षत्रभोगे ऽभिन्ना भवति तच्च नमिनोरा हो सनो ऽस्मा तीतिन मीत
स्यता मिन: उच्छ्वत्र क्षार्धं मिश्रमिति ॥ नक्षत्रार्धं मार्द्धं त्रयोदशानक्षत्राणि तैर्मिश्रं तत्र भोगे उच्छ्रयति उच्छ्रभोगो भवतीति ॥ ३९ ॥

मासास्त्रिंशद्गुणिताश्च प्रतिदिनसहिताः शैलरवाणेश्वलब्धं त्रिस्थानस्थाविमिश्रं तदपि जलधिरसैर्लब्धहीनोऽस्फुटाहः ॥
शैलर्त्वैकेश्वमिश्रं स्फुटदिवसगणः शैलनागार्द्र भक्तः शेषश्च खाहतं यत्स्तु नरपि रवरसैर्लब्ध शैलानि नाड्यः ॥ ४० ॥

इदानीं मंगलादीनां नक्षत्रभोगार्थमहर्गणमाह्यते ॥ मासा इति करणमासाः ॥ दिनराशिनिभिन्नं त्रिंशद्गुणिताश्च ते दिनानि भवन्ति ॥ ते दिना वर्त्तमानसमान
प्रतिदिनेन सहिता भवन्ति ॥ त्रिस्थानस्थो राशिः ॥ शैलरवाणेश्वैरिति ॥ सप्तोत्तरशतद्वयेन भागलब्धं मध्यराशौ विमिश्रं तन्नाम ध्यराशौ रपि जलधिरसैः ऽश्वतः षष्ठि
भिर्भागलब्धेन हीनो ऽस्फुटाह इति ॥ क्वचित् प्रतिदिनवाराधिक्येन स्फुटार्थमिकवारो हीनो भवति ॥ ततः स्फुटो ऽहर्गणो भवतीति ॥ इदानीं मंगल अ
न्ते ॥ शैलर्त्वैकेश्वमिश्र इति ॥ करणोपक्षा नास्मिन्नापेक्षा इति । सप्तमध्याधिक्ये तेनामिश्रः शैलर्त्वैकेश्वमिश्र इति । स्फुटदिवसगणः शैलनागार्द्र भक्त

इति । स चायं वसगणो मंगलादिनैः सप्ताशीत्युत्तरशतैर्भक्तः शैलनागार्धं भक्त इति ॥ अथैषां मंगलस्य परिवर्तनं ज्ञात्वा शेषं पूर्ववत् कृत्वा लब्धः सप्तविंशतिभिर्हतः गुणः शैलनागार्धभिः हृतं नक्षत्रं भवति ॥ खरसैः षष्टिभिरपि त्यक्तशेषाः घटिकाः लब्धा नाड्यो मंगलभोगेन लब्धा भवन्ति ॥ यत्तापि नाडिकं पूर्वोक्तविधिनेति ॥ अत्र सर्वग्रहाणां पञ्चविधं भोगस्थानं भवति । राशिस्थानं नक्षत्रस्थानं घटिकास्थानं पानीयपलस्थानं श्वासस्थानं ॥ अधोऽधो भवन्ति । श्वासस्थाने षड् उपरि स्थानानि तिष्ठन्ति । षड्भोगेन लब्धाः पानीयपले प्रविशन्ति । पानीयपलानि षष्ट्युत्तरेण तिष्ठन्ति ॥ षष्ट्या भोगेन लब्धा घटिकाराशौ विशन्ति ॥ घटिका षष्टिं नक्षत्रराशौ विशन्ति । नक्षत्राणि कर्मद्वये सार्द्धत्रयोदशार्द्धेन तिष्ठन्ति ॥ ग्रहराशयपलि तिष्ठन्तीति नियमः ॥ ४० ॥

शोध्याः सार्द्धनवारे यदि ऋणमधिकं चक्रमध्ये विशोध्यं योज्यं चक्रार्द्धमर्द्धाधिकमपि च भवेद्व्यक्तशेषोत्क्रमः स्यात् ॥
ऋक्षे मध्याहृतेष्वृक्षमभवति घटिका भूतवह्नीन्दुभक्ते यल्लब्धं मन्दकर्मण्यपि च धनमृणं चोत्क्रमेणाक्रमेण ॥ ४१ ॥

इदानीं मंगलस्य प्रत्यक्षं विरच्यते ॥ शोध्याः सार्द्धनवारे इति । इह मंगलस्य नक्षत्रादिभोगे पृथक् कृते ॥ एकस्मिन् भोगे आरे इति । शोध्या नव नक्षत्राः सार्द्धा इति । त्रिंशद् घटिका घटिकास्थाने शोधनीया जन्मचरणग्रहणार्थं ॥ अश्विन्याद्येन नक्षत्रभोगे यदि ऋणमधिकं चक्रमिश्रे विशोध्यमिति । इह नक्षत्रभोगे अश्विन्यादिके ऽवरूपं ऋणं शोधनीयं यद्यधिकं ऋणं ऋणराशिरधिका ॥ भोग्यराशिर्हीना तदा चक्रमिश्रे विशोध्यं चक्रं सप्तविंशतिनक्षत्रसमूहः ॥ तेन मिश्रे वि

चापरार्द्धे रविगमनवशान्निर्गमश्च ग्रहाणां सप्तत्रिंशत्तु मासैर्भवति करहुतैः शीघ्रवक्रं च केतोः ॥ ४९ ॥

सप्तविंशाद्दिनर्द्धैरिति ॥ अत्राकोपदेऽङ्कपगानि प्रथमराशेर्याविंशत्ततो दिनानि पश्चदश ॥ ततः कृ ४ इति ष ट् ॥ एवमपरार्द्धे विज्ञेयं प्रकटरसपदानीति वचनात् । शीघ्रकार्म्यैरसाध्या इति । शीघ्रेन क्षत्रकर्माणि ॥ चतुर्दशस्थाने रसाध्याः षड्घटिकाद्याश्चारास्ते याहुर्माले च वक्ष्यमाणे वक्रव्यायग्रहचारसमूहे सर्वं भेति ॥ शनैश्चरस्थ द्धिः ॥ ॥ मृतनीचारलक्षणमुच्यते ॥ शीघ्रमन्दश्च चारः क्रमपदगमनमिति ॥ शीघ्रकर्माणि सूर्यमण्डलादुदितग्रहस्य चतुर्दशचरणा घटिकार्द्धे पूर्वभोगः शीघ्रचार उच्यते ॥ क्रमेणापदगमनमिति ॥ क्रमपदगमनेऽपरार्द्धे यो भोगः स मन्दचार उच्यते ॥ वक्रमेतोत्क्रमेण ॥ ततोर्द्धचक्रे परित्यक्ते उत्क्रमो ग्रहस्य भवति । एवमुत्क्रमो वक्रचार उच्यते ॥ पूर्वार्द्धे चापरार्द्धे रविगमनवशान्निर्गमश्च ग्रहाणां निर्गमचार इत्युच्यते ॥ वक्रपरित्यागात् अत्रोदयात् क्रमगमनेन धनवृद्धिः पूर्वार्द्धे यावत्ततोऽपरार्द्धे धनक्षयं वक्रार्द्धं यावत्ततः ॥ वक्रार्द्धपरित्यागात् उत्क्रमेण ॥ पूर्वार्द्धे ऋणवृद्धिरपरार्द्धे ऋणहानिः सूर्यनक्षत्रप्रवेशं यावत्ततोस्तमनं सूर्ये ॥ उत्तरेबोत्पत्तेनैव क्रमेणावेदितव्य इति ॥ सप्तत्रिंशत्तु मासैर्भवति ॥ करहुतैः शीघ्रवक्रं च केतोरिति ॥ अत्र केतोरुद्देशपदमिदं वक्ष्यमाणेन विस्तरेणाव वक्ष्यामीति ॥ ग्रहाधिकारः ॥

यः कश्चित्सूर्यभोगं प्रविशति नियतं स ग्रहश्चास्तमेति सूर्यस्तमनोदितः स्यात्स्वगतिविभागेन मार्गी च तस्य ॥ वामे मार्गे
स्थितो यो रविगमनवशात्सञ्चरत्युत्तरेण सव्यस्थो दक्षिणेन स्फुटमपि वरयोर्व्युत्क्रममन्योन्यमत्र ॥ ५० ॥

इदानीं ग्रहाणामस्तमनोदयकाल उच्यते ॥ यः कश्चित्सूर्यभोगं प्रविशति नियतं स ग्रहश्चास्तमेतीति ॥ सूर्यमण्डलरश्मिभिरदृष्टत्वाद् अस्तंगत इत्युच्यते ।

नग्रहस्य सर्वथाभावइति ॥सूर्यंत्यक्तोदितः स्यादिति ॥सत्य वास्तंगतो ग्रहः ॥स्वचरगवशात्सूर्यंत्यक्तः सच्छादितो भवति ॥सूर्यरश्मिभिः परित्यक्तत्वादिति ॥अयनगतिविभागेन मार्गश्चतस्येति ॥तस्योदितग्रहस्यायनगतिविभागेन मार्गश्चायनयोर्विभागोऽयनविभागः ।आश्विवलयान्केवारास्यान्तरे हिमवन्तं यावत् हिमवतो दक्षिणोऽश्विवलयं यावत् ॥सार्द्धद्वादशानि दिनशतानि विभागेन इति ॥तेन सूर्यस्यायनगतिविभाग इति ॥तेन सूर्यगतिविभागेनोदितानां ग्रहाणां मार्गश्चेते र्गो भवतीति ॥वाममार्गे स्थितो योऽरविगमनवशात्सम्प्रजत्युत्तरेणेति ॥उक्तवाममार्गे ग्रहाणां सौम्यादीनां सौम्यानां बुधगुरुशुक्रकेतूनां वामाङ्गे संभूतत्वादिति ॥सूर्यमप्र ग्रिप्यलमनकाले वामाङ्गे न प्रवेशो वामाङ्गे नास्तुदयोऽतो नाममार्गस्थितो यो ग्रहः स क्रूरग्रहाणां चरेण व्रजति ॥यथा भानोः सव्यस्थो दक्षिणेनेति ॥इह सव्यस्थः सव्यमार्गे यः सूर्यमस्तुतेऽस्तंगतो मंगलो बृहस्पतिः शनिरिति ॥क्रूरो दक्षिणेनसौम्यग्रहाणां व्रजति दक्षिणाङ्गे संभूतत्वादिति ॥ अत्र वामाङ्गे संभूतत्वात् ॥ केतुः सौम्यकायभेदेन ॥दक्षिणाङ्गे संभूतत्वाद्बृहस्पती रौद्रः कायभेदेन तथास्फुरन्यपि त्वरिपोर्धूमसौम्यमत्रेति ॥अनयोः सौम्यक्रूरयोर्बुधमङ्गलयोर्बृहस्पतिशुक्रयोः शनिकेत्वोः ॥परस्परं रिपुत्वादिति ॥

स्वक्षेत्रे संस्थितानां यदि भवति रिपुर्निश्चितं तत्र भङ्गं नक्षत्रेऽप्येनभङ्गं खलु भवति समायुक्तिरन्योन्यमत्र ॥
वामे चन्द्रप्रवेशो यदि भवति रवौ निर्गमश्चोत्तरेण वामे शृङ्गोन्नतिः स्यात्क्वचिदयनवशान्निर्गमे दक्षिणे च ॥ ५१ ॥

स्वक्षेत्रे संस्थितानां यदि भवति रिपुर्निश्चितं तत्र भङ्गमिति स्वक्षेत्रं मङ्गलस्य मेषराशिर्वृश्चिकराशिश्चेति ॥तस्मिन् क्षेत्रे संस्थितस्य मंगलस्य यद्विषो भवति ॥तस्मि

शोधनीयं स्वर्णामित्यर्थः ॥ त्याज्यं चक्रार्द्धमिति ॥ अत्र शोधितेऽवशेषं चक्रार्द्धं यदि भवति । तदा त्याज्यं अर्द्धाधिकमपि भवेत् ॥ अत्रार्द्धादिकं यदवशेषं तस्य त्यक्तशेषं स्यात्क्रमो भवति ॥ उत्क्रमेणामन्दकार्ये धनं सर्वग्रहाणां क्रमेणार्क रामिति ॥ स्पष्टे षष्ठ्या हृते स्फुटं भवति घटिका षष्टिकापि तु निमित्तं ॥ स्पष्टे पि ऽष षष्ठ्या हृते सति अधःस्थं घटिकादियुतं स्फुटं भवति ॥ भूतवह्नीन्दु उत्क्रमराशिचरणार्थं ॥ षष्टिकाराशेः पंचत्रिंशदधिकशतेन भक्तं यल्लब्धं तत्राशिचरणा भवति ॥ मस्तु कर्मणापि च षष्टिकाया चोत्क्रमेण क्रमेण यथासंख्यं वेदितव्यं ॥ ४१ ॥

तत्त्वान्यष्टादशाद्रिः प्रकटरसपदान्यर्द्धचक्रेऽथ षष्ट्या हृत्वा भोगेन नाडीः शरगुणराशिभिर्भागलब्धोर्द्धचक्रात् ॥
पूर्वार्द्धे स्यात्स तत्र स्तो भवति यदवशात्त्याज्यमेवं परार्द्धे भुक्तौ हत्वैकपिण्डं ग्रहगमनवशाद्येपहेयं च नाड्या ॥ ४२ ॥

अत्र राशिचारपदानि ॥ तत्त्वानि जन्मनः प्रथमराशौ पंचविंशात् द्वितीये अष्टादश ॥ तृतीये अशीति सप्त पूर्वराशित्रये ॥ ततो परचक्रार्द्धे चतुर्थराशौ ॥ सप्त पंचमे अष्टादश षष्ठे पंचविंशादिति ॥ प्रकटरसपदान्यर्द्धचक्रेऽप्यधोर्द्धमिति ॥ हृत्वा भोगेन नाडीः षष्टिकाराशेः पंचत्रिंशदधिकशतभागेन लब्धो राशिभोगो भवति ॥ तदेव षष्ठम ध्येयं ॥ ततो गतौ यो भुज्यत इति भोगः ॥ तेन भोगेनावशेषं गणावशेषनाडी हन्यात् ॥ शरगुणराशिभिर्भागलब्धोर्द्धचक्रात् ॥ नाडीभोगेनाहतराशेः पञ्चत्रिंशदधिकशतभागेन लब्धः पूर्वार्द्धे स्यात्सस्थो भवति ॥ यदवशादिति ॥ यावद्ग्रहोऽपरार्द्धं न क्रमति ॥ ततस्त्याज्यमेवं परार्द्धे स एव भागोः

परार्द्धे त्याज्यो भवति ॥ अर्कं दत्वैकपिण्डमिति ॥ यद्राशिवशेन ग्रहाणां उच्चाग्रहे तदेकपिण्डं कृत्वा पूर्वार्द्धे स्थितं ॥ अपरार्द्धे उक्तपिण्डमेकं कृत्वा पूर्वापर अर्के स्तन्त्राग्रहगमनवशाद्देयं हेयं च नान्यामिति ॥ ग्रहाणां गमनं उत्क्रमेण क्रमेण च तत्तद्वशाद्देयं हेयं ॥ उत्क्रमवशाद्देयं क्रमवशाद्धेयं नान्यथा ॥ षट्काराशौ ग्रहभोगेन नक्षत्रराशाविति नियमः ॥ सर्वत्र मन्दकर्मणि मंगलादीनामिति । राशिकर्मविधिः ॥ जन्मचरणाशुद्धिरिति ॥ ४२ ॥

सूर्य्यभौमौ विशोध्यौ गुरुरपि रविजः शीघ्रकर्मण्यपैवं सौम्ये शुक्रे च सूर्य्यः स्वफलभवनिधनं शीघ्रकर्मक्रमेण ॥ शो
ध्याः शेषास्त्रचारा ग्रहचरणपदैः शेषनाडीनिहन्ता पश्चाद्भोगेन लब्धं ग्रहचरणपदं व्याससार्य्यं तथैव ॥ ४२ ॥

इदानीं शीघ्रकर्मविधिरुच्यते ॥ सूर्य्यभौमौ विशोध्यौ गुरुरपि रविजः शीघ्रकर्मण्यपैवं ॥ अथानन्तरमेवेति ॥ उत्तरराशिकर्मविशुद्धग्रहभोगः सूर्य्यभोगे शोधनीयः ॥ सूर्य्यभौमौ विशोध्य इति ॥ मन्दभोगेन विकाराहृते पृथक् ग्रहभोगं कृत्वा अग्रे वेनिकृत्य गुरुरपि शोध्यो रविजः शनिरपि शोध्यो भवति ॥ यथा मंगलोपि शब्देनेति ॥ कशीघ्रकर्मणि । एवं सौम्ये सौम्यभोगे सूर्यः शोध्यो बुधभोगार्थं शुक्रे च शुक्रभोगे च सूर्य्यः शोध्यः शुक्रभोगार्थं । अत्रोच्चग्रहाणां चग्रहे विशोध्य इति नियमः ॥ तेन सौम्ये शुक्रे च सूर्य्यः शोधनीयः ॥ स्वफलभवतिधनं शीघ्रकार्य्यक्रमेणेति ॥ अत्र शीघ्रकर्मणि शीघ्रकार्य्यक्रमेण धनं भवति ॥ स्वाल्पमिति निश्चितं ॥ उक्तक्रमेण करणं भवति ॥ अर्द्धचक्रे परित्यक्ते ॥ उच्चग्रहभोगेन यावच्छेषे शोध्ये शेषाः त्रचाराः ॥ उच्चग्रहभोगविशुद्धावशेषमनक्षत्रादिनभोगवशेन ग्रहाणां न

रुक्षेत्रेनेन तेन तदा निश्चितं तदुक्तं ॥ एवं बुधक्षेत्रे मिथुने कन्यायां यदि मंगलो भौमो वा तदा ग्रावर्षणं भवति । तथापि उक्तमिति ॥ एवं बृहस्पतिक्षेत्रे धनुषि मी-
ने शुक्रो यदि भवति तदा उक्तं शुक्रबृहस्पती ॥ एवं शुक्रक्षेत्रे वृषभे तुलायां चेति ॥ तथा शनिक्षेत्रे मकरे कुंभे यदि केतुर्भवति तदा तदुक्तं ॥ एवं कर्कटेपि
दिवानिर्भवति । शनिक्षेत्रे तदा केतुनासह तदुक्तं वामाङ्के केतौ स्वस्वक्षेत्रादिति । नक्षत्रे भौमेन तदुक्तमिति ॥ अथ नक्षत्रे ग्रहाः ॥ जन्मनक्षत्रात्प्रक्षेपेति ।
केनवा स्वक्षेत्रे राशौ तदुक्तं जन्मनक्षत्रेपि विशेषोर्ध्वं भवतीति ॥ पुनर्वसौ शुक्रो नक्षत्रे मघायां मंगलो नक्षत्रे । हस्तायां बृहस्पतिर्नक्षत्रे । अनुराधायां बुधनक्षत्रे । मूले
शनिर्नक्षत्रे । उत्तराषाढायां केतुर्नक्षत्रे । सौम्यमंगलयोः स्वस्वनक्षत्रे तदुक्तमेवं शुक्रबृहस्पती ॥ शनिकेतौ स्वीयेन नक्षत्रे विना भौमेन नक्षत्रे क्षेत्रे वा तदुक्तं न भवती ति
मतं निश्चितं ॥ जन्मनक्षत्रे समागमे क्रूरलोकाभ्यां भवतीति ॥ एवं चन्द्रस्यापि फलं ज्ञातव्यं ॥ वामे चन्द्रग्रहे राहुर्यदि भवति रवौ निर्गमस्थानेरेखा भवति ॥ तत्र तदुक्तं श्लोके त्व-
तिः ॥ क्वचिद्ध्ययनवशाद्दक्षिणे दक्षिणायने ॥ दुर्भिक्षाना वृष्टिहेतोः स्वभावतः इति ॥ ५१ ॥

पर्वच्छेदेन राहोर्व्रजति रविमतुरत्वं संस्तुतोयाममस्तव वामाचारे बलेभ्यो रविगमनवशाद्दक्षिणे सव्यभागे ॥ वामे
चन्द्रग्रहे राहुर्यदि भवति रवौ निर्गमस्थानेरेखा । अस्मिन् यात्यूर्ध्वचित्रं निशि दिवि समसाध्य तो गोलरेखा ॥ ५२ ॥

त्वानीतो राहोः ग्रहे राहुच्यते ॥ पर्वच्छेदे पूर्णिमायाश्छेदे चकारादमावास्याश्छेदे च ॥ राहोर्व्रजति चन्द्रः समण्डलः संस्तुतोयामस्तवं भवति ॥ अत्र संस्तवः पूर्वं ग्रासः सस्तव

राहोर्वलनवशाद्गृहीतव्यः॥ सर्वकरस्थानान्तरे प्रसिद्धत्वादत्र यत्नेन कथितमस्त्विति भगवनेति। वामचारे अपसव्ये वामे वलने राहोरपसव्ये वामे चन्द्रस्य ग्रासो भवति विगमनवशात् दक्षिणेऽस्य भागे इति॥ रविभागान्निर्गमनस्य चन्द्रस्य गमनवशाद्विगमनवशादिति॥ दक्षिणे दक्षिणवलने दक्षिणे चन्द्रग्रासो भवति। एवं राहोर्विद्धि ऽपसतीति ग्रासाधरमिति॥ एवं च क्रान्तिभेदावलनं वलनवशात् ग्रासोऽयं जायते विदिक्षु निर्गमं स्पष्टतश्च॥ पूर्वाश्वलनान्निर्गतं पश्चिमवलने स्पृष्टोऽपसतीति॥ भूलनत्रे नान्यत्कस्यान्तरे वा राहोर्वलनादिकं ज्ञातव्यमिति॥ ॥ इदानीं नक्षत्रगोल उच्यते॥ अश्विन्यां मेषादौ चित्रान्ते निशिदिवससमाप्तौ तोऽगोलोऽरवा॥ अश्विन्यादि चित्रार्धं चित्रार्धादि रेवत्यन्तं मेषतुलादि विभागे दिनरात्रिः समा गोलरेखा मध्यनोरवेतद्व्यासं गमनहेतोस्त्रिंशत्त्रिंशद्दण्डात्मिका भवति॥ तदेव गोलं ऋक्षभेदेन भवति॥

ऋक्षं सव्यापसव्यं व्रजति भुवनपदे संस्थिते राशिभेदे ध्रुवापाकार्त्तिग्रन्थौ शिखिवलयगतं दक्षिणे गोलमध्यात्॥
वामेन स्थितेऽस्मिन् कमलदलवदमेरुपूर्वं जलाधौ वह्नेः ज्ञीतात्रिसीरवः खखखशरनगा योजनानां सहस्री॥ ५२॥

ऋक्षं सव्यापसव्यं व्रजति भुवनपदे संस्थिते राशिभेदेऽपीति॥ अत्र कर्मभूम्यां भ्रमणवशात् ऋजुविधगोलगमनं पश्चादेशदानन्तरे प्रोक्तं॥ अत्र किल गोले अष्टग्रहणां शीघ्रमन्दगमनभेदेन राशिभोगस्तु नस्तु इति॥ प्रधान्यमर्दनेऽपि बलीवर्दः स्तम्भात् दूरे भ्रमति सद्गृही प्रगामी वक्रभिः पदैः प्रदक्षिणां करोति॥ यस्तम्भसमीपे भ्रमति स मन्दगामी लोकपदैः प्रदक्षिणां करोति॥ एवं ग्रहा अपि वेदितव्या इति॥ लौकिकमतं प्रथमं उक्त्वा विचार्यते॥ अत्र गणितव्यवहारो नास्ति॥

एषांद्दशास्वरविकाराणां नेहाधिकारान्ताः कामादशविधाभवन्ति। प्रकटविद्यमाना आगमेऽङ्कताः व्यञ्जनान्येककःसइति॥ व्यञ्जनानिककारादीनिसम
लानिगत्वा हरिशम्सगरहीतानि॥ एकवर्णः कः सोभवति॥ कसोः संयोगः क्षकार इति॥ स एव एकादशमः कामभवइति॥ १४ ॥

एकत्रिंशत्तवैश्वविभवस्तुभवेज्जातभेदात्त्रिधातु रेफक्षत्रत्रयस्तात्त्रिभुवनसकलं चादिकादिप्रभेदैः॥ रवा
भावरूर्कं गम्भोनिपादितनरको वाङ्कुताभोद्वितीयः पञ्चात्मत्वाप्रधूमो हरिरुपचितमो गौरवः सप्तमश्च॥ १५ ॥

एकत्रिंशद्भवैश्च त्रिभवस्तु भवेदिति॥ एभिरकारादिभिरेकत्रिंशद्भवैस्त्रिभवः॥ कामभवो रूपभवो ऽरूपभवो भवमिति॥ अत्रैकत्रिंशद्भवा इति॥ अ
रूपादयः नैवसंज्ञानासंज्ञायतनोपगाः॥ आकिञ्चन्यायतनोपगाः॥ विज्ञानानन्त्यायतनोपगाः॥ आकाशानन्त्यायतनोपगाः॥ इत्यरूपाश्चत्वारः॥
अकनिष्ठादयः षोडशरूपाः॥ अकनिष्ठाः। सुदर्शना। अतपा। अवृहा। वृहत्फलाः। पुण्यप्रसवा। अनभ्राः। शुभकृत्स्ना। अप्रमाणशुभाः। परीत्तशु
भा। आभास्वरा। अप्रमाणाभाः। परीत्ताभाः। महाब्रह्माणः। ब्रह्मपुरोहिता। ब्रह्मकायिका इति॥ षोडशरूपाः॥ परनिर्मितवशवर्त्यादयः। एकादश
कामा इति॥ अत्र परनिर्मितवशवर्तिनः। निर्माणरतयः। तुषिताः। यामाः। त्रायस्त्रिंशाः॥ चातुर्महाराजकायिका इति। षट्कामावचरा देवाः। अधम क
ल्पाः। षट्पञ्चचतुस्त्रिद्व्येक कल्पाउष्मान इति॥ अत्राऽसुरास्तदन्तर्वर्तिनः मनुष्याः तिर्यञ्चः प्रेतानारका इति॥ पञ्चकामभवाः॥ एवमेकत्रिंशद्भवाः॥ ए

षाम कारादयः स्वरास्संज्ञामप्राप्य यथासंख्यमरूपादीनां उक्तक्रमेणोत्ति ॥ तद्यथा ॥ अ आ अं अः ॥ इत्यरूपाकाशकृत्स्नाः ॥ इ ई ए ऐ इति वायुकृत्स्नाः ॥ ऋ
ॠ अर् आर् अग्निकृत्स्नाः ॥ उ ऊ ओ औ इत्यप्कृत्स्नाः ॥ ऌ ॡ अल् आल् इति पृथिवीकृत्स्नाः ॥ इति ज्ञानबलेन षोडशरूपाः ॥ वाय्वादिकृत्स्नसमाधिबले
न अकनिष्ठादिका बभूवुः ॥ ह हा य या र रा इति षट्कामावचराः दानबलेन मन्त्रजापबलेन बभूवुः ॥ व वा असुरा मनुष्या मानबलेन । मनुष्याः शुभाशुभक
र्मबलेन बभूवुः । ल ला तिर्यञ्चप्रेताः ॥ तिर्यञ्चा अधमपापेन । प्रेता मध्यमपापेन । क्षकारे शा नारका उत्तमपापेन बभूवुः ॥ प्रथमनागलोके पुण्यबलेन । प्रथ
मनरके पापबलेन । अधमकल्पायुषः ॥ द्वितीयतृतीयनरके मध्यमकल्पायुषः । चतुर्थपञ्चमनरके उत्कृष्टकल्पायुषः । षष्ठसप्तनरकेषु महाकल्पा
युष इति ॥ अष्टमेनरके लोकधातूपसंहारायुषः ॥ इत्येवमेकत्रिंशद्भवैस्त्रिभव इत्यर्थः ॥ धातुभवास्त्रिधातुरिति ॥ एतद्धातुत्रयं स्यात् कायवाक्चि
त्तमिति ॥ त्रिभुवनसकलं स्वर्गमर्त्यपातालं । आदिकादिप्रभेदा इति ज्ञातव्यं ॥ अधमकल्पमानं योजनमेकं आयाम व्यायामेन गर्त्तं ॥ तच्च वाला
ग्रैः सूक्ष्मैः परिपूर्णं वर्षशतेन एकैकवालाग्रउद्धार्यमाणं परिरिक्तं भवति तदा अधमकल्पैकदिनं । तेन त्रिंशद्दिनेन मासः । द्वादशमासैर्वर्षं वर्ष
शतेन कल्प इत्युच्यते । एवं तस्य वर्गो अधमकल्पशतसहस्राणां मध्यमकल्पो मध्यमकल्पवर्गेण उत्कृष्टकल्प इति ॥ एवं नरकादिदुःखसत्वानां कल्पाने
कसंख्यं पापवशाद्भवति ॥ पुण्यवशात्स्वर्गादिकं सौख्यं कल्पानेकं भवति ॥ देवानामिति ॥ ॥ इदानीं नागभवनादीनां संज्ञोच्यते ॥ तत्र नास्ति न
स्त्रीविवादतीर्थिकादिभिश्छति । रत्नाभात् सर्कराम्भोनिगदितनरक इति ॥ इह रत्नैर्यस्मिन्नावासे आभाः । स आवासो रत्नाभः ॥ तस्मादसुरनाग

वंशाच्छैनेश्च षष्टिर्मानं क्रमेण त्वरण नक्षत्राणां भूतदेवासुराणां शक्रे भर्तृदिनेकं। एवं पूर्वोक्तक्रमेण एषां नक्षत्रादीनां स्वकीय स्वकीय श्वासैः षट्शताधिक एकोविंशत्सहस्रैर्दिनं भवति॥ एतन्मानेन शक्तिमान मकनिष्ठदेवमानं वलतिर्अवितनोसन्निरोधगानां शक्तिमानमिति। खण्डे खण्डे चक्री व्रजाति शिवपदं। प्रत्येकखण्डे शुद्धधर्मं प्रवर्तयित्वा व्रजतिम शाश्वतपदं महासुखस्थानमिति। द्वादशार्कदिने के एवं प्रत्येकैकखण्डे प्रत्येकैक चक्रवर्ती धर्मप्रवर्त्तकः॥ एकदिने द्वादशचक्रवर्तिनो भवन्ति। अष्टादशाष्टादश शतैः शक्तिश्वासैः मनुष्याणां वर्षैरेकैको व्रजति। एवं द्वादशार्का धर्मा दिवाकराः शुभपद्ज्ञानमार्गप्रवर्त्तका इति॥ वारिवर्षेण द्वादशराशिभेदेन द्वादशार्का व्रजन्तीति॥ २४ ॥

पक्षामासाः समस्ता ऋतुयुगसमया अग्निकालोयनेके वर्षं त्राजन्मसंख्या प्रोक्तघटिकान्यपाणीपलानि॥
एतान्येवं व्रजन्ति त्वत्र नक्षत्रभूमिदेवासुराणां शक्रे भर्तुर्दिनैके त्रिभुवननिलये देहमध्येन चैव॥ २५ ॥

इदानीं सूक्ष्मादीनां श्वासभेदेन प्रत्येकदिने कालभेद उच्यते॥ पक्षा इत्यादि॥ इह प्रत्येकदिने नक्षत्रादीनां चतुर्विंशति पक्षाः॥ मासाः समस्ता इति॥ द्वादशमासाः। ऋतवः षट्। युगसमयाश्चत्वारः॥ अग्निकाल इति त्रयः कालाः॥ अयनौ द्वौ वर्षं राजन् समस्तमिति॥ एतत्सर्वं वर्षभेदेन ज्ञातव्यं॥ तत्परतदिनं षष्ठ्युत्तरत्रिशताधिक घटिकानन्तपाणी पलानि। विंशत्युत्तरत्रिशताधिक चत्वारिंशत्सहस्राणि वर्षाणि घटिकाषड्शताधिकैकविंशत्सहस्रं

ख्याः॥ पातालपत्तनानि षट्सप्ततिसहस्राधिकचतुःशतलक्षाणीति॥ एतान्येवं व्रजन्ति प्रत्येकं दिनेन तत्त्वादीनां मानानि वर्षाणि निश्वासभेदेन व्रजन्ति॥ तत्रैकपक्षो नवशतैः श्वासैर्व्रजति॥ चतुर्विंशतिपक्षैर्दिनं वर्षं व्रजति॥ अष्टादशशतश्वासैर्मासो मासस्थमासैर्दिनं वर्षं व्रजति॥ षट्त्रिंशाद्भिः श्वासशतैरृतुः षड्भिरृतुभिर्दिनं वर्षं व्रजति॥ चतुःपञ्चाशत्श्वासशतैर्युगं व्रजति। चतुर्युगैर्दिनं वर्षं व्रजति॥ मास प्रति श्वासशतैरेककालो व्रजति॥ त्रिकालैर्दिनं वर्षं व्रजति॥ अष्टशताधिकदशसहस्रैः श्वासैरयनं व्रजति॥ अयनाभ्यां दिनं वर्षं व्रजति॥ एवं षोडशशताधिकविंशत्सहस्रश्वासैः स्वस्वमानैः प्रत्येकं दिनं वर्षं व्रजति॥ तत्त्वादीनामिति। एवं षष्टिश्वासैरहोरात्रं व्रजति॥ षष्ट्युत्तरत्रिशताहोरात्रैर्दिनं वर्षं व्रजति॥ पञ्चश्वासैर्लवं व्रजति॥ विंशत्यधिकत्रिचत्वारिंशत् श्वासशतैर्दिनं वर्षं व्रजति॥ एकश्वासो घटिका व्रजति॥ एकश्वासस्य षट्संख्यापाणिपलं व्रजति॥ श्वासस्य षष्ठ्युत्तरत्रिशतांशः श्वासो व्रजति॥ एकविंशत्सहस्रषट्शताधिकघटिकाभिर्दिनं वर्षं भवति॥ षट्सप्ततिसहस्राधिकचतुःशतलक्षपाणिपलैर्दिनं वर्षं व्रजति॥ षट्सप्ततिसहस्राधिकसप्तसप्ततिलक्षश्वासैर्दिनं वर्षं व्रजति॥ एवं षट्सप्ततिलक्षाधिकनवसप्ततिकोटिश्वासैर्दिनशतं व्रजति॥ असौ कर्मवशात् परमायुः न्यूनमधिको भवति॥ स्वस्वमानैर्योगिनां योगबलेन तपश्चासमाधिबलेनाधिको भवति॥ एकश्वासो घटिका व्रजति॥ पापसत्त्वानां पापबलेन हीनो भवति॥ अस्य परमागमउक्तानियमो नास्ति किन्तु देहे कृशानां सर्वेतुरूपः। शतेन्द्रिय इति॥ अत्र प्रमाणं च वचनमिदं मनुष्याणां वर्षशतं परमायुरिति॥ कृतयुगेन राणामायुर्वर्ष [illegible] दिति॥ अत्र नीतार्थेन प्रतिदिनं प्रतिवर्षस्वरूपशब्देनोच्यते। दिनशतेन वर्षशतेनाध्यात्मनिवासे॥ उक्तेरेवान्यश्वासाश्चक्रवर्तनतः शतायुर्वैद्युरूपः शतेन्द्रिय इति॥ एवंविधशतदिनैश्चतुर्युगाः

इरणापेक्षावशेन भगवताऽनागतमेवव्याकृतमिति॥

देयाहेयाश्चदेयाः पुनरपितिथयो वारनाडीपदेषुपित्र्येषु भागेऽथवचन्द्रैः समविषमगते देयहेयौपदार्थौ॥ शून्येशून्यं विशुद्धं त्रिदशशतिपदेपञ्चनेत्रार्कयोर्द्विकं तिथ्यारेष्वेकादश्योऽष्टौपञ्चजलधिपदेविंशतिश्चैककृत्नां॥ २१॥

इदानीं मासशुद्धवाणिज्यादिगरिणमुच्यते॥ देयाहेयाश्चदेयाः पुनरपितिथयोवारनाडीपदेष्विति। इह प्रतिमासशुद्धवद्धेशु क प्रतिपदाद्येकतिथिमारभ्य यावत्त्रिंशत्तमामावास्यान्तास्तिथयो देयाहेयाः पुनर्देयाश्चेति वारस्थाने देयाः प्रतिदिनवारार्थं॥ घटिकास्थाने हेया चन्द्रकलायामेकस्य पर्यन्तितः पुनर्देयाः पित्र्यस्थाने चन्द्रपदानां धनत्ऋणाभोगपरिशुद्धितइति॥ पित्र्ये भागेऽथचन्द्रैः समविषमगते देयहेयौपदार्थाविति॥ पित्र्यस्थाने पित्र्याद्दर्षिचन्द्रेण चतुर्दशभागेन समगतेनपदार्थोधनं भवति॥ विषमगतेन ऋणं पदार्थोभवति॥ अत्रसमभागद्वाभ्यांगतश्चतुर्भिर्वागतइतिनगतोऽपिसमइति॥ विषमभागे एकेनगतः त्रिभिर्वागतइति॥ तत्र पितॄनाम्नि भागाः॥ सप्तपञ्चाशदूर्ध्वं त्रिंशत्तिथिसहिताः सप्ताविंशतिपित्र्यकान भवन्ति॥ अतश्चतुर्दशभागेश्चत्वारोविभक्ता भवन्तीतितेन समविषमभागेन पदार्था देयाहेयावावेदितव्याः॥ पदार्थानाम चन्द्रचारपदानि चतुर्दशस्थानेऽधऊर्द्ध सप्तसप्तपदव्यावृत्त्या अत्रबोमविलोमाभ्यां पृथिव्यादिग्रहाभेदभिन्नानि॥ तेचपदार्थादेयाहेयाभवन्ति॥ शून्येशून्यंविशुद्धमिति॥ चतुर्दशभागावशेषं यदिशून्यंतदापदार्थोऽपिशून्योनदेयोनहेयइति॥ स्याच्चेत् करणात्त्रिदशशतिपदेपञ्चेति॥ त्रयोदश्यामेवपदे अवशेषे दृष्टे एकपदेवापञ्च घटिकाधनस्वा ऋणस्वा भवन्ति॥ एवंनेत्रार्कयोर्द्वि

गितिद्विपदे अधिके ऽवशेषे ऽष्टादशैव दशघटिकादेया भवन्ति ॥ चन्द्रकला वृद्धिहानिवशादिति ॥ तिथ्यारम्भ इति ॥ पञ्चदशैकादशो अत्राविति ॥ ततो
ऽभवन्ति ॥ दशपदजलधीति ॥ चतुर्थपदे भागावशेषे दृष्टे विंशतिश्चैकहीना भवन्ति ॥ २१ ॥

द्वात्रिंशत्पञ्चरन्ध्रे ऋतुवसुतिजिनाः सप्तमे पञ्चविंशत् तस्मिन्नर्कप्रभेदैः प्रकटितरविकादेयहेया भवन्ति ॥
भूताभूतैकवेदाः शिखिकरशशिनः पूर्वभागे परे च पिरखे भागे ऽब्धिचन्द्रैः समविषमगते देयहेयाश्च वाराः ॥ २२ ॥

द्वाविंशत्पञ्चमे रन्ध्र इति नवमे भवन्ति ॥ ऋत्वादिरिति षड्वसु नीत्यष्टमे पदे जिनाश्चतुर्विंशतिर्भवन्ति ॥ सप्तमे पदे भागावशेषे दृष्टे पञ्चविंशघटिका समे देया विषमे हेया भवन्ति ॥ तस्मिन्नर्कप्रभेदैः प्रकटितरविकादेयहेया भवन्ति ॥ तस्मिन्तिथिभोगे ऽर्कप्रभेदेन सूर्यपदानि भवन्ति ॥ सूर्यस्य ऋणं तस्मिन्नृणं ॥ सूर्यस्य धनं तस्मिन्नेव धनमिति सूर्यप्रभेदः ॥ अत्र चन्द्रपदानि भूताभूतैकवेदाः शिखिकरशशिनः पूर्वभागे परे चेति ॥ भूता इति पञ्चभूतेनिततः अधः पञ्च इत्यभूरिति ॥ ॥ततोऽधः पञ्च वेदा इति ततोऽधश्चत्वारि शिखीति ततोऽधः त्रयः ॥ कर इति ततोऽधो द्वे शशिन इति ततोऽध एकपदं ॥ एवं सप्तस्थानेषु पदानि ॥ ततो ऽपर सप्तस्थानेषु विलोमेन एकोदिना चतुर्दशस्थाने पञ्चपदानि यावत् ॥ एवं चन्द्रपदानां न्यासो भवति ॥ चतुर्दशस्थाने ऽब्धीति ॥ पिरखे भागे ऽब्धिचन्द्रैः समविषमगते देयहेयाश्च वारा इति ॥ अत्रापि चतुर्दश भागावशेषे दृष्टे समगते ॥ वाराः पञ्च दश देया विषमगते हेया

ग्रहैते। चन्द्रराशीभूत इति॥ चन्द्र इति वारस्थाने एकः॥ अग्निभूत इति सप्तपञ्चाशत् घटिकास्थाने॥ अत्र वारस्थाने वर्षप्रवेशके गासार्द्धमीवारो भवति॥
तन वारेषा संक्रान्तिर्भवति॥ घटिकास्थाने षष्ठ्या घटिकास्त्वाभिर्घटिकाभिरिति॥ कारणान्मायः॥ वेदाविति। द्विवचनं छन्दोवशादिति। वेद चत्वारि वारस्थाने।
गाशर इति॥ त्रिपञ्चाशद् घटिकास्थाने वृषसंक्रान्तौ॥ शशिन इति वारस्थाने एकः॥ शैलचन्द्रमिति सप्तदश घटिकास्थाने॥ तृतीय इति मिथुनसंक्रान्तौ वेद
इति वारस्थाने चत्वारः॥ अग्निभूत इति त्रिपञ्चाशद् घटिकास्थाने कर्कटसंक्रान्तौ। चन्द्र इति वारे एकः॥ नयनकर इति द्वाविंशद् घटिकास्थाने सिंहे॥ डुग इ
ति चत्वारि वारस्थाने वेदनेत्राग्नीति चतुर्विंशति घटिकास्थाने॥ षष्ठ इति कन्यासंक्रान्तौ॥ षद्वारे चन्द्रवारा इति॥ एकपञ्चाशद् घटिकास्थाने तुलासंक्रा
न्तौ। चन्द्र इति वारे एकः॥ गिरिडुग इति सप्तचत्वारिंशद् घटिकास्थाने वृश्चिकसंक्रान्तौ॥ शरदीति वारस्थाने त्रयः षट्चन्द्र इति षोडश घटिकास्थाने
धनुःसंक्रान्तौ। वेद इति वारस्थाने चत्वारः॥ अग्निलोका इति सप्तत्रिंशत् घटिकास्थाने मकरसंक्रान्तौ॥ २७ ॥

षड्वेदैः शून्यशून्यं नयनशरपदं मीनराशौ रवेश्च षण्मासं हानिवृद्धिर्भवति दिननिशायाश्च सूर्यप्रचारैः॥ आद्ये
प्राणाग्निलिप्ताः प्रतिदिनसमये वृद्धिनाशोऽयनार्द्धे सर्वे रात्रेश्च वृद्धिर्भवति दिननिशाजाते वासरस्य॥ २८ ॥

षड् वारस्थाने। वेदशून्यं इति चत्वारो घटिकास्थाने कुम्भसंक्रान्तौ॥ शून्यमिति॥ वारस्थाने न किञ्चिद्देयं। नयनशर इति॥ द्विपञ्चाशद् घटिकास्थाने। पदंमी

नराशौ १ वेश्च स्येयं भवतीति संक्रान्ति भोगः करोतां तन्त्र ।। मिश्राणां अशी संक्रान्ति भोगेन न भवति । वैशैन्ति ष्पात्तं यन्मूर्धमपि तश्च नं तत्त्रिभागेन मिश्र
मिलते न मास मध्ये घटिकाभावः ।। प्रपञ्चेनापि त्रिस्थामध्ये दृते शा इति ।। अनेनापि न ध्यान्तयनेन सूर्यभोगः स्फुटो भवति ।। प्रतसूर्यमण्डलं दिने भोग
न विना भोगः शुद्धो भवति । वर्षमेकं यावत् ।। पुनरपरवर्षे ऽपरसंक्रान्ति ध्रुवकं भवति । तेन प्रति वर्षं मात्रं सूर्यभोगः ध्रुवकं चैत्रमासात् पुनश्चैत्रमासं
यावत् ।। ततोऽपरवर्षमेव पक्षप्रकाराप्तं तावदित्थं मासमेकं ध्रुवकं शुद्धं ततोऽशुद्धो दिनभोगः सूर्यस्य प्रत्यहं त्रिंश्यास च तु पारगी पलान्तरे सा उत्त
रायणादुत्तरायणं यावत् पञ्चदिनानि भोगवशाद् हूनी भवति ।। प्रति मासे पञ्चविंशति घटिकाधूना भवति ।। करणासंक्रान्तिकालात् ।। करणासंक्रा
न्तिकाल प्रतिमासे पञ्चविंशति घटिकाधिक्यः वर्षावशेः पञ्च वाराधिक्य इति ।। अत्रोत्राधिकस्य कथं तत्प्रयते ।। उत्तरायणात् मासादौ दशादिवस संपातत् ।। पनी श्चा
र्नं वा संज्ञा ख्यत यायस्मादिनादारभ्य संज्ञ च्छयानिवर्तते उत्तरतः ।। तत्संक्रान्ति दिन सूर्यस्य तेन वारेण न याति स्पष्टेन योगेन तेन कारणेनेति । तस्मि
न्दिने सूर्यभोगेन केन स्थाने विशति । घटिकास्थाने पञ्चदशा इति सूक्ष्म ध्रुवकं ।। तस्मिं ध्रुवके प्रत्यहं सूर्यमण्डलं दिने लब्धं प्रक्षिप्यते तेर रविपदानिशो
धयेत् ।। पूर्वोक्ताविधिना यत्राकीस्य मण्डलं दिनानि घटिका पारगी पलानि श्वासाः राशित्रक्रमेण नाज्ञा सप्तातत्र ।। तद्यथा ।। खर्ल मासनमेक्ता द्वादि
स्पष्टिग्रहिणीते लब्ध ।। पञ्चषष्ठ्याहृतं लब्धं सूर्य भागो भुक्ति क्षिपेत् ।। शेषं षष्ट्याहतं भूयो भाग लब्धं ततोऽप्यधः ।। पुनः षष्ट्याहतं शेषं भाग लब्धं ततोऽप्यधः ।। पुना
षष्ट्याहतं शेषं पञ्चषष्ठ्या विभाजितो लब्धं तस्याप्यधःस्थाप्यं श्वासपिण्डं नराधिप ।। दिनानि घटिका विनाडिः श्वासाः क्रमात् त्रिंशाड्गनः ।। अथो गितिरव

लोकात्पञ्चविंशतिसहस्रादधो योजनमानं तस्माद्रत्नाभात् सर्कराभो निगदितो नरकः कथितद्वितीयः। वालुकाभो नामतृतीयः। पङ्काभस्तुरीय इति ॥ शीतनरकद्वयं ततस्तीव्रधूम्रनरकश्चतुर्थो द्विविरपि पञ्चम इति ॥ रुक्षनरकद्वयं ततोऽधस्तमः षष्ठः ॥ रौरवो महातमः सप्तमः ॥ खरवातनरकद्वयं वर्गार्चिःसहितं चकारादधोऽधो केन्द्रसूत्रस्य भूभागाः सप्त प्रज्वलितद्रति ॥ अष्टौ महानरकाः पातालौ ॥ १५ ॥

क्षारो मद्यास्तु दुग्धा दधि घृत मधुराः सप्तद्वीपास्तदाख्याः नीलाभो मन्दराद्रिर्निषधवनगिरिः कोरो द्वीरण नानाद्रिवक्त्राः ॥ षष्ठी
पञ्चक्रौञ्चासिताम्भे वर परमकुशे किन्नरभोगभूमौ क्रौञ्चद्वीपे च जम्बूनिवसति मनुजः सप्तमं कर्मभूमौ ॥ १८ ॥

क्षारो मद्यास्तु दुग्धा दधि घृतमधुराः सागराः सप्त इति ॥ क्षारो भूमिवलयवालुन यादयो भस्म पारीशाबाः सप्त नीलाभो मन्दराद्रिर्निषध स्वमणिकोरो द्वीरण शो नाद्रिवक्त्राः ॥ वक्त्रः क्षारोदधिवासो हिमवदाद्यो मध्यादेः प्रत्येक षट् कुलपर्वताः ऋन पर्वता वासे उत्कालिनश्च वन ॥ षष्ठी पञ्चक्रौञ्चासिताभे वरपरमकुशे किन्नरभोगभूमौ ॥ क्रौञ्चद्वीपे च जम्बूनिवसति मनुजः सप्तमं कर्मभूमौ ॥ सप्तमं मनुजभूद्वीपं वलयाकारं लक्षयोजनायामं निलषण्डे तन्मात्म्ये निवसति मनुजः कर्मभूमौ वोधितव्यं सह भोगभूम्यामिति। जम्बूद्वीपं क्षारोदधितनतु शेषाणि मध्यादि तत्पश्च इति ॥ ॥

पूर्वं वायव्य ईशान्ये भवति नरपते दक्षिणे चाग्निकोणे पूर्वा तस्योत्तरे स्याद्वर कनक महे पश्चिमे चार्ककोणे ॥ भूसाकारः सु
मेरुर्वरकुडिरामयो मध्यनोमराग नानाशैला नागा यत्र हादि रभवति भविनतलं योजनानां सहस्रं ॥ १९ ॥

इदानीं महाजम्बूद्वीपे चतुर्द्वीपाण्युच्यन्ते पूर्वं वामर्द्धं दृन्त ॥ पूर्वे वायुमण्डलस्वभावेन वृत्तमर्द्धचन्द्राकारं ॥ दक्षिणे अग्निमण्डलस्वभावेन त्रिकोणं ॥ उत्तरे अम्बुमण्डलस्वभावेन वज्रं अर्द्धचन्द्राकारं ॥ पश्चिमे पृथिवीमण्डलस्वभावेन चतुरस्रमत्रिकोणमिति ॥ मध्ये मेरुः सूर्यमण्डलस्वभावेन बिन्द्वाकारो वरजलिशसयोमग्नेनो मण्डलानामिति ॥ पूर्वदक्षिणपश्चिमोत्तराणां मध्ये मेरुरिति ॥ शैलानागायहा दृग्भवनि ॥ भुवितलं योजनानां सहस्रमिति । एषां चतुर्णां मण्डलानां योजनमानं यथासंख्यं भुवितलं शैल इति सप्तसहस्रं नागा इत्यष्टसहस्रं ग्रहा इति नवसहस्रं ॥ दिगिति दशसहस्रं योजनमानं चतुर्द्वीपानां यथाक्रमं मेरोरिति ॥ इ — यस्त्र पूर्वद्वीपं पश्चिमं चतुरस्रं ॥ तत्त्वरीरस्वभावेन पूर्वापरवायुपृथ्वीस्वभावं वामदक्षिणं शरीरे तोयाग्निस्वभावमिति । अतश्चतुर्मण्डलाकारेण चतुर्द्वीपाणां लक्षणमिति ॥

मेरोर्विस्तारमूर्द्धं क्षितितलनिलये योजनानां सहस्रं पंचाशत्षोडशैकं प्रवरभुवितले चक्रवाडस्य सम्यक् ॥ ऊर्द्धे
शृङ्गाणि पञ्च क्षितितलनिलये सर्वदिक्चक्रवाडं तद्बाह्ये द्वीपशैलास्त्वपि जलविधयः सर्वदिग्वह्निवायू ॥ १८ ॥

इदानीं मेर्वादीनां विस्तारमानमुच्यते ॥ मेरोर्विस्तारमूर्द्धं पूर्वापरोत्तरदक्षिणभागं यावत् पञ्चाशत् सहस्रं क्षितितलनिलये विस्तारः षोडशसहस्रं एकसहस्रं चक्रवाडस्य सम्यगायामः ॥ ऊर्द्धे शृङ्गाणि पञ्च क्षितितलनिलये नेम तानि सर्वदिक्चक्रवाडश्च ॥ तद्बाह्ये द्वीपशैला इति ॥ तस्य चक्रवाडस्य बाह्ये चतुःशृङ्गाभ्यन्तरे रन्ध्रस्थाने षड्द्वीपानि षट्समुद्राः षट्पर्वताः नैव हिमाद्रिः सप्तम इति ॥ सप्तमं जम्बूद्वीपं तस्य बाह्ये क्षारोदधिवलयं ॥ सर्वतो वह्निवलयं वायुवलयमिति ॥

सर्वे चैकं सहस्रं षडपि जलधयः षड्वन्द्रचन्द्रैकहीना द्वीपास्त्वेवं सहस्रं वलकुलगिरयः पञ्चविंशत्सहस्रं ॥ जम्बूद्वीपं
विशालं ववताजलनिधे वर्द्धनक्षं प्रमाणं तद्वद्वह्नेश्च वायोस्त्रिभुवनधरणस्यान्तिमस्य प्रमाणं ॥ १९ ॥

निःस्वजन्मस्थानानि ॥ विंशत्सहस्राधिकानि चत्वारि शतलक्षैः श्वासैर्नाडिवर्षैरिति ॥ एवमुभयचक्रपरिवर्तनेनोभयपक्षयो राशिर्मासक्षयमेकं स्तु रिति
वामदक्षिणेऽहोरात्र एतानि ॥ प्राणप्रवाहे मण्डलमेकं षष्टिप्राणसहस्राधिकं चतुर्वर्षलक्षैः ॥ एवं पञ्चमण्डलैः सर्वग्रहाः स्वस्वजन्मस्थाने शून्ये विशन्ति ॥ तत
पुनरेवान्यचरणप्रवृत्त्या अपरपक्षे षोमध्यमायां विनिर्गतवृत्तिर्वक्ष्यमाणो गोवक्त्रमिति ॥ ॥ श्रीपरमादिबुद्धोद्धृते श्रीकालचक्रतन्त्रराजे द्वादश
साहस्रिके विमलप्रभायां टीकायां लोकधातुमानसंग्रहोद्देशोऽष्टमः ॥ २५ ॥

आद्याब्दात् षड्हुताशाब्दैः प्रकटयशानृपः संभलाख्ये भविष्यत्तस्मान्नागैः शताब्दैः रक्तुमखविषये म्लेच्छधर्मप्रवृत्तिः ॥
तस्मिन्काले धरण्यां स्फुटं लघुकरणामानवैर्वेदितव्याः सिद्धान्तानां विनाशः सकलमवनितले कालयोगाद्विपक्षात् ॥ २६ ॥

इदानीं सम्भलविषये मञ्जुश्रीयशस्तादयम्लेच्छधर्मोत्पादान् ज्योतिषसिद्धान्तविनाशान् लघुकरणप्रवृत्तिं तथागतव्याकरणं ॥ आद्याब्दादित्यादिना वि
तनोमीति ॥ आद्याब्दान् षड्हुताशाब्दैः प्रकटयशानृपः सम्भलाख्ये भविष्यतीति ॥ आद्येति ॥ धर्मदेशनावर्षं तथागतस्य तस्माद्वर्षत्रिषड्हुताशाब्दैः शीतान षट्शते रे
सम्भलनाम्नि विषये यशस्नागमनपाठः ॥ यशसामञ्जुश्रीप्रकटो भविष्यति ॥ निर्माणकाययशसो कोरिष्यतान्यर्थः ॥ तस्मान्नागैः शताब्दैरिति ॥ तस्मात्
यशसो निर्वृतान् ॥ नागैरित्यष्टवर्षशतैः ॥ खल्विति निश्चितं ॥ मखविषये म्लेच्छधर्मप्रवृत्तिर्भविष्यति ॥ शीतादक्षिणे मखविषये कोट्याग्रागविभूषिते

म्लेच्छानां तापि नामसुरधर्मप्रवृत्तिर्भविष्यति। तस्मिन्म्लेच्छकाले धराणां स्फुटग्रहकरणमानवैर्वेदितव्यं॥ सिद्धान्तानां विनाश इति॥ सिद्धान्तत्रयं सौरम्यमनकं रोमकमिति॥ एषां चतुर्णां विनाशः सिद्धान्तानां विनाशः सकलभुवितल इति। सकल इति यत्र तीर्थिकाः सिद्धान्ता निवर्तन्ते तत्र सकलं भुवितलं शीतादक्षिणां। तस्मिन्भुवितले। न सम्भवादिविषयेषु बौद्धसिद्धान्तस्य विनाश इति॥ कालयोगे भविष्यदिति॥ कालयोगो म्लेच्छधर्मस्तेन सिद्धान्तानां योगः कालयोगस्तस्मात्कालयोगाद्भविष्यत्कालयोग इति। पञ्चम्यर्थे सप्तमी॥ अतः सिद्धान्तविनाशाल्लघुकरणं स्फुटमिति॥ मात्स्मोदकवचनं तीर्थिकानां परमार्थतो न स्फुटं लघुकरणादिकं अतः सिद्धान्तानां विनाश इति कथं क्षवचनात्॥ यदि करणादिकं स्फुटं तदा सिद्धान्तानां विनाशाभावः करणेऽपि ग्रहसिद्धिनः॥ नवकरणान्तरे सूर्यशुद्धिर्दृश्यते उत्तरायणादिने छायया परीक्षमाणया। उत्तरायणे छायाशुद्ध्या विना सूर्यभोगोऽशुद्धः सूर्यभोगादशुद्धाच्चन्द्रभोगोऽशुद्धः॥ एवं मङ्गलादयोऽपि सूर्ये शोधिताः यतः सूर्यभोगाशुद्धत्वात्तेषामपि भोगोऽशुद्ध एवं ग्रहभोगाशुद्धत्वाज्जानकादीनाम फलं निरर्थकं तीर्थिकानामिति॥ ग्रहसिद्धान्ते ग्रहाणां शुद्धक्षेपकाः स्त्रीबालसाध्यास्तैर्ग्रहाः क्षिप्रं ज्ञायन्ते बालजनादिभिस्तेन ईर्ष्याबद्धा जाता दुष्टतीर्थिकानां यदि सर्वे स्त्रीबालादयो ग्रहसंचारं ज्ञास्यन्ति। तदास्माकं को गौरवं करिष्यति॥ तस्मात्सिद्धान्तमपहृत्य तन्त्रकरणादिकं कृर्म्मः॥ इत्यालोच्य सिद्धान्तानि अपहृतानि॥ तन्त्रकरणादिकं प्रकल्पितं तन्त्रेऽनेका दुर्गणाराशयः॥ करणेऽपि मन्दशीघ्रं कर्मचतुष्टयं त्रपञ्चकं कृतं येन बालजनाविषमं दृष्ट्वा हृदं भ्रमतां यान्ति॥ ज्योतिषनाम न कुर्वन्ति॥ एवं कालवशात्करणे ध्रुवकं न स्फुटं अस्फुटत्वात् सूर्यभोगोऽशुद्धः सूर्यभोगाशुद्धि

इति चतुर्दशभागावशेषे एकेदृष्टे पञ्च घटिका याश्चा द्वितीये द्वितीयस्थानस्थैः सहदश। तृतीये तृतीयस्थानस्थैः सह पञ्चदश॥ चतुर्थे चतुर्थस्थानस्थैश्चतुर्भिः सह एकोनविंशतिः॥ पञ्चमे पञ्चमस्थानस्थैस्त्रिभिः सहद्वाविंशत॥ षष्ठे षष्ठस्थानस्थाभ्यां द्वाभ्यां सह चतुर्विंशतिः॥ सप्तमे सप्तमस्थानस्थेनैकेन सह पञ्चविंशतिः॥ ततश्चन्द्रचरणावृत्तिर्निवर्त्तते॥ अष्टमे दृष्टे सति अष्टपदानि पूर्वसप्तपदैः सहितानि॥ त्यक्त्वापराणि षट्पदान्युक्तान्येकपिण्डं कृत्वा चतुर्विंशति घटिका देया हेया वा भवन्ति॥ नवमे पञ्चपदानां द्वाविंशति घटिका॥ दशमे चतुष्पदानामेकोनविंशति॥ एकादशे त्रिपदानां पञ्च दशा द्वादशे द्विपदानां दश त्रयोदशे एकपदस्य पञ्च चतुर्दशे तु शून्यमिति सिद्धान्तनिश्चयः॥ २२॥

सञ्चारिणावशेषं हतमृतुरविणा भागलब्धं च तद्धि तत्रैवार्कांशभेदैरविपदघटिका देयहेया भवन्ति॥ वेदैर्लिप्ता
हतं यत् स्फुटमपि च धनं तत्त्रिभागेन लब्धं ऋणमृक्षांसत्रिपादं त्वाममपि वरदैः शोधयेद्भुक्तिमध्ये॥ २३॥

सञ्चारेणावशेषं हतमृतुरविणा भागलब्धं च तद्धिदिति॥ अत्र सञ्चार इति पिण्डाधस्थितानां पिण्डावयवानां सत्पदं भवति॥ तत्र ग्रहः प्रविष्टः। तल्लग्नांशं देयहेयार्थं। तेन पदेनावशेषं पिण्डावयवं हतं ततः षड्विंशत्यधिकशतेन भागलब्धं च तद्धि देयं॥ सर्वं यथापूर्वं चरणा घटिकापिण्डे तद्धिदिति तत्रैव चार्कांशभेदैः पूर्ववद्घटिका देया हेया वा भवंतीति सिद्धान्तः॥ ॥इदानीं प्रतिदिनसूर्यभोग उच्यते॥ वेदैर्लिप्ताहतं यत्स्फुटमपि च धनं तत्त्रि

भागेन मिश्रमिति ॥ वेदैश्चतुर्भिर्लिप्तिभिश्चाष्टात्रिंशता वेदैर्लिप्ताष्टात्रिंशत्स्फुटं धनं भवति ॥ सूर्यस्य घटिकास्थाने तस्याष्टत्रिंशत्तिथ्यास्त्रिभागेन मिश्रं धनं घटिकास्थाने देयमिति ॥ ऋक्षं सत्रिपादं त्यक्त्वा गामपि तरवेः शोधयेद्भुक्तिमध्ये इति ॥ अथ रविकापदविशुद्ध्यर्थं सूर्यस्य जन्मराशिः शोधनीयः । येन सूर्यस्य जन्मर्क्षवारघटीपाणीपलादिभोगो ज्ञायते ॥ जन्मभास्करयोरश्विन्यामिति ॥ जन्मर्क्षं सूर्यस्येति । अतोऽश्विन्यादिनक्षत्रभोगात् ॥ षडृक्षं सत्रिपादमिति ॥ पञ्च चत्वारिंशत् घटिका इति ॥ मेषादिराशित्रयं शोधितं भवति । कर्के जन्मराशिर्भवति ॥ सूर्यस्य चरणभुक्तिरिति ॥ अत्र त्यक्त्वा ऋक्षं सत्रिपादं त्यक्त्वा गामपि तरवेः शोधयेद्भुक्तिमध्ये तत्कालं नक्षत्रादिभोगः तस्मिन्भुक्तिमध्ये नक्षत्रस्थाने नक्षत्रं शोधयेत् घटिकास्थाने घटिकाः शोधयेदिति ॥ २३ ॥

शिष्टं कार्यं यथारे रसभुगशशिनो मन्दकार्ये पदानि त्यक्त्वा भोगेन नाडीः शरऽगशशिभिर्भागतत्त्वसमानं ॥
देयं हेयं च सूर्ये त्वयनगणितवशान्नान्यथाऽश्विरत्निः सूर्यकाले र्द्धोऽह्निश्च यदशाङ्गुलात्स्फुटं दिग्भागषड्ढ ॥ २४ ॥

सूर्यभोगं पृथक्कृत्वा शिष्टं कार्यं यथारे इति । अत्र परिशेषं कार्यं यथा मंगलस्य तथा सूर्यस्यापि ज्ञातव्यं । किंतु मंगलस्य चोद्यगणितभिन्नानि । सूर्यस्य रसभुगशशिनो मन्दकार्ये पदानि । रस इति षट् । भुग इति चत्वारि ततोऽष्टः । शशिन इति । ततोऽष्टक इति ॥ राशित्रयं पूर्वार्द्धे अपरार्द्धे विलोमेन चतुर्थराशावेकः पञ्चमराशौ चत्वारि ॥ षष्ठराशौ षडुत्तराशि कर्म मन्दकार्यमिति ॥ अस्मिन्मन्दकार्ये एतानि षट् पदानि ॥ षड्भु कर्कयादिषु राशिषु भवति । अपरं षड् त

शेत्रा त्रेमस्य राशौ शोधनं विधीयते ॥ अतः षष्ठ्यां तनौ लब्ध्वं सूर्ये राशौ त्वरणं हरेत् ॥ अवशेषं दिनान्यत्र घटी पाराणि पलानि च ॥ अथ सांश्च मण्डलं भा
नोश्च कभोगाद्वलमी ॥ दिनैकेन तन्मध्ये नाडीभिः षष्टिभिर्लिन ॥ सूर्यमण्डलभोगेन पञ्चषष्ट्याधिकशतत्रयेणेति ॥ सूर्यमण्डलभागेन लब्धानि
यो दिनप्रति ॥ अतः षष्ट्या हतनाडिकाः श्वासः षड्गुणिता भवेत् ॥ भोगान्तं सूर्यनक्षत्रनाडिकादिषु योजयेत् ॥ अथ नाडीषु घन्यहे देयो यावत्सूर्योऽयनस्य
वेत् ॥ उक्तकर्मविधानेन शोधनीयं रवेः फलं ॥ अन्यथाकरणमार्गेणाप्युक्तानि लिख्यते ॥ अथैकसूर्यभोगेऽस्मिन् साधितां मङ्गलोदयः ॥ तस्मात्सर्वे भ
नक्षत्रमण्डलस्थाश्च ग्रहाः ॥ चन्द्रस्य मण्डलं चक्रे राशिनक्षत्रभोगतः ॥ तत्कालयोरन्तरं नाडी मासभोगतो निश्चिता ॥ त्रिंशद्भोगेन लब्धाः स्युः चन्द्रभोगा दि
नप्रति ॥ नाडिकाः सकलाघन्ता षष्ट्यः चन्द्रमाद्दिने ॥ षष्ठीमासौ पलश्वासैर्मण्डलं तत्समं भवेत् ॥ दिनैर्नवशतैः षड्भिः सहस्रैकजमण्डलं ॥ प्रसिद्धमङ्गलादीनां
मण्डलस्वरूपचारतः ॥ दिनमेकं हतं तच्च मण्डलेन विभाजितं ॥ लब्धं भवति नक्षत्रशेषं ग्रहस्य तद्गतः ॥ नाड्यो मण्डलभागेन लब्धा निमालपे वच ॥ श्वासा मण्ड ५८
लभागेन थ शतानां त्रलहं तथा ॥ तदेवं शोधनं कृत्वा ग्रहचारे शोभये द्रुहं ॥ ग्रहभोगो भवत्येवं केवलं चन्द्रकोदये ॥ ज्ञातव्यश्चन्द्रभोगेनान्तरे वा स्थितस्य
वै ॥ अस्मिन्नेव शोधयेत्सर्वं नक्षत्रं सूर्यराशौ धयेत् ॥ स्थितमेकैकं भोगे हत्वा मङ्गलादिकं ॥ तिथिरात्रप्रवेशेन पर्वच्छेदेऽधिते तिथौ ॥ तिथ्योऽन्समयोम
ध्ये विमर्दने तु सूर्ययोः ॥ एवं सर्वं परिज्ञाय सिद्धान्ते भोगमन्यथा ॥ जन्मभावप्रकरणा देवतोऽपि विवर्जयेदिति ॥ एवमुक्तक्रमेणापरमादिकं दत्त्वा त्र्य
तोक्तं सिद्धान्तलक्षणं तद्भुतं त्वन्त्रा ज्योतिषि ज्ञानानां विनायातिवचनेन मम स्पष्टं तत्त्रैगविस्पष्टं कृतं ॥ तत्कालस्य हेतोरीतिः दर्शितिका न भूतत्त्वा लक्ष्मा सूर्य भो

णविभ्रष्टं दृष्ट्वा स्वकीयकरणान्तरे लिखिष्यन्ति ॥ अस्माकं करणेपि सूर्यभोगविभ्रष्टिरस्तीति ॥ अतो हेतोर्नोक्तानीत्यन्तं टीकापेक्षयेति ॥ ॥ इदानीं दिनानि शाहानि वृद्धिरुच्यते ॥ षण्मासं यानि वृद्धी द्वे यथासंख्यं हानिर्वृद्धिश्च भवति ॥ दिननिशायाश्च दिनस्य च निशायाश्च सूर्यप्रचारे उत्तरचारे दक्षिणचारे : सूर्यस्य सूर्यप्रचार इति ॥ अथ च प्रमाणमिति ॥ श्राः प्रतिदिनसमये वृद्धिनाडीयनाड्यः ॥ दिनमानं कैलाशस्योत्तरभागे हिमवत्पर्वतपर्यन्तं चत्वारः श्यामास्त्रीणि पादाः पञ्चनिवृद्धिर्नाडीश्चायनाड्यः रपनाड्यः सार्धत्रयोन्याधिकदिनरात्रौ तैर्दिने ग्यनाड्यः सप्तरात्रे वृद्धिर्भवति ॥ उत्तरे वासरस्येति ॥ कैलाशस्य दक्षिणोत्तरस्य मार्गे वक्तव्यं ॥ इदमाने दक्षिणायनसंक्रान्तिदिने षट्त्रिंशद्घटिकाभिर्दिनं भवति ॥ चतुर्विंशतिभिरात्रिर्भवतीति ॥ एवमुत्तरायणे रात्रिदिनमानं विलोमेन ज्ञातव्यमिति ॥

मासा नेत्रार्कमिश्रा नयनविरहिताश्चन्द्रपर्वैकमिश्राः खर्वेभ्योधिप्रभक्ता गुणितकरहिताः खाब्धिभागेन चर्क्षं ॥ शेषाः
षष्ट्याहताये पुनरपि घटिकाले वर्जिताहृतास्ते चक्रं लब्धेन वक्रा भवति च नामिन उच्चस्य क्षार्धमिश्रं ॥ ३८ ॥

इदानीं राज्ञां नक्षत्रभोग उच्यते ॥ मासा इति मासाः करणमासा इति ॥ नेत्रार्कमिश्रा इति । करणापेक्षया न सिद्धान्तापेक्षा ॥ नेत्रार्का इति द्वाविंशत्याधिकशतेन मिश्राहीना नयनविरहिताः पक्षराशिर्निमित्तं द्वाभ्यां रहिता इति ॥ चन्द्रपर्वैकमिश्राः पूर्णिमाभोगार्थं पक्षमेकं मिश्रं । अमावास्याभोगार्थं पक्षद्वयमिश्रं परात्रौ भवति ॥ खर्वेभ्योधिप्रभक्ता इति ॥ राहोः पक्षभोगार्थं ॥ पक्षमण्डलेन षष्ठ्युत्तरत्वतः पक्षमानेन भागः ॥ तेन खर्वेभ्योधिना प्रभक्ता ये अवशेष

क्षत्रयुगं भवति॥ तदेव ग्रहचरणपदमनेकघटिकात्मकं॥ तैर्ग्रहचरणपदैर्घटिकाभिः शेषनाडीर्निहत्य षष्ठ्या भागेन लब्धं ग्रहचरणपदान् यासु हार्यन्त
थैवेति सूर्यवद्वर्णोर्द्धग्रासमपरार्द्धं वार्यमिति॥

शुक्लं कृष्णैकपिण्डे ग्रहगमनवशाद्देयहेयं समस्तं भौमे चाराजिनाद्याः प्रकटमनुपदे स्थापनी-
याः समस्ताः॥ एवं सर्वग्रहाणां क्रमपरिगमनाद्वेदितव्यान्नरेन्द्र सौम्ये शुक्रौ विशुद्धौ भवति दिनकरः सौम्यशुक्रौ च सम्यक्॥ ४४

शुक्लं कृष्णैकपिण्डे ग्रहगमनवशाद्देयहेयं समस्तमिति॥ अत्र शीघ्रधर्मिणि क्रमेण देयं। उत्क्रमेण हेयं॥ पूर्वार्द्धे शुक्लैकपिण्डे अपरार्द्धे अशुक्लैकपिण्डे
पूर्ववदिति॥ भौमे चाराजिनाद्या इति जिनाश्चतुर्विंशतिः॥ ते चाद्यौ येषां चतुर्दशपदानां मनुपदे चतुर्दशपदस्थितानामाद्यैपदस्थिताः॥ भौमे तदाद्याः
श्चाराजिनाद्याः प्रकटमनुपदे चतुर्दशनक्षत्रस्थाने समस्ताः स्थापनीया इति॥ एवं सर्वग्रहाणां क्रमपरिगमनाद्वेदितव्यान्नरेन्द्र इति। सौम्ये सौम्यभोगे
शुक्रो विशुद्धः सूर्यः सौम्यशुक्रौ तथैव च भवति॥ शुक्रे विशुद्धः सन् शुक्रो भवति॥ सौम्यशुक्रौ च भोगादिति॥ मंगलविशुद्धिः॥ ४४ ॥ ८१

भूम्याकाशोद्भवाणां दिनगणसकलं वह्निसूर्याब्धिलीनं शैलाद्यश्वादिनागैः क्रमतमपि निहितं शेषमृक्षादिभेदैः॥ प्राप्ते
भोगेन च शुद्धिनरपि घटिका सौम्यभोगे भवन्ति सौम्यांस्तत्वार्कमध्ये प्रकटमनुपदं पंचार्द्धसूक्ष्मं च सम्यक्॥ ४५ ॥

इदानीं शुभमुच्यते॥ भूम्याकाशोद्भवाणां दिनगणसकलमिति॥ प्राप्तिशुद्धं सकलदिनगणांसनेतव्यं॥ भूम्याकाशोद्भवाणामिति। वह्निसूर्याब्धिलीनं

तदेव शतत्रंशितं दिनगणं । त्रयोविंशत्यधिकैकसप्ततिशतेनेर्हृतमिति ॥ शैलाद्र्यश्व्याग्निनागैर्हृतमिति शैलात् सप्ततो रन्ध्राग्निनागा इति । सप्तनवति सप्तद्वनाष्टसहस्रात्मैः शैलाद्र्यश्व्याग्निनागैर्मण्डलादिनैः स्वचरणोनहृतं विभक्तमिति ॥ अपि निहृतं शेषं स्वक्षादिभेदैरिति ॥ मण्डलादिनभागावशेषं दिनगणानिहतमपि स्वक्षादिभेदैः सप्तविंशतिभिर्निहतं । आदि शब्दात् पुनर्मण्डलभागावशेषं षष्ट्यानिहतं ॥ एवं पाणीपलैर्निहतं श्वासैः षड्भिर्निहतमिति श्रोत्रैर्मण्डलादिनैर्भागेन स्वक्षांशस्वं भवति । पुनरपि घटिका घटिकास्थाने ॥ एवं पाणीपलानि श्वासा श्वासस्थाने इति ॥ सौम्यभोगे चरणाभोगे भवन्ति ॥ सौम्यं लग्नार्कमध्ये लग्नजङ्घन्तरमूर्ध्वं सम्यगिति ॥ अथादि मण्डलेन नयल्लघ्वं सौम्यभोगनक्षत्रस्था शीघ्रकर्मणि विशुध्यर्थं । भनोर्कमध्ये लग्नजङ्घन्तरपनर्पषोडशानक्षत्रं अर्द्धस्वक्षस्वत्रिंशद्घटिकासूर्यघटिका भोगो अपक्रमणान प्रच्छ्यति ॥ तदानक्षत्रचक्रान प्रक्षिप्यक्रणानि शोधयेदिति पूर्वनियमात्

शिष्टं कार्यं यथारे भवति धनमृणं मन्दशीघ्रे च कर्मे सौम्येयन्मन्दकार्ये दशगिरि शिखिनः शीघ्रकार्येऽनुपात्याः ॥ क्ष्
ल्याहः पिण्डसूतश्चरखरसनयनैर्हृतं तत्स्वाब्धिभक्तं शेषं तत् स्वप्रक्षेपं पुनरपि घटिका मन्दकार्येऽपि शोध्य ॥ ४८ ॥

शिष्टं कार्यं यथारे भवति धनमृणं मन्दशीघ्रे च कर्मेति सुबोधं ॥ सौम्येयन्मन्दकार्ये दशगिरि शिखिन इति ॥ सौम्ये त्र्यंशे मन्दकार्ये राशिकर्मणि अत्र दशप्रपूर्वापरे दश राशयः सप्तराशिपदे गिरिरिति । सप्त च्छिती येऽराशिपदे ॥ शिखिन इति त्रयस्त्रीणि राशिपदे इति पूर्वार्द्धे ॥ ततोऽपरार्द्धे चतुर्थराशिपदे त्रयः पञ्चम

स्वस्वसिद्धान्ताभिप्रायवशादिति ॥ एकमतं न भवति ॥ तस्मादेवं विचार्यते ॥ इह गोले ये ग्रहाः सूर्याच्छीघ्रमन्दगामिनस्ते किंतु पर्युपर्यधोऽधः स्थिताः ॥ अथ वामभा
गतो दक्षिणभागतः स्थिता इति ॥ उभयथाप्यविरोधः यद्यधऊर्ध्वं सूर्याद्यवस्थिताः ॥ तदा शीघ्रमन्दानां समानत्वं न स्यात् ॥ स्वकक्षापरित्यागात् ॥ अथ पृच्छते परम
सिद्धान्तवादी अधःस्थिताः सत्याः अधऊर्ध्वग्रहसमागमं संभवयति ॥ अधोग्रहेणोर्ध्वग्रहः प्रच्छादितस्य समत्वमिति ॥ अत्रोच्यते इह समत्वं न प्रातःकाले ॥ नोद
ये ॥ नास्तमनकाले ॥ उदयकाले अधऊर्ध्वग्रहदृश्यत्वात् ॥ सत्यं भिन्नकक्षात्वभावतः ॥ तथास्तमनकालेऽपि नैव ॥ एवं सत्यावसरेऽपि व्यवस्थितानां सूर्येण सह
समागमो नास्ति स्वकक्षापरित्यागतः ॥ एवं ग्रहाणां सूर्यमण्डले अस्तमनं तस्मादुदयोऽपीति ॥ तस्माद्ग्रहाणां कक्षान्तरं नास्ति परमार्थतः ॥ एतच्च बालानां बोधोद्
जनकं वाक्यं युक्तिरहितं रचितं भट्टनैरितीति ॥ इह प्रथमकक्षायां चन्द्रः ॥ द्वितीयायां बुधः ॥ तृतीयायां शुक्रः ॥ चतुर्थ्यां सूर्यः ॥ पञ्चम्यां भौमः ॥ षष्ठ्यां बृहस्पतिः
सप्तम्यां राहुः ॥ अष्टम्यां शनिरिति ॥ सम्भवति ॥ इह राशिचक्रे सर्वग्रहाणामुत्तरगतिर्दक्षिणागतिरस्ति यथा सूर्यस्य नक्षत्रभोगवशेन मन्दशीघ्रभोगवशेनेति ॥
न च तस्मादुत्तरगते दक्षिणागते सूर्यसमागमे सूर्यस्य कश्चिद्ग्रह ऊर्ध्वं गच्छति कश्चिदधो गच्छति ॥ इह राशिचक्रे मन्दगतिवशेन कश्चिद्ग्रहः सूर्यस्य पश्चत आगच्छ
ति ॥ उदितः सन् चन्द्रः पुरतो गच्छति ॥ शीघ्रगतिवशात् ऊर्ध्वश्चोच्चरणवशात् कदाचिदग्रतः कदाचित्पृष्ठतः ॥ उदितो गच्छन्निति ॥ एवं गमनपरिज्ञानार्थं राशिगो
लमुच्यते ॥ ऋक्षसव्ये चतुर्दशस्थाने ॥ श्रवणे च चतुर्दशस्थाने संस्थितो राशिभेदैरिति ॥ राशीनां भेदः सपादनक्षत्रद्वयं प्रत्येकराशौ एवं राशिभेदैः सार्द्धत्रयोद
शनक्षत्राणि मध्यगोलरेखायाः ॥ अश्विन्यादीनि चित्रार्द्धं यावदुत्तरे ॥ उत मध्यगोलरेखायाः चित्रार्द्धादीनि सार्द्धत्रयोदशनक्षत्राणि रेवत्यन्तानि दक्षिणे चापा

कार्त्तेराशौ क्षितिवलयगतं दक्षिणगोलमध्यात् ॥ धनुराकारे मध्ये यो नभत्रार्द्धचक्रे स भचक्रं दक्षिणगोलगतं गोलविभागरेखायामध्य न इति ॥ वामेन क्षितिजेनोन्न
क्रमन दर्वव लुमेष पूर्वेतलादौ यथा दक्षिणोषशशौ प्रथमकालं क्षितार्द्धचक्रगतं तथायोनमध्य रेखा उत्तरे प्रथमवत्त ॥ विभेदेन षण्णां ग्रोगतं ॥ मेषपूर्वेतु वादौ कन्यान्ते
गतमिति ॥ एवं तु नाडीनामीनान्ते गतमिति ॥ अत्र पूर्वार्द्धे मेष ईशे वृषः ॥ उत्तरार्द्धे मिथुनः ॥ पुनरुत्तरार्द्धे कर्कटः ॥ वायव्ये सिंहः ॥ पश्चिमार्द्धे कन्या ॥ पुनः पश्चिमार्द्धे
तुला ॥ नैरृत्ये वृश्चिकः दक्षिणार्द्धे धनुः ॥ पुनर्दक्षिणार्द्धे मकरः ॥ आग्नेय्यां कुम्भः ॥ पूर्वार्द्धे मीनश्चेति ॥ गोलेऽगाविन्यासः ॥ अस्मिन्मेषोदये तुलास्तमनं ॥ वृषोदये वृश्चि
कास्तमनं ॥ एवं सर्वत्रो द्यराशेः सप्तमराशेरस्तमनं वेदितव्यं अहोरात्रे रोगनि ॥ इयतां योजनसामान्यमतेन गोलाध्यायमुच्यते ॥ वन्हेः ग्रीनाड्डि खांभरखवरखरनगा योज
नानां सहस्रमिति ॥ इह दक्षिणाग्निवलयाउत्तरम सौम्यवनः सीमः पञ्चसप्ततिसहस्रयोजनानां गोलमानं ॥ एवं पूर्वापरवृत्तत इति ॥ स्फुटं पञ्चमपद्येनवक्तव्यमि
ति ॥

मध्ये चक्रार्द्धरेखागमनमपि रवेरेकराशौ विशेषाच्च पश्चात्सव्यापसव्यं चरति दिननिशा ह्रस्वदीर्घभेदैः क्रमेण ॥ मा
र्गे यां स्वाहि चन्द्रन्यजातिदिननिशाचापनान्तहि यावत् हानिर्वृद्धिः षडङ्कैस्त्वपिरविशशिनोः षष्ठिनाड्यो निशाह्नि ॥ ५४ ॥

मध्ये चक्रार्द्धरेखा इति मध्यराशिचक्रस विधुवरेखा पञ्चसप्ततिसहस्रयोजनानामध्ये सार्द्धसप्तत्रिंशत्सहस्रान्ते भवति ॥ तस्यां गमनं मध्ये चक्रार्द्धरेखागमनम
पि रवेः ॥ अपिशब्दात् सर्वेषां ग्रहाणां चक्रार्द्धमध्यरेखागमनं स्वस्वविषुवे भवतीत्यन्नात्र न सर्वकालमिति ॥ पश्चात् सव्यापसव्यं चरतीति ॥ पश्चाद्विषुवद्दिनाद्

राशिपूर्वेसप्तपक्षराशिपदेदस्रोतिदशशिरिशिखिनोमन्दकार्येपदानीति॥शीघ्रकार्येनक्षत्रकर्मणि न्तपाद्याः षोडशाद्याश्चतुर्दशस्थाने चतुर्दशावाराभव
न्तिनेच वक्ष्यमाणो वक्तव्या इति उपपत्तिः॥ ॥इदानींबृहस्पतिरुच्यते॥ कल्पाहःपिण्डमूर्तखखखरसनयनैरिति भगणैः शतिशैतेल्लुनमहःपिण्डं पूर्ववद्दिनः
गणाः स्युरिति॥खखखरसनयनैरुद्धृतमिति॥कारणमेपक्षातमिश्चानपपक्षात मिति॥दत्त वन्द्युर्विभक्तमिति॥ षट्त्रिंशदधिकत्रिंशतान्यूनः सहस्रैर्भक्तमिति॥शेषेभ
कीवशेषे नक्षत्रसप्तविंशतिभिर्गुणितंभगणेनभागेन नक्षत्रंभवति॥पुनरपि पूर्वोक्तक्रमेण घटिकादिकाभवन्तीति॥ततो भागेनेति॥ ४८ ॥

नक्षत्रेशोऽथमर्क्षे रुद्र नवविशिखिनो मन्दकार्ये पदानि भूयः शीघ्रे पदानि प्रकल्प्य तु पदे द्विकपक्षयानि तानि॥ हत्वाहः
रेवत्वेनोनं जलानिधिवसुभिर्भक्तमष्टैर्जिनाख्यैः कक्षे शीघ्रस्य वक्षो भोगः पुनरपि घटिका शीघ्रकार्ये भगोघ्नाः॥ ४९ ॥

नक्षत्रेशोऽथमर्क्षमिति अत्र बृहस्पतिभोगे शोध्यानक्षत्रे शोधनीयं॥ शीघ्रकार्ये मंगलवदिति॥ रुद्र नवविशिखिनो मन्दकार्ये पदानि पूर्ववत्॥ षड्राशिपदे। रु
द्र इति एकादश नवेति नव॥ ततः त्रिशिखिन इति त्रयः॥ एवमपरार्द्धेपि विलोमेनेति। भूयः शीघ्रकर्मणि पञ्चपदानि प्रकल्प्य तत्पदे चतुर्द्धाप्येदिकसार्धयानि तानी
ति। द्विगितिदश्यादिनक्षत्रचापपदानि वक्ष्यमाणो वक्तव्यानीति॥ बृहस्पतिशुद्धिः॥ ॥इदानीं शुक्र उच्यते॥ हत्वाहः रेवत्वेनेति॥ दत्ताभिर्दिनगणं हत्वा।
शुन्यं जलनिधिवसुभिरिति॥ चतुर्दशोतिभिरूनं कृत्वा भक्तमष्टैर्जिनाख्यैरिति॥ सप्तचत्वारिंशदधिकषड्विंशत्युत्तरैरिति॥ चरणामरणलक्षैः शीघ्रचरणा

अवशिष्टे ऋक्षघ्ने चन्द्रभोगः पुनरपि ग्राह्यका भोगे मंगलवत् ॥ एवं पाणीपत्रादिभोगः शीघ्रकार्ये भगो भवति । मन्दकार्ये भगो ध्रुवा ॥ ४७ ॥

ऋत्वृक्षं शोध्यमर्के शरभ्रगशशिनो मन्दकार्ये पदानि शीघ्रे नत्वा द्विभेदैः प्रकटमनुपदे देयहेयत्वभारे ॥ पुनः
खाक्षाष्टवेदैः स्फुटदिवसगणाः षड्रसागाप्तशेषः भक्तोऽश्वर्क्षघ्न ऋक्षं भवति च शशिनः पातमध्याद्दशाख्ये ॥ ४८ ॥

ऋत्वृक्षमिति षण्नक्षत्रं ॥ शोध्यमर्के सूर्यभोगे इति । सर्वत्र पञ्चम्यर्थे सप्तमी वेदितव्या शरभ्रगशशिनो मन्दकार्ये पदानीति पूर्ववत् ॥ पञ्च शशिस्थाने सर इति पं
च ॥ भ्रग इति चत्वारः । शशिन इति एकः । पूर्वार्द्धे एवं विलोमेनापरार्द्धे ॥ शीघ्रे शीघ्रकर्मणि नत्वा द्विभेदैरिति ॥ प्रकटमनुपदे चतुर्दशनक्षत्रचरणपदे देयहे
यत्वभारे यथा मंगले तेन भाचारपदं देयं हेयं च भवतीति पूर्वार्द्धः ॥ इदानीं शनिरुच्यते ॥ पुनः खाक्षाष्टवेदैः स्फुटदिवसगणा इति ॥ पूर्वदिनगणाः
स्फुटऊनोविंशत्यधिकाष्टशतचतुःसहस्रैरूनेति ॥ करणापेक्षा नसिद्धान्तापेक्षातः षड्रसागाप्तैरेकैर्भक्त इति ॥ षट्षष्ठ्यधिकसप्तशतद्व्यसहस्रैर्भक्तादि
र्भक्त इति ॥ अवशिष्टे ऋक्षघ्ने मगुणादिनभोगेर्ध्वं नक्षत्रं भवति ॥ एवं पाणीपत्रादिको भोगो भवति शशिनः पातमध्याद्दशाख्येति ॥ शनिभोगाद्दशाद्दश न
क्षत्राणि पात्यानि भवन्ति ॥ ऋक्षणाधिकोच्चक्रं त्यक्त्वा शोध्यानि भवन्तीति ॥ पूर्वनियमो जन्मनक्षत्रचरणार्थमस्य मन्दकर्मणि ॥ ४९ ॥

पञ्चाविंशद्दिनर्वैः प्रवदपरमपदे ज्ञोऽभ्रकार्ये रसाद्याः शीघ्रा मन्दप्रचारः क्रमपदगमने वक्र एवोत्क्रमेण ॥ पूर्वार्द्धे

क्षिणायनेन दक्षिणां यातीति ॥ उत्तरायणे उत्तरां च यातीति ॥ तथा च समेरुतलादी मेषादाविति ॥ दिनानि शिवं भे कैः क्रमेण मार्गाणां खादिचन्द्रमिति ॥ अथ शीतुत्तरायणतः सं

प्रमार्गाणां त्यजति ॥ दिनानि शीघ्रायनानां तद्दिवावत् उत्तरायणाद्दक्षिणायनं यावद्दक्षिणायनात् उत्तरायणं यावदिति ॥ हानिवृद्धिः षडंशो नवपि रविराशीनोः षष्टिनाड्य

स्त्रिंशांशा इति ॥ इह षडंशो हानि र्भवति ॥ वृद्धि र्भवति ॥ षडंशाः षष्टिनाड्यां दशनाड्यो रात्रेर्हानिः ॥ मकरान्मिथुनान्तं यावद्दिवावृद्धिरिति ॥ दिनस्य हानिः ॥ कर्कटाद्धनुरन्तं

यावद्रात्रिवृद्धिरिति ॥ खण्डरविशशिनोर्हानिवृद्धी इति ॥ षडंशाः ॥ इह केचन खण्डे छायानियमो नास्तीति विषये इति ॥ आर्यविषये दशांशो हानिवृद्धी उत्तरायणे दक्षिणा

यनान्तं दक्षिणायनादुत्तरायणान्तमिति ॥ छायानियमवशात् ॥ एवं वोष्णवीचर्चानाडिदेशे ष्टनवांशोऽष्टमांशः सप्तमांशो सप्तमान्त विषयान्तं यावच्छायानुवेन

हानिवृद्धी वेदितव्याविति ॥

यस्मात्सर्वेजनानां भवति च विषुवं मेषसंस्थे तुलादौ तस्मात्पूर्वेखण्डे रविखण्डवृषभगते वृश्चिकस्थे तथैव ॥ वक्रार्कवह्निसंख्ये मिथुनधनुर्गते दिक्प्रमाणो चतुर्थे मार्तण्डे कर्कटस्थेऽपि च मकरगते पंचमैकादशे च ॥ ५५ ॥

रक्षानीघादशखण्डे भूगोलोत्सर्पभ्रमणवशोनोच्यते ॥ यस्मात्सर्वेजनानां भवति हि विषुवं मेषसंस्थे तुलार्क इति ॥ यस्मिन्भूखण्डे मेषार्के वसन्तादौ विषुवं भव

ति ॥ तुलार्के शरद्यवश्यं भवति ॥ तस्मादेवं मेषार्के शरद्यवश्यं भवति तुलार्के वसन्ताद्यं मध्ये विषुवं भवति ॥ एवं भरतस्यापेक्षाकथा यस्मात्प्रथमभूखण्डात् द्वैतीये स

प्तमखण्डं मेरोर्दक्षिणात् उत्तरे उत्तराद्दक्षिणतः सप्तमभूखण्डे विषुवं भवति ॥ तस्मान्नाप्येवं तथा खण्डे रविखण्डवृषभगते वृश्चिकस्थे तथैवेति ॥ इत्यथा पूर्वोक्ते मे

६६

रार्दक्षिणा॥ नारभूखण्डे मेषसूर्येतुलार्के विषुवम्भवति॥ नभाक्षिद्विचे नैऋत्यकोणस्थितः॥ ईश्वरकोणार्द्धभागेस्थितेवखान्वितिनिश्चितं॥ वृषभगते सूर्ये वृश्चिक
स्थे विषुवं नन्दभवति॥ वसन्तोर्द्धशारदर्द्धमिति॥ एवं नभ्राख्येन नवमे वन्हिसंख्यातत्तृतीयभूखण्डे नैऋत्यकोणे अपरार्द्धस्थिते॥ ईशानकोणार्द्धस्थिते विषुवं भव
ति॥ मिथुने सूर्य्यगते धनुषिगते च वसन्तार्द्धशारदर्द्धं भवति॥ दिक्प्रमाणो दशमे चतुर्थमेरोः पूर्वभूखण्डे पश्चिमभूखण्डे च विषुवं भवति॥ वसन्तार्द्धशारदर्द्धं भ
वतीति॥ मार्त्तण्डे कर्कटस्थेपि च मकरगते पश्चिमस्थे एकादशे च पूर्वभूखण्डे विषुवं भवति॥ वसन्तार्द्धशारदर्द्धं भवतीति। ५५॥

सिंहे कुम्भे प्रविष्टे द्विदशारसमहौ मीनकन्यागते च अस्मिन्वामायनं स्यान्मकरगतरवौ कुम्भसूर्ये द्वितीये॥
मीनेखण्डे तृतीये त्वयनमपि नृणां मेषसूर्ये चतुर्थे भूताख्येऽर्के वृषस्थे मिथुनगतरवौ षण्महौ सप्तमे च॥ ५६॥

सिंहे कुम्भे प्रविष्टे सति सूर्ये पञ्चमे वायव्यकोणार्द्धस्थिते॥ एकादशे च वन्हिकोणार्द्धस्थिते विषुवं भवति॥ वसन्तार्द्धशारदर्द्धं भवतीति॥ द्विदशारसमहाविति
द्वादशमे वन्हिकोणापरार्द्धस्थिते रसे वायव्यकोणे॥ अपरार्द्धस्थिते महाविलागमपाठः॥ मीनगते सूर्ये कन्यागते च विषुवद्वयं भवति॥ वसन्तार्द्धशारदर्द्धं भव
तीति॥ एवं द्वादशभूम्यां द्वादशराशिवशेन सूर्योदयास्तमनविभागेन द्वादश मासाः षडृतवो भवन्ति॥ ॥ इदानीं द्वादशभूम्यां द्वादशोत्तरायणानि द्वादशदक्षिणा
यनानि॥ सूर्य्यराशिभ्रमणवशेनोच्यते॥ अस्मिन्वामायनं स्यादिति॥ अस्मिन्निति॥ मेरोर्दक्षिणोभूखण्डे जनो दक्षिणोत्तर[illegible]सूर्ये पेन भागन धर्मदेशनावशात्॥ भ

तोदक्षिणे भूखण्डे वामायनं उत्तरायनमिति ॥ मकरगतेरवौ ॥ एवं कुम्भसूर्ये द्वितीये भूखण्डे ॥ मीने तृतीयखण्डे अयनमपि तेषां मेषसूर्ये चतुर्थे ॥ पञ्चमे भूखण्डेस्तु वर्त्तति ॥ भूतारब्धे पञ्चमेऽर्के वृषस्थे सति मिथुनगतेरवौ षष्ठमहीउत्तरायनं भवति ॥ सप्तमे मेरोरुत्तरे ॥ ५६ ॥

मार्त्तण्डे कर्कटस्थे भवति हरिगते चाष्टमे भूमिखण्डे· कन्याऽङ्केतु लास्थे भवति च दशमे वृश्चिकेरुद्रखण्डे ॥ चापस्थे
द्वादशेस्याद्यनमपि तु तेषां द्वादशारे च भूम्याः· एवं सव्यायनं स्याद्रविगमनवशात्कर्कटादौ च राशौ ॥ ५७ ॥

मार्त्तण्डे कर्कटस्थे वामायनं भवति ॥ हरिगते अष्टमे भूखण्डे भवति ॥ कन्यागते सूर्ये ऽङ्के नवमे भूखण्डे तुलार्के भवति ॥ दशमे भूखण्डे वृश्चिकसूर्ये ॥ रुद्र एकादशमे भूखण्डे चापस्थे द्वादशे खण्डे स्याद्यनं तेषामपि सम्भावने द्वादशारे च भूम्याः स्थितानां लोकानामुत्तरायनं द्वादशराशिभेदेनेति ॥ एवं सव्यायनं स्यात्तस्वकक्षान्ते मेरोर्दक्षिणायनं रविगमनवशात् कर्कटादौ च राशौ भवति ॥ अस्मिन्मेरोर्दक्षिणे लघुजम्बूद्वीपभूखण्डे दक्षिणायनं कर्कटादित्ये भवति ॥ एवं दक्षिणावर्त्तनं सिंहादित्ये द्वितीये तृतीये कन्यादित्ये तुलादित्ये चतुर्थे ॥ मेरोः पश्चिमे दक्षिणायनं भवतीति ॥ वृश्चिकादित्ये पञ्चमे ॥ धनुरादित्ये षष्ठे मकरादित्ये सप्तमे ॥ मेरोरुत्तरे ॥ कुम्भादित्ये अष्टमे ॥ मीनादित्ये नवमे ॥ मेषादित्ये दशमे वृषादित्ये एकादशे ॥ मिथुनादित्ये द्वादशे भूखण्डे ॥ लोकानां दक्षिणायनं द्वादशराशिभेदेन भवतीति ॥ ५७ ॥

५७

ऊर्द्धेषन्नागसंख्यान्तपनमपि रवेश्चायने चोत्तराणे तस्मात्क्षीणाश्च सव्ये भवति नरपतेऽत्र संख्यासहस्रं ॥ एका
शीतिसहस्राद्वारशानरहितं मध्यतो गोलरेखा तस्माच्च वृद्धिपातं भवति खखशरैरुत्तरे दाक्षिणे च ॥ ५८ ॥

इदानीं सूर्य्यभूवलयादूर्ध्वक्रान्तिमानमुच्यते । ऊर्द्धेषन्नागसंख्येति ॥ इह सप्तमभूवलयादूर्द्ध्वं ॥ षडशीतिसहस्रयोजनसंख्यान्तपनमपि रवेश्चायने श्चोत्तरेनो दक्षिणायनादौ ॥ खखखरुण्कर्कयादौ दक्षिणायनं खखसंक्रान्तिदिने भवति ॥ द्वादशारवेष्वपि भात्रमिति ॥ तस्मात्क्षीणाश्च सव्ये भवति नरपतेऽत्र संख्यासहस्रं ॥ तस्मात् दक्षिणायनसंक्रान्तिदिनात् सव्येऽयने उत्तरायणं यावत् क्षीणा भवत्येकाद्वासहस्रं पञ्चसप्ततिसहस्रं तपनं सूर्य्यस्योर्द्ध्वं वेदितव्यमिति ॥ एकाशीतिसहस्रं ॥ सरपञ्चशतरहितं मध्यतो गोलरेखा भवति ॥ योजनमानं ॥ तस्या गोलरेखायाय वृद्धिपातं भवति ॥ सूर्य्यस्य पतत खखशरैरुरुति ॥ पञ्चशताधिकपञ्चसहस्राणि योजनानामिति ॥ उत्तरे रेखायां दक्षिणे च खखखरवण्ड राशिभोगवशेनेति ॥ ५८ ॥

भीराशिं विलंघयित्वा व्रजति दिनकरो दक्षिणे यावदद्रिं वैतालास्यान्तरे च व्रजति हिमगिरिं चोत्तरे चोत्तरस्थः ॥
बाणाब्धिस्पष्टाश्च व्रजति दिनयने योजनानां सहस्रं सार्द्धं शाहित्य तं च व्रजति दिनदिने पञ्चभूतः समन्तात् ॥ ५९ ॥

इदानीं सूर्य्यस्य प्रतिदिनं तिर्यक्क्रान्ति द्वादशारवेऽष्ठ समन्तान्ते उच्यते ॥ भीराशिं विलंघयित्वा व्रजति दिनकरो दक्षिणे यावददिमिति ॥ इह द्वादशारभस्यां प्रत्ये

त्रिंशघ्निः सहस्रैर्गलितमपि शतानाद्वस्यमानं प्रसिद्धं भूमर्त्यैर्यत्प्रभक्ता भ्रमतनियघटिकाः षष्टिभागाद्दिनं च॥ ८४॥

इदानीं देहे मध्यमावर्षशतात्मिकन्श्वासादिकमुच्यते॥ विंशत्येकेसहस्रे इत्यादि। विंशत्येकेसहस्रे अधुनातत्पञ्चसहस्राधिकोत्तरशत न्यूनैर्षट्शतकस्तु कोइति॥ निर्गनाप्लमार्गैः तोतजैः श्वाविंशत्स्याशौर्गैर्निर्गता॥ देहे मारुतिश्वासा अभिकामे प्रतिदिनसमये षट्शतानि संक्रान्तिकाले भूतसौख्यसंख्या पञ्चसप्तत्याधिक सहस्रान संख्या षट्त्रिंशाघ्निः सहस्रैर्गलितमपिशतानाद्वस्यमानं प्रसिद्धं इति श्वासानां वर्षशतादिनेः षट्त्रिंशाघ्निः सहस्रैर्गलितानवर्षशतन्श्वाससमानानि भवन्ति। अत्र पञ्चसहस्रत्रिंशात्श्वासाः॥ षोडशशताधिकषष्ठयुतसंख्याव श्वासा दिने गलितानां षट्सप्ततिलक्षाधिकसप्तसप्ततिकोट्यो भवन्ति। तेषां षट्त्रिंशाशेन बहुश्वासास्त्रिचत्वारिंशल्लक्षाधिककोटिद्वय संख्या मध्यमायाः जवस्थलाः श्वासा भवन्ति। अवशेष्यास्त्र चत्वारिंशल्लक्षाधिकपञ्चसप्ततिकोट्यो विलतनाः सनयोः पञ्चमपाठलवाष्टकाः समभागतोर्बालतनावाष्टका अर्थार सनातो हूका वामसव्यतो वर्षशतावशेषैरिति॥ भूमर्त्यैर्यत्प्रभक्ता भ्रमतनियघटिकाः ततः श्वासप्रमेयस्तु तत्रत्रिंशतेन प्रभक्ता व श्वासघटिका राशिर्भवति षष्टिभागाद्दिनं स्यात्तेना घटिकाराशेः षष्टिभागेन वर्षदिनपिण्ड भवति॥ मध्यमायाः पञ्चविंशत्यधिकेकादशशतसंख्या षट्त्रिंशत्सहस्रेभ्यो वत्रिंशद्दिनपिण्डपञ्चसप्तत्याधिकाष्टचत्वारिंशदूनतानि संयुतत्रयं वलनानाः सनयोर्वर्षशतान्तयेत्तानवन्तिनि

चन्द्रेपक्षेरवौवायनमपिनवमासाश्च भौमेचराशिः सद्वर्षाः सुर्रशीस्यादयनमपिभृगौ चापरं चन्द्रसूनौ॥ तिथ्या-
स्यानानिशौरोतामितिनवतभाकेतुहीनां वराज्ञन् तन्सर्वं वैकपिण्ड वक्रतिगतस्युगाब्दानिसार्द्धत्रिमासाः॥ ८५॥

इदानीमष्टयत्नासावर्षज्ञानमानं सार्द्धचक्रप्रभोगेन एकपरिवृत्त्येन कालचक्रे रहितेन गम्यते ॥ चन्द्रे पक्ष इत्यादि ॥ चन्द्रपक्षश्चन्द्रस्य पक्ष एकत्रिंशद्द्वागु
लकरात्रं भवति ॥ अर्द्धराशिचक्रोपभोगेन ॥ रवौ वायनमपि रवेरयनमर्द्धमहोरात्रं भवत्यर्द्धचक्रोपभोगेन ॥ नवमासाश्च भौमेनत्वरात्रिरिति ॥ कारणाविव
स्था एवं गुरोः षड्वर्षाः शुः यथा रवेस्तथायनमपि भृगोश्चायनं चन्द्रसूनोश्च भस्य च निष्पाख्याब्दानि पञ्चदशवर्षाणि सौरौ रानेश्च राहुरस्य तामिनिनराहु
र्नववर्षाणि अहोरात्रार्द्धमर्द्धन क्षत्रचक्रोपभोगेन भवति ॥ तत्सर्वं चैकपरिवृत्तेन उग्गाब्दानि द्वात्रिंशद्वर्षाणि सार्द्धत्रिमासा भवन्ति ॥ सत्त्वगुणादिभा
सत्त्वानां ॥

संख्यासार्द्धदिनेन्द्रार्द्धमपि च भवेत्कालचक्रेण मन्त्रः प्राणाः सत्त्वे वहन्त्या रजसि तमसि वै कायवाक्चित्तभेदैः ॥
पंचाब्दं यातितस्मात्तु इनरपतिनाः सार्द्धनेत्रेण चन्द्रो संख्या प्रसिद्धा भवति तु नियता कालचक्रे नरेन्द्र ॥ ८८ ॥

संख्या सार्द्धादिनेशार्द्धन क्षत्रचक्रोपभोगेन ॥ सत्त्वरजस्तमोभेदेनाब्दशतमपि भवेत् ॥ कालचक्रेणेति ॥ त्रिवर्षं त्रिपक्षोनं सार्द्धदशमासाधिकं यस्य व
तिवर्षाणि पुंभवत्यष्टग्रहाणामेकपरिवृत्तेनेति प्राणाः सत्त्वे वहन्ति ॥ अत्र सत्त्वानां सार्द्धत्रिमासाधिकद्वात्रिंशद्वर्षाणि यावत्प्राणाः सत्त्वे सत्त्वगुणे वहन्ति ॥
ततः पंचामृतं भक्षितं योगिना सौख्यदं स्यादिति ॥ वासे विडंगं देवदेवेन निर्वापितं तैलं वंशागन्धको दिङ्गुल्यते ॥ अध्यात्मनि विडंग ॥ अनयोस्तुल्यभागः ॥ सूत्रं वासे विशुद्ध
यो भिद्भू राजरसं ॥ अध्यात्मनि मूत्रमेव ॥ रक्तं वासे अभ्रकं ॥ अध्यात्मनि स्त्रीपुष्पं ॥ तुल्यभागमिति ॥ अभ्रं वासे पारदो ऽध्यात्मनि शुक्रमेवानयोः समभागमिति ॥ तमात्सं
वासे त्रिफला ऽध्यात्मनि मज्जा ॥ अनयोरपि समभागमिति ॥ एवं विडंगभागः मात्सस्य पादोन भागः ॥ रक्तार्द्धभागः अभ्रकस्यैकपाद एतत् देकीकृत्य मूत्रेण सप्तवारान् भा-
वयेत् ॥ भानपे भूयो भूयः शोषयित्वा ततः प्रभाते कर्षमात्रं घृतमधुभ्यां भक्षितं षण्मासावधे सौख्यदं भवति ॥ शाकाम्लतैलतक्राणां वर्जनादिति पंचामृतनियमः ॥ ॥ इदानीं
धूमपानस्य उच्यते ॥ सध्यानमित्यादिना ॥ इदं ध्यानं मध्यमाया ज्ञाणप्रवेशः ॥ तेन ध्यानेन सह ध्यानमिति ॥ पुष्पं स्त्रीरजः ॥ वासे केशराजिका भृङ्गराजः ॥ तस्य रसः स्त्रीपुष्पतु

लं सधानं उष्णं नस्यं स्यानानां हरति सप्तमितानरुजानान्जरांश्च पश्चात्सावधेरितिनियमः ॥ ॥ इदानीं पंचप्रदीपमुच्यते ॥ गोश्वदन्तीहयनराणां मांसमाक्षिका हर्दिमिश्रं मधुनामिश्रं भुक्तं पंचप्रदीपसकलरुजहरं भवति ॥ अपरं माक्षिकाहर्दिमांधवानयासार्द्धं सकलरुजहरं भवतीति नियमः ॥ स्त्रीउष्णं शुक्रामिश्रं पूर्वोक्तं तास्वाध्यामिकं अपहरति जरां भक्षितं नं च वर्षाणि ति पूर्वोक्तभोजननियमः ॥

वातघ्नं क्षारमस्तु प्रभवति मधुरं पित्तहन्तुः कषायः श्लेष्मघ्नं सर्वजित्कं कटुकमपि तथा चौषधं क्षारसो वा ॥ श्लेष्म
घ्नं क्षारमुग्रं त्रिकटुकसहितं माहिषं पित्तहन्तुः वातघ्नं चोष्णमुग्रं त्रिविधरुजहरं गोमयः सर्पिरेव ॥ १२८ ॥

इदानीं वातघ्नमुपसमुच्यते ॥ वातघ्नं क्षारमस्तु प्रभवति ॥ मधुरं पित्तहन्तु ॥ शर्करासहितं ॥ वातघ्नं चोष्णउग्रं वचासहितं त्रिविधरुजहरं गोपयो यथा संख्यं ॥ सैंधवादिसहितं वातपित्तश्लेष्मघ्नमिति ॥ सर्पिरेव गोघृतं त्रिविधरुजशमनं ज्वररहितानामिति नियमः ॥

जातीक्वाथस्तु चोष्णं मुखरुजशमनं दन्तशूलं च तीव्रं तैलं सक्वाथयुक्तं त्रिकटुकलवणैः कर्णरोगस्य नाशः ॥ आज्यं
क्षीरादिरक्तैः क्षपितमपि समं घ्राणरोगस्य नाशः कर्कोटी नाकुली न्द्री हरति सहदेवा मण्डमातां प्रतेपात् ॥ १२९ ॥

इदानीं मुखरुजादिरोगोपशमनार्थं क्वाथतैलाद्युच्यते ॥ जातीत्यादिना ॥ इह सर्वद्रव्याणां स्वरसं तोयं जातीपत्राणां स्वरसं तोयं पादावशेषं जातीक्वाथस्तु तोयं किञ्चिदुष्णं मुखरुजशमनं भवति ॥ दन्तशूलस्यैवं ॥ तैलं तिलतैलं कल्कस्तु व्योषमूत्रं तेन तैलं पक्वं तैलावशेषं त्रिकटुकलवणैः सह पाचितैः पाकावसाने प्रदत्तं ॥ तत्कर्णे प्रविष्टं कर्णरोगस्य नाश इति

एवमाज्यगो घृतक्षीरेणाष्टगुणेन क्वाथावसाने अहिर्नागकेशरं रक्तं चामनैः पाद्यंशेन दत्तैरनेन घृतेन तत्त्वं प्राणरोगस्य नाशएव॥ कर्कोटी वन्ध्यकर्कोटी वांगवीरइन्द्री
इन्द्रवारुणी तिक्ता हरन्ति॥ सहस्रवारं गर्जगं ततैः सहगण्डमात्रा प्रतिपाद्यिति नियमः॥ संक्षेपतो विस्तरेण वैद्यशास्त्रे ज्ञेय इति॥ (१२७)॥

कुर्य्याद्ध्वस्तौ प्रबद्धो समपदक्रमतो प्राणवायोर्निरोधं यावद्भूम्यां प्रपातो नहि भवति ततो उष्णत्वनं च ज्वरस्य॥ भूयो
भूयः समाधौ मरणभयकरान्नाशयेत्कण्टकान्वै हृन्मे चन्द्रमूर्त्तेत्वमनशशिनिभा भाविता विश्वमाता॥ १२८॥

इदानीं वज्रकण्टकोपसमनमुच्यते॥ कुर्य्याद्ध्वस्तेत्यादिना॥ हृदयगपापरोगोपद्रवो भवति॥ तत्र प्रथमं ज्वरो भवति॥ हस्तपादसन्धिषु व्यथा भवति॥ शिरश्च व्यथ
ते इदं लक्षणं ज्ञात्वा समाधिमवलम्बयेत्॥ तत्रायं विधिर्निर्दिष्टः रहे प्रवेशः ज्वरितः कुर्य्याद्ध्वस्तौ द्वौ प्रबद्धौ ऊरूपर्यन्तं समपदक्रमतो कुर्य्यात्॥ प्राणवायोर्निरोधं कु
म्भकं कुर्य्यात् यावत्प्रपातो भूम्यां नहि भवति ततो तावज्ज्वररोगेण भूम्यां प्रपातो भवति॥ अथा प्रपातो यावत् पुनः पुनः प्राणायामं कुर्य्यादिति नियमः॥ उष्णत्वनं च ज्व
रस्य यावन्न भवति तावत्कार्य ज्वरे सक्ते सति न कुर्य्यादिति नियमः॥ भूयो भूयः समाधौ स्थितो मरणभयकरान्नाशयेत् कण्टकान्वै॥ हृन्मे चन्द्रमूर्त्तेत्वमनशशिनि
भा भाविता विश्वमाता॥ प्राणायामेन पञ्चवारं हृत्स्था वज्रपमा यत स्था चन्द्रमण्डले ध्यायेदेक वक्त्रेति नियमः॥ इति पापरोगोपसमः॥ १२८॥

पिष्ट्वा शीतांशुसूर्य्यां ज्वरविहितनृणां कण्ठकान्नाशयन्ति घृष्टंत्वक्षौद्रमिश्रं हरति भयकरान्वा कपालं ज्वरान्ते॥

मंत्रश्चोंकारपूर्वाजलशिखिमरुतांवज्रपूर्वंश्चनामं रक्षान्तेनैवसर्वंशिरसिगतहृदोन्नीभिजस्थादिकेषु॥ १२५॥

इदानीं पापरोगोपसमनार्थं भैषज्यमुच्यते॥ इह यदा पापरोगचिन्हं भवति ज्वरितं हजयादसच्छिद्र यथा तथापिष्ठ्वा शीतांशुनामसूर्योज्वरविहितन्नृणां दत्ताः करण्ठकान्नाशयन्ति॥ तथाज्वरान्ते मृतोयदिनेकण्ठको श्मानकाले पापरोगेण मृतस्य कपालं अलाभे यथालब्धं पूर्वं अक्षोभमिश्रं पीतंगुडवृषकपालं वृषेण॥ स्त्रीकपालंस्त्रिया॥ अलाभेयथालब्धं पीतं हरति भयकारान्करण्ठकाश्चाइति॥ यथा तथालब्धंकपालं ज्वरान्तेरितिनियमः॥ अत्रमसूर्यादीनामभिमन्त्रणाय मन्त्रोभवति॥ मन्त्र ओंकारपूर्वंइति मंत्रश्चोंकारपूर्वः॥ जलशिखिमरुतां पूर्वं ओंकारोजलमिति॥ यवर्गस्यादिनीयाक्षरं तोयधातुः फूइति॥ शिखीन्यघोरइति॥ उर्द्धे एकारः॥ एषांजलशिखिमरुतां एकत्वं फ्रें अनुस्वारं॥ आकाशं सर्वव्यापित्वादिति॥ वज्रपूर्वं चक्ररात्रकानां॥ नामरक्षान्तेनैवकर्तव्यंयथामसूर्यादिः सप्तवाराभिमन्त्रितंनभैवरक्षान्तेनैवशिरसिगतेहृदयेनाभौगुह्ये॥ आदित्यादाउष्णीषे॥ स्कन्धस्तुभस्थानेषु॥ त्रिसंध्यायां रक्षांकुर्यादितिनियमः॥ अत्रमंत्रः॥ ॐ फ्रें विश्वमातवज्रकरालकान्नाशय २ ममशान्तिंकुरुस्वाहा॥ पररक्षार्थं देवदत्तस्य शान्तिंकुरुस्वाहा॥ इतिनियमः॥ इदंभगवत्याविश्वमातुः सर्वेषु यन्त्रेषु प्राप्तपररक्षायां स्मर्तव्यमिति भगवतोनियमः॥ अनेनमन्त्रेण सप्तवारानाभिमंत्र्यमसूरिकाः शीतांशुनापिष्ठ्वा पातव्याः ज्वरनष्टस्य कपालं अक्षोभेनपिष्ठ्वादेयं॥ मूत्रयसस्य त्रिकटुकेनसहितं॥ अक्षोभ्यापिष्ठ्वादेयमिति॥ पापरोगसमननियमः॥ १२५॥

तत्त्वंधात्रीविधार्यत्वपरमपितथातिन्तिडीपत्रचूर्णं तोयेचन्द्रार्कपक्षे रवकुविगनमबे क्वाथयेत्पादशेषं॥तत्

क्वाथः खण्डमिश्रः पुनरपरदिनात्पीतमेतत्त्रिरात्रं ग्रीष्मे सूर्यांशुदाहं हरति मरणदं सप्रधातोर्गतं च॥ १३०॥

इदानीं सूर्यातपशमननियमः॥ क्रियत इत्यादिना॥ इह यदा ग्रीष्मे सूर्यांशुसंतापो भवति॥ अक्षमिति गतद्रवं धात्रीति॥ आमलकीफलचूर्णं धात्रीमिति जतु
ल्येन तुल्यमपरमिति॥ नपानिन्तिरीपत्रचूर्णं वधुवीपत्रचूर्णमिति तुल्यं॥ एवं सर्वेषां तुल्यभागं कृत्वा॥ तोये चन्द्रार्कबुध्ने इति चन्द्रार्ककिरणैः स्पृष्टे देवतु वि
गतमल इति शैवालादिमलरहिते क्वाथयेत्पादशेषमिति॥ क्वाथस्य यावत् पादमेकं भवति॥ तावत् जलत्रयं क्वाथयेत्॥ इत्था कृत्वा तेषां ध्येयं दत्वेति॥ अत्र तु
ल्यामानं न भवति॥ क्वाथविषये आढकेन मानं सर्वत्रेति नियमः॥ तत्क्वाथपानं समानमात्रं खण्डमिश्रं पुनरपरदिनात् पीतं एवमनेन क्रमेण त्रिरात्रं ग्रीष्म
काले ग्रीष्मे सूर्यांशुदाहं हरति मरणदं सप्रधातोर्गतं चेति॥ तोमलत्वमावेशगतं चकारादपरमपीति नियमः॥ १३०॥

हेमार्ककान्तलोहं पन्नजमयसं वाहये माक्षिकेन वीडार्द्धनापि पिष्ट्वा मलविगतरसे वाहयेत्सत्त्वेनेच्छा॥ गोत
क्रं सरयित्वा खण्डखराशिरिवना ग्रासमेवाग्रमत्तु श्रीपिध्याकल्किपत्रे क्वथितमपितु नर्याव दर्ध्व प्रमाणां॥ १३१॥

इदानीं अपरं रसायनमुच्यते॥ हेमेकमित्यादिना॥ इह शरीरे यः कश्चिद्यासु रसायनार्थी सिद्धरसाभावे मध्यरसायनमिदं कुर्यात्॥ असावविधिरुच्यते॥ हेमेति नि
र्विशुद्धस्वर्णं अर्कमिति ताम्रं॥ कान्तलोहं॥ पन्नजमभ्रकलोहं॥ अयसं तीक्ष्णं॥ एषां प्रत्येकं समभागकृतानां भागं सुवर्णासमं माक्षिकचूर्णं प्रतिवापेन प्रक्षेप्य

त्राया तीव्रवह्निना निर्वाहयेत् ॥ यावद्धेम तिष्ठति ॥ तदेव बीजं तेन बीजेनार्द्धेन स्वर्णपलद्वयेन रसे चतुःपलेन मर्दितं इति सम्प्रदायनाद्दुते ॥ मिश्रं वस्त्रपूतं कारयेदि
ति ॥ ततो गोस्तनकमपगत नवनीतं खदिराग्निनेति ॥ तीव्राग्निना विदारयित्वा ॥ तुष्याविदारितस्य कर्पटेन गालयित्वा स्वच्छमस्तु ग्राह्यं कल्कं त्यक्त्वा ॥ तदेव मस्तु अपक्वान्न
पात्रे हेमपिष्ट्या सार्द्धं पुनः क्वाथयेत् यावदर्द्धं प्रमाणं भवति ॥

उष्णात् शुद्धखण्डाद्यपक्वमथ नववत् क्षेपणीयं हि तत्र तद्भोज्यं सर्वकालं व्यसनविरहितं चापनं यावदेव ॥ षण्मासैर्दि
व्यदेहो वलिपलितगतो जायते योगराजस्तस्माद्ग्राह्यं तदेव प्रतिदिनसमये किंतु पिष्ट्याविहीनं ॥ १२१ ॥

ततउष्णम् शुद्धखण्डापपक्वमिति ॥ तमराजादिकानां ॥ आहारपरिणामवशेन नवादिकं सप्तादिकं च ॥ खण्डस्य चतुःषष्टिभागिकमरीचचूर्णमपि तत्र क्षेपणीयमिति
तद्देव भोज्यं सर्वकालं ॥ असनविरहितं चापनं यावदेव ॥ षण्मासैर्दिव्यदेहो वलिपलितगतो यास्यनेनामरत्वं ॥ इत्यपाने तांबूलभक्षणं विहितं ॥ तांबूलकल्कं विहाय
तद्भोज्यं सर्वकालमिति ॥ तदेव मस्तु तेन विधिना भोज्यं भोजनीयं ॥ हेमपिष्ट्या विहीनं ॥ किन्तु यावत्पिष्टिकास्ति तावत्तया सार्द्धं ॥ पश्चात्तया विना सर्वकालं ॥ इति रसायननिय
मः ॥

पूर्वोक्तं बीजराजं सममपि च रसे जारितं चार्द्धमात्रं क्षाराम्लैर्मर्दयित्वा वज्रविविधविडैर्यावदेकत्वमेति ॥ पित्ताम्लै
र्गन्धकाद्यैर्दृढमपि शिलां मर्दयेत्सूततुल्यं तद्वै मात्रा रसेन्द्रं व्रजति कनकतां पक्षमध्याधिकेन ॥ १२२ ॥

मानी भक्त्याद्युपभोगाय हेमाष्टिकमाह ॥ पूर्वोक्तमित्यादिना ॥ इह पूर्वोक्तं बीजराजं सममपि च रसे चारितं चार्द्धमात्रं क्षाराम्लैर्मर्दयित्वा वज्रविविधविडैर्यथा

मारोर्यावदेकत्वमेति ॥ ततः पित्ताद्यैर्गन्धकाद्यैः दरदमपि शिलामिति ॥ इह रससंक्रामणाय त्रीणि द्रव्याणि रसमतुल्यानि रसेन सार्द्धं पित्तास्तैर्मर्दयेत् ॥ गोपित्तं मत्स्यपित्तं वा
क्लाम्लं वा यथालब्धं बीजपूरकाम्लं ॥ गन्धकं दरदं ॥ शिलां तालकं । शशकं । काक्षी कासीसं तुत्थकं । हेमगैरिकं । एषां गन्धकादीनामुपरसत्वं ॥ महारसस्यैकं ॥ त्रिशि
रसतुल्यानि ॥ तस्मिन्लेपानन्तरं पत्रं ॥ दिनत्रयं तुल्लिकाधः स्थापितं व्रजति कनकतां पश्चात्तुल्लिकाग्निना आर्द्रकेन रेम्नाकृति ॥ हेमार्द्रकनियमः ॥ १२३ ॥

तीक्ष्णं वा काशराजानं त्वथ लवणगणं व क्षारवर्जं क्रमेण वृद्धं चार्कैः क्षिप्तरोपं समरसकरणं शाऊये दग्धशेषं ॥ भूयः क्षी
रेणाशुद्धं भवति मृततनभागोमयाऽग्निनिषिक्तं नारे दत्तं त्रिभागं हतमपि भरितं शुद्धपुष्पत्वमेति ॥ १२४ ॥

इदानीं पुष्पक्रियोच्यते ॥ तीक्ष्णमित्यादिना ॥ इह पुष्पशब्देन उष्मक्षयक उक्तमुच्यते ॥ तीक्ष्णं नारेण ताडितं भरितं चेति ॥ तस्येयं हतशुद्धिः ॥ तीक्ष्णं ना काशराजानमिति
सम्भकसत्वं ॥ अलमिति तालकं लवणं सैन्धवं । यवक्षारं । सर्जरसं ॥ तीक्ष्णाद्यं क्रमेण वृद्धमिति ॥ एकद्वित्रिचतुःपञ्चषड्भागं यावत् ॥ ततः सर्वमेकीकृत्य अर्केनास्त्र
क्षिप्तरोग समरसकरणात् प्रथममन्धमूषायां धमेत् ॥ ततः प्रकटमूषायां वास्येयर्कशेर्फ यावद्भवति ॥ भूयः क्षारेण टङ्कणक्षारेणाशुद्धं भवति ॥ मृतनभागोमयाऽग्निनिषिक्त
मिति ॥ गोमयं गोमूत्रं ॥ आदितः । अर्कमूलं । वज्री कनकमूलं । एरण्डमूलं ॥ क्षीरकञ्चुकीमूलं पीषयित्वा सन्धानं कारयेत् ॥ सप्ताहं यावत् ॥ ततस्तस्मिन्मूत्रके निक्षिकंद
ध्मात् यावत्स्फुटं भवति ॥ तस्य तारे दत्तं त्रिभागं हतमपि भरितं वा शुद्धपुष्पत्वमेति ॥ इति पुष्पदलनियमः ॥

एला कर्पूरमानात्वचलघनफलिनी वायसानद्रिजं च कक्कोलं सिंहमूत्रोपलफलमृगजारक्तदैत्यानि पूतिः ॥ नागं

शीतक्षणायतनं नजवक्रजलानोन्मथ्रं वक्रमेनतं चन्द्रैस्तु गन्धंकृत्स्नग शशिभिर्दूपकच्छप्यांसवाद्यैः॥ १२५ ॥

इदानीं बुद्धबोधिसत्वपूजार्थं गन्धधूपादि कच्छपुटमुच्यते ॥ शीतेत्यादिना ॥ इह शोधितद्रव्याणि गन्धशास्त्रोक्तविधिना पञ्चविंशतिकोष्ठके। कच्छपुटे स्थापयेत् ॥ प्रथमकोष्ठे। एला। द्वितीये कर्पूरं ॥ तृतीये मालतीनिष्कपुष्पं ॥ चतुर्थे वलं सिह्लकचूर्णं ॥ पञ्चमे घनंसारकं । षष्ठे मृगशिनी प्रियंगुपुष्पं ॥ सप्तमे वायसकृष्णागरुः ॥ अष्टमेऽक्षिनं शैलेयकं। नवमे कर्कोलकं ॥ दशमे सिंहमूत्रं ॥ एकादशमे उत्पलकुष्ठं ॥ द्वादशे फलं जातिफलं ॥ त्रयोदशमे मृगजा कस्तूरिका ॥ चतुर्दशमे रक्तो कुंकुमं ॥ पञ्चदशमे देवदारु ॥ षोडशमे पूतिः पुत्रकेशं ॥ सप्तदशमे नागं नागकेशरपुष्पं ॥ अष्टादशमे शीतं चन्दनं ॥ एकोनविंशतिमे रसाउशीरकं ॥ विंशतिमे पत्रं तमालपत्रं ॥ एकविंशतिमे मलं मांसी ॥ द्वाविंशतिमे जलं वालकं। त्रयोविंशतिमे लतेति ॥ लता कस्तूरिका ॥ चतुर्विंशतिमेऽम्बरं भेरुण्डविष्ठं ॥ पंचविंशतिमे चक्रं पिण्डीतगरपुष्पं ॥ एवमेतद्द्रव्याणि ॥ एभिः पंचद्रव्यैर्यथालब्धैः कच्छपुटोद्भूतैः शोभनं गन्धं कार्यमिति नियमः ॥ मृगशशिभिरिति कस्तूरिकाकर्पूरसहितैः धूपैः पातयेत् ॥ उगन्धं धूपैर्वासयेत् ॥ आसवाद्यैरिति ॥ मद्यासवैर्वक्ष्यमाणैः कर्पूरकस्तूरिकाजातीफलसहितैर्वर्धयेदिति द्रव्यपातनियमः ॥

नेत्रेन्द्वग्न्यब्धिबाणाग्न्यगजलधिशरा हस्तचन्द्रेषुनेत्रा चन्द्राग्न्यब्धीन्दुबाणाऽगशरनयनाब्धीषुनेत्रेन्दुलोकाः ॥ स
लाग्न्या भागसंख्याः क्रमपरिरचिताः पञ्चपञ्चप्रकोष्ठै द्रव्यैर्गन्धं भवेत् कच्छपुटगतैः शुद्धभागैर्दिनाद्यैः ॥ १२६ ॥

इदानीं कच्छपुटपतितानां द्रव्याणां भाग उच्यते ॥ नेत्रेत्यादिना ॥ इह प्रथमकोष्ठपतितद्रव्यस्य नेत्रमिति द्वौ भागौ ॥ द्वितीये इन्दुरिति एको भागः ॥ तृतीयेऽग्निरिति

त्रयः ॥ चतुर्थे ऽब्धिश्चत्वारः ॥ पञ्चमे वाणा इति पञ्च ॥ षष्ठे गुणा इति त्रयः ॥ सप्तमे जलधिरिति चत्वारः ॥ अष्टमे शरा इति पञ्च ॥ नवमे यम इति द्वौ ॥ दशमे इन्दुरित्येकः ॥ एकादशे इषुरिति पञ्च ॥ द्वादशे नेत्रमिति द्वौ ॥ त्रयोदशे चन्द्र इत्येकः ॥ चतुर्दशे अग्निरिति त्रयः ॥ पञ्चदशे अब्धिरिति चत्वारः ॥ षोडशे काला इति त्रयः ॥ अष्टादशे युगा इति चत्वारः ॥ एकोनविंशतिमे शर इति पञ्च ॥ विंशतिमे नयन इति द्वौ ॥ एकविंशतिमे अब्धिरिति चत्वारः ॥ द्वाविंशतिमे इषुरिति पञ्च ॥ त्रयोविंशतिमे नेत्र इति द्वौ ॥ चतुर्विंशतिमे इन्दुरित्येकः ॥ पञ्चविंशतिमे लोका इति त्रयः ॥ एवं कच्छपक्रमेण एताद्या भागसंख्या क्रमपरिरचिता पञ्च पञ्च प्रकोष्ठेषु । तैः पञ्चभिर्धूपैर्गन्धो भवेत् ॥ कच्छपुटपुटगतैः पुरमिति कोष्ठकं अष्टद्वयभागैर्दिनाख्यैरिति पञ्चदश भागैः ॥ एकादित्रिचतुःपञ्चभिरेकीभूतैरिति ॥ इत्थं भागनियमो गन्धकच्छपुटे ॥ १३६ ॥

जात्याश्रीवालतनानादलकतसपुरे पातनीयं क्रमेण लाक्षासर्जश्च गन्धं प्रवरमपि विना धूपकार्ये च धूपं ॥ कुर्या
त्कर्पूरखण्डैः कुसुमरसयुतैर्वह्निभागैर्नखैश्च पिष्टं तज्ज्वलितैर्यैरभिमधुहरितां धूपवर्तिं प्रकुर्यात् ॥ १३७ ॥

इदानीं धूपकच्छपुट उच्यते ॥ जात्यादिना ॥ इह पूर्वं पातितानां कच्छपुटद्रव्याणां मध्ये जात्यादि पञ्च द्रव्याण्युद्धृत्य तेषां स्थाने यथाक्रमेण स्थानि पञ्च देयानि ॥ तत्र जातीति जातिफलं ॥ आदितः । द्वितीया एला । तृतीया तना कस्तूरिका ॥ चतुर्थं दलं तमालपत्रं ॥ पञ्चमं कवलं कक्कोलं ॥ एषां पुरे कोष्ठे पातनीयं क्रमेण ॥ जातीफलकोष्ठे लाक्षा एलाकोष्ठे सर्जरसं ॥ लताकोष्ठे ऽन्वमिति श्रीवासं ॥ दलकोष्ठे पुरमिति गुग्गुलुं ॥ कक्कोलकोष्ठे सितमिति तुरुष्कं ॥ एवं धूपकार्ये च धूपं ॥ पञ्चद्रव्यैः पूर्वोक्तभागैः कुर्यादिति नियमः ॥ कर्पूरखण्डैः सह पत्रखण्डं ॥ तत्र मधुद्रव्यं खण्डेन सार्द्धं वह्निभागैर्नखैश्च सार्द्धं ॥ एवमष्टादशभागैः कच्छपो धूपो भवति ॥ कर्पूरखण्डमधुकस्तूरिकासहितो धूप इति ॥ धू

पक्कक्षपुटे द्रव्यनियमः॥ इदानीं धूपवर्तिरुच्यते॥ पिंडं नदिन्यादि॥ इह धूपकक्षपुटे योक्तं धूपयोगं मधूकविरहितं॥ गन्धोत्कटेन किंचित् स्वयुग्मिश्रेणापिष्ट्वा धूपवर्तिं तेन कुर्यात्॥ नानाचाकारां धूपनाय वस्त्रादिकं सद्धर्मं सानिमार्थमिति नियमः॥

नाभ्या द्वौ सिंहपूत्रे त्रिभागमनगुरे पातयेत्स्नानयोगे ग्रन्थिं व्याघ्रं हरेणुं हतमपि च तथा शांखचर्मत्रिभागाः॥ धान्यं
पुर्वाशानक्कं दिनमपि मधुरीतं कुष्ठ वलेन च पूर्वीके चानिवृत्ते जलजमपि तथा ग्रन्थिपर्णां च नैवे॥ १३८॥

इदानीं स्नानकक्षपुटमुच्यते॥ नाभ्याद्वावित्यादिना॥ इह पूर्वकक्षपुटे पातित द्रव्याणां मध्ये चत्वारि द्रव्याणि नाभ्यादीन्युद्धृत्य तेषां कोष्ठेषु यथासंख्यं स्नानकक्षपुटे दानीति॥ तत्र नाभिकोष्ठे ग्रन्थिपर्णां पातयेत्॥ सिंहसूत्रकोष्ठे व्याघ्रनखं॥ शशिपुरे हरेणुं गगनतगरे हृतामिति कचोरकं॥ अपि च तथा। यथा धूपकार्ये संख्यामिति नखं तस्य त्रिभागं एवं त्वग्द्विभागास्त्रयो देयाः॥ स्नानयोगे स्नानद्रव्याणां मध्ये॥ एवमष्टादश भागेषु द्रव्यैः स्नानं भवति॥ स्नानकक्षपुटे द्रव्यनियमः॥ ॥ इदानीमुद्वर्तनकक्षपुटमुच्यते॥ इह स्नानकक्षपुटे योक्तपञ्चद्रव्याणां मध्ये त्वग्वर्गयोः भागाः पञ्च द्रव्याणि देयाः॥ धान्यमिति कुस्तुम्बुरु॥ पूर्वाशेति मरुवकं॥ शातह्वेति शतपुष्पा॥ दमिति दमनकं॥ मधुरीत्येषां पञ्चानां त्रयो भागाः॥ एवमष्टादशभागेनोद्वर्तनं भवति॥ उद्वर्तन द्रव्यनियमः॥ ॥ इदानीं पक्वतैलार्थं तैलकक्षपुटमुच्यते॥ पूर्वेत्यादि॥ इह पूर्वोक्तगन्धकक्षपुटद्रव्याणि अनिवृत्ते जलजमिति नखं॥ जलजमिव तगरमिति त्वक्॥ ग्रन्थिपर्णं च तयोर्भागत्रयं दत्वा गन्धकक्षपुटं पञ्चद्रव्यैः सार्द्धं सप्तद्रव्यैरष्टादशभागेन तत्पमाणकमेणैव तैलं पचेत्। नानागन्धतैलं भवति तैलकक्षपुटद्रव्यनियमः॥ १३८॥

चूर्णो ग्रन्थिं च तस्य भवति तत्र हतं पानवासे सुखे च त्वम्बोलं ग्रन्थिशंखं फलदलपुष्पपाके च हस्तादिकं स्यात् ॥ एवं
त्रिंशत्प्रभेदैः सुरचितविविधान् गन्धधूमादियोगात् कुर्याद्द्रव्यैर्विशुद्धैः फलकुसुमपवनैर्वासितैर्वीक्षितैश्च ॥ १३९ ॥

एवं चूर्णादिकं । चूर्णो चूर्णविषये ग्रन्थिर्वृत्त इति ॥ तस्य वस्त्रखण्डकेषु देयं ग्रन्थिपर्णकं । तत्र एवं पानवासे देयं भवति । सुखवासे च ताम्बोलं ग्रन्थिसंख्यमिति ॥ द्रव्यं च सुम्भस्य भागत्रयं फलपाके दलपुष्पपाके हस्तपाके ॥ आदितो दीनायाकेन स्यात्प्रमाणो देयमिति ॥ एवमुक्तकालेन त्रिंशत्प्रभेदैस्त्रिंशत्प्रकारादियोगात् सुरचितान् विविध गन्धधूपादियोगान् स्नानोद्वर्तनादिकान् कुर्यात् अथ यथार्थी ॥ द्रव्यैः किंभूतैर्विशुद्धैः फलपुष्पपवनैर्वासितैर्वीक्षितैरिति ॥ द्रव्यसंग्रहनियमः ॥ १३९ ॥

अष्टांशादेकषायो भवति दलवशात् क्षिप्ररोपाग्रधूपः पश्चाद्द्रव्यप्रमाणो ऽ उ इति च भवेद्दुर्दिने ग्रीष्मयोगात् ॥ पादां
शांशं तु धूपं मधुकमपि सितं तिर्दहेद्द्रव्यमत्रापि यद्वा शंखप्रमाणं मलयमपि फलं चन्द्रयुक्तं च नद्यात् ॥ १४० ॥

इदानीं गन्धस्य धूपपाक उच्यते ॥ अष्टांशादित्यादि ॥ इह गन्धयोगे त्रिविधं दलं ॥ अधममध्यमोत्तमं ॥ तत्राधमं मुस्तकं ॥ मैलेयं उशीरकं ॥ बालकं । कपित्थं विल्वं सुरामांसीति ॥ एतानि दलान्यधमानि ॥ एषामष्टांशादेतद्वशात् गन्धैकषायो उडेन मोदितं हरीतकीचूर्णं धूपो भवति ॥ तेन दलमष्टांशेनादौ धूपयेद्दिनमेकं ॥ ततः पुष्पवासं कृत्वा दिनद्वयं । तृतीये दिने मध्यमदलमिश्रयेत् ॥ ततस्तत् क्षिप्ररोपाग्रधूपः इति ॥ तस्य पूर्वापरस्य क्षिप्ररोपाग्रधूप इति ॥ लाक्षा । सर्जरसः । यो

वासंयग्रखुजउरुरुकं ॥ एभिः पश्चाद्गैर्गुडेन मोदितैस्तथा धूपो भवति। कषायसाद्धित्रयाणां देयः ॥ दत्तस्य पाकस्थमिति ॥ अत्र मध्यमदलं। अष्टवर्गं। चन्दनं। अगरु फलवर्गं। नखं। त्वग्वर्गं ॥ निःश्वासवर्गमिति ॥ सर्वं दिनद्वयं। अथ धूपेन धूपयेत् ॥ एकान्तरितं ॥ दिनद्वयं ॥ धूपवासं अर्थात् पश्चात् द्रवप्रमाणाद्गुडं ॥ आमिष धूपेन सार्द्धं निर्दहेत् ग्रीष्मे ॥ ततो वर्द्धते ग्रीष्मयोगात् ॥ वर्षे द्रव्यद्वित्रयाणः ॥ हेमन्ते त्रियाणो देयः ॥ ततो गुडे दग्धे सति संरवमिति नखं ॥ गुडेन सार्द्धं पाकसं निर्दहेत् ॥ दिनद्वयं पूर्वविधिना ॥ ततो मधुकांक्षितां सर्करां द्रव्यतुल्यां निर्दहेत् पिण्डधूपेन सार्द्धं ॥ धूपयोगस्याधावसाने केवलं निर्दहेत् ॥ एवं गुडोपि प्रतिदिनं यावत्त्रयं दग्ध्वा विश्रामयेत्प्रतिदिनं द्रव्यस्याष्टांशं धूपं निर्दहेत् ॥ अन्यथा नेन पक्को भवति ॥ अधिकेन दग्धगन्धो भवति अपक्के अन्ध्रो भवतीति नियमः ॥ पिण्डमिति पिण्डधूपं ॥ कक्षपुटोक्तं कर्पूरसहितं उग्रद्रव्यवर्जितं ॥ पञ्चद्रव्यैर्मधुसर्करामोदितैः पिण्डधूपं तद्वत्संरवप्रमाणमिति द्रव्यपादांशं निर्दहेत् ॥ तत्र पत्रकेशजातीफलं कर्पूरं नाभिः ॥ अपरं कक्षपुटोक्तं घनमदनं दत्वा मलयं चन्दनं। लघुमित्यगुरुं ॥ बालमिति सिल्हकं ॥ चन्द्रमिति कर्पूरं तेन सक्तं द्रव्यत्रयं ॥ तद्वदिति पिण्डधूपद्रव्यसदृशं ॥ निर्दहेन्मधुसर्करासहितं ॥ अत्र गुडी वटिका गुडो या खो न द्रवपूर्वक इति नियमः ॥ १४० ॥

पक्कं गन्धं सधूप्यं कतिपयदिवसैर्वासयेद्यावदिष्टं पश्चाच्छैशतांशांत्रिफलशशिपदैः कारयेत्सीसवैश्च ॥
सियखुधगयूत्रं जउसमरससमं क्वाथयेत्सुप्रजातं मासे कषायपक्कं भवति मृगसमं वासवेराभिविद्धं। १४१ ॥

ततः पक्कं गन्धं ज्ञात्वा ॥ अस्य पाकं मर्दितस्य गन्धेन करस्पर्शतलं यदि रक्तं भवति ॥ तदा परिपक्वं ॥ अथ न पक्कं अतो यावत् पाकं न भवति तावद्दिनं धूपेन दाहयेदि

ति॥ एतत् पक्कं गन्धद्रव्यैः चम्पकाद्यैः सुगन्धैः कतिपयदिवसपर्यन्तं धूपमेकं वा यावद्धूपक्षेपं सज्जति॥ ततः सुष्ठं भवति। पश्चाद्वेधसमांसं फलमिति। जातीफलं
कक्कोलं। अपरं वा कक्कोलस्थाने लताकस्तूरिका। धात्रीति कर्पूरं। मदमिति कस्तूरी॥ एषां समभागं कृत्वा शतांशेन गन्धस्य वेधं कारयेत्॥ मासं वैरितिवत्पमारो म
नासवैः सार्द्धं वेधं शतांशेन दद्यात्॥ वेधस्याप्यवगमासवमिति वेधनियमः॥ इदानीं गन्धानां मोदनार्थं आसवमुच्यते॥ शिग्वित्यादिना॥ बृहद्गन्धशास्त्रोक्तविविधा विरुत
रायत्नयाद्धा आसवादीनां पाकः॥ मतन्त्रेन गन्धशास्त्रे लोपः॥ अत्र च संक्षेप उक्तः॥ शिग्रुत्वस्विति॥ शिग्रु रसं। नागरं जलसमरसमिति मधु। तेन समं हृतमानां॥ आ
ग्निना क्वाथयेत्॥ पञ्चजातमिति॥ मधुपर्यन्तं॥ ततः सुधृतनारिकेलाशे प्रक्षिप्य धान्यराशिमध्ये मासमेकं पक्वं भवति मृगसमं॥ आसवेनाभिविद्धमिति॥ आग्निपाका
वसाने नाभिरिति कस्तूरी॥ अनुक्तमपि कर्पूरं॥ त्रिफलं तेन समांशं वेधं दत्वा॥ ततो धान्ये स्थापयेत्॥ ततस्तेन गन्धस्य वेधं पूर्वोक्तं कारयेदिति नियमः॥ सर्वस्मिन्न
न्धशास्त्रे धूपपाकाय त्रिविधं धूपयन्त्रं समं डमरुकाकारं॥ मूर्द्धिं सरावाकृतिः॥ मध्यं शूलं च यं छिद्रं खण्डयुगलमध्यमं कवाटयोरग्रधूपार्थं मध्यमं शङ्कुं लोछ्रिनं॥ नरव
ण्डयित्वा धूपार्थं॥ अधमं दंशाङ्कुं वर्त्तीनधूपार्थ॥ अस्य यन्त्रस्य तले वालिकासहितं॥ खर्परं चूर्णिकामूर्द्ध्वं दत्वा दन्त्रवालिकाया धूपं यासं दत्वा मध्ये परियन्त्रं यन्त्रं
परिगन्धक त्वक प्रवितिन्न सक्तुं त्वर्द्धम छिद्रितं मृतकपालं स्वल्पकल्केन नारिकेलं दत्वा धूपं निर्दहेत्॥ दरौ कन्दरगार्द्ध धूपप्रमाणं ज्ञात्वा॥ ततश्चलकपालं फलकौ
परि वस्त्रं दत्वा धोउरवं स्थापयेत्॥ येन धूपो न गच्छति पाककाले पि कपालयन्त्रयोर्मध्ये आर्द्रवस्त्रेण वेष्टयेत्॥ इति धूपपाकनियमः॥ फलपाके बीजपूरकस्य
गर्भवास्यश्च छत्रत्वचं परिवर्त्य मध्ये गन्धकल्कं प्रक्षिपेत्॥ बाह्ये च वल्कैर्वेष्टयित्वा मृदङ्गुवालिछिन्नं लेपयेत्॥ पश्चात्केन करीषाग्निना उपयोगेन पाचयेत्॥ यावत्त्वच्यो
ग्निवर्णो भवेत्॥ ततः सुगन्धता शोभवति॥ ततोऽस्मै कृष्णं शीति भूतं गन्धं नाभ्यादिभिर्वेधयेत्॥ पूर्वोक्तविधिनेति॥ फलपाकनियमः॥ दन्तछदपाकेपि केतकीपत्रैः

पुटिकां कृत्वा मध्ये गन्धकल्कं क्षिपेत्॥ शेषं फलपाकवत्॥ हंसपाके स्वर्णकलशौ रौप्यं वा गर्भे गन्धकल्केनालिप्तं अङ्गुलैकेनोच्छ्रितेन नात्र कपाले गन्धोदकार्द्धं परिपूरितेन॥ पूर्वमानं कथन मृत भक्तु हंसइव पूर्वमानो हंसपाक इति वेधादिकं पूर्ववदिति॥ हंसपाकनियमः॥ हंसपाके न इति वचनात्॥ दोलापाकोऽधुनोच्यते॥ इह शास्त्रोक्तानानाविधद्रव्याणां मध्ये॥ अधमद्रव्याणां॥ अष्टविधं कर्म प्रयुज्यते॥ क्षालनं भेदनं॥ उद्धमनं। भर्जनं। भावनं। धूपनं। वासनं। वेधनं चेति॥ तत्र क्षालनं काञ्जिकेन। भेदनं दोलापाकेन॥ उद्धमनं गन्धोदकेन॥ मर्द्दितानां भर्जनं उत्तमाग्निना॥ भावनं शिशुच्छागमूत्रादिभिः॥ धूपनं कषाययोगैः॥ वासनं केन कस्तूरिकाद्यैः॥ वेधनं नाभ्यादिद्रव्यैरिति॥ अधमद्रव्याणां तुरुष्कादीनां॥ उष्णगरोः क्षालनभेदनादिकं कुर्यात्॥ भर्जनं वर्जयित्वा॥ एवं लघुगरोः मध्यमद्रव्याणां मूलगरोः काष्ठगरोः पत्रगरोः जीवगरोः नयनस्य भर्जनं उत्तकेशस्य पाकः॥ शेषं उष्णगरोवत्॥ फलगरो निर्जासगरो द्रवद्रव्यगरो नास्ति [illegible] कार्यमिति॥ एषामु[illegible] द्रव्याणां चूर्णं कृत्वा भाण्डमुखे वस्त्रं परिचूर्णं देयं भाण्डगन्धोदकेनार्द्धपूर्णं चूर्णिकोपरि दत्वा वाष्पस्वेदेन स्वेदयेत्॥ यावच्चूर्णं द्रवीभूतं भवति॥ ततः कृत्वा [illegible] मनादिकं कारयेत्॥ एवं पत्रकेशस्यापि दोलास्वेदः॥ नखस्य स्वेदस्थाने गोमयेन मृत्पात्रक्वाथनं भर्जनं॥ कषायोदकेन सेचनं॥ शेषं पूर्ववदिति॥ पञ्चविधपाकनियमः॥ शेषं गन्धशास्त्रे ज्ञातव्यं गन्धार्थिनेति॥

उत्सृज गन्धेषु पूतिं रसनखचपलं धूपयोगेषु उत्सं तद्वन्मीनं च रुक्मं रुक्ममपि प्राशितं वा सकार्ये प्रयुज्यं॥
वेधे कर्पूरनाभित्रिफलमदखराज्ञानयोगे च सम्यक् उत्सृज ग्रन्थिपर्णं वनचरसहितं ग्रन्थिकं भूतनेत्रं॥१४२॥

इदानीं गन्धादीनां उत्सर्ग उच्यते॥ उत्सृजेत्यादि॥ इह गन्धानां शीत धूपपाककाले उत्सृज गन्धेषु पूतिं दद्यात्॥ रसनखचपलामिति उत्सृज॥ इह धूपपाके अन्यो

भूतानां गन्धानां धूपं दद्यात्॥ धूपयोगं कृत्वा धूपयोग इति॥ धूपपाकविषये गन्धरसं नरवं सिन्दूकखण्डेन सोदयित्वा दिनैकं दिनद्वयं वा॥ यावत्तूलं लगति॥ ततः पिण्डादिकं दद्यादितिनियमः॥ अथ खरपाकेन गन्धे दग्धे सति निर्वाप्यां शशाङ्ककिरणैः स्पृष्टो गन्धः॥ तदभावे जलनीरे स्थापयेत् यावद्गन्धदोषोपशमो भवति॥ गन्धानां विना शाकारणा उच्यते॥ इह शुद्धश्च शुद्धश्च द्रव्याणां॥ एकत्वविना शाकारणा॥ तत्र भानौ वा शार्द्ध स्थाप्य पवनं भारकृत्य॥ विरूपं मांसम् अकसर्वैः॥ वात अम्बुराशिस्थानमिति॥ तद्दक्षिणमिति चन्दनं॥ उत्तरं॥ उदग्राशिनं॥ उत्सं॥ उत्तरकेशावस्थाने॥ शीतादिधूपो देयमिति॥ पाकान्ते नियमः॥ वासकं मेघपुष्पं उत्सं यावत् धूपदोषोपशमो भवति॥ विध इति वेधविषये कर्पूरं कस्तूरिकादि कृतं॥ मस्तुरेति कस्तूरिका सवोत्र सं॥ यावत् तृणप्रवास देशोपशमो भवतीति गन्धयोगे नियमः॥ स्नानयोगे च सम्यगिति॥ स्नानविषये वर्षपञ्च तुल्यमिति॥ देयं स्नानद्रव्यगणमध्ये त्वक् ग्रन्थिपर्णी॥ वनचरसहितमिति पुन्नकेशरसहितं॥ भागत्रयं पञ्चदशभागमध्ये स्नानद्रव्यमिति नियमः॥ उद्वर्तनयोगे ग्रन्थिपर्णी देयं॥ स्नाने यथाविभागमिति॥ गन्धकक्षपुटवृत्तिः॥ १४२॥

धूपाङ्गं द्रव्यहीनं मधुकविरहितं गन्धतोयेन पिष्टं पङ्कं धूपैः कषायो ग्रसमधुकरजैर्ग्रासवृद्ध्याक्रमेण। द्वौ
ग्रासौ खरणामिश्रौ मनयचपलयोर्नालिककर्पूरयोश्च ग्रासस्याद्यावसाने मधुकमपिहितानि दहेदादिधूपान्॥ १४३॥

दग्धाभिर्नाभिर्भर्जी गन्धउच्यते॥ धूपाङ्गमित्यादिना॥ इह यत्र कडवेया गन्धराजं कर्तुमिच्छति॥ तत्र धूपाङ्गमिति॥ तत्र वनदेवसानात्सैन्यबहुविधं॥ गजकर्णी अम्बुखुरं उत्पलपत्रं॥ वरदपत्रं चेति॥ तेषु गन्धयोगजे गजकर्णी॥ अम्बुखुरं देयं धूपयोगे वदरोत्पलपत्रं देयं॥ अत्रवकुलपत्रं॥ श्रेष्ठं तस्याभावे उ

त्वक्पत्रादिकं ग्राह्यं शुद्धं गन्धशास्त्रोक्तविधिना क्वथितं भर्जितं गुडकषायोदकेन षिक्तं चूर्णितं त्रिफलादिभिः प्रलेपितं वासितमिति शुद्धं ॥ तदेवान्यद्रव्यै
र्हीनं मधुकमित्याख्यं तेन विरहितं ॥ गन्धतोयेनापि युक्तमिति ॥ इह गन्धोदकार्थं स्वच्छतोयं गृहीत्वा ॥ एलात्वग्रमामांसीवालकचन्दनपोटलिकायां बद्ध्वा मध्ये उ
कतोये क्षिपेत् ॥ ततः पाकविशेषं क्वाथयेत् यावद्गन्धोदकं भवति ॥ तेनापरमपि गन्धं भावयेदिति नियमः ॥ मक्कधूपैरिति तदेव शुद्धं नखमिश्रं धूपपाकविधि
नापक्वधूपैः कषायोऽत्र समधुकस्तैर्ग्रासवृद्ध्या क्रमेणेति ॥ मधुसर्करयासहैकग्रासः कषायस्य प्रथमदिने ग्रासस्याद्यावसाने मधुकमपि सितानिर्दहे म
दिधूपादिविनियमात् ॥ प्रथमं मधुकसर्कराग्रासो देयो मध्ये कषायधूपस्य पुनर्ग्रासावसाने मधुसर्करां निर्दहेत् ॥ द्वितीयेदिने उपवासं कारयेत् ॥
एवमेकान्तरितं ॥ उग्रधूपस्य ग्रासद्वयं दिनद्वयेन निर्दहेत् ॥ नखस्य ग्रासत्रयं त्रिभिर्दिनैः ॥ ततो द्वौ ग्रासौ खण्डमिश्रौ विति ॥ मलयस्य द्वौ ग्रासौ दिन १७
द्वये ॥ चपलस्यैकं ॥ लोहकर्पूरयोरपि ग्रासस्याद्यावसाने मधुसर्करा पूर्ववदिति ॥ एवमेकान्तरेण चतुर्विंशति दिनैर्धूपैः पक्वं भवति ॥ १४३ ॥

वासं कृत्वा सुपुष्पैः कतिपयदिवसैर्गन्धतोयेन मिश्रं अग्रावे मृत्कपाले दृढपिहितमुखे वेष्टितं सिक्थवस्त्रैः ॥
कृत्वा विस्तीर्णभाण्डे त्वथ धरणितले पूरिते वालुकाभिः पक्वं धराग्रासयोगाद्भवति जनगतो नाभिगन्ता सगन्धः ॥ १४४ ॥

ततो वासं कृत्वा दशदिनं सुपुष्पैः ॥ यावद्धूपदोषोपसमो भवति ॥ गन्धतोयेन मिश्रमिति पूर्वविधिना प्रत्यहं गन्धतोयं क्वाथयेत् ॥ शीतोदकेन दद्यात्
शीतोदकेनाम्लो भवति ॥ तेन गन्धतोयेन मिश्रं गन्धं कृत्वा अग्रावे मृत्कपाले वाल्य सिक्थवस्त्रेण वेष्टिते दृढपिहितमुखे तदेवापरे विस्तीर्णभाण्डे जा

निकायामथ धवराशानले अस्याभावे तस्मिन् भाण्डे प्रक्षिप्य उपरि वालिकां दद्यात् ॥ यावद्भाण्डं कण्ठपर्यन्तं पूरितं भवति ॥ अत्र वालिकाभिः पूरिते भाण्डे सामान्यमुदकं सूर्यतप्तं देयं तदेव भाण्डं सूर्यतापे स्थापयेत् षण्मासं यावत् ॥ एवं पक्वं षण्मासोपयोगाद्भवति ॥ जलगतोनाभिभर्ता गन्धइतिगंधराजनियमः ॥

कृत्वा शुद्धिं तिलानां क्वथितजबदलैर्धूपनैर्लेपादिभिश्च पश्चाज्जात्यादिपुष्पैः कतिपयदिवसं वाचयेद्यावदिष्टं ॥ यन्त्रैस्तै-
लं गृहीत्वा नृपनिपुणतया स्नापयेत्काचभाण्डे स्नानेवाभ्यंगनेवा भवति मदकरं पुष्पतैलं स्वपक्वं ॥ १४५ ॥

इदानीं पुष्पतैलार्थं गंधतैलं वा यच्च तिलशुद्धिरुच्यते ॥ कृत्वेत्यादि ॥ इह तिलान् परिपक्वान् नवान् संगृह्य क्वथितदलजलैरिति ॥ दलान्याम्रपत्त्राणि ॥ एवं जंबूकपित्थमातुलुंगबिल्वानां पंचवृक्षाणां पत्त्राणि तैः क्वथितं जलं तैर्दलजलैर्मर्दयित्वा तिलानां तुषापनयनं प्रथमशुद्धिः ॥ ततो जाता यत्रौपरि वस्त्रं दत्वा तदुपरि तिलानपरभाण्डे पिहित्वा धूपयेत् ॥ द्वितीया शुद्धिः ॥ लेपादिभिरिति ॥ त्रिफलैर्लेपो देयो गंधतोयेन पिष्टैः ॥ आदितः सूर्यरश्मिभिः शोषयेत् ॥ एवं तिलानां शुद्धिं कृत्वा पश्चाज्जात्यादिपुष्पैः कतिपयदिवसं पक्षं वा दशदिनं वा निरन्तरं वासयेत् ॥ यावन्मर्दितानां वासितः पुष्पगन्धमुद्वहति ॥ तत इष्टं वासनं भवति ॥ ततः कोल्हुकयन्त्रेण तैलं गृहीत्वा ॥ नृप इत्यामन्त्रणं निपुणतया काचभाण्डे स्थापयेत् ॥ तत्तैलं स्नाने वाभ्यंगनेवा भवति मदकरं पुष्पतैलं स्वपक्वमिति ॥ अथ पक्वतैलं कर्तुकामः ॥ तदा तद्देवतैलं समतोये नखगन्धेन क्वाथयेत् ॥ यावत्तैलं फेनं मुञ्चति ॥ ततोवतारणकाले अस्यांशेन गन्धद्रव्यं गन्धोदकेन पिष्ट्वा देयं ॥ पश्चादवतारयेत् यावत् शीतलं भवति ॥ ततः कस्तूरिकाद्यैर्वेधं दत्वा काचभाण्डे स्थापयेत् ॥ तदे

वमदसवेन पादांशेन मिश्रितं ॥ लाक्षाभाण्डे सूर्यतापैः सप्ताहं तत्र कस्तूरिकातैलं भवति ॥ ततः कस्तूरिकार्धे वै धृत्वा काचभाण्डे स्थापयेत् ॥ तदेवमदसवेन पादांशेन मिश्रितं ॥ लाक्षाभाण्डे सूर्यतापे ॥ वेणुकनलिकायां पक्वं सूर्यपाकं भवति ॥ एवं विलेपनाद्यं वेणुकनलिकायां पक्वं । देवादिलेपनं भवति ॥ नाभ्यादिभिर्विद्धं ॥ एवं नानाविधं गन्धशास्त्रोक्तं गन्धादियोगं कारयेत् ॥ अत्र संक्षेपतः उक्तं भवतीति गन्धयुक्तिनियमः ॥ १४५ ॥

भूभृत्सूर्येन्दुमन्वाक्षिमदनवसवोरुद्रराजानयश्च दिग्भूतारन्ध्रषट्कं तिथिजलनिधयःस्थापनीयाश्चकोष्ठे ॥
संख्याकोष्ठैश्चतुर्भिर्जलनिधिशिखिनोलेखयित्वासमस्तं श्रीचक्रं मानपृष्ठे प्रसवनसमये दर्शयेद्गर्विणीनां ॥ १४६ ॥

इदानीं गर्विणीनां प्रसवनार्थं सर्वतश्चतुस्त्रिंशतिकं यन्त्रमुच्यते ॥ भूभृदित्यादिना ॥ इह यद्गर्विणीनां प्रसवनकाले गर्भस्तम्भनं भवति ॥ वाल्हस्तीदोषेण ॥ तदा इदं यन्त्रं मानपृष्ठे लिखेत् ॥ मानमित्याढकं ॥ तस्य पृष्ठे षोडशकोष्ठकान् कृत्वा प्रथमकोष्ठे भूभृत्सप्त ॥ द्वितीये सूर्यद्वादश ॥ तृतीये इन्दुरित्येकं ॥ चतुर्थे मनुश्चतुर्दश ॥ पञ्चमे ऽक्षि द्वौ । षष्ठे मदनेति त्रयोदश ॥ सप्तमे वसवो ऽष्टौ ॥ अष्टमे रुद्र एकादश ॥ नवमे राजानः षोडश ॥ दशमे ऽनय इति त्रयः ॥ एकादशे दिगिति दश ॥ द्वादशे भूता इति पंच ॥ त्रयोदशे रन्ध्रा इति नव ॥ चतुर्दशे षट्कमिति षट् ॥ पञ्चदशे तिथिरिति पंचदश ॥ षोडशे जलनिधय इति चत्वारः ॥ स्थापनीयाश्च कोष्ठे षोडशे ॥ एषामङ्कानां चतुःकोष्ठे स्थितानां संख्या ॥ एकपिण्डितं जलनिधिशिखिन इति ॥ चतुस्त्रिंशत्सर्वत्र ॥ एतद्यन्त्रं लिखित्वा समस्तं श्रीचक्रं मानपृष्ठे प्रसवनसमये दर्शयेत् गर्विणीनामिति ॥ गर्भमोचननियमः ॥ १४६ ॥

योगिन्यो ऽष्टाष्टकाया: प्रकटमहितले मातरो याः प्रसिद्धा गर्भाख्या वासराख्यास्त्रिशगा नव दशैकादशाद्यास्त्रि पंच ॥
मासाख्या वत्सराख्या सकलभुवितले ताः प्रगृह्णन्ति बालं गर्भे शूलं च पीडां प्रसवनसमये प्येवकुर्वन्ति योनौ ॥ १४७ ॥

इदानीं गर्भादिबालतंत्रमुच्यते ॥ योगिन्य इत्यादि ॥ इह महीतले याः प्रकटाः चतुःषष्टि योगिन्यः ॥ ता अष्टाष्टका मातरः प्रसिद्धाः ॥ तासां मध्ये गर्भाख्या त्रिशगा नव इति सप्तविंशतिः ॥ वासराख्या दश ॥ एकादश मासाख्याः ॥ अन्यास्त्रियपंचेति ॥ पंचदश वत्सराख्या अन्यास्त्रयः षष्टिः ताः बालं गृह्णाति सकलभुवितले गर्भे शूलं च पीडां प्रसवनसमये प्येवकुर्वन्ति योनाविति ॥ इह गर्भाख्यानां मध्ये पंचदश आधानदिनमारभ्य पंचदशदिनानि यावत् ॥ गर्भे शूलं प्रकुर्वन्ति ततो नवमासं यावन्नव ॥ प्रसवनकाले एका । जनक्षीरा हारिणीपो दे इति ॥ गर्भाख्यानां नियमः ॥ १४७ ॥

जातानां बालतन्त्रं भवति दिनवशान्मासवर्षप्रभेदात् पंचक्रूराः कुमाराः प्रकृतिरिपुगावशात्तत्स्थिताः सर्वसाध्याः ॥ बाला
गृह्णन्ति ते वैस्रुतिथिभयगतं नैवसश्चन्ति राजन् तेषां शान्त्यर्थमस्मिन्भवति विविधं मण्डले स्नानहोमं ॥ १४८ ॥

जातानां बालानां बालतन्त्रं भवति । दिनवशान्मासवर्षप्रभेदादिति ॥ इह बालतन्त्रमिति ॥ बालचिकित्सा मातृपीडनानां ॥ तत्र वासराख्यानां बलिं वक्ष्यमाणां दद्यात् ॥ जातानां जन्मदिनमारभ्य दशदिनं यावत् ॥ स्वस्वदिने बालानां पीडां कुर्वतीनां ॥ प्रत्येकमासवशादेकादशानां ॥ एकादशमासान्

यावत् ॥ ततः पंचदशानां पंचदशवर्षान् यावत् ॥ तदुपरि वा तत्कुमारत्वाभावः ॥ षोडशमे वर्षेऽप्यंकच्यवनाभिति नियमः ॥ इदानीं पंचक्रूरा उच्यन्ते ॥ क्रूरेत्यादि ॥ इहानुदितलेन नन्दादितिथिभेदेन पंचतिथीनां सन्धिषु कौमारा आकाशादिग्रहतिथयो वशात् संस्थिताः पर्वसन्धौ ॥ तस्मात् तिथौ भयगतं वाल-रन्तन्ति सर्वसामान्यवलिनां नैव तुष्यन्ति वालां ॥ राजन्नित्या मन्त्रगणं तेषां शान्त्यर्थमस्मिन् प्रभवति विविधं लाउतं होमकार्यं वक्ष्यमाणमिति क्रूरा नियमः ॥

कुष्ठोशीरं कसेरुं नगरकुवलयं केशरं पंकजस्य पिष्ट्वा शीताम्बुनामन्त्रितमभिकुद्विशोर्गर्भशूले प्रभेदं ॥ गर्भस्त-
म्भेऽष्टलोमानलकुलाशाखिनः पीषभिर्वाप्रदेयं उग्धाद्यं पायसान्नं दधिगुडसहितं दीयते वासरीभिः ॥ १४९ ॥

इदानीं गर्भरक्षाभिः स्त्रीजनानां गर्भिणीनां भैषज्यमुच्यते ॥ कुष्ठेत्यादि ॥ इह यदा गर्भिणीनां गर्भशूलं भवति तदा भैषज्यं । कुष्ठं । उशीरं । कसेरु । नगरमुस्तं । उत्पलकन्दं । पद्मकेशरं ॥ एतानि द्रव्याणि शीताम्बुना पर्युषितेन पिष्ट्वा अभिमंत्रितमपि कुर्यादिशोरिति ॥ ॐ आः हूं अमुककाया गर्भशूलं हर हर स्वाहेति मन्त्रः ॥ अनेनाभिमन्त्र्य गर्भशूलेषु देयमिति नियमः ॥ एवं गर्भस्तम्भे अष्टरोमाणि नकुलस्याशाखिनो मयूरस्य पिच्छं गृहीत्वा शीताम्बुना पिष्ट्वा सर्वम्देयानभिमन्त्र्य क्षीरायहारिण्याः क्षीरवृक्षजलेन स्नापयेत् ॥ सप्तमञ्जलिकैर्गोक्षीरपूर्णैः क्षीरभक्तेन वलिं दद्यादिति ॥ गर्भरक्षाणां नियमः ॥ इदानीं वासरीणां विधिरुच्यते ॥ उग्धेत्यादिना ॥ इह द्वादिनाभ्यन्तरे गृहीतस्य वालकस्य शान्त्यर्थमुग्ध ॥ आम्लपायसान्नं दधिगुडसहितं पोलिकामोदकाश्च गन्धपुष्पं प्रदीपं वलौ दीयते वासरीणां ॥ स्नानं धूपं वक्ष्यमाणमिति ॥ वासरीणां त्रिरात्रवलि नियमः ॥ १४९ ॥

१४९

पक्वान्नंपञ्चभिन्नं दधिगुडसहितं पोलिकामोदकांश्च गन्धंधूपंप्रदीपंस्नपनमपिदलैः पंचरात्रंप्रकुर्यात्॥गोद
न्तंमेषशृङ्गं मृगनखचिकुरं सर्पनिर्मोकधूपं बालानांमासजानांकथितमपिबलिंप्राप्तिहेतोःसमस्तं॥ १५० ॥

इदानीं मासाख्यानां विधिरुच्यते॥ पक्वेत्यादिना॥ इह दशादिनादूर्ध्वं मासः॥ तत एकादशमासान्यावत्॥ मासजातकानां शान्त्यर्थं बलिमानृणा दद्यात्॥ पक्वान्नं पञ्चभिन्नमिति॥ घृतेन पक्वं पूरिका घृतपूरं॥ सौमाली। सेवालिंबटकानिति पंचभिन्नं॥ अपरमोदनं दधिगुडसहितं पोलिकामोदकांश्च॥ गन्धमिति चन्दनं। ड गन्धधूप्यं तिलतैलेन प्रदीपं घृतेनवा॥ स्नपनमपिदलैरिति॥ पंचक्षीरवृक्षाणामश्वत्थादीनां पत्रैः किञ्चित्क्वथितोदकेन सोष्णेनवा बालंस्नापयेत्॥ पंचरात्रं यावत्॥ समस्तंकुर्यात्॥ स्नानावसाने बालस्य धूपं दद्यात्॥ गोदन्तं। मेषशृङ्गं। माखष्यनखं॥ मृगरोम। चिकुरं सर्पनिर्मोचं॥ एतदेकीकृत्वाग्नौ ब्राह्मणेन धूपं॥ देवतावत्तौ पूर्वोक्तगन्धधूपादिकं देयं चतुर्दिक्षु ग्राममध्ये वेति नियमो बालानां मासजातानां कथितमपि पुष्टिहेतोः समस्तं॥

पक्वान्नंपंचखाद्यं जलचरपिशितं गन्धपुष्पंप्रदीपं मद्यं पूर्वोक्तधूपंस्नपनमपितथा दिग्बलिर्दिग्विभागे॥ बाला
नांवर्षजानां प्रकथितमवनौ पुष्टिहेतोर्नरेन्द्र गर्भाद्वर्षत्रिपञ्च प्रतिभयनियतं योगिनीनां प्रपूजा॥ १५१ ॥

इदानीं संवत्सरीणां बलिरुच्यते॥ पक्वान्नमित्यादिना॥ इह दशमासादूर्ध्वं मासद्वयं वर्षमिह गृह्यते॥ तस्मात्पंचदशवर्षाणि यावत्॥ वर्षजातकानांमा

त्पीडितानां शान्त्यर्थं सम्वत्सरीणां वलिं दद्यात्॥ पञ्चान्नमिति भक्तं सितं पीतं रक्तं कृष्णं हरितं कृत्वा हरिद्रादिभिः॥ एतत् पञ्चान्नं पञ्चखाद्यमिति॥ पञ्चान्नं पूर्वोक्तं। जववरं। मत्स्यमांसं गन्धाद्यं पूर्वोक्तं। मद्यं। पूर्वोक्तधूपादिकं। सर्वं वंशचङ्गेडिकायां कृत्वा त्रिवारान्। निर्मञ्छयेत् सदीपवलिना। दिशीति दशादिनं॥ दशदिग्विभागे इन्द्रादि ईशानपर्यन्तं अधऊर्द्धं वलिः॥ ग्राममध्ये चतुःपथे दातव्येति॥ बालानां वर्षजातानां प्रकटितभवनो दृष्टिहेतोर्नरेन्द्र इत्यामन्त्रणमिति॥ सम्वत्सरीणां पूजानियमः॥ एवं गर्भाद्वर्षत्रिपञ्चेति॥ पञ्चदशावर्षपर्यन्तं त्रयःषष्टियोगिनीनां नियतं पूजा कर्तव्या॥ जन्मभावानानां शान्त्यादिकं न भवतीति योगिनीनां पूजानियमः॥

अङ्गाक्षेपाग्निभूतो मुखकरचरणं पीततां याति सम्यक् प्रस्रावः पीतवर्णो ज्वर इति च भवेच्छर्दिदोषश्च मूर्च्छा॥ ज्ञात्वा चिह्नानि तेषामपि नृपकरणं मण्डलं याति सम्यक्चोदन्ते ये श्रयन्ति प्रकृतिगुणवशान्मातरो भूतजाश्च॥ १५२ ॥

इदानीं मातृगृहीतानां दोषलक्षणमुच्यते॥ अङ्गेत्यादि॥ इह यदा मातृभिर्गृहीतो बालको भवति॥ तदा तस्याङ्गाक्षेपो भवति॥ अग्निभूतं भवति। मुखकरौ चरणौ च मुखकरचरणं पीततां याति सम्यक्। प्रस्रावः पीतवर्णो भवति ज्वरो भवति। छर्दिर्भवति। शोषश्च। मूर्च्छा भवतीति। एतानि मातृदोषचिह्नानि ज्ञात्वा तेषां बालकानां॥ अपि शब्दात् क्रूरग्रहगृहीतानां मण्डले होमादिकं कार्य्यं॥ अन्यथा नोदन्ते वदोऽश्रयन्ति॥ प्रकृतिगुणवशात् भूतजा मातरः पूर्वोक्ता इति चिकित्सालक्षणं॥

श्वेताङ्गं यस्य सर्वं भवति नरपते स्फोटकाश्चातिसूक्ष्मा शुक्रग्रीवाः सगात्रा स्रवति सरुधिरं वक्त्रगुह्ये गुदे च॥ त

स्मिन्पूजां न कुर्य्याज्जवतिहि लघुना मंत्रिणां मोहितानां मृत्युस्तस्यास्ति नूनं सुरनरभुजगै रक्षितुं शक्यते न॥ १५२ ॥

इदानीं चतुःषष्टिमध्यात्कालिकया गृहीतस्य मृत्युलक्षणमुच्यते ॥ श्वेतेत्यादिना ॥ इह चतुःषष्टिमध्ये कालिका । सर्वासां योगिनीनां प्रत्येकसन्धौ व्यापकरूपेणावस्थिता । गर्भदिनमासवर्षाणां सन्धौ ॥ तया गृहीतस्य बालकस्य श्वेताङ्गं सर्वं भवति ॥ स्फोटकाश्चाति सूक्ष्माः सर्षपराजिकामात्रा भवन्ति । वक्रग्रीवा भवति ॥ सगात्रा श्रवति रुधिरं । वक्त्रे वा । गुह्ये वा । पादे वा ईदृशं नभतां दृष्ट्वा ॥ तस्मिन्विषये पूजां न कुर्यात् । यदि करोति तदा मोहितानां मान्त्रिणां लोभात् लघुता भवति जनः । यतो नूनं तस्यास्ति मृत्युः सुरनरभुजगै रक्षितुं शक्यते न ॥ इति मृत्युचिन्हनियमः ॥

नागा यक्षा ग्रहा ये ऽपि च दनुजकुलजा राक्षसा वै पिशाचाः शाकिन्यो दुष्टनागा नररुधिररता डाकिनी रूपिकाश्च कुष्मा-
ण्डाः क्षेत्रपाला रूपिगणपतयः क्षेत्रपातालजाश्च सापस्माराः खगेन्द्राः परमसुखकराः पूजिता मरणे ते स्युः॥ १५४ ॥

इदानीं मरणे ते पूजिताः सुखकरा उच्यन्ते ॥ नागेत्यादि ॥ इह नागादिभिः पीडितानां नागादयः ॥ पूजिता वक्ष्यमाणा मरणे ते सुखकरा भवन्ति ॥ एषां लक्षणान्यनेकानि भूततन्त्रोक्तानि सुग्रावभेदेन ज्ञातव्यानि ॥ तत्रैव वक्ष्यमाणोक्तियन्त्रीति ॥

क्रूराणां पूजनार्थं भवति नरपते मण्डलं ग्रामबाह्ये वृक्षस्थाने श्मशाने सुरवरभवने संगमे वा नदीनां ॥ हस्तं वा द्वौ
चतुष्कं त्रिदशनवतिपे दैवतानां प्रमाणैर्मध्ये त्वष्टारचक्रं भवति गुणावज्ञान्मरणे वा दशभागं॥ १५५ ॥

इदानीं क्रूरपूजार्थं मण्डलं मण्डलस्थानं सूच्यते॥ क्रूराणामित्यादि॥ इह क्रूराणां पूजनार्थं मण्डलं ग्रामवासे भवति॥ तत्रैवैकवृक्षस्थाने। श्मशाने। खुरव
रभुवनइति। शून्यदेवालये। संगमे वा नदीनां॥ हस्तं वा षोचतुष्कमिति॥ इह विभवाल्पतः॥ एकहस्तं मण्डलं द्विहस्तं॥ चतुर्हस्तं वेत्यारभ्य यावद्धस्तसह
स्रं वा नावर्द्धनीयेदाचार्य्यैः॥ त्रिदशनवनयेरिति॥ इह नवदेवतानां प्रमाणं॥ एकहस्तं मण्डलं॥ त्रयोदशानां द्विहस्तं। नवपञ्चविंशतिषोडशानां चतुर्हस्तं॥ इत्यारभ्य याव
द्विंशत्यधिकषोडशशतानां हस्तसहस्रपर्यन्तं वर्तयेत विभवतः। इह सर्वमण्डलानां मध्ये अष्टारं चक्रं वा पद्मं वा भवति मण्डलादर्द्धभागिकं॥ १५५॥

द्वारं चक्राष्टभागं भवति खलु तदर्द्धेन वेदी च शुभ्रा प्राकारा वेदिकार्द्धात् त्रिगुणमपि भवेत्तोरणं द्वारमानात्॥ वृत्तं कु
ण्डं त्रिभागं सितकमलमयं पूरितं श्वेतरङ्गैः ऊर्ध्वात् श्रीपञ्चरङ्गैः स्वकुलादिदिग्गतं देवतानां स्वचिह्नं॥ १५६॥

द्वारं मण्डलचक्राष्टभागं द्वारार्द्धं वेदिकाहारभूमिश्च। पञ्चप्राकाररेखा वेदिकार्द्धेन रत्नपङ्क्तिकापि॥ द्वारमानेन निर्यूहं पक्षकं कपोलं चेति॥ तोरणं त्रि
गुणं द्वारात्॥ इति मण्डललक्षणनियमः॥ इदानीं शान्तिकुण्डमुच्यते॥ वृत्तमित्यादि। इह वक्ष्यमाणकुण्डानां मध्ये वृत्तकुण्डं ग्रास् शान्तये। तदेव त्रिभाग
मिति॥ वितस्तिद्वयं विष्कम्भं॥ वितस्त्येकं गम्भीरं। सितकमलमयमिति॥ गर्भमध्ये श्वेतरजसा पद्मं॥ वेदिकोपरि पद्मावली वासेषः पद्मपत्राणि॥ एवं पूरितं श्वे
तरङ्गैः। ततः श्वेतपद्मे कर्णिकादलेषु पञ्चरङ्गैर्देवतानां चिह्नं कारयेत् स्वदिग्गतं॥ कुलवशात्स्वचतभागतवशादिति॥

वज्रं मध्येऽसि पूर्वे भवति कुलवशाद्दक्षिणे रक्तवर्णं वामे श्वेतं च पद्मं शतदलसहितं पश्चिमे चक्रचिह्नं॥ आग्ने

यां कर्णिकायै कमलदलगता दैत्यकोणेऽङ्कुशः स्यात् वायव्ये वज्रपाशो भवति नरपते रुद्रपत्रे त्रिशूलं। १५७॥

वज्रमध्वग्नि॥ इह च ष्पमारो वज्रं वा सर्वकर्मणीति वचनात्॥ पद्मकर्णिकायां वज्रं नीलं। विज्ञानस्कन्धः॥ असिः पूर्वपत्रे कृष्णः संस्कारः॥ भवतिकुलवशाद्दक्षिणे रत्नं वेदना॥ वामे उत्तरपत्रे श्वेतपद्मं शतदलं संज्ञा॥ पश्चिमे च कविन्दं पीतं रूपस्कन्ध इति आग्नेयपत्रे कर्त्तिका कृष्णा। वायुरिति कमलदलगता॥ दैत्यकोणे नैरृत्ये ऽङ्कुशो रक्तस्तेजइति॥ वायव्ये वज्रपाशः पीतः पृथ्वीति॥ रुद्रपत्रेईशाने त्रिशूलं शुक्लं तोयधातुरिति॥ मध्यवज्रमाकाशधातुर्विज्ञानमार्द्धभिति॥

पूर्वद्वारे च खड्गं कषणाघननिभं दक्षिणे वज्रदण्ड वारुण्ये श्रीगदा च प्रभवति नियतं चोत्तरेऽङ्कुशश्च॥ ज्ञात्वा चि
ह्नानुसारं कुरुस्व कुविधं कालचक्रं हियावत् वंसानां छत्रहेतोर्यहि निहतनृणां शान्तिपुष्ट्यर्थहेतोः॥ १५८॥

पूर्वद्वारे च खड्ग। कृष्ण ईर्ष्या वज्रक्रोधः॥ मध्ये वज्रं द्वेषवज्रो नीलक्रोधराज इति ज्ञात्वा। दक्षिणद्वारे वज्रदण्डो रक्तो रागवज्रः क्रोधः॥ वारुण्ये पश्चिमद्वारे गदा पीता मोहवज्रः क्रोधः॥ उत्तरद्वारे ऽङ्कुशः शुक्लो मानवज्रः क्रोधः॥ मध्ये वज्रं द्वेषवज्रो नीलक्रोधराज इति ज्ञात्वा इत्यादि पुष्ट्यर्थमेतदिति पर्यन्तं सुबोधं॥ १५८

कुम्भाद्याभिः सरत्नैर्दलकमलमुखैः संप्रमुखैरपद्मैः तोयैः पंचामृताद्यैः स्नपनमपि च निर्मञ्छनं सर्षपाद्यैः॥ गन्धैर्धू
पैः प्रदीपैर्विविधफलरसैः श्वेतपुष्पैश्च तोयैः कृत्वा पूजां विचित्रां पुनरपि च ततो होमयेच्छान्तिहव्यं॥ १५९॥

इदानीं ग्रहपीडितानां स्नानविधिरुच्यते ॥ कुम्भ इत्यादिना ॥ इह मण्डले दिक्षु अष्टकलशा वक्ष्यमाणलक्षणोपेताः सरत्नाः पंचरत्नसहिताः ॥ वक्ष्यमाणे षष्ठाद्युक्ताः ॥ दल इति क्षीरवृक्षपल्लवाः ॥ कमलमुखवासैरिति ॥ तथा सप्तमल्लैरिति ॥ सप्तसरावैरपक्कैः ॥ तोयैः पञ्चामृताद्यैः तैः सहितैः ॥ तोयदुग्धदधिस्तनमण्डरस्थरसगन्धोदकरभिः पूर्णैः सप्तमल्लैर्यथाक्रमेण स्नपनं कुर्यात् ॥ ततोऽष्टभिः कुम्भैर्जय विजय घयभ्यामपि शब्दादिति ॥ निर्मञ्छनं सर्षपाद्यैरिति ॥ प्रथमं पञ्चगोमयपिण्डिकाभिः ॥ ततो ज्वलत्तृणचूलिकाभिः ॥ सर्षपाद्यैर्भस्मपिण्डिकाभिरिति क्रियादिभिर्निर्मञ्छनं ॥ ततो गन्धाद्यैः पूजां कृत्वा मण्डलप्रतिष्ठां कृत्वा प्रवेशयेत् मण्डले ॥ तत्राभिषेकं दत्त्वा मण्डलकलशोदकेनाभिषेकं तोयादिकं कृत्वा ॥ ततो होमयेत् ॥ शान्तिहव्यमिति ॥

दुग्धं ध्यानं तिलाज्यं शवशानसमिधः पञ्चदुग्धाङ्घ्रिपानां अर्घ्यञ्चावाहनञ्चारमरमपि तथैवार्चनं पूजनञ्च ॥ कुर्य्याच्चा
न्यर्थमेतत्प्रवरसुविमले मातृभिःपीडितानां षट्त्रिंशद्योगिनीनां भवनिनरपते सर्वकाले हि पूजा ॥ १८० ॥

दुःखमित्यादि सुबोधं ॥ अपरं यदुक्तं तत्सर्वमभिषेकपटलोक्तविधिना कार्यमाचार्येणेति सर्वत्र नियमः ॥ १८० ॥

इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां विमलप्रभायां द्वादशसाहस्रिकायां रसायनादिवालतन्त्रमहोद्देशः षष्ठः ॥ ॥

नैरात्माकर्मपाकस्त्रिभवजनुगतिर्या दशाङ्कं प्रतीतेः संभूतिर्वेदसत्यं द्विगुणितनवका वेणिकाजदधर्माः ॥ पञ्च

स्कन्धास्त्रिकायाः सहजइतितथैवाजडा शून्यता च यस्मिन्नेतद् वदन्ति प्रवरखवितले देशनावज्रिणः सा॥ १८१॥

प्रणिपत्य जगन्नाथं कालचक्रं महासुखं॥ स्वपरे दर्शने किंचिन्मतमुत्कं वितन्यते॥ इदानीं परमादिबुद्धा मञ्जुश्रियोदितं स्वपरदर्शनानुमतं टीकया वितन्यते॥ नैरात्म्येत्यादि॥ इह लोकसंवृत्या विचार्यमाणाः सर्वदर्शनसिद्धान्ताः समाना लौकिकसिद्धये॥ तद्यथा॥ येन येन हि भावेन मनः संयुज्यते नृणां॥ तेन तन्मयतां याति विश्वरूपो मणिर्यथा॥ इति भावसंकल्पः समानः॥ तथा धात्विन्द्रियादि विचारोपि तुल्यः॥ व्यावहारिकं कर्तृकरणादिकं च तुल्यं॥ बौद्धनैर्ग्रिकयोर्विशेषो नास्ति॥ शून्यतानात्वप्रति विशेषः॥ स च नैरात्म्येति। इह नैरात्म्यं द्विविधं॥ पुद्गलनैरात्म्यं धर्मनैरात्म्यमिति॥ कर्मविपाकस्त्रिविधः॥ कायिकं वाचिकं मानसिकं चेति॥ त्रिभवः कामरूपोऽरूपः॥ षड्गतिरिति॥ नरकप्रेततिर्यङ्मनुष्यासुरदेवानां गतिः षड्गतिः॥ द्वादशाङ्गप्रतीतेः सकाशात्॥ संभूतिः षड्गतिकानामिति॥ वेदसत्यमिति चतुरार्य्यसत्यं॥ दुःखसमुदयमार्गनिरोधलक्षणं चेति॥ द्विगुणितनवका ह्यष्टादशावेणिकाबुद्धधर्मा वक्ष्यमाणा वक्तव्याः॥ पञ्चस्कन्धा इति रूपादयः॥ त्रिकाया इति॥ धर्मकायादयः॥ सहजश्चतुर्थ इति॥ तथैवाजडा शून्यता सर्वाकारवरोपेता प्रतिसेनोपमेति॥ यस्मिन्निति यानत्रये एतन्नैरात्म्यादिकं देशका वदन्ति प्रकटितनियता देशना वज्रिणः सा बोद्ध षष्टिवसात् सत्वाशयेनेति॥ तथागतमतनियमः॥ १८१॥

यस्मिन्वेदः स्वयंभूर्मुखकरचरणो मोक्षयोनिर्जिनस्य नान्यो धर्मोऽश्वमेधात्परतर इति भवे देशना ब्रह्मणः सा॥ कर्तात्मा
कर्मकालः प्रकृतिरपि गुणाः शून्यतानन्तधर्मा कर्ता हेतुः फलस्य प्रकटितनियता देशना सात्र विष्णोः॥ १८२॥

इदानीं ब्रह्मविशेषो मतमुच्यते॥ यस्मिन्नित्यादि॥ इह यस्मिन्मते वेदः स्वयंभूरकृतक आकाशवन्मुखकरचरणादौ च योनिर्जनस्येति॥ इह ब्रह्ममुखं ब्राह्मणयोनिः॥ भुजौ क्षत्रिययोनिः॥ आदिशब्दादूरुद्वयं वैश्ययोनिः॥ पादौ शूद्रयोनिरिति॥ नान्यो धर्मोऽश्वमेधादिति॥ इह स्वर्गसाधनेऽश्वमेधयज्ञात् परो नान्यो दानादिधर्मोऽस्तीति भवे देहिनां ब्रह्मणः सा इत्यादि ब्रह्ममतनियमः॥ ॥इह तन्त्रभूते गीताधर्मे विष्णुमते॥ तद्यथा॥ कर्त्तास्ति। आत्मास्ति। शुभाशुभकर्मास्ति। कालोऽस्ति। पृथिव्यादि प्रकृतिरस्ति। सत्वादयो गुणाः सन्ति। भूस्ततानष्टधर्मे नास्ति। तद्य इपतीत्याज्जरेकीभूत इत्यादिनः॥ कर्त्ता हेतुः फलस्य शुभाशुभकृतस्य नामकोसीति। प्रकटितनियता देशना सात्र कालचक्रे विष्णोरिति वैष्णवमतनियमः॥ १८२॥

षण्मार्गाः पञ्चतत्त्वं परपदमखिलं चापरं मन्त्रदेहं विद्यात्मा सच्छिवत्वं त्रिविधपथगतेर्जोजनंभ्यागतावः॥ वि
न्दोर्भेदः शिवत्वं सकलतनुगतं द्वादशग्रन्थिभेदाः एतत्सर्वं हि यत्र प्रभवति नियता देशना सा शिवस्य॥ १८३॥

इदानीमीश्वरमतमुच्यते॥ षण्मार्गा इत्यादि॥ इह पूर्वोक्तेन विष्णुमतेन सार्द्धं षण्मार्गादिकं ज्ञातः॥ एकमूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वरा इति वचनात् कर्त्ता आत्मा कर्म कालः प्रकृतिर्गुणाः भूस्ततानष्टधर्मो निर्वाणकायावस्थानः॥ एभिः सार्द्धं षण्मार्गादिकं वेदितव्यमिति नियमः॥ इह शरीरे षण्मार्गाः षड्विषयेषु प्रवर्तका इति॥ पञ्चतत्त्वमिति आकाशादिधातुसमूहं॥ परपदमिति॥ षष्ठो ज्ञानधातुः॥ अखिलमिति सर्वधात्वेकलोलीभूतं॥ चकारादपरं मन्त्रदेहमित्यादि कालात्मकं मन्त्रतत्त्वमिति॥ विद्येति। आनन्दादिकामतत्त्वं॥ आत्मेति आत्मतत्त्वं सच्छिवत्वमिति॥ शिवत्वं सर्वव्यापि तत्स्वरूपपरिवर्जितं तस्य त्रिविधा

पदगतिः॥ पिण्डस्था पदस्था रूपस्था॥ कायवाक्चित्तविकल्पधर्मिणी॥ तस्यास्त्रिविधपदगते योजनमिति॥ एषाम रमार्गादीनां उत्पादकाले योजनमेतावक इति॥
मध्यकाले त्यागभावः॥ तेषां विद्यदनमित्यर्थः॥ बिन्दोर्भेदं शिवत्वमिति॥ इह शुक्रबिन्दोर्भेदं च्यवनं सुखावस्थालक्षणं॥ न स्वैव शिवत्वं सकलजगद्गतमिति चराचरव्या
पि॥ द्वादशग्रन्थिभेदादिति॥ इह शशिनां नक्षत्रगतानां द्वादशराशयो ग्रन्थिशब्देनोच्यन्ते॥ तेषां द्वादशराशीनां भेदा वर्षायनकालयुगऋतुमासपक्षदिनघटिकापाणी
पलश्वासा इति॥ एतत्सर्वं हि यत्र सिद्धान्ते प्रभवति नियतां देशना सा शिवस्य शैवमतनियमः॥ १८२॥

नास्तीशः कर्मपाकोऽपि च गुणा विषया भूतवृन्दं हि भुङ्क्ते तस्याभावे फलं न स्फुटममरगुरोर्देशना वेदितव्याः॥ कर्तास
र्वं समस्तं सचरमचरजं तायिनां भक्तिहेतोः स्वर्गस्तस्य प्रतीपाद्भवति खलु नृणां देशना रक्षणाः सा॥ १८४॥

इदानीं लोकायतमतमुच्यते॥ नास्तीत्यादि॥ इह देहिनां नास्तीशः कर्ता नास्तीति कर्मपाकोऽपि न नास्ति॥ गुणा विषयानिति गुणाः सत्त्वादयो विषया गन्धादयो भूतवृन्द
मिति पृथिव्यादिकं तान् भुङ्क्ते॥ तस्य भूतवृन्दस्याभावे मरणान्ते कर्मफलेन॥ हरितकीगुडादिसंयोगान्मदिराशक्तिवत् भूतानां संयोगशक्तिः॥ तस्याभावेन क
श्चि नरलोककाम्योऽस्तीति स्फुटममरगुरोर्बृहस्पतेर्देशना वेदितव्येति॥ लोकायतमतनियमः॥ ॥ इदानीं म्लेच्छतायिनां मतमुच्यते॥ कर्तेत्यादि॥ इह कर्ता
ब्रह्मणा सर्वं समस्तं सचरं जंगमं अचरं स्थावरं वस्तु॥ तायिनामिति म्लेच्छानां भवनवासिनां भक्तिहेतोः स्वर्गस्तस्य रक्षणाः प्रतीपात्॥ अप्रतीपान्नरको भवति
खलु नृणां देशना रक्षणाः सा पूर्वोक्तक्रियेति तायिमतनियमः॥ १८४॥

त्रैकाल्यंद्रव्यषट्कंनवपदविहितंजीवषट्कायलेश्याः पञ्चान्येसन्तिकाया व्रतसमितिगति ज्ञानचारित्रभेदाः॥ जीवःकाय
प्रमाणो ह्यपरिमितभवैर्व्रह्मचर्य्येणमोक्षो यस्मिन्मोक्षप्रमाणा ह्युपरि निगदिता देशनासाजिनानां॥ १६५ ॥

इदानीं क्षपणकमत उच्यते ॥ त्रैकाल्यमित्यादिना ॥ इह क्षपणकसिद्धान्ते स्याद्वादे द्रव्यपर्यायाभ्यां नित्यानित्यव्यवहारः॥ तत्र त्रैकाल्यमिति॥ अतीतमनागतं
वर्तमानं चेति ॥ द्रव्यषट्कमिति ॥ जीवः पुद्गलः कालः आकाशं पुण्यं पापं चेति॥ एषां मध्ये जीवः कालः आकाशं च नित्यम्॥ नवपदविहितमिति॥ जीवाजीवास्र
वसम्वरवर्जनं॥ बन्धमोक्षगत्यागतिश्चेति॥ जीवषट्कायलेश्या इति॥ पृथ्वीकायलेश्याः॥ अप्कायलेश्याः॥ तेजःकायलेश्याः॥ वायुकायलेश्याः॥ वनस्पतिकायलेश्याः
त्रसकायलेश्याः॥ इति जीवानां षट्कायलेश्याः॥ पञ्चान्येसन्तिकाया इति॥ आहारिकः कायः॥ ज्योतिःकायः॥ निसर्गिककायः॥ उपपादुककायः॥ चरमकायश्चेति १५८
जीवानां॥ व्रतसमितिगतिज्ञानचारित्रभेदा इति॥ क्षपणकानां व्रतानि पञ्च॥ अहिंसा प्रथमं॥ द्वितीयं सत्यं॥ तृतीयं दत्तादानं॥ चतुर्थं ब्रह्मचर्य्यं॥ पञ्चमं सर्व
परिग्रहपरित्याग इति ॥ समितयः पञ्च ॥ ईर्यासमितिः। भाषासमितिः। एषणासमितिः। आदाननिक्षेपणसमितिः। निकम्पप्रतिष्ठापनासमितिरिति॥ गति
भेदाः पञ्च। नरक। तिर्यक्। मनुष्य। देव। मोक्षगतिश्चेति॥ ज्ञानभेदाः पञ्च मतिः। श्रुतिः। अवधिः। मनःपर्य्ययं। केवलज्ञानं चेति ॥ चारित्रभेदास्त्रयोदश॥ व्र
तभेदाः पञ्च। समितिभेदाः पञ्च। कायगुप्तिः। वाग्गुप्तिः। चित्तगुप्तिश्चेति। इत्येतन्मोक्षमार्गमर्हद्भिः प्रोक्तं॥ जीवःकायप्रमाणः॥ अपरिमितभवैर्निर्जीवितमोक्षः॥
यस्मिन्सिद्धान्ते मोक्षप्रमाणा ह्युपरि त्रैलोक्यस्य निगदितं पंचचत्वारिंशद्योजनलक्षं छत्राकारं सा देशना जिनानामिति॥ क्षपणकमतनियमः॥ १६५ ॥

वेदोस्तिनस्वयम्भूस्त्रिभुवननिलये वेदनादोऽर्थवाची ब्रह्मावक्त्रैश्चतुर्भिःप्रकटयतिपुरावेदशब्देनचार्थं ॥ शब्दस्या
र्थोप्यभिन्नस्तथदहतिमुखंकिंनशब्दोर्थवाची तस्माद्वेदेशिकोस्त्यप्याविदितविषयेनागतार्थेप्यतीते ॥ १६८ ॥

इदानीं तीर्थिकानांमतस्यभ्रान्तिविचारं स्रग्धरयोच्यते ॥ वेद इत्यादि ॥ इह स्तुतमादिर्व्विचार्यमाणो वेदः स्वयम्भूर्नभवति ॥ कुत आह ॥ वेदशब्दस्यार्थवाचकत्वा त् ॥ इह यः शब्दोऽर्थवाची स करादितात्वादिश्रमत्वेनजनितो यस्मात्तस्मात्त्वस्वयम्भूरितिसिद्धं ॥ अपरनायं वेदशब्दः । अन्यो वेदः कर्त्ता दिवसान्तरे सर्वशब्दा र्थैकतोत्वीभूतोनित्यः तस्मायमभिव्यञ्जक इतिसिद्धं ॥ अत आह ॥ इह यदि सर्वशब्दार्थैकतोत्वीभूतत्वेनावस्थितोनित्यो वेदस्तदा पट इत्युक्ते सति कर्णावि वरान्तरे कोलाहलेन भवितव्यं न चैवं ॥ तस्मादियं प्रतिज्ञा वृथा नित्यः शब्दोऽपरोऽस्ति व्यापकोऽर्थस्याभिन्नः । यदि शब्दार्थयोरेकत्वं । तदा अग्निशब्द उ क्तः ॥ स्वमुखं किं न दहति ॥ तस्मात्त्वं वेदस्यानित्यत्वं ॥ नार्थेन सहैकत्वमिति सिद्धं । किंचान्यदिह । किं न श्रूयते ॥ यदा वेदाभावो भवति । तेषां वेदधर्मोच्छि त्ते सति ॥ तदा ब्रह्मा वक्त्रैश्चतुर्भिः प्रकटयति पुरा वेदशब्देन चार्थं इत्यः पद्मरासीदित्यादिपाठेनेति ॥ अतोऽर्थोऽस्ति वेदोऽन्य इति सिद्धं ॥ तस्माद्देशको ब्रह्मा स्ति ॥ अविदितविषयेऽनागतार्थेऽतीत इति देशकः सिद्धः ॥ आसीत् पाठात् क्षणकः सिद्धः ॥ १६८ ॥

वेदोनाकाशजन्यः कृतकरहसुखैरुच्चारितः स्थानभेदात् युक्त्या प्रादेशिकश्च द्विजमुखपठितः सर्वगोऽन्येपठन्ति ॥ यस्मा
त् शूद्रादिजातिः पठति लिखतिनो नासर्वगोवेद एष तस्माद्वेदस्य प्रमाणं नहि भवति नरां ज्ञानिनां पण्डितानां ॥ १६९ ॥

अतो वेगनाकाश्चात्तन्यः कृतकाइहस्तखोच्चारितः स्थानभेदादितिनियमः ॥ उक्त्या प्रादेशिकश्च द्विजमुखपठितः सर्वगोऽन्ये पठन्ति ॥ यस्माच्छूद्राद्विजातिः पठति लिखति ना सर्वगो वेद एव ॥ तस्माद्वेदः प्रमाणं न हि भवति नृणां ज्ञानिनां पापिष्ठानामिति ॥ वेदः कृतकः सिद्धः संक्षेपतः ॥ विस्तरेण प्रमाणशास्त्रे दर्शितस्तत्राभिधेयो नियमः ॥ इदानीं पूर्वोक्तं ब्राह्मणादीनां योनिदूषणमुच्यते ॥ इह किल ब्रह्ममुखं ब्राह्मणानां योनिः ॥ तदुत्पन्नत्वादिति ॥ एवं भुजौ क्षत्रियाणां योनिः ॥ आदिशब्दात् ऊरुद्वयं वैश्यानां योनिः ॥ पादद्वयं शूद्राणां योनिः ॥ एवं चत्वारो वर्णाः ॥ एषां च वर्णानां नियमो वर्णाः पञ्चमः ॥ चण्डालानां तेषां कार्योनिर्न ज्ञायते ब्राह्मणैरवक्षिति ॥ किं चान्यत् ॥ इहैव ब्रह्ममुखात् ब्राह्मणा जाताः ॥ किं वसत्यं ॥ अतः पृच्छामि ॥ किं ब्राह्मणोऽपि तन्तोजाता यदि स्युः सर्वे भगिन्यो भवन्ति ॥ एकयोनिसमुत्पन्नत्वादिति ॥ एवं क्षत्रियादीनामपि विवाहं भगिन्या सार्द्धं भवति कथं ॥ अथ भवति तदा म्लेच्छधर्मप्रवृत्तिर्भवति ॥ म्लेच्छधर्मप्रवृत्तो जातिक्षयः ॥ जातिक्षयान्नरकमिति न्यायः ॥ अपरमपि विचार्यते ॥ इह यथैकः श्रेष्ठः प्रजानां नरकं पंचत्वर्वर्णा भवन्तीति ॥ यथा एकस्यापि पितुश्चत्वारः पुत्रास्तेषां न पृथक् पृथक् जातिः ॥ एवं वर्णानामपि ॥ अथ ब्राह्मणो मनुवादिभेदेन भेदः ॥ तदा सर एकस्तान घटते ॥ कथं यथा ॥ उदुम्बरफलानां मूलमध्याग्रजातानां भेदो नास्ति तथा प्रजानामपि ॥ अपरोऽपि श्वेतरक्तपीतकृष्णवर्णभेदेन भेदो न दृश्यते ॥ तथा क्षान्तिविन्द्रियसुखदुःखविद्यागमादिभिर्भेदो न दृश्यते ॥ यस्मात्तस्माज्जातिरनित्येति सिद्धं ॥ एवमश्वमेधादियागफलं शुकेन दूषितं ॥ तद्यथा ॥ यूपं छित्त्वा पशुं हत्वा कृत्वा रुधिरकर्दमं ॥ यद्येवं गम्यते स्वर्गो नरकः केन गम्यत इति ॥ शुकवाक्यं प्रसिद्धं ॥ तस्मान्न वेदः स्वयंभूः ॥ नच खादियोनिर्जनस्य नाश्वमेधात्परतो धर्मो अन्य इति ॥ सर्वं प्रजापतिरर्थं किं विचार्यमाणमिति ब्रह्ममतं वैष्णवमतमीश्वरेण सार्द्धं दूषणीयमिति ॥

अस्तीशः सर्वकालं यदि सकलजगतः कर्मभोक्ता न चान्यत् नापीशः कर्मकर्ता यदि स च न भवेत्सर्वकर्तासमन्तात् ॥

कर्तास्य प्रेरितोसौ परमपरवशाधानता कर्तुरेषा तस्मात्कर्ता न चेशोऽशुभशुभफलदः प्राणिनां कर्मसुक्ता ॥ १६८ ॥

इदानीमीश्वरमतस्य दूषणमुच्यते ॥ कर्तेत्यादि ॥ इहासावीश्वरः सर्वकर्ता यदि भवति ॥ तदा कर्मभोक्ता न चान्य इति । कथं । अन्यो वरकमश्नाति ॥ अन्यः पिपासया म्रियते ॥ न चैवं । यः करोति स कर्ता । यत् क्रियते तत्कर्म ॥ तस्य कृतस्य कर्मणः फलभोक्ता ॥ कर्म कर्ता न च कर्मणा विना कर्ता सिध्यति ॥ यथा कुम्भं करोतीति कुम्भकारः ॥ एवं यः कर्म करोति स कर्तेति न्यायः ॥ आह नापीश्वरः कर्मकर्ता ॥ स्वतंत्रः प्रयोजक इति ॥ इह यदि कर्मकर्ता न भवति । तदा सर्वकर्ता समन्तादिति निरर्थकं ॥ इह कर्ता यदि प्रेरितः सन् कर्म करोति । तदा कर्तुः पराधीनता ॥ यस्य पराधीनता तस्य प्रयोजकः कथं विरुद्धकर्मणि कृते सति निग्रहं न करोति ॥ स्वतन्त्रतया विना ॥ स्वतंत्रता ईश्वरेणाव्याप्ता ॥ एवं कर्मफलाभावः कर्तृवादिनां सिद्धः ॥ न चैवं । तस्मात्कर्ता न कश्चिन् ईशोऽशुभशुभफलदः प्राणिनां कर्मसुक्तेति ॥ स्वकर्मफलोपभोगः सिद्धः कर्ता विना ॥

पृथ्वीतोयाग्निवाताणव इति च तथा कर्तुरग्रे न सन्ति द्रव्याभावेन विश्वं विषयविरहितः सर्वकर्ता करोति ॥ न
प्रत्यक्षं परोक्षं विषयविरहितस्यास्य कर्तुः प्रमाणं संयोगादेव सर्वं भवति न रचते नेच्छया कर्मरूपं ॥ १६९ ॥

इदानी स्वतंत्रस्य कर्तुः परापेक्षिकत्वमुच्यते ॥ पृथ्वीत्यादि ॥ इह यदि खे आकाशे पृथिव्यादिपरमाणवो न सन्ति कर्तुरग्रे ॥ तदा द्रव्याभावेन विश्वं करोति ॥ विषयविरहितो निष्कलः सर्वकर्ता कथं ॥ अस्य विषयविरहितस्य कर्तुः साधकं न प्रत्यक्षपरोक्षं प्रमाणं यस्मात् ॥ तस्मात् द्रव्यसंयोगादेव सर्वं विश्वं चराचरं भवति ॥ नेच्छया कर्तुः कर्मरूपमिति न्यायः ॥ इतीच्छा प्रतिषेधकर्तुः ॥ १६९ ॥

संयोगाच्चिंदुकान्तेर्भवति च शलिलं दर्पणे वस्त्रबिम्बं जिह्वाश्रावो ऽम्लहेतोश्चरवनशतरः शुद्धबीजाङ्कुरः स्यात् ॥ कान्ता
श्मायः शलाकाभ्रमणमपि भवेन्नेच्छया किञ्चिदेषां वस्तूनां शक्तिरेषा त्रिभुवननिलये निर्मिता केनचिन्न ॥ ७० ॥

इदानीं प्रतीत्योत्पाद उच्यते ॥ इह सर्ववस्तूनां संयोगादुत्पादः ॥ इदं प्राप्य इदमुत्पद्यते ॥ संयोगादिति ॥ चन्द्रकिरणसंयोगाच्चन्द्रकान्ते भवति च शलिलं ॥ चकारात्सूर्यकान्तेऽग्निर्भवति ॥ दर्पणे वस्तुसंयोगात् वस्तुप्रतिबिम्बो भवति ॥ अन्यस्याम्लभक्षणसंयोगादन्यस्य जिह्वाश्रावो भवति ॥ अम्लहेतोः सकाशादिति ॥ कूपादौ खरवसंयोगात् अनिरवो भवति ॥ शुद्धबीजेऽङ्कुरः स्यात् पृथ्वीतोयादिसंयोगादिति ॥ कान्तादिति कान्तपाषाणात् ॥ अयःशलाका भ्रमणं भवति संयोगादिति ॥ नेच्छया किंचिदेषां वस्तूनां वस्तु भवति ॥ किंतु वस्तूनां शक्तिरेषा ॥ त्रिभुवननिलये निर्मिता केनचिन्नेति ॥ प्रतीत्योत्पादसिद्धः आह ॥ इह कारणेन विना कार्यं न भवति यस्मात्कारणमस्तीति ॥ अत ईश्वरादिकं सिद्धमिति ॥ आह ॥ इह कारणे कार्यं यन्न भवति ॥ तत्किं सत्कार्यमसद्वा कारणे सत्कार्यं न भवति विद्यमानस्य घटस्य मृदादयः कारणभूता न भवन्ति ॥ सत्वात् । असत्कार्यं न । असत्वात् । कूर्मरोमवत् ॥ तथा घटस्य तरीबेमादयः कारणभूता न भवन्ति ॥ उभयात्मकं कार्यं न भवति ॥ परस्परविरोधात् यत्सत्तदसन्न भवति ॥ यदसत्तत्सन्न भवति विरोधात् ॥ अतो न सत्कार्यं नासत्कार्यं न सदसत्कार्यं कारणे भवतीति सिद्धं ॥ आह ॥ इह कारणस्य प्रतिषेधेन कार्यस्यापि प्रतिषेधो भवति ॥ उभयप्रतिषेधात् सर्वाभाव इति सिद्धं ॥ आह ॥ इह सर्वाभावो न परापेक्षिकत्वादिति ॥ इह कारणे यत्कारणत्वं तत्कार्यमपेक्ष्य परिकल्प्यते ॥ कार्यत्वं कारणमपेक्ष्य ॥ एवं परापेक्षिकत्वात् ॥ उभयोरपि कारणत्वप्रसंगः ॥ उभयस्य कारणत्वात् । कार्याभावः तदभावे कारणाभावः कारणस्य

कार्यापेक्षिकत्वात्॥ अनित्यत्वप्रसंगः॥तस्मादनित्यत्वादकारणत्वप्रसंगः॥एवंसर्वं पामोश्वरादीनां कारणानामनित्यत्वमकारणत्वंसिद्धं॥ आह।नापेक्षिकाश्चिद्धिः
कारणस्यकार्यस्यच॥यत्कारणंतत्कारणमेव॥यत्कार्यंतत्कार्यमितिसिद्धं॥ आह। इह तवेच्छातःसिद्धिर्नममेतिवैषमिकत्वं॥ यदीच्छातःसिद्धं भव।तदाममापी
च्छातः।यत्तवमतंतन्ममासत् सिद्धं।युक्तिविवर्जितत्वात्॥आह॥आप्तागमादस्माकं समय एषः समयोऽसिद्धः॥समय इति वक्तुंनलभ्यते॥उक्तं शास्त्रविद्भिरिति॥
आह॥कदाचित्नुयुक्तिरुच्यते॥इह उपादानकारणात् सर्वसंभवाभावात्॥शक्तस्यशक्यकरणात् सत्कार्यसिद्धिरिति॥आह॥इह युष्माकं हेतुर्वृथा॥कथंयदित्व
वपक्षस्य साधकलक्षणं प्राप्तः॥तदाममापिपक्षं साधयिष्यसि॥अथदूषणलक्षणं प्राप्तस्तवपक्षस्यतदाममापिपक्षं दूषयिष्यति॥यथाग्निरुभयदाहकोनास्य
वेकस्येति॥इह यथाशब्दवादिना प्रतिज्ञा नित्यःशब्दः॥को हेतुरमूर्तत्वादिति॥को दृष्टान्त आकाशवत्॥यथा आकाशममूर्तत्वान्नित्यं॥तथाशब्दोपि यस्मात्तस्मात्तद्वदे
नित्यःसिद्ध इति॥आह॥नेयंप्रतिज्ञा परोपिवक्ष्यति॥अनित्यःशब्दःकोहेतुः कृतकत्वादिति॥को दृष्टान्तो घटवत्॥यथा घटो मृद्दण्डचक्रसूत्रपुरुषव्यायामात्कृ
तकः॥तथाशब्दोपि कण्ठताल्वादिभिः प्रयत्नतोजनितो यस्मात्तस्मादनित्यःशब्दःसिद्धः॥ अतोहेतुव्यपदेशमात्रतः॥कार्यसिद्धिर्नभवति॥यस्तु याथावच्चक्ष्यात् त
त्प्रमाणस्यान्न हेतुव्यपदेशात इति॥एवं हेतुर्वृथा॥अन्यच्च साध्यानां प्रतिज्ञाविरोधेन हेतुःसाधकोनभवति॥इह यस्मिन्काले प्रतिज्ञा तस्मिन्काले हेतुर्नास्ति॥यस्मि
न्काले हेतुस्तस्मिन्काले प्रतिज्ञानास्ति॥अथ कस्यासौ हेतुः प्रतिज्ञया विना अयुगपद्धर्मित्वात्॥यस्मिन्काले प्रकारस्तस्मिन्काले ननिकारोनताकारश्च॥एवंयकार
रेफाकाराः॥यथा प्रकारस्याक्षराक्षरस्य॥न ह्यजातेनमृतेनवाऽपुत्रेणाऽत्र कार्यं कर्तुं शक्यते॥एवं हेतुनापि तस्मात्कारणोपतनभावात्॥कार्यं न भवति॥अहेतुतः सि
द्धत्वात्॥अहेतुत इति।हेतुः कारणमित्यनर्थान्तरं॥एवं न कारणे कार्यं॥नाप्यहेतुतः कार्यं भवति॥अतः कार्यं स्वतो न भवति॥परतो न भवति॥उभयतो न भवति॥अहेतु

कं न भवतीति सिद्धं ॥ कर्तृकारणानित्यदूषणामिति ॥ ७० ॥

यद्यात्मा सर्वगः स्यादत्र भवति सुखं कस्य विश्लेषदुःखं नित्यश्चायं यदि स्यान्मदनशरहतोऽवस्थतां किं प्रयाति ॥ यद्यासी
त्सक्रियश्च व्रजति कथमिमां मूर्ततां तत्र काले एवं वै सर्वगः स्याद्विभुरपि च परासक्रियोऽयं न चात्मा ॥ ७१ ॥

इदानीमात्मनो दूषणमुच्यते ॥ यदीत्यादि ॥ इह यद्यात्मा सर्वगः स्यादत्र भवति कथं वस्तुविश्लेषदुःखमिति ॥ इह य आत्मा सर्वगः स एको भवति न स्याद्वस्तुविश्लेष दुःखं न भवतीति ॥ एकसत्वस्य दुःखेन सर्वसत्वानां दुःखं भवति ॥ आत्मनः सर्वगत्वादिति ॥ अथानेकात्मानः । तदा अनेकात्मनां सर्वगत्वाभाव इति ॥ नित्यश्चायं यदि स्यान्मदनशरहतोऽवस्थतां किं प्रयातीति ॥ इह यो नित्यस्तस्यावस्थान्तरं नास्ति ॥ विकाररहितत्वादिति ॥ तत्कथमिमां कामावस्थां दशविधां मदनशरहतो गच्छतीति ॥ तस्मादात्मना अनित्येन भवितव्यं ॥ विकारसंयोगादिति ॥ यद्यासीत्सक्रियश्च व्रजति कथमिमां मूर्ततां तत्र काले इति ॥ इह यद्यासीत्काले जाग्रदवस्थालक्षणे सक्रियश्च कारणान्नित्यश्च ॥ तदा तत्र काले मूर्ततां क्रियारहितः कथं व्रजतीति ॥ एवं वै एकान्तं विचार्यमाणः सर्वगः स्यान्न विभुरपि च स्वामी नित्यो न ॥ सक्रियोऽयं न चात्मा इति सिद्धं ॥

नास्त्यात्मा संभवो वास्त्यपश्च भस्तु भ फलं चास्ति कर्ताविहीनं गन्ता नास्त्यस्ति मोक्षाय गमनमखिलं चास्ति बन्धो न बद्धः ॥
भावाभावोऽपि चास्ति क्षणिकविरहितो निःस्वभावो भवोऽस्ति एतन्मे सत्यवाक्यं स्वरस्फुरितवचनैः स्रग्धरे हृत्स्पनेन ॥ ७२ ॥

इदानीं बुद्धभगवतः प्रवचनमुच्यते ॥ नास्त्यात्मेत्यादि ॥ इह प्रतीत्यसमुत्पन्नं धर्माणां निरोधादुत्पाद उत्पादान्निरोधः ॥ एवं निरोधधर्माणामात्मा नास्ति ॥ आत्मी

स्याभावात् ॥ उत्पाद धर्माणां संभवोस्ति ॥ पुनर्जन्मग्रहणात् ॥ स्वाध्यायादि दृष्टान्तैरेषां सिद्धिरिति ॥ वक्ष्यमाणो वक्तव्या ॥ अथ भङ्गभङ्गत्वं चास्तीति ॥ उत्पाद धर्माणां च भङ्गभङ्गत्वमस्ति निरोधधर्माणाम भावेन ॥ कर्त्रादिविहीन कर्त्रादि विनेत्यर्थः ॥ गन्तानास्ति निरोधधर्मसमूहः ॥ मोक्षाय भगमनमस्ति ॥ अन्येषामप्यत्र ङ्रूपमित्यादि वचनात् ॥ अरविन्दसमत्वं ॥ अस्ति बन्धो न वध्य इति ॥ इहोत्पाद धर्माणां बन्धोस्ति ॥ वध्यो निरोधधर्मो नास्ति ॥ भावो भावोपि वास्ति क्षणिक विरहितो निःस्वभावो भवतीति ॥ इह भावभावैकलोलीभूतो निःस्वभावो द्वय विकल्परहितः प्रतिसेनायुत्पः क्षणिक विरहित उत्पाद व्यय रहितो भावो बुद्धानां धर्मचक्रप्रवर्तनायास्तीति ॥ एतन्नेसर्वत्र हविनिर्दिष्टं वचनं यत्तत्पुरस्तद्वचनैः सग्रहैर्हस्तेन ॥ इहत्यभाय हृष्ट मोमहो यहसन्नामबद्धं हस्तुन्न शङ्कोनि ॥ नभाविकल्पयहृष्ट सो विकल्पयहृष्टं कंहस्तुनश्च भवतीति नैरात्म्यादि सिद्धिः संक्षेपेणात्रोक्ता ॥ विस्तरा विस्तरागमेन ज्ञेया इति नियमः ॥ १७२ ॥

यस्तत्कं पुद्गलाख्यं वदति न तु गतं तत्स्वभावास्तु नष्टः संवृत्यात्यर्थवादी त्वविदित परमार्थो ह्यसन्मन्यमानः ॥ विज्ञा
नं मन्यमानस्त्रिभुवनसकलं चैव विज्ञानवादी यो नष्टो न स्वपक्षः स भवति करुणा शून्यताज्ञानवादी ॥ १७३ ॥

इदानीं वैभाषिक सौत्रान्तिक योगाचार मत दूषणमुच्यते ॥ यस्तत्कमित्यादि ॥ इह तीर्थिक बौद्धानां एषां पक्षग्रहः तेन स्वपक्षग्रहेण परपक्षस्यापि ग्रहणं भवति ॥ तद्धर्मेणानद्वे धर्मेण वा तेषां बालमतीनां ॥ इह वैभाषिको यस्तत्कं पुद्गलाख्यं वदति न तु गतं न तत्स्वभावान्तनष्ट इति ॥ इत्यादि पुद्गला नर्वर्मि उपपन्नद्धि कः पुद्गलोस्ति न तस्य स्वभावो वाच्यः ॥ किं ज्ञानस्वभावो ऽज्ञानस्वभावो वा ॥ यदि ज्ञानस्वभावस्तदा ऽनित्यः ॥ इह घटज्ञाने निरुद्धे पटज्ञानमुत्पाद्यते ॥ अतो ऽनित्यः ॥ अथाज्ञानस्वभावस्तदा ऽज्ञानस्य खुरव

ऽःखाभावः ॥ अतस्तत्त्वभावाद्विचार्यमाणाः सन्तश्चैवैभाषिक इति ॥ इहापि भङ्गतो भारवाहो रणरिणोवं भरणामि रणारितोवं भरणामीति ॥ यत् भगवतो वचनं तत्तत्त्वान्यत्वे
विवरेणावक्तव्यमिति ॥ संवृत्या चार्थवादी त्वविदितपरमार्थो ऽसन्नन्यमान इति ॥ इह संवृत्या नीत्वा ग्राह्यर्थग्राह्यार्थवादीनष्टः कथं ॥ अविदितपरमार्थो ज्ञानकायोर्हि अ
सत्त्वाच्च तत्त्वमन्यमानस्तथाह ॥ आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतं ॥ संस्कृतं क्षणिकं सर्वमात्मशून्यमकर्तृकं ॥ अक्षजा धीरनाकारा साक्षाद्वे परमाणुसंचयं ॥
स्यात्काश्मीरमतांभोधि वैभाषिकमतं मतमिति ॥ स्वाकारज्ञानजनका दृश्या नेन्द्रियगोचरा ॥ वन्ध्याङ्गनसमं व्योम निरोधौ व्योमसंनिभौ ॥ संस्कारा नजडाः सन्ति त्रै
काल्यानुगमेन च ॥ असदप्रतिघं रूपमिति सौत्रान्तिका विदुरिति ॥ अतोऽप्रतिघरूपं त्रैकाल्यवेदकं ॥ यदि प्रदीपनिर्वाणसमं ॥ तदा अप्रतिघरूपे असति सर्वज्ञो न भवति
चतुर्भिः कायैर्विना प्रादेशिककायेन बुद्धवचनं भवति ॥ इहाप्रतिघः कायेन विना बुद्धस्य सर्वाकारऋद्धिदर्शनं न स्यात् ॥ सर्वज्ञत्ववचनं न भवति ॥ परचित्तज्ञानं च न प्रवर्तते ॥
दिमन्त्रबुद्धादिकं सर्वं निःफलं भवतीति सौत्रान्तिकग्रहदोषः ॥ ॥ इदानीं योगाचाराणां ग्रहदोष उच्यते ॥ विज्ञानं मन्यमानस्त्रिभुवनसकलं नैव विज्ञानवादीति ॥ आ
ह ॥ न सन्त्येव पदीनाम न सन्तः परमाणवः ॥ प्रतिभासो निरालम्बः स्वप्नानुभवसंनिभः ॥ ग्राह्यग्राहकवैधुर्यात् विज्ञानं परमार्थसत् ॥ योगाचारमतांभोधिपारगैरिति
गीयते ॥ अतो विज्ञानविचारे एकानेकस्वभावेन विज्ञानवादिनो नष्टा वियोगत इति ॥ इह विज्ञानमात्रं त्रैधातुकं यदि ज्ञानादन्यद्ग्राह्यरूपं नास्ति ॥ तद वस्तुर्विज्ञान
स्य ग्राहकस्य वा स्वरूपं कथं ग्राह्यस्वभावेन प्रतिभासत इति ॥ आह ॥ अविद्यावासनावशेनेति ॥ आह ॥ किमियमविद्या त्रैधातुकलक्षणा न भवति ॥ तदा संसारातीत
लक्षणा भवति ॥ एवं प्रज्ञापारमितेयं न चैवं ॥ तस्मादियमविद्या संसारवासना संसारोऽपि त्रिभुवनलक्षणः ॥ त्रिभवं त्रैधातुकत्वं विज्ञानमात्रं ॥ एवमविद्या विज्ञान
मात्रा विज्ञानमात्रं न सात्मकत्वं ॥ तदापि कल्पादविद्यापगमो नास्ति विज्ञानस्याविद्यामात्रतः ॥ अथ विज्ञानमात्रं त्रैधातुकं न भवति ॥ तदा प्रतिज्ञाहानिरिति ॥ त्रैधा

तु कंमात्रत्वमसिद्धं ॥ ॥इदानीं क्षणभङ्गोत्पाददोष उच्यते ॥ इह योधर्माणामेकक्षणात् भङ्गोत्पादौ भवति ॥ स किं स्थित्या विना ॥ यदि स्थित्या विना भङ्गोत्पादश्च भवति ॥ नश शशविषाणस्यापि भविष्यति ॥ अथ उत्पादान्स्थितिः स्थितेर्भङ्गो भङ्गाउत्पादः ॥ एवं स्थितिभङ्गोत्पादानां एकत्वं नास्ति ॥ भिन्नलक्षणेन भवितव्यं ॥ इह यस्मिन्काले स्थितिस्तस्मिन्काले नोत्पादभङ्गौ ॥ यस्मिन्काले भङ्गस्तस्मिन्काले नोत्पादस्थिती ॥ यस्मिन्काले उत्पादस्तस्मिन्काले न स्थितिर्न भङ्गः ॥ काल इति क्षणः सत्येककाले जातिजरामरणानामैक्यमिति ॥ किंचान्यत् ॥ इह य एकक्षणो भङ्गोत्पादो धर्मस्य स किं पूर्वधर्मे निरुद्धे अपरधर्मोत्पादः ॥ अथानिरुद्धधर्मात् ॥ यदि निरुद्धधर्मा उत्पादस्तदा निरुद्धप्रदीपादपरप्रदीपोत्पादः ॥ अथानिरुद्धाउत्पादस्तदा अनिरुद्धात् प्रदीपात्प्रदीपोत्पादवत् ॥ तस्मादपरोत्पादः एवमुत्पादाउत्पादेन प्रदीपमाला इव विज्ञानमाला भवति ॥ अतः पूर्वविज्ञानस्य निरोधादपरस्योत्पादो कर्तुं न शक्यते । निरुद्धादपि ॥ नामिश्रात् परस्पर विरोधेन तत्पारे कत्वाभाव इति ॥ अतो माध्यमिका आहु ॥ नैवं तदपि धीशरणा विज्ञानं परमार्थसत् ॥ एकानेकस्वभावेन वियोगाऽगगनाब्जवत् ॥ न सन्नासन्न सदसन्न चाप्यनुभयात्मकं ॥ चतुःकोटिविनिर्मुक्तं तत्वं माध्यमिका विदुरिति ॥ योनष्टो न नष्टपक्षः स भवति कोऽसौ करुणा शून्यताद्वैतवादीयः ॥ इह यस्य करुणा निरालम्बा विकल्परहिता शून्यता सर्वाकारवरोपेता ॥ अध्ववर्तिनी अध्वपरिज्ञानाय इति बौद्धसिद्धान्तनियमः ॥ ७३ ॥

जन्तुः पूर्वार्जितकर्माशयजभवति दृढतान्मोहिकान्यस्यजात्या यद्येवं कर्मनाशो न हि भवति नृणां जातिजात्यन्तरेण ॥
संसारान्निर्गमः स्यादपरिमितभवैर्नैव मोक्षप्रवेशः एतद्वैतायिनान्तु प्रभवति हि मतं चान्यजाति प्रहीणां ॥ ७४ ॥

इदानीं पूर्वकर्मोपभोगवर्तमानकर्मसंचयप्रतिषेध उच्यते ॥ जन्तुरित्यादि ॥ इह एषां मतं जन्तुः पूर्वकृतानि कर्माणि भुंक्ते इह जन्मनि कृतान्यन्यजात्यामिति ॥ यद्येवं तदा कर्मनाशो न हि भवति नृणां जातिजात्यन्तरेण ॥ कर्मफलोपभोगत इति ॥ एवं न संसारान्निर्गमः स्यादमस्मिन्भवे नैव मोक्षप्रवेशो भवतीति ॥ एतन्नैयायिनां अभवति हि मतं ॥ किन्तु अन्यजातिग्रहणमिति तापिनाहोच्छानां मतं ॥ मनुष्यो मृतः स्वर्गे वा नरके वा अन्यायां मनुष्यमूर्तौ उरगं वा खरं वा उन्तोर कारणो नियमेनेति ॥ अतो अन्यजातिग्रहणमिति नियमः ॥ ७४ ॥

भूतैर्यद्येकभूतैः प्रभवति मदिराशक्तिवन्माक्षि चित्तं वृक्षाणां किं न हि स्यात् क्षितितलजलअग्मारुताकाशयोगात् ॥ नास्त्येषां
जन्तुशक्तिस्तथ परममृषा जन्तुसंयोगशक्ति एतच्चार्वाकवाक्यं न हि सुखफलदं मार्गनष्टं नराणां ॥ ७५ ॥

इदानीं चार्वाकमतदूषणमुच्यते ॥ भूतैरित्यादि ॥ इह पूर्वोक्तैर्भूतैः पृथ्व्यादिभिरेकीभूतैर्यदि ॥ हरितकीगुडधातकीसंयोगेन मदिराशक्तिवत् ॥ सेन्द्रियं चित्तं ॥ नराणामिति सिद्धं ॥ नराद्वृक्षाणां पृथिव्यादिभिरेकीभूतानां किं न भवति ॥ सेन्द्रियं चित्तमिति भूतसंयोगात् ॥ अथैषां स्थावराणां जन्तुशक्तिर्नास्तीति तत् परममृषा भूतसंयोगशक्तिरिति ॥ तस्मादेतच्चार्वाकवाक्यं न हि सुखफलदं मार्गनष्टं नराणामिति ॥ लोकायतमतदूषणनियमः ॥ ७५ ॥

जीवः कायप्रमाणो यदि करचरणच्छेदनान्नस्य नेकिं नित्यं कायप्रभावादणुरपि च भवेत् स्थूलतां किं प्रयाति ॥
संसारात्कर्ममुक्तो व्रजति सुखपदं यः स्थितं लोकमूर्ध्नि त्रैलोक्यं चाणुभिर्यद्व्यापिनमपि सकलं शाश्वतं नन्तकालात् ॥ ७६

इदानीं क्षपणकमतदूषणमुच्यते ॥ जीवइत्यादि ॥ इह क्षपणकसिद्धान्ते जीवो नित्यः ॥ स च कायप्रमाण इति सिद्धं ॥ इति चेत्तर्हि कायावयवे करचरणादौ छिन्ने सति
किं विनश्यते छिन्नावयवमूर्तेरभावादिति ॥ नित्यः कायप्रभावादणुरपि च भवेत् सूक्ष्मकायग्रहणात् स्थूलतां किं प्रयातीति ॥ इह यो नित्यः सोऽविकारी यो विका-
री सोऽनित्यः सिद्ध इति ॥ आह ॥ द्रव्यपर्यायाभ्यां नित्यानित्यमिति स्याद्वादः ॥ आह ॥ इहस्य भास्वरीकृतत्वाभ्यां नित्यानित्य ॥ तथा द्रव्यपर्यायाभ्यां जीवद्रव्यं नित्यं वि-
कारोऽनित्य इति ॥ तथा च स्याद्वादः ॥ कथेइ जीवो हे इवलि ओ कम्मेन कम्मा इहेन्तिवलि आइ ॥ जीवस्स अकम्मस्स अपूर्वणीवर्द्धी इ वैराइ इति ॥ अस्या गाथाया
अर्थमाह ॥ अत्र विद्धिनमोक्षविषये जीवो बलवान् केवलज्ञानबलेन ॥ कुत्रचित् चतुर्गतिसंसारविषये कर्म बलवत् ॥ अज्ञानबलेन एवं जीवस्यापि कर्माणि च पू-
र्वेनादिकालनिबद्धानि वैराणीति सिद्धं ॥ एवं द्रव्योत्पत्तिव्ययात्मा स्वगुणास्त्वत इति नान्यथा सिद्धिरिति सिद्धान्तः ॥ आह ॥ द्रव्यपर्याययोरेकत्वमन्यत्वं वा ॥ इहस्य-
द्येकत्वं ॥ तदा द्रव्यपर्याययोर्भेदो नास्ति ॥ अथान्यत्वं ॥ तदा द्रव्यैर्विना पर्यायो भवति ॥ नचैवं दृश्यते सूत्रैर्विना पटः ॥ एवं जातिव्यक्त्योरपि नित्यानित्यसंयोगदो-
ष इति ॥ नित्यानित्ययोरेकत्वं नास्ति परस्परविरोधात् ॥ असद्वा सद्घटयोर्यथा ॥ अतो जीवजात्यादि द्रव्यमनित्यमिति सिद्धं ॥ तथा संसारात्कर्ममुक्तो व्रज-
ति सुखपदं यत्स्थितं लोकमूर्ध्नीति ॥ इह क्षपणकसिद्धान्ते ॥ एकमेव त्रिभुवनं द्वितीयं नास्ति ॥ तेनेदं त्रिभुवनं अनादिनिधनमुत्पादव्ययरहितं सर्वं कृ-
मयं न कदाचित् क्षयं यास्यतीति ॥ यद्यस्य भुवनस्य क्षयो भवति ॥ तदाऽन्यत्रिभुवनाभावात् सर्वे प्राणिनः कुत्र स्थास्यन्ति ॥ तेन कारणेनेदं नित्यं जीवोपि नित्यः
संसारात्कर्ममुक्तः सन् व्रजति मोक्षं पंचचत्वारिंशद्योजनलक्षं सुखपदं ॥ अकृतनराहितमिति सिद्धं ॥ आह ॥ इह त्रैलोक्यं अणुभिर्जातं नाणुभिर्विना च कारान्नो
ऽपि ॥ तत्कथं नित्यं भवति यदणुभी रचितं अपि शाश्वतमपि नित्यं सदा सर्वकालं न भवति ॥ संहारकालवशात् क्षयं यास्यतीति ॥ तत्क्षपणकसिद्धान्तानामपि क्षा

यो भविष्यतीति सिद्धमिति न्यायात् ॥ किं चान्यदिह पूर्वोक्तानां षड्जीवकापरेशानां मध्ये वनस्पतीनां जीवः स किं प्रत्येक वनस्पति ॥ काये एकः सुखदुःखं वा कर्मवशेनाद् भवति ॥ अथानेक इत्याह ॥ एकोजीव एकं पङ्कजं न गृह्णाति यस्य प्रभावेन वनस्पतीनां सस्यादीनां जीवितसंज्ञा यदि जीवो नास्ति नश पादपा इति कथं सिद्धं । न चाजीवाः काष्ठादयः कंपीलादयः पाषाणादिवत् प्रकुर्वन्तीति सिद्धं ॥ आह ॥ यदि प्रत्येक पङ्कजे प्रत्येकं एकैकोजीवः तदा इक्षुदण्डे खण्डखण्डेऽप्यनेऽनेकखण्डानि भवन्ति ॥ तेषां मध्ये एकस्मिन् खण्डे स जीवो नित्यः कर्मवशात् संकुचन प्रविष्टः ॥ कानि तेन परित्यक्तानि न चैव कथमुत्पद्यन्ते ॥ विचार्यमाणाः कुतोऽयं नस्तेषां पुनर्भूम्यामारोपितानामङ्कुरादिकं प्रत्येकखण्डे दृश्यते ॥ तस्मादृष्ट स्वभावो वनस्पतीनां अङ्कुरादिकं प्रत्येकखण्डे दृश्यते ॥ तस्मादृक्षु सर्वशक्तिरिति सिद्धं ॥ इति क्षपणकमतदूषणनियमः ॥ विस्तरेऽनेकोऽनेकप्रमाणग्रन्थेन मध्यमकेन नीराकरणीयस्तीर्थिकानां सिद्धान्तः ॥ यः संवृत्त्या विवृत्त्या वा संबुद्धवचनसमः स न दूषणीय इति ॥ कालचक्रे आदिबुद्धे भगवतो नियमः ॥ ७६ ॥ तद्यथा ॥ १६०

इत्यादिज्ञानहेतोः प्रकथयति महोद्देशनां कालचक्रः दुःखाच्चिन्ताच्च सारां मृदुकठिनपरां वासनायाबलेन ॥ चित्तं वै भावरागैः स्फटिकवदुपधाद्यागतां याति यस्मात्तस्माद्धर्मो न कश्चित् स्वपरकुलगतो योगिना दूषणीयः ॥ ७७ ॥ धर्मः सत्त्वोपकारो विषय विरहितश्चापकारोऽप्यधर्मः हिंसावेदप्रमाणा न हि सुखफलदा दुःखदा सर्वकालं ॥ सन्मैत्री सूर्खवाक्यात् परमसुखकरा सर्वसत्त्वातुराणां तस्मात्सत्त्वार्थमेकं कुरुत परमनसा भावनां निःस्वभावां ॥ ७८ ॥ इन्द्रोऽहं स्वर्गलोके त्रिदशनरगुरुर्भूतले चक्रवर्ती पा

तातेनागराजः फणिकुलनमितः सर्वगश्चीनमोऽहं ॥ ज्ञानं त्वं क्षेमुनीन्द्रो ऽक्षरपरमविभुर्योगिनां वज्रयोगः वेदों
कारः पवित्रो व्रजममशरणं सर्वभावेन राजन् ॥ ७९ ॥

इति शरणानियमः ॥ ७९ ॥ इदानीं सूर्यरथस्य नमस्कार ॥ ॥

त्वंमाता त्वं पिता त्वं जगति गुरुरथित्वं च बन्धुः सुमित्रं त्वं नाथस्त्वं विधाता हितमय हरणं त्वं पदं संपदां च ॥ त्वं कै
वल्यंपदं त्वं वरगुणनिलयो ध्वस्तदोषस्त्वमेव त्वं दीनानाथचिन्तामणिरपि शरणं त्वां गतोऽहं जिनेन्द्र ॥ ८० ॥

इति श्रीमदादिबुद्धोद्धृते श्रीमहाकालचक्रतन्त्रराजे ऽध्यात्मनिर्णयो द्वितीयः पटलः ॥ ॥ इति सूर्यरथो गुरुनमस्कारेण मञ्जुश्रियं भगवन्तं
स्तुत्वा पादद्वयं शिरसि कृत्वा पुनः स्वकीयासनेनिषन्नः ॥ ॥ इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां द्वादशसाहस्रिकायां विमलप्रभायां
स्वपरदर्शनन्यायविचारमहोद्देशः समाप्तः ॥ ॥ समाप्तेयं टीका अध्यात्मपटलस्येति ॥ ॥ ॥ श्रीमत्तन्त्रप्रथमपटले भाजनीभूतलोकस्य बो
द्विष्टप्रभवलयसंस्थानमानादिभेदाः ॥ नैस्तैस्तुत्वा स्वतन्त्रस्खलास्पष्टदृष्टार्थतत्वैः ज्ञेया केचिद्यदिह पटले सद्दयासुज्ञैनेव ॥ अध्यात्मनिर्णयकरं पटलं विले
रम श्री अरुकेन कुशलं यदिहाप्तमस्त्वं ॥ तेनास्तुसेकसुखनिर्णयकल्पराजबोधप्रतिष्ठितमतिः सकलोपि लोकः ॥ ॥ ॥ शुभमस्तु ॥ ॥

देहे विश्वस्यमानं दिननिशिसमयामाससंक्रान्तिभेदा नाडीनांसूक्ष्मसंख्या प्रकृतिपुरुषसत्तीर्थिकानां मतंच॥ वेदः
कर्णादिभेदः श्रुतमिति नृप हि मयामण्डले देशनीयं श्रुत्वासौ चन्द्रवाक्यं प्रवदति सुगतो मण्डले कालचक्रे॥ १ ॥

नमः श्रीकालचक्राय॥ ॥दत्तं येन हयादिकं दशविधं दानंच धनार्थिने उत्पन्नज्ञानबलेन तेन महता मारादयो ध्वंसिताः॥ सिक्त्वा श्रीमति धर्मधातुविमले वागीश्वरे मण्डले विश्वं मात्कृतमेक शास्त्रविषये उत्क्रामतस्मै नमः॥ प्रणम्यैवं त्रिकायाग्र्यं कालचक्रं महासुखं॥ त्रिमण्डलत्रिकक्षाग्र्यं घोषवज्रमनक्षरं॥ टीकाभिषेकपटले मूलतन्त्रावबोधकः॥ लिख्यतेत्र मयातन्त्रे उत्पन्नज्ञानफलाप्तये॥ ॥इह श्रीमति कलापग्रामदक्षिणामलयोद्याने कालचक्रमण्डलगृहपूर्वद्वारावसाने महामणिरत्नमण्डपे महामणिरत्नसिंहासनस्थेन यशोराज्ञा निर्मितकायेन मञ्जुश्रिया सूर्यरथाभ्यर्थितेन तथागतव्याकृतेन परमादिबुद्धात्सुचन्द्राध्येषणार्थप्रतिपादकं लघुतन्त्रे ऽभिषेकपटले प्रथमवृत्तं देशितं॥ तदेवमया लोकेश्वरेण निर्मितकायेन पुण्डरीकेन तथागतव्याकृतेन मञ्जुश्रिया चोदितेन महोद्देशटीकया वितन्यते॥ देहे विश्वस्यमानमित्यादिना मण्डले देशनीयमितिपर्यन्तं सुचन्द्राध्येषणा॥ ततः श्रुत्वासौ चन्द्रवाक्यं प्रवदति सुगतो मण्डले कालचक्रमित्यादि समस्ताभिषेकपटलवृत्तेषु तथा ; इह देहे विश्वस्यमानमित्यादिना ; गतप्रवचनं पुनरध्येषणा भाष्यः पटलानयावदिति॥ अत्र सुचन्द्र आह॥ इह देहे भगवन् यद्भगवतोक्तमध्यात्मपटले विश्वस्यमानं दिननिशिसमयं माससंक्रान्तिभेदादि वेदकर्णादिभेद इति पर्यन्तं श्रुतं मया सर्वं ज्ञातमित्यर्थः॥ तदिदानीं सत्वानां उत्पन्नज्ञानलाभाय भगवता मण्डले देशनीयं

शिष्याणां सेकदानाय प्रतिमादीनां प्रतिष्ठाकरणाय दशतत्वसंयुक्त लौकिकसिद्धिसाधनाया कनिष्ठभुवनपर्यन्तं लौकिकसम्भेनेति ॥ परमार्थसम्भेन रजोमण्डलालेखनं नास्ति भगवतः प्रतिषेधात् ॥ तथाह भगवानाद्यबुद्धे ॥ पातनं वज्रसूत्राणां रजसोपि निपातनं ॥ नकुर्यान्मंत्रतत्वेन कुर्वतो बोधिदुर्लभेति ॥ इह यदि मंत्रतत्वेन मंत्रमिति ज्ञानं मनस्त्राणभूतत्वात् ॥ तेन मंत्रतत्वेन यदि महासुखप्रासिध्यर्थं सूत्रपातनादिकं करोति वज्राचार्य्यः ॥ तदा तस्य कुर्वतो बोधिदुर्लभा भवतीति तथागत नियमः ॥ तेन कारणेनेदं सुचन्द्राध्येषणां लौकिकसिद्धिसाधनार्थं पुण्यसम्भारार्थं न महासुखप्रासिद्धिसाधनार्थं ज्ञानसम्भारार्थमिति ॥ अत्र ज्ञानसाधनायापरं मण्डलत्रयं भगवतोक्तं ॥ तद्यथा कायेन्द्रियं भगाश्रितं मण्डलं त्रिविधं भवेत् ॥ कायवाक्चित्तवज्राणां परं पञ्चरङ्गिकमिति ॥ अतो महासुखसाधनाय रजोमण्डलं न भवति ॥ उत्तराभिषेकदानाय चेति सुचन्द्राध्येषणां ॥ तदेवाध्येषणावचनं सौचन्द्रवाक्यं श्रुत्वा प्रकर्षेण वदति सुगतो मण्डलं कालचक्रं सर्वं देशयतीत्यर्थः ॥ सर्वं वक्ष्यमाणक्रमत इति देशकाध्येषक प्रतिवचनसंग्रहः ॥

आदौ संसेवनीयो गुरुरपि समयी वज्रयानाधिरूढः सत्वध्यायी त्वलुब्धो व्यपगतकलुषः क्षान्तिशीलोऽध्ववर्ती ॥
शिष्याणां मार्गदाता नरकभयहरः सत्वतोब्रह्मचारी मारारीणां वज्रदण्डः सचधरणितले वज्रसत्वः प्रसिद्धः ॥ २ ॥

इदानीं वज्राचार्य्यपरीक्षां गुर्वाराधनाय द्वितीयवृत्तेनाह ॥ आदावित्यादिना ॥ इह मन्त्रनये प्रथमं लौकिकलोकोत्तरसिद्धिकांक्षिभिः शिष्यैर्गुरुः सेवनीयः ॥ तं च सम्यक्परीक्षयित्वा वज्राचार्य्यपरीक्षोक्तविधिना ॥ अन्यथा परीक्षालक्षणारहितस्य गुरोराराधनेन शिष्याणां धर्मविपर्यासो भवतीति धर्मविपर्यासान्नरकगमनं भवति

अनआह ॥ आदौ संसेवनीयो गुरुरपि समयीति ॥ इह समयो द्विविधो बाह्य अध्यात्मिको नेयनीतार्थेनावगन्तव्यो वक्ष्यमाणो स समयो ऽस्यास्तीति समयी गुरुरादौ सम्यग्वज्रा
कारेण सेवनीयः ॥ उत्तमकलत्रादिभिराराधनीय इत्यर्थः ॥ वज्रयानाभिरूढ इति ॥ इह वज्रयानं सम्यक्संबुद्धयानं ॥ तीर्थिकश्रावकप्रत्येकबुद्धयानानामभेद्यत्वात् वज्र
मोक्षोपायते इनेनेति वज्रयानं ॥ तस्मिन्नाधिरूढो वज्रयानाधिरूढ इति ॥ तत्त्वध्यायी इह तत्त्वं द्विधा लौकिकसिद्धिसाधनं सम्यक्संबुद्धत्वसाधनमिति वक्ष्यमाणो व
कश्च परमाक्षरज्ञानसिद्धौ पंचमे ज्ञानपटले ॥ तदेव तत्त्वं ध्यातुं शीलमस्येत्यर्थः ॥ अलुब्ध इति सर्वउत्तमकलत्रादि स्वशरीरनिरपेक्ष इति ॥ अपगतकलुष इति ।
रागद्वेषमोहमानईर्ष्यामात्सर्यसमूहः कलुषं ॥ तदेव विविधप्रकारेणापगतं यस्य सोऽपगतकलुष इति ॥ क्षान्तिशील इति ॥ क्षान्तौ फलनिरपेक्षा स्वाभाविकी
प्रवृत्तिरस्य ॥ अध्ववर्ती अध्व सम्यक्संबुद्धमार्गः ॥ तत्र वर्तन इति । असौ गुरुराराधितः सन् शिष्याणां मार्गदानान्नरकभयहरो भवति ॥ नच तो ब्रह्मचारीयः परमाक्षरसु
खप्राप्तो माराणां स्कन्धक्लेशमृत्युदेवपुत्रमाराणां चतुर्णां वज्रदण्ड इव वज्रदण्डः ॥ स च धरणीतले वज्रसत्त्वः प्रसिद्धो निर्मितकायेनेति वज्राचार्यसेवानियमः ॥ ॥

मानी क्रोधाभिभूतो समयविरहितो द्रव्यलुब्धो ऽश्रुतश्च शिष्याणां वंचनार्थी परमसुखपदे न प्रचिन्तो न शक्तः ॥ भो
गाशक्तः प्रमत्तः सकटुकवचनः कामुकश्चेन्द्रियार्थे शिष्यैः संबोधिहेतोर्नरकमिव बुधैर्वर्जनीयः स एव ॥ २ ॥

इदानीं दुष्टाचार्यदोषपरीक्षार्थं इह तृतीयवृत्तेनैवाह । मानीत्यादिना ॥ इह मंत्रनये मानादिदोषसहितो गुरुर्यः स गुरुः शिष्यैर्वर्जनीयः ॥ कुतोऽपि गुरुः सम्यक्संबोधि
हेतोर्नरकमिव बुधैः पण्डितैरिति ॥ मानो ऽस्यास्तीति मानी ॥ मानो ऽप्यनेकधा ॥ पण्डिताभिमानः ॥ द्रव्यैश्वर्याभिमानः ॥ दशतत्त्वपरिज्ञानमार्गरूपाद्यभिमानः ॥ समयस्यास्ति

स वर्जनीयोऽबोधः सत्वान् पश्यन्निति मानीऽज्ञमोत्तमसत्वान् पश्यन्नुमानरहितो भवति॥ सम्यक्मार्गं वेत्तीति॥ तेन मानी करुणारहितो वर्जनीयः॥ तथा क्रोधेनाभिभूतः समयविरहित इति॥ यो कलुषितैस्तु समयैः प्रकटेनाचरितैः समयविरहितो भवति। सोऽपि वर्जनीयः॥ द्रव्यलुब्धोऽपि॥ साधिकतोऽपि कादिगुरुद्रव्योपभोक्ता द्रव्यलुब्धः॥ तथा संसारभोगार्थं द्रव्यसंचयकारक इति॥ अश्रुतश्च इति मूर्खः॥ सन्मार्गोपदेशारहित इति॥ तथा साद्धिष्याणां वंचनार्थमिथ्यावादीति वर्जनीयः॥ परमसुखपदे न स्थचित्तो नासिक्त इति॥ अभिषेकं विना तंत्रदेशक इति वर्जनीयः॥ भोगासक्तो वा स्वसंसारिकभोगेषु आ समन्तात् प्रकारेण संसक्त इति॥ प्रमत्तो मद्यमानेन वर्जनीयोऽसमाहित इत्यर्थः॥ कामुक नष्टेन्द्रियार्थमिति॥ स्त्रीन्द्रियसुखार्थं कामुकश्च वर्जनीय इति तथागत नियमः॥ कुतमंत्रनये तथागतेनोक्तं॥ तद्यथा आचार्यस्य गुणाग्राह्या दोषानैव कदाचन॥ गुणाग्रहणाद्भवेत्सिद्धिर्न सिद्धिर्दोषवाक्यत इति॥ तथाऽभिषेकाय वन्द्योहि वज्राचार्यस्तथागतैः॥ दशदिग्लोकधातुस्थैस्त्रैकाल्यमेव वन्द्यत इति॥ तस्मादाचार्यस्य गुणाग्राह्या दोषानैव कदाचनेति॥ तत्र कुतः॥ यतो गुर्वाराधनायाचार्यस्य दोषगुणपरीक्षा तथागतेनोक्ता॥ तद्यथा निःकृपं क्रोधनं क्रूरं स्तब्धं लुब्धमसंयतः॥ सोत्कर्षणश्च नो कुर्यात् गुरुं शिष्यः सुबुद्धिमानिति॥ अतो वचनात् कृपेऽपि गुरुः कार्य्यकारी शिष्येण मोक्षार्थिना वर्जनीय एव॥ तथाक्लिष्टे॥ यो गृही मठिकाभोक्ता सेवको नागतीवणिक्॥ सद्धर्मविक्रयी मूर्खो वानस वज्रधरोऽस्य वि इत्यादिना त्रिविशेषगुरुराचार्यपरीक्षायामुक्तः॥ दशतत्वपरिज्ञाना त्रयाणां भिक्षुरुत्तमः॥ मध्यमः श्रामणेराख्यो गृहस्थस्त्वधमस्तयोरिति॥ तथा न कर्तव्यो गुरुराता भूमिलाभं विना गृही॥ तत्र श्रुतपरिज्ञानैर्लिङ्गीकर्तव्य एव यः॥ भूमिलाभं विनाचार्यो गृहस्थः पूज्यते यदा॥ तदा बुद्धश्च धर्मश्च संघोगच्छन्त्यगौरवं॥ तथा विहारादेः प्रतिष्ठाद्यं कर्तव्यं लिङ्गिना सदा॥ सत्सु त्रिष्वेकदेशे च न गृहिणा श्वेतवासिना इति॥ एवमनेकप्रकारेणाचार्यपरीक्षायां भगवतोक्तो गुरुः॥ शिष्ये

गराधनीय इति ॥ पूर्वोक्तनियमः ॥ दोषदुष्टस्य च वर्जनार्थं ॥ तत्र गुणाः उक्ताः ॥ तद्यथा ॥ धीरो विनीतो मतिमान् क्षमावान् आर्जवोऽशठः ॥ मंत्रतंत्रप्रयोगज्ञः कृ
पालुः शास्त्रकोविदः ॥ दशतत्त्वपरिज्ञाता मण्डलालेख्यकर्मणि ॥ मंत्रव्याख्याकृदाचार्य्यः प्रसन्नात्मा जितेन्द्रियः ॥ इत्यादिना किंचित्किंचित् परगाथयोक्तं वचनं
विचार्यते ॥ अभिषेकाग्रलब्धो हीत्यादिवचनं ॥ परमार्थसत्येन लौकिकसत्येन नीतार्थेन नेयार्थेनावगन्तव्यः ॥ परिगृहीते इति ॥ अत्र नीतार्थस्तावदुच्यते ॥
इह कल्पराजस्थप्रज्ञाज्ञानाभिषेकाणां मध्ये महामुद्राप्रज्ञापारमितामहाक्षरसुखक्षणानामर्ज्जितो ऽभिसंबोधिलक्षणो ऽद्वयः ॥ स येन भगवता बोधिमूले लब्धो
सो ऽभिषेकाग्रलब्धो हि यस्मात्तस्मात् कायवाक्चित्ताभेद्यत्वाद्वज्राचार्यः शाक्यमुनिस्तथागत इति ॥ इह त्रैधातुके सत्त्वार्थं प्रति यस्य कायवाक्चित्तमभेद्यं वज्रवदाचरति
स वज्राचार्यः सर्वगः सर्वज्ञ एव ॥ स च तथागतैर्दशदिग्लोकधातुस्थैरिति ॥ इह दशसु दिक्षु ये बोधिसत्त्वास्तेषां स्वकुलाः सप्तरत्नमयानां प्रार्थेन लोकधातव उच्यन्ते ॥
तेषु स्वकुलेषु ये तथागताः कुलत्रयस्वरूपेणावस्थितास्ते दशदिग्लोकधातुस्थास्तेन बोधिसत्त्वास्त्रैकाल्यमागत्य भगवतो वन्दनां कुर्वन्ति ॥ तैर्वन्दनां कुर्व
द्भिर्मौलिस्थितैस्तथागतैः पंचस्कन्धैरपि वन्द्यते तथागत इति भगवतो नीतार्थः ॥ तथोपचारेण नेयार्थ उच्यते ॥ इह यथा बाह्ये तथा देहे इति वचनात् ॥ लो
कधातुशब्देन दशसु दिक्षु स्थितानां शिष्याणां शरीराण्युच्यन्ते ॥ अधो भूमिगृहे स्थितानि ॥ ऊर्द्धे त्रिपुरप्रासादे स्थितानि ॥ तेषु पञ्चस्कन्धास्तथागता उच्यन्ते
एवं लोकधातुस्थास्ते च शिष्यास्त्रिसन्ध्यमागत्य गुरोर्वन्दनां कुर्वन्ति ॥ तैर्वन्दनां कुर्वद्भि पंचस्कन्धैरपि वन्द्यते गुरुरिति नेयार्थः ॥ इह त्रिकालं भिक्षुभिः काषायधा
रिभिर्वज्राचार्यो वन्द्यते न गृही नवकः सद्धर्मव्याख्यानेन विना ॥ तद्यथा ॥ सद्धर्मादीन् पुरस्कृत्य गृही वा नवकोपि वा ॥ वन्द्यो ग्रन्थधरैर्बुद्ध्या लोकाः वर्त्तान [illegible] तस्मै
तथा आसनदानमभ्युत्थानमर्धक्रियादिगौरवं ॥ सर्वमेतद्भूतं कुर्यात् त्यक्त्वा ऽसत्कर्म वन्दनामिति ॥ इह यदि गृही नवकोपि वा भिक्षुवज्राचार्यगौरवत्यो भ

वति ॥ तदा किं सत्कर्म पादप्रक्षालनादिकं पश्चाङ्गवन्दनां नत्वा स्वस्थाने गुरोरागतस्यार्थादि गौरवं कर्तव्यं व्याख्यानकाले सद्धर्मादीन् उरस्कन्ध वन्दनाक
र्तव्या लोकावध्यानहानये ॥ इह लोकावध्यानं यत् गृहस्थचेल्लकानां तत्कौशीद्यत्वेनोचरलिङ्गग्रहणात् प्रातिमोक्षाद्युत्पादे तानेन यदि कौशी भाभि, मानो
नास्ति ॥ तदा किमर्थं प्राग्भिक्षुसंवरं ज्ञात्वा पश्चान्महायानं ज्ञानत्यमिति हेवज्रादिके भगवतो वाक्यं न कुर्वन्ति ॥ तस्मात् गृहस्था नार्या भिक्षुभिर्नाराधनीया भि
क्षौ वज्रधरे सति ॥ राताउनः सर्वप्रकारेण नाराधनीया इति ॥ तथाचार्यपरीक्षायां भिक्षुपात्रकवस्त्रेण तज्ज्ञायस्य गुराजनः ॥ वन्द्यः पूज्यः सद्गुणानां वो
क्षानां न सर्वार्गिणामिति सम्बन्धः ॥ रक्ताम्बरं यदा दृष्ट्वा द्वेषं गच्छन्ति पापिनः ॥ ये च धर्मरता बौद्धास्तथा श्वेताम्बरप्रिया इति ॥ इह बौद्धदर्शने सर्व मानन्दको
पटं ॥ तथा मञ्जुश्रीविषये विहारे यदा भिक्षुश्चेल्लको वा पाराजिकमापद्यते तदा उत्क्षवस्त्रं दत्वा काषायं गृहीत्वा विहारान्निर्धार्यते ॥ वज्राचार्योऽपि सं
त्रिविहारात् राज्ञो नियमेन ॥ इह पुनः सर्वविषये कथं काषायधारिणा श्वेताम्बरधरो गृहस्थो गुरुर्विहारादि प्रतिष्ठाकर्ता महानयं याः भवः सधि ॥ महती मत्विषं
विवेकविकलता सौगतानां ॥ यदमी अपराधदशापन्ना नाराधयन्ति ॥ सत्यपि भिक्षुवस्त्रधरे ॥ तस्मात्सर्वप्रकारेण परीक्षयित्वा गुरुः सेवनीयो दोषरहितः ॥ दोषयुक्तो
वर्जनीय इत्याचार्यपरीक्षाप्रकथननियमः ॥

गाम्भीरोदारचित्तो गुरुनियमरतस्त्यागशीलो गुणाढ्यो मोक्षार्थी तन्त्रभक्तो ह्यपपरहस्यो तन्त्रतत्त्वे ऽति उग्रः ॥ अध्यानां
संगतक्षः सुनिपुणतायुक्ताग्रा स्वशिष्यः स एव प्रज्ञासेकादिहेतोरपर इति पुनर्मध्यमः पुराणहेतोः ॥

यदा जे ज्ञाता नाभिषेकार्थं सिद्धिध्यलक्षणमुच्यते ॥ गंभीरोदारादिना ॥ इह मंत्रनये शिष्यो द्विधा एको मन्त्रज्ञासिद्धिसाधनार्थी द्वितीयो लौकिकसिद्धिसाधनार्थी । योग्याउ



द्धासिद्धिसाधनार्थी स भूत्स्वतां मार्गभावनार्थं सेकेन संग्राह्य सकलतत्त्वसादिकेन योऽसौ लौकिकसिद्धिसाधनार्थी समन्तभद्रामरगुलवत्कभावनार्थं सप्ताभिषेकेण संग्राह्यो म
ध्यमः प्रशमहेतोरिति ॥ अधमोभिषेकेण संग्राह्यो न भवति ॥ मउपासकाशिक्षया संग्राह्य इति नियमः ॥ गृहगम्भीरो परधर्मे भ्रमता कल्याणान्मके चित्तेभस्य स गम्भीरो दार
चित्त इति शिष्योत्तमः ॥ गुरुनिमग्नरत श्रुतर्दया मूलापातिरहित ॥ दशाकुशल धर्मरत इति ॥ त्यागशील इति सर्वसंगविवर्जितो द्रव्यादिनिरपेक्षक इति ॥ शरणागत इति रत्न
त्रयेश्राद्धः ॥ मोक्षार्थीति लौकिकसिद्धिनिरपेक्षक इति ॥ तन्त्रभक्त इति ॥ तन्त्रोक्त सम्वरपरिपालक इति ॥ अचपल हृदय इति ॥ लौकिकमार्गे हृदयं न चाल्यते यस्या
सावचपपल हृदय इति ॥ सर्व्वतत्वे ऽवितथ इति तत्र्वेतत्वे यावत्तत्वतोऽभावो न भवति तावद्धर्त्रो ऽवितथ इति ॥ दुष्टानां सङ्गवर्जित इति ॥ गृहधनार्थिनो येऽत्र गृहस्थाचार्याः
तभालमस्थितोऽपि एकप्रज्ञ ते न मठविहारोपभोगिनस्ते दुष्टा तेषां सङ्गो दशाकुशलपथः सन्त्यस्यासौ दुष्टानां संगनष्ट इति ॥ इत्थंभूतो महाशिष्यः स्त्रनिश्रगात्वहृगा
तत्वविदप्रज्ञासेकादिहेतोः संग्राह्यः ॥ आदिशब्दाच्चतुर्थाभिषेकहेतोः स एव ॥ अपरो मध्यमः पुनः प्रशमहेतोः संग्राह्यो मध्यमस्तेनोक्तः सप्ताभिषेकहेतोः ॥ अध
मः पुनः पञ्चशिक्षापदहेतोः संग्राह्यो मद्भिर्वाराधनं करोति न विहेठयतीति भगवतो नियमः ॥ इति शिष्यपरीक्षानियमः ॥ ॥

चैत्रान्ते श्वेतपर्वे परहितगुरुणा मण्डलं वर्तयित्वा देयाः सप्ताभिषेकाः कलुषमलहराः प्रशमहेतोः सुतानां ॥ पूजा वै
योगिनीनां सकलगणविधेर्देशनीया निमित्तं पूजाभावे ऽवद्यमेकं नहि भवति गुरोर्देशनानन्त्रराजे ॥ ५ ॥

इदानीं तत्राचार्यस्य मण्डलवर्तनाया भिषेकदानाय तन्त्रदेशनार्थं योगिनीनां पूजाकरणाय शुक्लपर्व नियमो भगवतोक्त दिनन्यते ॥ चैत्रान्ते इत्यादिना ॥ इदार्य

विषयेषु॥ कस्मिन्निर्भगवान् वैशाखपूर्णिमायामरुणोदये ऽभिसंबुद्धः॥ अतः प्रतिपदादि पंचदशकलावसाने कृष्णप्रतिपत्प्रवेशे ततो धर्मचक्रं प्रवर्तयित्वा मा
नत्रयदेशनां कृत्वा द्वादशमे मासे चैत्रपूर्णिमायां श्रीधान्यकटके धर्मधातुवागीश्वरमण्डलं षोडशकलाविभागलक्षणं तदुपरि श्रीमान्नक्षत्रमण्डलं षड्विभागिक
मादिबुद्धं विस्तारितमिति॥ कथं नक्षत्रमण्डलमिति ज्ञायते उच्यते॥ इह चैत्यवासे येनाष्टाविंशन्नक्षत्रविंशत्या जम्बूविग्रहस्तम्भाश्चतुर्षु दिशासु सप्तसप्ताकाभे
देनावरोपिताः॥ पूर्वे विष्णुनाऽतीताः॥ दक्षिणे कार्तिकेयेन॥ पश्चिमे ब्रह्मणा॥ उत्तरे शंकरेणानीता इति॥ तेन चैत्यवासेन नक्षत्रविभक्तेन चैत्यगर्भमण्डलं श्रीमा
न्नक्षत्रमण्डलमिति॥ एवं चतुर्विंशतिकक्षपक्षकलाभेदेनापरं पातालमण्डलं षोडशविभागिकं कायवाक्चित्तमण्डलात्मकं षोडशशून्यपादकक्ष्यावेष्टिता इति
मण्डलस्थाननियमः॥ तत्रस्थाने तस्मिन्नेव दिने बुद्धाभिषेकं दत्त्वा देवासुरादयोऽभ्यर्च्य व्याकृतानागतेनानागते ऽध्वनि तेनास्यां पूर्णिमायां तं भागतनियमः॥
कालचक्रे वज्राचार्याणां बभूव इति॥ चैत्रादौ श्वेतपर्वे प्रत्यहं सप्तरूपाणां मण्डलं वर्तयित्वा देयाः सप्ताभिषेकाः कलुषमलहराः उपायहेतोः सत्त्वानामिति॥ इहसप्तभमंस
प्ताभिषेकमनप्रवृत्त्यर्थं मंत्रनादमण्डलं तच्चक्रस्य भावनार्थं तेन पुण्यसम्भारः॥ तस्मात्पुण्यसंभारहेतोः सप्ताभिषेका देया इति॥ अहिंसादि पंचविंशव्रतानि देयानि॥
ततो ज्ञानसम्भारार्थं उत्तराभिषेकत्रयं देयं॥ स्वमांसादीष्टतरदानाद्यर्थं सर्वाकारवरोपेतशून्यताभावनार्थं बोधिचित्ताक्षरार्थं तेन ज्ञानसम्भारः॥ तस्माज्ज्ञानसम्भारहे
तोरुत्तराभिषेका देयाः॥ ते चतुर्थाभिषेकेण सहिताः॥ चतुर्थं उपदेशेन वक्तव्यमिति भगवतो नियमः॥ एवं चैत्रपूर्णिमां प्रभृतः कृत्वा द्वादशपूर्णिमासु वज्राचार्येणा
भिषेका देयाः प्रतिमादीनां प्रतिष्ठा कर्तव्या तथान्यस्मिन्नपि दिने शुभनक्षत्रयोगसहिते कर्तव्या इति॥ सेकादिनियमः॥ इदानीं कालचक्रदेशनार्थं योगिनीपूजा
नियम उच्यते॥ चैत्रपूर्णिमायां मण्डलं वर्तयित्वा योगिनीनां खानपानादिना पूजा कर्तव्या॥ मण्डलालेखनाभावेऽपि वासकलशगणनिधेः॥ तंत्रराजस्य देशनार्थं अं

था सामग्रीवशात् पूजाऽभावो भवति चैत्रपूर्णिमायां ॥ तदाद्येकं देशनाभावः तन्त्रराजे गुरोर्वज्राचार्यस्येति ॥ अथ पूजाऽभावे जाते सति कश्चिद्योग्यः शिष्यः श्रुतार्थस्तदा सद्वादशपूर्णिमासु योगिनीपूजां कृत्वा शृणोतीति ॥ तस्य पुण्यसंभारेणान्येपि शृण्वन्ति ॥ इह योगिनीपूजा वा सर्वविघ्नोपशमनार्थं सदाष्टम्यां चतुर्दश्यां यथाविभवतः कर्तव्या ॥ भूतादीनां प्रत्यहं बलिदानमेव च पूजा मण्डलादिकं कर्तव्यमिति गृहस्थानां धनिनां नियमः ॥ अवधूतशिष्याणां पुनः पूजानियमो नास्ति तेभ्यो देशनां प्राति ॥ योगेऽपि नियमो नास्ति यस्मादासयग्राहका बुद्धा वज्रयोगिन्यश्च न पूजादिवस्तुग्राहका इति ॥ तत्र देशनापूजानियमः ॥

सेकार्थं भूपरीक्षां वनपुरनिगमे ग्रामके दिग्विभागं ज्ञात्वाचार्यः समस्तं त्वशुभशुभफले शान्तिकाद्यं प्रकुर्यात् ॥
कुण्डानां लक्षणं वै सकलशरजसां होमकीलादिकानां शिष्याणां संग्रहं यन्त्यरस जिनपतेर्मण्डलालेखनं च ॥ ८ ॥

इदानीं सेकार्थं भूम्यादिलक्षणमुच्यते ॥ इह तन्त्रे यद्भूम्यादिकं गृहीतं वक्ष्यमाणे वक्तव्यं तत्समस्तं शुभाशुभकर्म कृत्वा पश्चाच्छान्तिकाद्यं कुर्यादिति वज्राचार्यः शिष्याणां संग्रहं यत्नमण्डलालेखनं च ज्ञात्वा कुर्यादिति नियमः ॥ परिज्ञानाभावात्कुर्वतो दुष्टाचार्यस्य नरकगमनं भवति द्रव्यलोभेन परवञ्चकस्येत्याचार्यत्र शासनं वृत्तं ॥ सेकार्थं भूपरीक्षामित्यादि सुबोधम् ॥

भूमेर्जातिश्चतुर्धा भवति गुणवशाच्छूद्रविड्राजविप्राः कृष्णा पीता च रक्ता शशधरधवला वर्णतो वेदितव्या ॥ पूतिक्षा-
राज्ञगन्धा भवति वसुमती दिव्यगन्धा क्रमेण अम्लाक्षारा च भूर्द्धी समधुककटुके विह्नरूपेऽन्या द्विजातिः ॥ ९ ॥

इदानीं भूमिलक्षणमुच्यते ॥ भूमेरित्यादिना ॥ इह लोकव्यवहारेण वस्तूनां जातिश्चतुर्धा सा चतुर्वर्णानां वेदितव्या शूद्रादिना कृष्णवर्णादिना इति ॥ अत्र लोकसंवृत्या कृष्णवर्णा भूमिः शूद्री पीता वैश्या रक्ता क्षत्रिणी श्वेता ब्राह्मणीजातिः ॥ तथा गन्धतः पूतिगन्धा शूद्री क्षारगन्धा वैश्या पद्मगन्धा क्षत्रिणी दिव्यगन्धा ब्राह्मणीजातिः क्रमेणानभा रसतः ॥ अम्लक्षारास्वादेन शूद्री ॥ समधुरकटुकेति मधुरास्वादेन विड्जातिः ॥ कटुकास्वादेन नृप इति क्षत्रिणी ॥ अन्त्योरसतिक्तः कषायो द्विजातिरिति स्वादतो जातिनियमः ॥

श्वेता शान्तौ च पुष्टौ भवति घननिभा मारणोच्चाटने च रक्ताकृष्टौ च वश्ये वरकनकनिभा स्तम्भने मोहने च ॥ सर्वस्मि
न्कर्मभागे भवति हि हरिता पंचमी चान्त्यजातिः सर्वस्वादा च गन्धा समस्तलक्षणा निधियोगिना वेदितव्या ॥ ८ ॥

१६६

इदानीं शान्त्याद्यर्थं भूमिमाह ॥ श्वेतेत्यादि ॥ इह शान्तिके श्वेता भूमिः पुष्टौ च ॥ कृष्णवर्णा मारणे उच्चाटने च ॥ रक्ता आकृष्टौ वश्ये च ॥ पीता स्तम्भने मोहने स्यादिति ॥ चकारान्निर्विषादिकेऽपि म भा क्रमेणानियमः ॥ इह सर्वस्मिन्कर्मभागे हरिता भूमिः सर्वकर्मकरी भवति पञ्चमी चान्त्यजातिः ॥ सर्वस्वादा सर्वगन्धाः सकललक्षणानिधिः सा काशा धान्वलक्षणा योगिना वेदितव्येति भूमिलक्षणनियमः ॥ इह यदीदृशी भूमिलक्षणनियमः ॥ शान्तिकाद्यर्थं तदा न सर्वत्र वनपुरादिदिग्विभागे श्वेभिर्लक्षणैरुक्ता भूमिर्भवति ॥ तेन मूलतन्त्रे भगवतोक्तं ॥ इह यत्र मण्डलादिकर्मकर्तव्यं तत्र यदि कर्मानुरूपतो भूमिर्न भवति ॥ तदास्य निखनित्वा उदकान्तं शिलान्तं वा खनेत् ॥ ततोऽपरमृत्तिकया खानिं पूरयेत् ॥ कर्मानुरूपतः ॥ अत्र शान्त्यर्थं श्वेतमृत्तिकां चन्दनोदकेन भावयेत् ॥ रक्तमृत्तिकां पद्मोदकेन रक्तचन्दने

नोदेकेन भावयेत्॥ पीतमृत्तिकां खराश्वमनुष्यमूत्रेण भावयेत्॥ कृष्णमृत्तिकां घृतमांसतोयेन भावयेत्॥ रसास्वादनार्थं कृष्णायां लवणाम्बु क्षेपयेत्॥ पीता-
मातुलुं॥ रक्तायां त्रिकटुकं। श्वेतायां तिक्तकषायश्चेति। हरितायां सर्वकर्मकरत्वान्न किंचित् क्षेपणीयं॥ तथा भूमिगर्भे निधापनीयं॥ कृष्णायां माषा क्षिप्ता
रणिका कपिच्छो च्छादने॥ विशेषे खरास्थीनि पीतायां शोधने मेषशृङ्ग स्तम्भने हरितालं मोहने सर्प रक्तायां वश्ये गोरोचनं॥ आकृष्टौ हिंगुलं क्षोभे मनःशिलां
श्वेतायां शान्तौ स्फटिकं। उच्चाटने शंख। ज्वरापहरणे पारदेस्थापना इति॥ हरितायां न किञ्चिदपि क्षेपणीयं इति॥ अथ हरितायां साधारणं सार्वकर्मिके कार्ये तद
पञ्च रत्नानि भूमिगर्भे निधापयेत्॥ श्वेतरक्तायामपि सर्वकर्मणि क्रूरद्रव्याणि वर्जयेत्॥ सर्वकर्मशब्देन शान्तिकादिवश्यादिषट्कर्मणि॥ न मारणादिवी-
द्वेषणादिषट् इति भूमिपरीक्षाक्रियानियमः॥

ऐशान्यां चोत्तरे वै भवति अविरतो शान्तिकं पौष्टिकं च आग्नेय्यां पूर्वभागे प्रकटितनियतं मारणोच्चाटनं च॥ नैरृ-
त्यां दक्षिणे च स्फुटमपि सततं वश्यमाकर्षणं च वायव्यां पश्चिमे वै परमनरपते स्तम्भनं मोहनं च॥ ६ ॥

ईशानी शान्तिकाद्यर्थं दिग्विभाग उच्यते॥ ऐशान्यामित्यादिना॥ इह सामान्यग्रामे ग्राम वा ऐ ऐशान्यां शान्तिकं पौष्टिकं ज्वरापहरणं वा कुर्यात् उत्तरेऽपि वा॥ महाराजवा-
स्याद् नगरप्रदिक्षु शवदहनादि श्मशाननाशकं तेन शान्तिकं पौष्टिकं न सिध्यति॥ तेन राजगृहस्य ऐशान्यामुत्तरेण वा शान्तिकं पौष्टिकं कर्तव्यं॥ शेषकर्माणि ग्रामवत्
वासे राजधान्यामिति शान्तिपौष्टिककर्मनियमः॥ तथाग्नेय्यां मारणं पूर्वे विद्वेषोच्चाटनं॥ नैरृत्यां वश्यं दक्षिणे आकृष्टिः॥ स्तोभनं॥ वायव्यां मोहनं॥ पश्चिमे स्तम्भनं कीलनं
चेति॥ ग्राममध्ये सार्वकर्मिकमण्डलं कुण्डं होमं च कुर्यादित्यन्ताः इति दिग्भागे कर्मकरण नियमः॥ ६ ॥

कुण्डं ग्रामाष्टदिक्षु प्रभवति नियतं वर्तुलं चाग्निकोणं अर्द्धेन्दुं पंचकोणं प्रह्लातिरणवशात्सप्तकोणं त्रिकोणं ॥ षट्कोणं
चाष्टकोणं भवति कुलवशात् गर्भचिह्नं च तेषां पद्मं चिह्नं चकर्त्री त्वसि विशिखिरिति वज्राङ्कुशं शृंखला हि ॥ १० ॥

इदानीं शान्त्यादिकुण्डमुच्यते ॥ कुण्डं ग्रामाष्टदिक्षु ऐशान्यादिषु यथाक्रमेण शान्तौ वर्तुलं कुण्डं पुष्टौ चतुरस्रं मारणे ध्वजाकारं विद्वेषे पंचकोणं । वश्ये सप्तकोणं । आकृष्टौ त्रिकोणं मोहने षट्कोणं स्तम्भने चाष्टकोणमिति ॥ एषां लक्षणं च वक्ष्यमाणे होमविधौ विस्तरेण वक्तव्यमिति ॥ इदानीं कुण्डचिह्नमुच्यते ॥ इह वृत्तकुण्डमध्ये तु कर्णिकायां चिह्नं पद्मं ॥ चतुरस्रे चक्रं ॥ ध्वजाकारे कर्त्री ॥ पञ्चकोणे खड्गः ॥ सप्तकोणे वाणः ॥ त्रिकोणे वज्राङ्कुशः ॥ षट्कोणे मोहने सर्पः ॥ अष्टकोणे शृंखलेति ॥ अत्र कुण्डद्वये चिह्नविपर्यासः छन्दोवशादिति चिह्ननियमः ॥

एकं ह्यर्द्धैकहस्तं रसयुगविनयनं खाग्नियवर्वाङ्गुलैः स्यादर्द्धांशाष्टभागा द्विहस्तरविभागेन खानि श्ववेदी ॥ उच्चा श्वि
त्रावलीस्या उपरि कुलवशा वेदिकायाः समन्ता वेदीवासे ऽन्नपत्राणपि कुलं नृपते शान्तिपुष्ट्योर्न चान्ये ॥ ११ ॥

१८

एषां प्रमाणमाह ॥ एकेत्यादि ॥ एकहस्तं वृत्तं द्विहस्तं चतुरस्रं ॥ अर्द्धहस्तं ध्वजाकारं । वज्रप्रमाणं पंचकोणं ॥ चत्वारिंशदङ्गुलं सप्तकोणं ॥ त्रिंशदङ्गुलं त्रिकोणं । षट्कोणं विंशदङ्गुलं ॥ षष्ट्यङ्गुलमष्टकोणं कुण्डानामानि खानिः कुण्डे षड्विभागिका वेदिः ॥ कुण्डद्वादशभागिकमोष्ठं । चेत्रावलीच वेद्याः समन्ताद्वासे ऽन्नपत्राणि शान्तिपुष्ट्योः शेषकर्माणि वेदीवासे ऽन्यदन्नमुच्यते ॥ ११ ॥

वज्रं वा सर्वकर्मस्वपि भवति महीकीलकश्चाष्टभेदैर्न्यग्रोधाश्वत्थकाष्ठान्नृप खदिरजं स्तंभन बिल्वार्कजं च ॥ एवं स्फा-
टिककुम्भा वररजतमयाः श्रीकपालायसाश्च ताम्राख्या हेमकुम्भाः प्रकटितनियता दारुजाः कर्मजाश्च ॥ १२ ॥

वज्रं वा विन्नं सर्वकर्मणि ज्ञेयमभ्येत्तानव्यं ॥ इदानीं भूमिकीलनार्थं कीलका उच्यन्ते ॥ इह शान्तिके न्यग्रोधकीलका दशादि कीलनार्थं पुष्टौ अश्वत्थः ॥ मारणेऽस्थिमयाः ॥ उच्चाटने आयसाः ॥ वश्ये खदिरजाः आकृष्टौ चूतजाः ॥ मोहनेऽर्कजाः ॥ स्तम्भने बिल्वजाः ॥ इति कीलकनियमः ॥ सार्वकर्मिके उदुम्बरजाः ॥ इदानीं कलशा उच्यन्ते शान्तिके स्फाटिककलशाः ॥ पुष्टौ रौप्याः ॥ मारणे मानुषकपालाः ॥ उच्चाटने विद्वेषे आयसाः ॥ वश्ये सौवर्णाः ॥ आकृष्टौ ताम्राः ॥ स्तम्भनेऽश्ममयाः ॥ मोहने दारुजाः ॥ दशकलशा इति ॥

वृत्ता पञ्चाङ्गुलोक्ता क्षितिशशिनदशके नोच्छ्रिता मुकुलोष्ठाः षड्वाष्टाङ्गुलास्याः शरावधरधवलाः शान्तिपुष्ट्योर्नवान्ये ॥
पूर्वाह्णादष्टयामाः प्रातिदिनसमये शान्तिपुष्ट्यादिके स्यु रेवं तत्राद्ययामैर्दिननिशिसमये चाष्टकर्म प्रकुर्यात् ॥ १३ ॥

अथ शान्तिपुष्ट्यर्थं घटलक्षणमुच्यते ॥ इह कलशगर्भवृत्तेन पञ्चाङ्गुला उक्ताः ॥ षोडशाङ्गुला उक्ताः ॥ क्षितिशशिनदशके नोच्छ्रिता उन्नत्यधः कलशगर्भात् मुखोष्ठानां विंशत्यङ्गुला उच्छ्रयेणेति ॥ मुकुलोष्ठा इति मुकुलावोष्ठौ यथा मानौ येषां ते मुकुलोष्ठा मुखादवधेः ॥ षडङ्गुला ग्रीवाः ॥ अष्टाङ्गुलास्याः ॥ ओष्ठानादोष्ठान्तमुखमष्टाङ्गुलं ॥ अष्टांगुलं भागत्रयं कृत्वा भागद्वयेन कण्ठार्धं भागैकेनोष्ठद्वयायामः ॥ तेन शरावधरधवलाः शान्तिपुष्ट्योर्न चान्ये घटाः स्युरिति ॥ स्फाटि-

करीष्यकलशानामभावे मृन्मया अकाल मूलकलशाः ॥ शान्तिदिष्टेन चन्दनेन वा लिप्य धवलाः कर्तव्याः ॥ तथामृततंत्रेपि भगवतोक्तं ॥ मारणे नरकपालानि ;
श्मशानाङ्गारचूर्णेन नरवशायाल्लिप्य कलशानि कारयेत् इति ॥ उच्चाटने विद्वेषे वा धूम्री वा ॥ अष्टाङ्गुलवक्त्राः ऊर्ध्वभाङ्गादधोन द्वादशाङ्गुलाः ॥ उच्छ्रयेणा चतुर्वि
शत्यङ्गुला अङ्गुष्ठैकोष्ठाः षडङ्गुलास्या इति वश्यकर्मणोय धात्रीकृतिना घटिता लोकव्यवहारे रीतिः ॥ तन्मनैरववोदृतोच्छ्रयेणाङ्गुलाः ॥ षोडशाङ्गुलाः
चतुरङ्गुलग्रीवाः ॥ षडङ्गुलास्याः स्थूलोष्ठा अङ्गुष्ठद्वयेनेति ॥ कलशनियमः ॥ सर्वकर्मणि शान्त्यादि वश्यादि कर्मसु न्यास्या इति नियमः ॥ ॥ इदा
नीं शान्तिकादिवेलोच्यते ॥ पूर्वाह्नेत्यादिना ॥ ह्यहःप्रतिदिनं पूर्वाह्णाद्यष्टयामाः प्रहराः ॥ तेषु पूर्वाह्न प्रहरे शान्तिकं ॥ द्वितीये पौष्टिकं ॥ तृतीये मारणं ॥ चतुर्थे
उच्चाटनं ॥ पञ्चमे वश्यं ॥ षष्ठे आकर्षणं ॥ सप्तमे मोहनं ॥ अष्टमे स्तम्भनं कुर्यादिति शान्तिकादि प्रहराः स्युः ॥ एवं नक्तार्द्धयामैरिति ॥ पूर्वाह्नार्द्ध प्रहरे शान्ति
कं ॥ अपरार्द्धे पौष्टिकं ॥ एवं सर्वत्रापि ॥ तथा रात्रौ पूर्वार्द्ध प्रहरे शान्तिकं ॥ अपरार्द्धे पौष्टिकमपि कर्माणि कुर्यान्मंत्रीति ॥ यदि वक्ष्यमाणासनं वद्धा प्रहरमे
कहोमं कर्तुं न शक्नोति ॥ तदार्द्धप्रहरमेकहोमं कृत्वा साधयेदित्युभयकथनं ॥ अपरः कालविशेषेणादेवीपूजासाधननियमः ॥ पञ्चमपटले वक्ष्यमाणो वक्त
व्यइति ॥

मध्यान्हेवार्द्धरात्रे दिननिशिसमये शान्तिके वर्जनीये लग्नं क्रूरग्रहस्थं मरणभयकरं तद्द्वयं देवप्रसिद्धं ॥ सधी
रा शान्तिपुष्ट्याः शरशानसमिधो मारणे मातुलास्थि विद्वेषे काकपिच्छान्यपि च खदिरजाः किंशुकाख्याश्च वश्ये ॥ १४ ॥

इदानीं शान्तिपुष्ट्योः क्रूरवेलालग्नप्रतिषेध उच्यते ॥ ह्यहःप्रतिदिनं मध्यान्हे चार्द्धरात्रं च शान्तिके पुष्टिकार्येपि वर्जनीयं ॥ तथादितलग्नं क्रूरग्रहस्थंगत

शानिकानाम्नि ग्रहसहितं वर्जितं ॥ यतो मरणभयकरं ॥ अथ मारणोच्चाटनेतु योजनीयं तदेवेति नियमः ॥ ॥ इदानीं शान्तिकादिषु होमसमिध उच्यन्ते ॥ सक्षीरेत्यादिना ॥ इह शान्तौ पुष्टौ सक्षीरास्समिधः ॥ सरशनेति पञ्चशतसंख्याः ॥ क्षीरवृक्षाणामिति ॥ उदुम्बराश्वत्थन्यग्रोधपर्करीमधूकवृक्षाणामिति ॥ मारणे माषवास्थानिश्परितानि ॥ कनिष्ठाङ्गुलीसंस्थानानीति पंचशतानि ॥ नथा विद्वेषोच्चाटने काकपिच्छानि पंचशतानि ॥ एवं वश्येखदिरजाः ॥ आकर्षे पलाशजाः ॥ ॥

विप्रोक्तार्द्धहस्ताः शरशतगणनाः स्तम्भने मोहने च क्षीराज्याभ्यक्तसास्वेदकबिराशतिलश्लेष्ममय्यादिहोमे ॥ दूर्वा
शस्यं च मांसं सविषमपि तथा राजिकारक्तपुष्पं विल्वैर्निर्माल्यमालागुरुकनककुसुमान्येव पंचादिकेषु ॥ १५ ॥

मोहने उन्मत्तजाः ॥ स्तम्भने विल्वजा इति ॥ अर्द्धहस्ताः । सर्वे प्रादेशाङ्गुलाः कनिष्ठाङ्गुलीप्रमाणो नाङ्गुष्ठं यावत् ॥ न च परिछिन्नाभिकानग्रा स्युः इति शमिधनियमः ॥ इदानीं होमद्रव्याण्युच्यन्ते ॥ क्षीरेत्यादि ॥ इह शान्तिके गोक्षीरेण दूर्वया होमः । पुष्टौ घृतेन पंचसस्यैः ॥ मारणे रक्तेन मांसविषाभ्यां सह । उच्चाटने विद्वेषे नरवशया राजिकालवणाभ्यां सह ॥ वश्ये श्वेतैर्नरक्तकरवीरादिपुष्पैः सह ॥ आकर्षे सूत्रेण विल्वपत्रेणान्नस्य फलसस्येन वा सह ॥ स्तम्भने श्लेष्मणा निर्माल्यमालया सह ॥ मोहने मधेन धत्तूरकपुष्पैः सह ॥ इति शान्तिकादिषु होमद्रव्यनियमः ॥

याम्ये नैरृत्यके च सवरुणपवने यक्षरुद्रे च वह्नौ आचार्यस्यासनं वै भवति नरपते शान्तिकर्मादिके च ॥ रक्तं कर्म त्रये
स्यादपि विदितकमले श्वेतकृष्णार्कपीतं वाह्ये अब्धप्रभेदैः सरयमवरुणे उत्तरे रक्तभूमिः ॥ १६ ॥

इदानीमाचार्यस्यासनदिग्विभाग उच्यते ॥ इह शान्तौ याम्ये आसनं कर्तव्यं ॥ वक्ष्यमाणं पुष्टौ नैरृत्यकोणे ॥ मारणे वारुणे ॥ उच्चाटने विद्वेषे वायव्ये ॥ वश्येमपक्षे ॥ आकृष्यधीशाने ॥ मोहने पूर्वे ॥ स्तम्भने अग्निकोणे इति होमकुण्डासननियमः शान्तिकर्मादिके ॥ इदानीं रजोविधिरुच्यते ॥ इह शान्तिकादौ कर्मण्येकुण्डे वा मण्डले वा मध्ये रजःपातो भवति ॥ शान्तिपुष्ट्योः श्वेतरजः ॥ मारणोच्चाटनयोः कृष्णरजः ॥ वश्याकृष्टौ रक्तं ॥ मोहनस्तम्भनयोः पीतं ॥ सर्वकर्मणि हरितं श्वेतः कृष्णो रक्तो वा पीतो वा हरितसहितं इति ॥ एवं कुण्डे वा मण्डले वा बाह्ये पूर्वे दक्षिणे पश्चिमे उत्तरे ऊर्द्ध्वभेदेनस्म्यारजःपातस्तन्त्रोक्तविधिना भगवतो वक्त्रवर्णभेदेनेति रजःपातनियमः ॥

कुण्डे वा रङ्गभूमिर्भवति जलवशा रङ्गपातश्च भूमिन्यासाद्यं प्रोक्षणाद्यं स्वहृदयकशिरोत्सर्जनं देवतानां ॥ स्फाटिक्या अर्घ्य
पात्रे रसदलकमलं द्वादशाङ्गुष्ठकं च दण्डाग्रेऽब्जस्य पात्रं भवति चतुरङ्गुलकं वाहुती होमकार्ये ॥ १७ ॥ १६९

तथा वक्ष्यमाणक्रमेण न्यासाद्यं प्रोक्षणाद्यं स्वहृदयकशिरोत्सर्जनं देवतानामाचार्येण कर्तव्यमिति नियमः ॥ इदानीमर्घपात्रलक्षणमुच्यते ॥ इह शान्तौ स्फाटिकपात्रमर्घदानार्थं सरावाकृतिः ॥ कचोलाकृतिरित्यर्थः ॥ सर्वं द्वादशाङ्गुलं सकर्णिकाष्टदलात्मकं ॥ एवं स्फाटिकार्घपात्रे वसुदलकमलं द्वादशाङ्गुष्ठकाश्चेति ॥ अत्र चतुरङ्गुला कर्णिका । चतुरङ्गुलान्यष्टदलानि ॥ एवं द्वादशाङ्गुलं ॥ तथा च शुद्धिके रौप्यकपालायसस्सुवर्णानामप्यभावे मृन्मयपात्रेष्वपि विधिरिति ॥ तथा आहुती होमार्थं पात्री स्रुवक उच्यते ॥ इह दण्डाग्र हस्तमात्रदण्डस्याग्रे अब्जस्याकारपात्रं चतुरस्रं चाङ्गुलैकोच्छ्रितं ॥ समन्ततेपमंपमपत्राग्रनसं ओष्ठाभ्यन्तरपार्श्वं वा लेपं च शङ्खकल्पं मध्यभूके छिद्रं घृतधाराया निर्गमार्थं मन्त्रश्चक्रधारा निर्गमवत् ॥ आहुती कार्ये आहुती पात्रीति हस्तमात्रदण्डादिति ॥ मूलतन्त्रे हृदयक्रमतास्त्रपर्यन्तमिति नियमः ॥ त

थादण्डाग्रे होमकार्ये स्रुत्रुकं भवति ॥ उर्णास्थानात् हृदयं यावत् ॥ अखनो वानिर्मद्विभाग इति ॥ तत्रैव षडङ्गुलं परमं करतलमानेति द्व्यर्धहोमश्रुवासां दण्डपृष्ठे वज्रचिह्नमिति होमपात्रनियमः ॥

शान्तक्रूरासकामा भवति जलवशा देवतानां च मूर्तिः एवं कर्मद्वयेस्या प्रकटितनियतो मण्डले चाधिदैवः ॥ पंचाकारो
जिनेन्द्रस्त्रिविधभगवतः स्कन्धधात्वाधिदैव पंचाकारा हि तस्मादपि भवति रजो मण्डले देवतानां ॥ १८ ॥

इदानीं शान्त्यादौ देवतामूर्तिरुच्यते ॥ इह कुण्डे आपि देवता मण्डले नायकश्च शान्तिपुष्टौ शान्तः शुक्लवर्णो भवति ॥ मारणोच्चाटनादौ क्रूरः कृष्णवर्णः ॥ वश्याकृष्टौ सरागो रक्तवर्णः ॥ मोहनस्तम्भनादौ स्तब्धः पीतवर्णः ॥ इति देवतावर्णः ॥ शान्तिकादौ सर्वकर्मणि हरितश्चैव प्रसिद्धितरागमूर्तिरिति देवतानियमः ॥ इदानीं रजोविशुद्धिरुच्यते ॥ पंचाकार इत्यादिना ॥ इह जिनेन्द्रो वज्रसत्वः पंचाकारो हि यस्मात् पंचाकारज्ञानरश्मिस्फुरणात् त्रिविधभगवतः स्कन्धधात्वायतननिरावरणभेदेन ॥ तस्मादपि पंचाकारं रजो मण्डले देवतानां भवतीति रजोनियमः ॥

सूत्रं हस्ताष्टकस्याद्भवति करयेवेकेन वृहत् त्रिवृत्तं आचार्याङ्गुष्ठकेन त्रिविधपथगतं सूत्रमेकं न चान्यत् ॥ पर्य
ङ्कः शान्तिकादौ क्रमपरिरचितं वज्रदैत्योत्कटं च पर्यङ्कार्धं द्विभेदं दगतच्चरणं चासनं कर्मभेदैः ॥ १९ ॥

त्रदानीं सूत्रलक्षणमुच्यते ॥ सूत्रं हस्ताष्टमित्यादिना ॥ इह कन्याकर्तितसूत्रैस्त्रिगुणमेकैः अनेकैः सूत्रं वर्तयित्वा ततस्त्रिवृतं कारयेत् वज्राचार्याङ्गुष्ठयवप्रमाणेन ततदेवा बृहत्तमिति ॥ मण्डलस्याद्विगुणं चतुर्गुणं वा षोडशहस्तं यावत् ॥ आचार्य्यहस्तेन सूत्रमेकं कर्तव्यं ॥ न चान्यत् लक्षणं मण्डले ॥ मण्डलं सदा स्वात्मावि भागेन एक हस्त

मारभ्य यावत्सहस्रहस्तं तावद्भवति तेन सूत्रनियमो मण्डलनियमश्चाचार्यहस्तेन यत्र तत्र क्रियमाणसूत्रमण्डलादिति ॥ तत्रादितो द्वे ॥ चित्तमण्डलं द्वादशहस्तं कुर्या
दिति नियमाच्चतुर्विंशतिहस्तं सूत्रं ॥ एवं वाङ्मण्डलं षोडशहस्तं ॥ कायमण्डलं विंशतिहस्तमिति नियमः ॥ सूत्रं द्विगुणमायाः ॥ न पुनः सहस्रहस्तमण्डले द्विहस्तसहस्र
सूत्रेण सूत्रपातोऽभिधेयोऽनन्तत्वादिति ॥ ननु तत्रान्तरे द्वाविंशतिभागिकसूत्रवृत्तेन दीर्घेण मण्डलाद्विक्रियमाणं कथं वृत्तेन यवमात्रं दीर्घत्वे नाष्टहस्तकमिति क
स्यचिद्वचनं भविष्यति तस्मादुच्यते ॥ इह यदि सर्वस्मिन्मण्डले द्वाविंशतिभागेन वृत्तसूत्रं ॥ तदा तत्र हस्तहस्तमण्डले चत्राष्टभागिकं द्वारं पंचविंशत्याधिकमात्र
हस्तं भविष्यति तस्य विंशतिभागेन षडङ्गुलाधिकषड्हस्तं वृत्तेन सूत्रं भवति ॥ तेन सूत्रेणाद्विसहस्रहस्तेन कोऽसावाचार्यः सूत्रपातं करिष्यति मण्डलभूम्या ॥ त
स्मादिदं वचनं सामान्यमण्डले हस्तमात्रादौ न तद्दीर्घसूत्रवृत्तानियमो भगवत इति ॥ सामान्येन कायो नराणां चतुर्हस्तः तेन कायात्क्रियमाणमष्टहस्तं त्रिविधपथगतं
कायवाक्चित्तनाडीगतमेकत्रीभूतं तेन महत्सहस्रपर्यन्तं सूत्रयेन्मण्डलं ॥ गर्भचक्रारेभ्यः पुनः पुनः सूत्रस्थाने सूत्रपातनेनेति सूत्रविधिनियमः ॥ ॥ ७०
इदानीं शान्त्यादिकर्मसाधनार्थमासनान्युच्यन्ते ॥ पर्यङ्कमित्यादिना ॥ इह शान्तिकादौ क्रमेण आसनानि भवन्ति ॥ तत्र शान्तौ पर्यङ्क इति ॥ वामजानूपरि दक्षिणपादो
गतः ॥ उत्तानक इति पर्यङ्कः ॥ पुष्टौ वज्रासनं सव्यपादो वामोरुमूर्ध्नि वामोऽपि सव्योरुमूर्ध्नि निपस्थानेनेति वज्रासनं ॥ दैन्यमिति दैन्यासनं मारणे ॥ अङ्कुशकारं कूर्मपातव
दिति दैन्यासनं ॥ उत्कटं चेति उच्चाटने विद्वेषे च उत्कटं भवति ॥ भूम्यां द्वौ पादौ समौ स्थाप्यौ पिच्चकमूलतनयो ऊर्ध्वगतं जानुद्वयं ऊरुद्वयं चेत्युत्कटं ॥ पर्यङ्कार्द्धं द्विभे
दमिति ॥ इह यद्यपि वामपादः ॥ पर्यंकवद्दक्षिण उत्कटवत् किञ्चिद्दक्षिणेन प्रसृत इति ॥ आलीढो द्वितीयो भेदः दक्षिणः पर्यङ्कवद् वाम उत्कटवत् किंचिद्वामेन प्रसृत इति पर्य
ङ्कार्द्धद्विभेदस्तु दगतचरणमिति ॥ इह मोहने वामचरणाङ्गुदगतं चरणोपरिस्थितो निषण्णो दक्षिणस्तु उत्कटवदिति ॥ स्तम्भने दक्षिणाङ्गुदगतं चरणोपरिस्थितो निषण्णो वामस्तु

कृष्वदितिअष्टविधासनभेदनियमः ॥ स्फाटिकैर्मौक्तिकैर्वा नरखरदशनैर्वास्थिभिः पुत्रजीवैः पद्माक्षैः शंखमारिष्टैः सुगतउतवशा मंत्रजापे क्षसूत्रं ॥
सौगन्धैः श्वेतपुष्पैः सकटुककषैरो सर्जरसक्तापीनैः शान्तौ विनासधूपो मधुरुधिरयुतो प्यग्रधूपः कषायः ॥ २० ॥

इदानीं मंत्रजापार्थं शान्त्यादीन्यक्षसूत्राण्युच्यन्ते ॥ स्फाटिकैरित्यादिना ॥ इह शान्तौ स्फाटिकमक्षसूत्रं पुष्टौ मुक्ताफलं मारणे नरदन्तकृतं उच्चाटने खरदन्तकृतं वा अस्थि-
भिः कृतं ॥ वश्ये पुत्रजीवाक्षसूत्रं ॥ आकृष्टौ पद्माक्षसूत्रं ॥ अथ रक्तचन्दनबीजैः कृतं ॥ मोहने रिष्टाक्षसूत्रं ॥ स्तम्भने शंखाक्षरुद्राक्ष इति रुद्राक्षैर अक्षसूत्रमिति अभासू-
त्रनियमः सुगतउतवशादिति वक्ष्यमाणो वक्तव्यं ॥ इदानीमर्चनार्थं शान्त्यादिविषयाण्युच्यन्ते ॥ सौगन्धैरित्यादिना ॥ इह शान्तौ पुष्टौ च सुगन्धपुष्पैः श्वेतैर्देवतादीना-
मर्चनं ॥ मारणे उच्चाटने विद्वेषे च सकटुकैः कटुकैः सकण्टकैरिति ॥ वश्ये आकृष्टौ रक्तैः ॥ मोहने स्तम्भने पीतैरिति पुष्पार्चननियमः ॥ ॥ इदानीं धूपा उच्यन्ते ॥ शान्-
इत्यादिना ॥ शान्तिपुष्ट्योः शान्तौ धूपः ॥ शीतांशुरस सिल्हककर्पूरैः धूपो मधुसर्करासहितः ॥ शान्तौ धूप इत्युच्यते ॥ शान्तिद्रवे ॥ तथा मारणोच्चाटने विद्वेषे धूपो रुधिरयुत
इति ॥ वश्ये आकृष्ट्या उग्र धूप इति ॥ उग्रस्तु लाक्षासर्जरसागुरुश्रीवासागुडेन मोदिना उग्रधूप इति ॥ एवं मोहने स्तम्भने च कषायधूपः ॥ हरीतकीचूर्णगुडसहितं क-
षायधूप इति धूपनियमः ॥ ॥ एवं नैवेद्यं शान्तौ दुग्धभक्तं ॥ पुष्टौ दधिभक्तं । मारणे कालजं । उच्चाटने मांसं । वश्ये घृतभक्तं । आकृष्टौ तिलतैलेन भक्तं । मोहने व्यामि-
श्रओदनं । स्तम्भने वराककच्छ मत्स्योदनमिति ॥ एवं शान्तिपुष्ट्योश्चन्दनं विलेपनं ॥ मारणोच्चाटने रक्ताङ्गारेण ॥ वश्याकृष्टौ कुंकुमगोरोचनेन रक्तचन्दनेन वा ॥ मोह-
ने स्तम्भने हरिद्राहरितालेनेति गन्धनियमः ॥ ॥ तथा प्रदीपः शान्तिपुष्ट्योः घृतेन प्रदीपः ॥ मारणोच्चाटनयो नरवसया ॥ वश्याकृष्टौ तिलतैलेन ॥ मोहने स्तम्भने ज्यो-

तिष्मनी तैलेन भक्ष्या तक तैलेनेत्यादिनेति दीपनियमः॥ ॥तथा शान्तौ पुष्टौ अक्षतं शालितण्डुलाः॥ मारणे उच्चाटने राजिकाः॥ वश्याकृष्टौ सर्षपाः स्तम्भने मोहने मसूरिकाः॥ अपरत्र व्रीहिर्वा इति॥ तथा वस्त्राणीति शान्तिपुष्ट्योः सर्वाणि पूजाद्रव्याणि श्वेतानि मारणोच्चाटनयोः कृष्णानि॥ वश्याकृष्ट्यो रक्तानि॥ स्तम्भने मोहनयोः पीतानि॥ सर्वकर्मणि सर्वाणि हरितानीति पूजाविधिनियमः॥

मन्त्रं न्यग्रोधपत्रे चितिमृतकपटे दूर्वाजपत्रेऽर्कपत्रे श्रीखण्डैः शालिपिष्टैः क्षितित्रिभुवनगतैरङ्गारकैर्विषैर्वा॥ काश्मीरैः शान्तपुष्ट्योः स्थिरफलकरसक्तश्शानाऽङ्के लेखनं स्यादुर्वाशीनाङ्गिपिष्टैः कनकखदिरजा लेखनी बिल्वजार्का॥ २१॥

इदानीं शान्त्यादिकर्मणि तत्र मारणमन्त्रस्य लिखनविधिरुच्यते॥ इह वक्ष्यमाणमन्त्रं शान्तौ पुष्टौ न्यग्रोधपत्रे शाञ्दले लेखनीयं॥ शालिपिष्टोदकेन दूर्वाङ्कुरेराणीन लेखन्या पुष्टौ तथा मारणोच्चाटने च श्मशानकर्पटे विषरुधिराङ्गारेण नरास्थिलेखन्या काकपिच्छलेखन्या उच्चाटने॥ वश्याकृष्टौ भूर्जपत्रे कुङ्कुमगोरोचनेन स्वर्णलेखन्या खदिरलेखन्या कृष्टौ रक्तचन्दनेन पिष्टेनेति॥ स्तम्भने मोहने अर्कपत्रोपरि पङ्के पीतवर्णैस्त्रिफलारससहितेन तालकेन हरिद्रया च बिल्वलेखन्या॥ अर्कलेखन्या मोहने चेति नियमः॥ ॥इदानीं यन्त्रप्रतिष्ठापनविधिरुच्यते॥ इह शान्तिपुष्ट्योर्मन्त्रलिखितं यन्त्रादिकं श्वेतसूत्रेण वेष्टयेत्॥ यावत्पत्रं न दृश्यते॥ एवं कर्मविभागेन कृष्णसूत्रेण रक्तसूत्रेण पीतसूत्रेण वेष्टयेत्॥

मन्त्रं देशी कपाले त्रिमधुनि रुधिरे सिक्थबिम्बे च मध्ये साऽऽईस्थाने पवित्रे चितित्रिभुवनगते चाग्निचापे धररामां॥ यन्त्रस्यारोपणं स्याच्छुभमशुभवशान्मन्त्रिणा वेदितव्यं चन्द्रे भे श्वेतरक्ते सपतुरगपशौ कर्मदेहे क्रमेण॥ २२॥

ततः शान्तिपुष्ट्योः सरावसंपुटे स्थापयेत्॥ त्रिमधुनिमग्नमूत्रदुग्धसंमिश्रे ॥मारणे चाण्डालकपाले रुधिरपूर्णे स्थापयेत्॥ अग्नितापे खर्परसंपुटे सिक्थके वेष्टयित्वा
वश्याकृष्टौ॥ स्तम्भनेमोहने हरितालोदकपूर्णे शरावकमध्ये स्थापयेत्॥ सार्द्रस्थाने पवित्रे शान्तिपुष्ट्योः स्थापयेन्मरणक्षोभादि मारणे चाण्डालश्मशानदग्धखानिकानले निधा
पयेत्॥ वश्याकर्षे गोक्षीतले॥ स्तंभनेमोहने भूक्षभस्मानि निधापयेदिति॥ मन्त्रिणाऽशुभशुभकर्मणि फलं वेदितव्यमिति नियमः॥ ॥इदानीं लिखितस्य च
क्रस्य चक्रवाले नियम उच्यते। इह शान्तौ चक्रं वाले चन्द्रमण्डलेन वेष्टयेत्। उद्भूत्स्वरेखयाङ्कुशौ हस्तिना वेष्टयेत्॥ हस्तिदेहे यथा चक्रं भवति॥ मारणे प्रेतदेहे
उच्चाटने उष्ट्रदेहे॥ वश्ये मृगदेहे॥ आकृष्टौ खरदेहे॥ मोहने छागलदेहे मेषदेहे वा ॥स्तम्भने कूर्मदेहे यथा यन्त्रचक्रं भवति तथा वाले रूपं कर्तव्यं॥ ततः पू
र्वोक्तसूत्रेण वेष्टयेदिति॥ एवं विद्यायामपि नियमः॥ शान्तिपुष्ट्योः रौप्यनलिका विद्याया मध्ये स्थाप्या॥ मारणे मानुषास्थिनलिका उच्चाटने काकास्थिनलिका
वश्ये सुवर्णनलिका। आकृष्टौ ताम्रनलिका॥ मोहने लोहनलिका॥ स्तम्भने रीतिकानलिका इति नियमः॥ ॥इह येनैवोच्चाटनं तेनैव विधिना विद्वेषकार्यं कर्त
व्यं॥ येनैव स्तम्भनं तेनैव कीलनं कर्तव्यं॥ किन्तु कीलने शत्रूर्ध्वनेन पंचामृतसहितेन प्रतिकृतिं कृत्वा मदनकण्टकैः षड्भिः कीलयेत्॥ हस्तपादसन्धिषु शेषः सम्भादि
वत्॥ येनैवाकृष्टिस्तेनैव ज्वरोत्पादनं किं तु राजिकालवणैः पुत्तलकं लेपयित्वा अग्निना संतापयेत्॥ येनैव शान्तिकं तेनैव उग्रदृष्टिविषापहरणं चेति॥ द्वादश
कर्मविधिं ज्ञात्वा आचार्यो वक्ष्यमाणक्रमेण यदि करोति भगवतो नियमेन न हानिश्चित्ते तत्क्षणाद् भवति॥ परोपकाराय न पुनः स्वार्थतः करोति यः तस्य न किंचिदत्र
सिद्ध्यति॥ केवलं क्लेशमात्रं परिश्रमो दुष्टाचार्याणां तस्मात्तन्त्रोक्तनियमेन निरपेक्षकेणाचार्येण परोपकारार्थं कर्तव्यमभिज्ञानाभिनेनेति वक्ष्यमाणनियमो भवि
ष्यति तेनात्र विस्तरेणोक्तमिति॥ ॥इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां द्वादशसाहस्रिकायां विमलप्रभायां कलशाचार्यादिसर्वकर्म

त्र सर्वाभनालक्षणमहोद्देशोऽभिषेकपञ्चमोद्यमः ॥   ॥

श्रीवज्रैः सर्वदिक्षु क्षितिमपि सकलैर्निर्दहेन्मारवृन्दं पश्चाद्वज्रैकदशारे दिशि विदिशिगतं भावयेत् क्रोधवृन्दं ॥
क्रोधेन्द्रं चक्रमध्ये ह्यधिकजिनकरं वज्रवेगं प्रणाम्य तस्माद्यत्किंचिदिष्टं ग्रहसुनियमजातं साधकैः साधनीयं ॥ २२ ॥

त्रैलोक्यविजयं नत्वा वज्रभैरवभीकरं ॥ दुर्दान्तदमकं वीरं कालवक्त्रं कपालिनं ॥ स्थानरक्षाविधिश्चैव मण्डलाविरचनाय च ॥ [illegible] निर्मापनं चैव भूम्यादि अधि-
वासनं ॥ यथोक्तं तन्त्रराजे च मंजुवज्रेण वा परे ॥ वितनोमि टीकां सर्वविधिं उद्धृत्य वाक्ये ॥   ॥ इह सप्तकल्पविधिना सूचितं भाषितो मंजुश्रीभगवान्निर्मि-
तकायो यमारीन्द्रो मण्डलालेखनाय परमार्थिकवज्राङ्कुशभगवतः प्रतिवचनं रक्षाचक्रादिकर्म [illegible] ॥ तथा पि [illegible] श्रीवज्रैः सर्वदिक्षु क्षितावपि ॥ मण्ड-
लतन्त्रे ॥ तत्सर्वं महोद्देशेन वितनोमीति ॥ श्रीवज्रैरित्यादिना ॥ इह प्रथमं तावत् वज्राचार्येण शरीरस्थानरक्षा वितननीया ॥ पश्चाद् विघ्नादीनां संग्रहो भूमिपरिग्रहादि-
कं च कर्तव्यमिति ॥ अतः प्रथमं मन्त्री मण्डलाय कल्पितभूम्यां गत्वा मध्ये पूर्वाभिमुखो भूत्वा सुखासनोपविष्टः ॥ श्रीवज्रै रक्षां करोति ॥ ततो ॐकारेण श्वे-
तं चन्द्रमण्डलेन्यासं ॥ आःकारेण कण्ठे रक्तसूर्यमण्डलेन्यासं ॥ हूंकारेण हृदये कृष्णवज्रमण्डलेन्यासं ॥ ह्रीःकारेण नाभौ पीतनवरत्नकालाग्निमण्डलेन्यासं ॥ हःकारेण
भां उष्णीषे समपातले हरितनीलकालानलमण्डलेन्यासं ॥ एवं मण्डलानि ध्यात्वा तेषु मण्डलेषु यथाक्रमं [illegible] भिर्बीजैः परिणतानि वज्राणि भावयेत् ॥ सप्रदश
शूकं नवषष्ठिशूकं ॥ नवशूकं पंचषष्ठिशूकं । पंचशूकं । त्रयस्त्रिंशत्शूकं ॥ एवं वामे वामसंबन्धे [illegible] सन्धौ [illegible] एकत्रिंशत्शूकं ॥ एवं दक्षिणे दीर्घकव

त्मकं ॥ तथा वामोपबाहुसन्धौ ह्रस्वचवर्गात्मकं दक्षिणे दीर्घात्मकं ॥ तथा वामकरसंधौ ह्रस्वटवर्गात्मकं ॥ दक्षिणे दीर्घात्मकं ॥ वामोरुसन्धौ ह्रस्वपवर्गात्मकं दक्षिणे दी-
र्घात्मकं ॥ वामजानुसन्धौ ह्रस्वतवर्गात्मकं दक्षिणे दीर्घात्मकं ॥ वामपादसन्धौ ह्रस्वसवर्गात्मकं दक्षिणे दीर्घात्मकं ॥ इति सन्धौ वज्रन्यासः ॥ ॥ तथाध्यात्मपटलोक्तबी-
जाक्षरैः त्रैधातुकी सर्वज्ञ समस्तकानि वज्राणि भावयेत् ॥ एवं श्रोत्रयोः । भञाभ्यां नेत्रसूर्यवज्रं भावयेत् ॥ एतेभ्यां घ्राणरन्ध्रयोः ॥ अः आः भ्यां नेत्रयोः ॥ ओ औ भ्यां
जिह्वावाक्कायोः ॥ अं अः भ्यां वज्रप्रणयेः ॥ अं अः भ्यां मनस्तत्त्वनाद्यामिति ॥ एवं ह्रीं वै हीरामिव हृदम्भाम [illegible] सूर्य रसनतल मेरुरन्ध्रा ॥ तथा पादतलयोः ब-
वाभ्यां ॥ तथा पायुर्वामदक्षिणे तलाभ्यामिति ॥ एवं वज्रकायमध्यानं भावयेदिति ॥ ततस्तु वज्रनिर्गतैर्वज्रज्वालाभिर्दशदिक्स्थितमपि सकलं मारवृन्दं सम्यग्विहेठ-
कान्निर्दहेत् ॥ ऊर्ध्वे हरितज्वालाभिः ॥ अधो नीलज्वालाभिः ॥ पूर्वे श्वेतज्वालाभिः ॥ दक्षिणे नीलकृष्णमीरकज्वालाभिः ॥ उत्तरे श्यामपीतज्वालाभिः ॥ पश्चिमे वा-
यव्ये पीतज्वालाभिरिति ॥ मारवृन्दं दग्ध्वा ततः पश्चात् चक्रे दशारे दिग्विदिग्गतं भावयेत् क्रोधवृन्दमिति ॥ एवं भावनाक्रमेण मारविघ्नविनाशकानां क्रो-
धानां स्थानरक्षार्थं रक्षाचक्रं भावयेन्मन्त्री ॥ [illegible] निपातयन्ति ॥ [illegible] त्रिवज्रैः प्रथममिह बलिं [illegible] पश्चात् [illegible] ॥ चतुर्भिर्दिग्वि-
दिग्गतं निर्दहेन्मारवृन्दमिति ॥ [illegible] विस्तरतः सर्ववज्रैर्निर्दहेदिति नियमः ॥ सर्वाङ्गे मन्त्रन्यासो वेदितव्यमिति ॥ [illegible] प-
त्रपात्रं [illegible] समविषमाक्षरः ॥ तस्य बलिमन्त्रः ॥ ॐ आः हूं [illegible] सपरिवाराय इदं बलिं गन्धपुष्पधूपप्रदीपाक्षतं [illegible] सपरिवाराः [illegible]
[illegible] हूं वं हो हूं [illegible] बलिं [illegible] सपरिवारकः सर्वसत्त्वानां शान्तिं पुष्टिं रक्षावरणादीनि करोतु [illegible] स्थानं [illegible] हूं हूं फट् फट् वज्रधर
आज्ञापयति स्वाहा ॥ एवं [illegible] विधिना बलिं दत्त्वा स्थानाधिपं विसर्ज्य ततो मारवृन्दं [illegible] रक्षाचक्रं विनयेत् ॥ तत्र प्रथमं [illegible] कारपरिणतं [illegible]

कारनत्र संघटितं ॥ एवं रंकारात्मकमग्निमण्डलं ॥ वंकारात्मकमुदकमण्डलं ॥ लंकारात्मकं पृथ्वीमण्डलं ॥ तत्र चतुर्मण्डलान्ते वीक्षेत प्रातःछायावत्ताने इति सीमा
पर्यन्तं ॥ अथ हलाहल द्वयं कृत्वा गारं भावयेत् ॥ वाक्षे हूं हूं धक्षा वसाने मन्त्राकाराम्भर्मिर्मि तिनाप्रति भासते वृत्तमण्डलाकारान्तत्र प्राकारत्रयं तेनैव मण्डलं चतुष्कयेन
एकीभूतेन ततो रक्षार्थं राष्ट्रसीमायां पंच प्राकारं भावयेत् ॥ अथः शूलानि सर्वत्र ऊर्ध्वे शरजालं निश्चितं मध्य वज्रभूमिं राष्ट्रसीमान्तं भावयेत् ॥ ततः क्रूरागा
रमध्ये अज्ञेवाचनं वा म्रा दशाहं भावयेत् ॥ अशेषरत्नस्य कर्णिकानेमिर्वा चतुर्दला सासना सूर्यासनसहिता ॥ आम्नातं तस्य सूर्यस्य मूर्ध्नि वभ्रमाराण क्रोध वज्रवेग
रूपं सर्वं शक्तियुक्तं चतुर्भुजं स्वयं परागतं कृतुषं ॥ एवं क्रोधेन्द्रचक्र मध्ये अधिक जिनकरो वज्रवेगो भगवान् इति भावनीयो मन्त्रिणा साधन पट्टे वक्ष्यमाणा इति
नियमः ॥ तस्मात् क्रोधेन्द्र यत्किञ्चिदिष्टं तन्नियमस्तं तद्वचनं युक्तं साधकैः साधनीयमिति ॥ रक्षाचक्रे क्रोधाधिकदेवतागणस्मरणीयं मण्डलभूमि र
क्षार्थं शिष्यादीनां चेति ॥ अत्र समाधिः प्रथमं वज्रवेगमात्मानं ध्यात्वा ततो हृदये सूर्यमण्डले हूंकार बलात् क्रूरूपान् भावयेत् ॥ तेषु मध्ये हूंकारोत्थं तत्र र
तवर्णं वक्ष्यमाणा भुजास्तु धवक्त्रा वामकर्णद्वारेण निश्चार्य प्रभास्वरतः ऊर्ध्वे क्रूरगर्भे चन्द्रमण्डले सूर्यमण्डले वाउ घ्रीं संस्थापयेत् शान्तिपदमिति ॥ सर्व क्रोधानां
पञ्चाविधौ न्यासो रविकाभेदेन ॥ हृदये रविका एकादशगणसंख्या शान्तिर्नि इति नियमात् ॥ तत्र शान्तौ वज्रवेगः ॥ अङ्गे यमान्तकादयश्चत्वारः ॥ रसैरुष्णीषादयः स
न्तीति ॥ अतः सूर्यस्य साधनभेदेन सूर्यस्था सर्वेवा तथातिथौ धनक्षणभेदेन सर्वे चन्द्रस्था ॥ एवं कायभेदेन दिक्षु चन्द्रस्थाः । विदिक्षु सूर्यस्थाः ॥ तथा भाव
भेदेन विदिक्षु चन्द्रस्थाः ॥ दिक्षु सूर्यस्थाः ॥ तथा पश्चिमे दक्षिणे सूर्यासनस्थाः ॥ उत्तरे पूर्वे चन्द्रासनस्था इति ॥ रविकाभेदेन नियमः ॥ येन यथाभिरुचिना
मन्त्री क्रोधवृन्दं स्थापयेदिति नियमः ॥ एवं दीर्घहाकारं नियमं सुम्भराजं नीलवर्णं ॥ वज्रभूमितले सूर्ये स्थापयेत् दक्षिण कर्णद्वारेण निश्चार्येति ॥

एवं इकारनिष्पन्नं विघ्नान्तकं वामनासाद्वारेण निश्चार्य कृष्णवर्णं पूर्वद्वारे चन्द्रमण्डले स्थापयेदिति सूर्ये वा तथा ईकारनिष्पन्नं नीलदण्डं दक्षिणनासाद्वा
रेण निश्चार्याग्नेयद्वारे सूर्ये स्थापयेच्चन्द्रे वा ॥ उकारनिष्पन्नं प्रज्ञान्तकं रक्तं वामचक्षुर्द्वारेण निश्चार्य दक्षिणद्वारे चन्द्रमण्डले स्थापयेत् सूर्ये वा ॥ तथा ऊकार नि
ष्पन्नं टक्किराजं रक्तं दक्षिणचक्षुर्द्वारेण निश्चार्य नैरृत्यद्वारे सूर्ये स्थापयेच्चन्द्रे वा ॥ तथा ऋकारनिष्पन्नं पद्मान्तकं शुक्लं जिह्वाद्वारेण निश्चार्य उत्तरे चन्द्रे
स्थापयेत् सूर्ये वा ॥ तथा ॠकारनिष्पन्नं अचलं कृष्णं मूत्रद्वारेण निश्चार्य ईशानद्वारे सूर्ये चन्द्रे वा स्थापयेत् ॥ तथा ऌकाराक्षरनिष्पन्नं यमान्तकं पीतं पायुद्वारे
ण निश्चार्य पश्चिमद्वारे चन्द्रे सूर्ये वा स्थापयेत् ॥ तथा ॡकाराक्षरनिष्पन्नं महाबलं पीतं वज्रोष्णीषद्वारेण निश्चार्य वायव्यद्वारे सूर्ये चन्द्रे वा स्थापयेदिति ॥
अथ सर्वे सूर्यमण्डले स्थापनीयाः ॥ मन्त्रिशा[illegible]मतेनेति ॥ एवं गर्भचक्रन्यासः ॥ ततः कूटबाह्ये ब्रह्मकायिकादीन् पृथ्वीकृष्णादीन् स्फारयेदि
ति ॥ अत्र प्रत्याहारपाठेन स्वरवर्ना ह्रस्वकाः ॥ ङञ सामन्त अन्ते ॥ तत्र हृदये सूर्यमण्डले ङकारमननतः कृष्णरूपेण भात्वा तेषु भाका कृष्णो पूर्वोक्तद्वारा
भ्यां निश्चार्य इन्द्राक्षरोत्पन्नो कृष्णो दीर्घांशुस्वभावः पूर्वमण्डलस्थो भावयेदिति ॥ एवं वायुकृष्णो किलीनिष्पन्नो पूर्वो [illegible] यपो वायुमण्डले भाव्यो ॥
तथा तेजःकृष्णो रक्तः ऋनिष्पन्नो दक्षिणनैरृत्ययोरग्निमण्डले भाव्यो ॥ एवं तु ऌनिष्पन्नो तोयकृष्णो उत्तरेशानयोस्तोयमण्डले भाव्यो तथा
ऌॡनिष्पन्नो पृथ्वीकृष्णो पश्चिमवायव्ययोः पृथ्वीमण्डले भाव्याविति ॥ ततो घङछभथधः कूटाकारं विभाव्य तेषु पुनर्दशदिक्पालान् स्फा
रयेदिति ॥ घथाभ्यां निष्पन्नौ हरितनीलौ ब्रह्माविष्णुश्च प्राकारविष्कम्भमानेन ऊर्ध्वे ब्रह्मा अधो विष्णुरिति हंसगरुडस्थौ भाव्यौ ॥ तथा ङझी
निष्पन्नौ नैरृत्यवायुपूर्वाग्नेययोः कृष्णावर्णौ प्रेतमृगासनस्थौ ॥ एवं दक्षिणनैरृत्ये टठनिष्पन्नौ यमवैश्वानरौ महिषमेषस्थौ उत्तरेशा

निशुम्भनिष्पन्नो भस्मदृशांकरोशंकरवृषभस्थो ।। पश्चिमे वायव्ये इन्द्रयशो धूं धूं निष्पन्नो हस्तिविमानस्थो विति ।। एवं दिक्पालान् प्रा
कारोर्द्धे भावयेत् ।। ततो ग्रहचक्रं स्फारयेत् प्राकाररक्षार्थं पूर्वोक्तसूर्यमण्डले गजाकृत देवाध्यात्वा तेषु गं गां निष्पन्नो राहुकालाग्नि वि
प्राकाराणां विष्कम्भमानेनोर्द्धं अधः शून्यमण्डलान्तःस्थो भाव्यो ।। तथा जिं जीं निष्पन्नौ चन्द्रसूर्यौ वायुमण्डलस्थौ पूर्वाग्नेययोः ।। हुं हूं निष्प
न्नौ बुधमङ्गलौ अग्निमण्डलस्थौ दक्षिणनैर्ऋत्ये ।। वुं वूं निष्पन्नौ शुक्रबृहस्पती ।। उत्तरेशानेतोयस्थौ ब्रूं ब्रूं निष्पन्नौ केतुशनिश्चरौ पश्चि
मवायव्ययोः पृथ्वीमण्डले भाव्यौ ।। इति प्राकारबाह्यरक्षपालग्रहाः ।। ततः पञ्चप्राकाररक्षार्थं नागराजान् भावयेदिति ।। तत्र सूर्यमण्ड
ले खक्षठषथथो भाव्याः ।। तेषु खरवा निष्पन्नौ जयविजयौ पञ्चप्राकाराभ्यन्तरविष्कम्भमानेनोर्द्धं अधः शून्यमण्डलस्थौ भाव्यौ ।। एवं
क्षिं क्षीं निष्पन्नौ कर्कोटकपद्मौ वायुमण्डलस्थौ पूर्वाग्नेयोः ।। तथा हुं हूं निष्पन्नौ वासुकिशंखपालौ अग्निमण्डलस्थौ दक्षिणनैर्ऋत्ययोः ।। त
था फुं फूं निष्पन्नौ अनन्तकुलिकौ तोयमण्डलस्थौ उत्तरेशानयोः ।। धुं धूं निष्पन्नौ महापद्मतक्षकौ पश्चिमेवायव्ये पृथ्वीमण्डलस्थौ भा
व्यौ ।। ततः पञ्चप्राकारबाह्यरक्षार्थं भूतासुरान् भावयेदिति ।। तत्र सूर्यमण्डले कचटपतेतोध्यात्वा कृतागारान् ।। तेषु बाह्यप्राकार
विष्कम्भमानेनोर्द्धं वेताडोऽधः कुम्भाण्ड एतौ ककानिष्पन्नौ शून्यमण्डलस्थौ भाव्यौ ।। पूर्वदिक्किंनरो वायुस्थः श्वानमुखः चिं निष्पन्नः ।।
अग्नौ किंपुरुषः काकमुखः चीं निष्पन्नः ।। तथा टं टूं निष्पन्नो गन्धर्वः शूकरमुखः ।। ततो गृध्रमुखो दक्षिणनैर्ऋत्ये अग्निस्थः ।। उत्तरेशा
नेतोयस्थः ।। राक्षसो व्याघ्रमुखः ।। प्रेत उलूकमुखः ।। पुं पूं निष्पन्नौ पश्चिमे वायव्ये भूमिस्थः ।। तुं तूं निष्पन्नो अपस्माराः जम्बुकमुखः ।।

१४

गर्भे डागरूढ एव॥ इति रक्षाचक्रे कायवाक्चित्तधर्म्मविशुद्धानां कूटागार त्रिप्राकार पञ्चप्राकाराणां ज्ञानाकाशवायुतेजउदकपृथ्वीवज्राणुजनिता
श्चावराजा रूपदशदिक्पालग्रहनागभूताः॥ वज्रगर्भेण कारक्षापालाश्चन्द्रमन्त्ररवीत्पतः संयुक्तयोगेन वेश्माः॥ पृथ्वीतोयोद्भुताः कामधातुरक्षकाः
॥अग्नेर्वायुधातूद्भूता वा रूपधातुरक्षकाः॥ आकाशज्ञानधातूद्भूताः॥ सर्वे त्रिचित्तधातुरक्षकाः॥ अतोऽस्माद्वैतानि समन्तात्स्यापात्किंचिदिदुष्टं गृहे निय
मस्तुतं साधकैः साधनीयमिति नियमः॥ ॥

॥ त्रिप्रकारं स्त्रिवज्रं महिबलयमानूरहस्यावसाने ज्ञानरूपावसाने क्षितिजलनिलयादम्बरे वज्रकूटं॥ मध्ये ज्ञं स्वयं हूं
भवति युगकराकार्य्यकाशमनाच्च आत्मानं तस्य मूर्द्ध्न्यपगतकलुषं योगिना भावनीयं॥ २४ ॥ सम्मोदिक्षु त्रिवज्रैः
प्रथममपि बलिं क्षेत्रपालाय दत्वा पश्चाद्वेत्रैश्चतुर्भिर्द्दिक्षु विदिक्षु गतं तन्निर्दहेन्मारवृन्दं॥ समित्थावाहयित्वा स
र्शाखिलकसुमेरपॅसमस्ते प्रदेशे पश्चाद्दृष्टं यथेष्टं कुरु भुवि निलये प्रार्थयित्वात्तु तांश्च॥ २५ ॥ ॥

इदानीमिमं क्रोधादीनां प्रत्येकं बलिमन्त्रपदानि भवन्ति॥ तद्यथा॥ ॐ आः हूं हो उ श्रीस्तम्भनिस्तम्भ विघ्नान्तक नीलद
ण्ड प्रज्ञान्तक टक्किराज पद्मान्तक अचल यमान्तक महाबलेभ्यः सपरिवारेभ्य इदं बलिं गन्धं पुष्पं धूपं दीपं अक्षतं ददामहे
लिचा गत्य सपरिसपरिवाराः श्रीप्रमिदं बलिं गृह्णन्तु पिबन्तु खादन्तु हूं वहेः सन्तुष्टाः सर्वसत्वानां शान्तिं पुष्टिं रक्षावरणगुप्तिं

कुर्वन्तु हूँ हूँ फट् वज्रधर आज्ञापयति स्वाहा ॥ ततो दिक्पालानां बलिमन्त्रपदानि ॥ ॐ आः हूँ ब्रह्मविष्णुनैऋत्यवायुयमाग्निसमुद्रेश्वरेन्द्रयक्षेभ्यः सपरिवारेभ्य इदं बलिं गन्धं पुष्पं धूपं दीपं अक्षतं ददामहे ते चागत्य सपरिवाराः शीघ्रमिदं बलिं गृह्णन्तु पिबन्तु जः हूं वं होः संतृप्ताः संतृप्ताः सर्वसत्वानां शान्तिं पुष्टिं रक्षावरणगुप्तिं कुर्वन्तु हूं हूं फट् वज्रधर आज्ञापयति स्वाहा ॥ ततो ग्रहबलिमन्त्रपदानि ॥ ॐ आः हूं होः राहुकालाग्निचन्द्रसूर्यबुधमंगलशुक्रबृहस्पतिकेतुशनिभ्यः सपरिवारेभ्य इदं बलिं गन्धं पुष्पं धूपं दीपं अक्षतं ददामहे ते चागत्य सपरिवाराः शीघ्रमिदं बलिं गृह्णन्तु खादन्तु पिबन्तु जः हूं वं होः संतृप्ताः सर्वसत्वानां शान्तिं पुष्टिं रक्षावरणगुप्तिं कुर्वन्तु हूं हूं फट् वज्रधर आज्ञापयति स्वाहा ॥ ततो नागबलिमन्त्रपदानि ॥ ॐ आः हूं होः जयविजयपद्मकर्कोटकवासुकिशंखपालकुलिकानन्ततक्षकमहापद्मेभ्यः सपरिवारेभ्य इदं बलिं गन्धं पुष्पं धूपं दीपं अक्षतं ददामहे ते चागत्य सपरिवाराः शीघ्रमिदं बलिं गृह्णन्तु खादन्तु पिबन्तु जः हूं वं होः संतृप्ताः सर्वसत्वानां शान्तिं पुष्टिं रक्षावरणगुप्तिं कुर्वन्तु हूं हूं फट् वज्रधर आज्ञापयति स्वाहा ॥ ॥ ततो भूतबलिमन्त्रपदानि ॥ ॐ आः हूं होः वेताडविकृतमुखश्वकाकशूकरगृध्रव्याघ्रोलूकजम्बुकगरुडमुखेभ्यः सपरिवारेभ्य इदं बलिं गन्धं पुष्पं धूपं दीपं अक्षतं ददामहे ते चागत्य सपरिवाराः शीघ्रमिदं बलिं गृह्णन्तु खादन्तु पिबन्तु जः हूं वं होः संतृप्ताः सर्वसत्वानां शान्तिं पुष्टिं रक्षावरणगुप्तिं कुर्वन्तु हूं हूं फट् वज्रधर आज्ञापयति स्वाहा ॥ इति भूतबलिमन्त्रः ॥ ॥ एवं प्रत्येकबलिं वक्ष्यमाणक्रमेण शोधयित्वा प्रदीपयित्वा अमृतीकृत्वा क्रोधादी

१७५

नां मन्त्री ददाति ॥ एवं सर्वत्र मण्डलविधौ चतुःसंख्याबलिं दत्वा आचार्यः ततो विसर्जनं करोति ॥ विसर्जनकाले गुह्यचक्रे हांकारे क्रोधचक्रं प्रवेशयेत् ॥ उष्णीषे ॐकारे शून्यकुलत्वादिचक्रं ॥ ललाटे इकारे दिक्पालचक्रं कण्ठे ऋकारे ग्रहचक्रं ॥ हृदये उकारे नागचक्रं नाभौ ऊकारे भूतचक्रं प्रवेशयेदिति विसर्जनविधिं निवर्त्य ततो भूमिपरिग्रहं करोति मन्त्री वक्ष्यमाणक्रमेणेति नियमः ॥ ॥ इदानीं पृथिव्यावाहनं वक्ष्यमाणसमाधिना भूमिशुद्धिनिमित्तमुच्यते ॥ इह पृथ्वीसमाधिना भूमिं चावाहयित्वा जः हूं वं होः इति मन्त्रपदेः पूर्वोक्तार्घपात्रसलिलकुसुमैरर्घगन्धादिसहितैरर्घमस्यै प्रदाय ॥ पश्चाच्छुद्धिं पपेषं करुभुविनिलये प्रार्थयित्वानुतां वै ॥ इत्यनुप्रार्थना ॥ ॥

देवी त्वं साक्षिभूतासुरपतिसहिते मारभङ्गे जिनस्य तस्मात्त्वं साक्षिभूतासुरनरनमिते गृह्ण गृह्णार्घकं मे ॥ भग्नं मारस्य सैन्यं प्रबलमपि यथा बोधिहेतोर्जिनेन शिष्याणां सेकहेतोरहमपि च तथा मारनाशं करोमि ॥ २६ ॥ ॥

देवी त्वं साक्षिभूतासुरपतिसहिते मारभङ्गे जिनस्य तस्मात्त्वं पूजनीयासुरवरनमिते गृह्ण गृह्णार्घकं मे इति स्तुत्वा प्रार्थयेत् ॥ भग्नं मारस्य सैन्यं प्रबलमपि यथा बोधिहेतोर्जिनेन शिष्याणां सेकहेतोरहमपि च तथा मारनाशं करोमि त्वया साक्षिभूतया इति ॥ ततो बुद्धादीनां वक्ष्यमाणपूजां कृत्वा अर्घादिकं दत्वा प्रार्थयेत् ॥ अत्र प्रार्थना ॥ ॥

ये बुद्धाः सर्वदिक्षु व्यपगतकलुषा बोधिसत्वाः समस्तास्ते मां वै पालयन्तु परमकरुणया मण्डले सेकहेतोः ॥ तानेवाध्येष्य स
र्वान् हृद्खखदिरमयैः कीलकैः कीलयेत् क्ष्मां दिक्क्रोधान् दिग्विभागे प्रहरणसहितान् विन्यसेद्रक्षणार्थं ॥ २७ ॥

ये बुद्धाः सर्वदिक्षु व्यपगतकलुषा बोधिसत्वाः सभार्य्या स्ते मां वै पालयन्तु परमकरुणया मण्डले सेकहेतोः ॥ तानेवाध्येष्य सर्वान् हृ
द्खखदिरमयैः कीलकैः कीलयेत् ॥ क्ष्मां वक्ष्यमाणक्रमेणोन्ध्येवराणि यमः ॥ तथा उक्तक्रोधान् दशदिग्विभागे विन्यसेत् ॥ प्रहरण
सहितान् भूमिकीलनरक्षणार्थमिति । नियमः ॥ ॥

शल्यं साङ्गारष्टङ्ग मरणभयकरं भूमिगर्भे निविष्टं तस्मिंस्थाते विनाशो भवति तरणवशाच्छोधनीयं हि तस्मात् ॥ रत्नं शं
खश्चकाचो विषयसुखकरं मण्डलार्थं हि भूमौ प्रासादार्थं गृहार्थं प्रकटितनियमश्चात्रयागादिहेतोः ॥ २८ ॥ १७६

इदानीं भूमिखातिमित्युच्यते ॥ इह भूमिगर्भे शल्यादिकं निविष्टं अशुभकर्मणापि प्रकरं भवति ॥ तस्माच्छोधनीयं शल्यं मनुष्यास्थि साङ्गा
रं सङ्गारस्थाङ्गसाधारणं मरणभयकरं अशुभकर्मणि ॥ तस्मिंस्थाने विनाशो भवति तरणवशात् शोधनीयं हि तस्मात् ॥ अथ रत्नं वा शंखं
वं काचो वा कष्टपतनसुखकरो भवति ॥ मण्डलार्थं हि भूमौ ॥ तथा प्रासादार्थं गृहार्थं प्रकटितनियमश्चात्र यागादिहेतोरिति स्थान
शुद्धिनियमः ॥ ॥

अन्येनकें प्रतिष्ठा भवति तरमेते शुभलग्ने ग्रहा अजीवे शुक्रेऽस्तमेते नहि भवति तस्माद्वै विवाह प्रतिष्ठा॥ ज्ञात्वाचार्य्यः समस्तं
क्षितितलनिलये लोकलोकोत्तरं च यथ्यात्कार्यं करोति प्रभवति हि शुभं तत्र देवे समस्तं॥ २० ॥ ॥

इदानीं भूमिशोधनार्थं दिनमुच्यते॥ पूर्णामासित्यादि॥ इह प्रतिमासेषु पूर्णाः॥ ते यथा॥ पञ्चम्यौ द्वे दशम्यौ द्वे पञ्चदश्यौ द्वे मराद्र ला
त्रिरयनाम्ना॥ कालावधिं ज्ञात्वा शुभाशुभकर्म ज्ञात्वा॥ इह शुभकर्मणि शुक्लपञ्चम्यां पञ्चदश्यां विहितं वर्जयित्वा भूमिं शोधयेत॥ ततः पूर्वो
क्तमृत्तिकया पूरयेदिति॥ अशुभकर्मणि कृष्णपञ्चम्यां दशम्यां अमावास्यां तस्य च भूमिं शोधयेत्॥ पूर्वोक्तमृत्तिकया पूरयेदिति॥ अन
तो ग्रहणमपि पूर्णायाम् चैत्रादिकं॥ पुत्रकाणां शिष्याणां संग्रहः पूर्णिमायां॥ ततो मराडलालेख्य न कालं ज्ञात्वा द्वादश्यां स्वमात्तः कर्त्त
व्यः॥ मदनामनुदिने त्रयोदश्यां चतुर्दश्यां श्रीश्री रजःपातकर्त्तव्यः॥ सेकार्य्य वृद्धमार्गे पूर्णिमायां दद्यतीत्यागमपाठः॥ वरगुरुर्मारभ
ङ्गदिनेव च कारदपरस्यां पूर्णिमायां दद्यातीति नियमः॥ एवं प्रतिमादीनां तस्मिन्नेव पूर्णिमारात्रौ प्रतिष्ठा भवति॥ जिनकुलनामरात्रौ
प्रतिष्ठा इति तिथिनियमः॥ २८ ॥

पूर्णायां भूमिशुद्धिग्रहणमपि तथा संग्रहः पुत्रकानां द्वादश्यां स्नात्रपातो मदनमनुदिने श्रीरजःपात एव॥ सेकार्यं पूर्णिमायां द
द्यात् वरगुरुर्मारभङ्गदिनेव तस्मिन्रात्रौ प्रतिष्ठा भवति जिनकुलेशान्यरात्रौ प्रतिष्ठा॥ २८ ॥ ॥

अर्थान्येन कं प्रतिष्ठा भवति नरपतेशुस्वलरेखे ग्रहाधिपैः॥ इह जीवे बृहस्पतौ शुक्रे अस्तङ्गते सति सूर्यमण्डले प्रविष्टे॥ नहि भवति नरतन्नलिमन्यासे वेरकाणां विवाहः प्रतिष्ठा॥ एवं पुष्ये चैत्रे बृहस्पतिचैत्रे सूर्ये प्रविष्टे पूर्णिमासां पुनर्भवति राज्ञां पुष्याभिषेकत इति॥ चैत्रे पुष्याभिषेकत इति नियमः॥ एवं ज्ञात्वा आचार्यैः समस्तं क्षितितलनिलये लोके लोकोत्तरं च यत्कार्यं करोति स्नानादिकं प्रभवति फलदं जनेदेवं समस्तमिति तिथिनियमः॥ एवं क्रूरकर्म शुभदिननियमः॥ २० ॥ ॥

ज्ञात्वा शिष्यस्य रक्षां शिरसि हृदि तथोष्णीषनाभौ च कण्ठे श्रीगुह्योजिनाद्यैः स्वभयकुलगतैः कायवाक्चित्तवज्रैः॥ एवं लेपादिकानां प्रभवति नियतैः श्रीस्वरैः पुस्तकानां सत्त्वानां मोक्षहेतोरमुकमपि विभो मण्डलं वर्तयामः॥ २१ ॥

इदानीं शिष्यरक्षाविधिरुच्यते॥ इह प्रथमं शिष्यादेर्रक्षां कृत्वा पश्चात् संग्रहः शिष्यादिकं॥ अत्र जिनाद्यैर्देवतीभिः स्वभयकुलगतैः रक्षां शिरसि इकारं॥ हृदये ईकारं॥ उष्णीषे आकारं॥ नाभौ ऌकारं॥ कण्ठे ॠकारं॥ गुह्ये आःकारमिति॥ उभयकुलगतैः कायवाक्चित्तभिन्नैरिति॥ एवं लेपादिकानां प्रकटितनियतैः॥ षड्भिः स्वरैः श्रीस्वरैरिति॥ अ इ ऋ उ ऌ इति॥ पुस्तकानां रक्षां कृत्वा तेषां बुद्धान्वेषिणां॥ सत्त्वानां मोक्षहेतोरमुकमपि कालचक्रभगवतो मण्डलं लेख्यामि॥ तस्माद् बुद्धबोधिसत्त्वाधिष्ठानं बिम्बादीनां कुर्वन्निति॥ अधिप्रणामनियमा रक्षानियमः॥ ॥

शुभे स्थाने सुपूर्णे तु समविरचिते कूर्मपृष्ठोन्नते च एकाद्विहस्तमाने वसुनृपयुगसाहस्रमेव प्रमाणे ॥ सूत्रं वज्रं रजो वै सुरयमवरुणोत्तरे वज्रपाणिं दत्वा लब्धे निमित्ते प्रथमपरदिने मण्डले सूत्रनीये ॥ २२ ॥

इदानीं संक्षिप्तत उच्यते ॥ येन वक्ष्यमाणो विस्तरेणावक्तव्यं सूत्राधिवासनादिकमिति ॥ शुभे स्थाने सुपूर्णे तु समविरचिते चतुरस्रे किञ्चित्कूर्मपृष्ठोन्नते च ॥ एकाद्विहस्तमाने युगवसुनृप इति ॥ चतुर्हस्तः षड्हस्तो षोडशहस्त एवं सहस्रहस्तं यावत् प्रमाणे स्थाने पूर्णे ॥ तत्र सूत्रं सुरे ॥ वज्रं यमे ॥ रजोभाण्डानि वरुणे ॥ उत्तरे वज्रपाणिं ॥ मध्ये विजयकलशं दत्वा ततो वक्ष्यमाणमार्गक्रमेण शुद्धो यदाचार्यो निमित्तं लभते शिष्यो वा ॥ तेन लब्धे निमित्ते प्रथमं पूर्वदिशं ॥ अपरं पश्चिमदिशं ॥ मण्डले सूत्रनीयं तत्र द्विशिष्याभ्यामिति नियमः ॥

छिन्ने सूत्रे तु रोगः क्षतिरपि परिपाले यन्ते उत्क्रान्तौ वातोद्भूतं रजश्चेत् प्रकटयति भयं राज्यभङ्गश्च राष्ट्रे ॥ तद्दृष्ट्वा दुर्निमित्तं तु नरपिचविभीर्मन्त्रजापं प्रकुर्याद्भूयो लब्धे निमित्ते समविसमपदैः सूत्रपातो विधेयः ॥ २३ ॥

इदानीं दुर्निमित्तलक्षणमुच्यते ॥ इह छिन्ने सूत्रे सति तु रोगः क्षतिर्भवति ॥ अपि च परिपालं यन्ते पुत्रकाणां क्षतिः ॥ वातेनोद्भूतं रजश्चेत् ॥ इह मण्डलिकावातेनोद्भूतं रजो यदा भवति ॥ तदा तु वीदीनां भयं प्रकटयति राजभङ्गं च राष्ट्रे प्रकटयतीति नियमः ॥ तद्दृष्ट्वा

दुर्निमित्तंपुनरपिचविभोर्मंत्रजापंप्रकुर्यात्‌आचार्यः॥यावन्निमित्तंपुनर्भवति॥ततोभूयोलब्धेनिमित्तेसमविषमपदैःसूत्रपातोविधेयः
॥इत्याचार्यस्यवामेपार्श्वेदक्षिणपादतलेभूमिनिघर्षणेसमपदेन॥एवंव्यतिक्रमेणविषमपदेनसूत्रपातोविधेयइतिनियमः॥ ॥

प्रज्ञोपायाङ्कमध्येभवतिसपरिधौमण्डलेवर्जनीयोभूमौसंग्रामकालेशिखिपवनगतःसैन्यमध्येकृणीव॥संग्रामे
सैन्यनाशोभवतिपृथिवितलेत्वङ्कयुद्धप्रकारःतस्माद्युद्धंचसेकेत्वतिबलपरिधौमन्त्रिणावेदितव्यः॥ ३४ ॥

इदानींपरिधउच्यते॥इहप्रज्ञोपायाङ्कमध्येप्रभवतिपरिधौमण्डलेवर्जनीयइति॥इहप्रज्ञाङ्कंदक्षिणपश्चिमं॥उपायाङ्कंपूर्वो
त्तरं॥अनयोर्मध्येपरिधौमण्डलेवर्जनीयः॥एवंभूमौसंग्रामकालेशिखिपवनगतइति॥आग्नेय्यांवायव्यांदिशिपावकमरुतयोर्द्व
योः॥सैन्यस्यमध्येकृणीवदण्डाकारः॥संग्रामेसैन्यनाशोभवतिपृथिवितलेपरिमलंपतनात्॥अङ्कयुद्धप्रहारेणभवति॥मण्डलेकलह
विग्रहोभवति॥तस्माद्युद्धंचसेकेत्वतिबलपरिधौमन्त्रिणावेदितव्यइतिनियमः॥ ॥

आचार्यैःकोपैःसवज्रैःस्वहृदयकमलेचन्द्रसूर्याग्निमूर्ध्नि ध्यात्वाश्रीकालचक्रंशशिधरमदनाक्रान्तमालीढपादं॥प्रज्ञा
भैत्रीहदक्षेसरविशशिपुटैःस्वस्ववज्राङ्कुशेनज्ञानाकृष्यदेवीरजसिसमरसान्यस्वस्वेचभव्याः॥ ३५ ॥

१२८

इदानीमिष्टदेवतान्यासमन्त्रमुच्यते संक्षेपतः॥ इत्यादौरिति॥ अकाराद्यैः स्वरैः कादौरिति ककाराद्यैर्व्यञ्जनैश्चन्द्रसूर्यात्मकैः॥ सवज्रैरिति॥ हूं
कारसहितैः स्वहृदयकमले च चन्द्रसूर्याग्निमूर्द्धि वक्ष्यमाणक्रमेण ध्यात्वा श्रीकालचक्रं काश्रीधरमदनाकान्तमालीढपादं प्रज्ञाभद्रौं हृदि छो
मरविशशिपुटे स्वस्ववर्णाङ्कितैरानन्दाङ्गनाप्यदेवीरिति॥ रजसि समरसाउज्ज्वलाभामारज आकारेणान्मसलनूवे च देवो भाव्याः॥ स्वराकारे
रोतिनियमः॥ ॥इदानीं पूर्वमभ्यासाहुतायमारभ्य इदं समाधिं यावन्मन्त्रविधिरुच्यते॥ देवतासमाधिमीरनिग्रहं मन्त्रं काल
चक्रभगवतोऽङ्गन्यासः कायवाक्चित्तशोधने वोच्यते॥ ॥इह प्रथमं साधनापटले वक्ष्यमाणक्रमेणानुस्वविशुद्धिं तथागतानां
पूजां मण्डलानां पुरणानुमोदनां विशरणगमनं मानं वा निर्मातनं बोधिचित्तोत्पादं तं मार्गाश्रयणं कृत्वा॥ ततः शून्यतालम्बतं कृत्वा
देवतानिष्पादनं कृत्वा कायवाक्चित्तज्ञानविशोधकानि मन्त्रपदानि भवन्ति॥ ॐ आः हूं हो हंक्षः प्रज्ञोपायात्मककायवाक्चित्तज्ञाना
धिपतेत्तमकायवाक्चित्तज्ञानवज्रं वज्रामृतस्वभावं जहद्स्कन्धधात्वायतनं निःस्वभावं स्वाहेति॥ इदं मन्त्रमुच्चार्य उष्णीषपरि
वंकारपरिणतं वज्रचन्द्रमण्डलं षोडशकलापूर्णं ध्यात्वा मन्त्री॥ ततस्तेनाशीतमारभ्य पादनखान्तं यावत् स्वशरीरं स्वपंकपु
कवत् त्यजेद्धीनवारन्तु॥ ततः शशाङ्कवधरात्मानं ध्यायात्॥ शान्तेोडुपेच॥ वज्रपाक्षेपाद्वसूर्यमण्डलेन रक्तवर्णं ध्यायादेवं रक्तप
रिणतेनामारणेनात्ते यंकारपरिणतेन कृष्णराहुमण्डलेन शान्तमसो हृते लंकारपरिणतेन पीतउन्दराहुमण्डलेन पीत
मिति॥ प्रलुञ्जीवने हंकारपरिणतेन नाकशमण्डलेन विश्ववर्णेन हरितेन हरितवर्णेनालान्तेन्यान्त्रीविनतो मन्त्रमिदमुच्चा

रयेत्॥ ॐ स्वभावशुद्धाः सर्वधर्माः स्वभावशुद्धोहमित्युच्चार्य ततो ललाटे ॐ शुक्लमणिनाभं॥ कण्ठे आः रक्तं रक्तसंभवं॥ हृदये हूं कृष्णाम
णिप्रशिखि॥ नाभौ ह्रीं पीतं वैरोचनं॥ उष्णीषे हं श्याममक्षोभ्यं॥ त्रिशिष्टः नीलं वज्रसत्वं न्यसेत्॥ अक्षमाला उज्वलो श्रुधमरमिति
वज्रवकशुद्धिः षडङ्गकलन्यासविधिरितिप्रथमः॥ ॥इदानीं करशुद्धिन्यासमन्त्र उच्यते॥ रं हः सर्वास्तुरजमारक्लेशानाकरवज्र
तीक्ष्ण रुः खड्ग छिन्द मम करं विशोधय स्वाहा॥ अनेन मन्त्रेण वरस्पर्शं करेण करं मर्दयेत्॥ इति करप्रक्षालनमन्त्रः॥ ततः पूर्वोक्तक्रमे
ण अकारादिलकारान्ताः षोडशस्वराः॥ अ इ ऋ उ लृ॥ अ ए अर् ओ अल॥ ह य र व ला इति वामकराङ्गुलीपर्वसंधिषु न्यस्या
कनिष्ठामूलपर्वादिषु॥ दक्षिणकरे वज्राङ्गुष्ठाङ्कपर्वादारभ्य कनिष्ठाङ्गुलीपपर्वावसानं लाकारयोदेयाः॥ ञावारयाहा॥ आल
ओआर ऐ आलृ ऋ ई आ इति हथिआदिक्रमेण॥ ततः हस्तसंपुटे हूं नीलवर्णं चन्द्रार्कयोर्मध्ये ध्यात्वा॥ ततस्तैश्चन्द्रार्कैरालि
वीजैः पञ्चशूकवज्रमुद्रां बध्येत् वक्ष्यमाणां॥ तथा उष्णीषादारभ्य पादतलं अङ्गुलीनखपर्यन्तमात्मानं संस्पर्शयेत्॥ ततः इदं मन्त्र
मुच्चारयेत्॥ ओं आः हूं हो हं क्षः कायवाक्चित्तज्ञानाधिपते वज्रकाय मम कायवाक्चित्तज्ञानं वज्रं वज्रकायस्वभावं कुरु कुरु स्वाहा॥ त
तोऽहंकारं ॐ सर्वतथागतवज्रकायस्वभावात्मकोहमिति॥ कायवाक्चित्तज्ञानविशुद्धिः॥ ततः षडङ्गन्यासं कृत्वा पश्चात्
षडङ्गन्यासं करोति॥ कराभ्यां संपुटं कृत्वा अङ्गुष्ठयुग्मेन हृदये॥ ॐ हूं हृदयाय नमः॥ शिरसि ॐ हूं शिरसे स्वाहा॥ शिखायां
ॐ हूं शिखायै वौषट्॥ सर्वाङ्गे ॐ ह्रीं कवचाय हूं उभयहस्ताभ्यां सर्वाङ्गं संस्पर्शयेत्॥ ॐ ह्रां नेत्राय वषट् नेत्रे॥ ॐ ह्रः अ

स्त्रायफट्॥ सर्वदिक्षुतर्जन्यङ्कुशच्छोटिकयाशुभेवामयाअशुभेदक्षिणयात्मसेदस्त्रो॥ ॐ सर्वतथागतहृदयशिरःशिखा
कवचनेत्रास्त्रवज्रषडङ्गस्वभावात्मकोऽहमितिषडङ्गन्यासविधिः॥ असौषडङ्गः॥ पृथिव्यादिनायेनपुनःसंध्याभाषान्तरे
णाहृदयताभिः॥ एवंहृदयकण्ठललाटोष्णीषांशिरआदिनागुप्तेन॥ ततःपूर्वोक्तरक्षाचक्रंकरोतिअनेनमन्त्रेण॥ ॐ
आःहूँरःवज्रचन्द्रसूर्यराहुकालाग्नयःकायवाक्चित्तज्ञानवज्रप्राकारान्हूंजःहूःस्वाहा॥ इतिप्राकारमन्त्रः॥ ॐ हूँविश्वका
यवज्रवज्रकूटागारंजःहूःस्वाहा॥ इतिकूटागारमन्त्रः॥ ॐ हौंयांरांवांलोंवज्राकाशवायुतेजउदकपृथिवीवज्रस्वभाव
पञ्चधातवोवज्रमण्डलानिजःहूःस्वाहा॥ अधोमण्डलन्यासमन्त्रः॥ उपायतन्त्रेरुधिरेवकूटागारादिकंकरोति॥ अन्यत्रमे
रुमूर्ध्निमण्डलेनभवति॥ ॐ विश्ववज्रपद्मंजःहूःस्वाहा॥ इतिपद्ममन्त्रः॥ ॐ रःवज्रसूर्यवज्रसूर्यासनंजःहूःस्वाहा
॥ इतिसूर्यासनमन्त्रः॥ ततस्तदुपरितत्त्वाधिसु[illegible]तयात्मानंक्रोधेन्द्रंध्यायात्॥ ॐ हूँक्रोधेन्द्रोहूँक्रोधानामाज्ञादायक
स्वाहा॥ ततःक्रोधानाज्ञापयेत्॥ स्वस्वमन्त्रपदैः॥ ॐ हूँवज्रक्रोधराजमहोष्णीषोर्ध्वदिशिरक्षांजःहूःस्वाहा॥ ॐ यंव
ज्रक्रोधराजातिबलसर्वविघ्नान्तकपूर्वदिशिरक्षांकुरुहूःस्वाहा॥ ॐ रंवज्रक्रोधराजजम्भकदुष्टप्रज्ञान्तकदक्षिण
दिशिरक्षांजःहूःस्वाहा॥ ॐ वंवज्रक्रोधराजमानकविरागपद्मान्तकउत्तरदिशिरक्षांजःहूःस्वाहा॥ ॐ लंवज्रक्रो
धराजस्तम्भकयमान्तकपश्चिमदिशिरक्षांजःहूःस्वाहा॥ ततोभाववशात्विदिक्षुदीर्घवर्णयात्माःसंहारक्रमेणेति॥

ॐ लाः वज्रक्रोधराज महाबल वायव्यां दिशि रक्षां कुरु स्वाहा॥ ॐ वाः वज्रक्रोधराजाचल ईशान दिशि रक्षां कुरु स्वाहा॥ ॐ रः वज्रक्रो-
धराज टक्किनैरृत्यां दिशि रक्षां कुरु स्वाहा॥ ॐ याः वज्रक्रोधराज नीलदण्डाग्नेय्यां दिशि रक्षां कुरु २ स्वाहा॥ ॐ हाः वज्रक्रोधराज
सुम्भाधोदिशि रक्षां कुरु २ स्वाहा॥ एवमेभिर्मन्त्रपदैः स्तोत्रोक्तसाधनविधिना क्रोधराजान्ध्यायान्मन्त्री ततः सर्वतथागतरक्षावक्रस्व-
भावात्मकोऽहमित्युच्चार्य्यो हूंकारस्तु हृदिति रक्षाचक्रनियमः॥ ॥ततः स्वहृदये पंकारपरिणतं विश्वपद्मं तदुपरि कर्णिका-
यां अंकारपरिणतं चन्द्रमण्डलं तदुपरि देवताधिमुक्तिवशात् ज्ञानबीजं तस्माद्वज्रादिरूपवत् सर्वतथागतप्रबोधमात्रा ज्ञ रश्मीन् गग-
नांतो स्फारयेत्॥ ततस्तान् परावृत्य स्वहृदि ज्ञानबीजे प्रवेश्य आकाशधातौ नखुलाकारस्फारितानां बुद्धानां पूजार्थं गन्धमालाद्या-
न्स्फुरयेदिति॥ स्वस्वज्ञानबीजादिति॥ ॐ हु गन्धवज्रे गन्धार्चनं कुरु २ स्वाहा॥ ॐ ह्रां वज्रमाले वज्रमालार्चनं कुरु २ स्वाहा॥
ॐ हू वज्रधूपे धूपार्चनं कुरु २ स्वाहा॥ ॐ ह्रु वज्रप्रदीपे प्रदीपार्चनं कुरु २ स्वाहा॥ ॐ ह्रूं वज्रामृते नैवेद्यपूजार्चनं कुरु २ स्वाहा १८०
॥ ॐ ह्रां वज्रामृते अक्षतफलार्चनं कुरु २ स्वाहा॥ ॐ हु वज्रलास्ये वस्त्राभरणपूजां कुरु २ स्वाहा॥ ॐ ह्रा वज्रहास्ये घण्टाद-
र्शपूजां कुरु २ स्वाहा॥ ॐ हू वज्रवाद्ये वाद्यपूजां कुरु २ स्वाहा॥ ॐ ह्रू वज्रनृत्ये नृत्यपूजां कुरु २ स्वाहा॥ ॐ स्त्रु वज्रगीते गीत-
पूजां कुरु २ स्वाहा॥ ॐ स्त्रु वज्रकामे सर्वबुद्धबोधिसत्त्वानां क्रोधादीनां वज्ररतिपूजां कुरु २ स्वाहा॥ इत्येभिर्द्वादशमन्त्र-
पदैः स्तोत्रमयीं पूजां कृत्वा बुद्धादीनामभिवन्दना पूजनेति ततः स्तोत्रोक्तविधिना पापदेशनाशरणानुमोदनारत्नत्रयशरण

गमनमात्मभावनिर्यातनं बोधिचित्तोत्पादनं कुर्यादिति॥ सप्तविधपूजाविधिः॥ ततः शून्यतालम्बनं मण्डलराजाग्री कर्मरा
जाग्री विन्दुयोगश्च सूक्ष्मयोगः सन्त्रिराकर्तव्य इति॥ ततस्तत्राधिमुक्तिवशादिष्टदेवताहंकारं कारयेत्॥ ॐ सर्वतथागताधि
पतिवज्ररूत्वोहं हूं दर्शनदमक हूं हूं हुट् स्वाहा॥ अनेनात्मानमधितिष्ठेत्॥ इति देवताहंकारनियमः॥ इति देवताहंकारमुत्पा
द्यनन्तरं भूमिपरिग्रहं शिष्यसंग्रहं कुर्यादिति॥ पूर्वदेशग्रामक्षेत्राधिपतेर्बलिं दद्यात्॥ विशोधयित्वा मन्त्रपदैरेभिः॥ ॐ
ॐ वज्रचन्द्र सर्वधर्मस्तु विशुद्ध स्वभाव सर्वधर्मं विशोधय स्वाहा॥ ॐ आः वज्रसूर्य सर्वधर्मप्रबोधक सर्वधर्मान् प्रबोधय स्वा
हा॥ ॐ हूं वज्रानल सर्वधर्मप्रदीपक सर्वधर्मान् प्रदीपय स्वाहा॥ ॐ सर्वधर्मवज्रामृतकर सर्वधर्मान् वज्रामृतं कुरु स्वाहा॥
एभिर्मन्त्रपदैर्यथाक्रमेण वामहस्तेन शोधयेत्॥ दक्षिणहस्तेन बोधयेत्॥ संस्पृश्य जलापिहित्वा प्रदीपयेत्॥ वज्रमुद्रयु
द्रया वज्रामृतेन कृत्वा त्रैलोक्यविजयमुद्रया देशाधिपस्यावाहनं कुर्यात्॥ ध्यानमुद्रया ग्रामस्थानाधिपानां क्रोधराजानां पञ्च
शूकमुद्रया कृत्स्नानां कर्त्तृमुद्रया देवतानां खड्गमुद्रया॥ ग्रहाणां रत्नमुद्रया॥ नागानां पद्ममुद्रया॥ प्रेतानां चक्रमुद्रया॥ आवा
हनं कृत्वा ततः ओं आः हूं अमुक आगच्छ इमं भूमिदं बलिं गृह्ण गृह्ण भुक्त्वा पीत्वा तृप्तिं कृत्वा सर्वसत्त्वानां शान्तिचित्तं कृत्वाऽपरस्थाने
गच्छ स्वाहा॥ भूमिपरिग्रहकाले॥ अपरकाले स्वस्थानं गच्छेति वक्तव्यं॥ एवं सर्वेषां प्रत्येकं बलिं दिग्विभागे पूर्वोक्तविधिना
संप्रेषयेदिति बलिविधिः॥ ततः स्वहृदये चन्द्रमण्डले लांकारपरिणतं पीतवर्णं ध्यायात्॥ तत्परिणतां पृथ्वीं चिमुखां षड्भुजां

दक्षिणेन चक्रदण्डवज्रधरं॥ वामेन शङ्खशृङ्खलावज्रघण्टाधरं॥ पीतवर्णां पीतवस्त्रां पीतरत्नाभरणां ध्यायात्॥ ततः समयसत्त्वज्ञा-
नसत्त्वेनैकीकृत्य वक्ष्यमाणक्रमेण ततो वामे पृथिवीदेवतामावाहयेत्॥ अनेन मन्त्रपदेन॥ ॐ लाँ आः वसुंधरी सर्वजगज्जननि सर्वसत्त्वो-
पकारिणी वज्रसत्त्व आज्ञापयति श्रीप्रमाणकुरु २ इदं गन्धं पुष्पं धूपं दीपं नैवेद्यं प्रत्यक्षान्ते दत्तमित्तवत्त्वमेव गृह्ण २ मम रक्षार्थं मम रक्षां तेद
द सर्वसत्त्वानां शान्तिं पुष्टिं कृत्वा शुभे विजेन इदं स्थानं त्यक्त्वा परं स्थानं गच्छ २ स्वाहा॥ इति पृथिवीविसर्जनविधिः॥ ततो मारनिर्घातनं
कुर्यात् पूर्वोक्तविधिना एभिर्मन्त्रपदैः॥ ॐ आः हूँ हो हंक्षः हाः हाः हुः हाः र र र र वज्रानलसर्वावरणधर्मप्रलयस्वभावस-
र्वमारकायिकविघ्नविनायकादीनां दशदिग्गतानां कायवाक्चित्तानि दह २ पच २ भस्मीकुरु २ हूँ हूँ फट्॥ इति मारनिर्घातनवि-
धिः॥ ततो परविघ्नविनायकादीन् वज्राङ्कुशेनाकृष्य वज्रपाशेन बन्धयित्वा वज्रकीलक्रोधराजं नाभेरधः शूलाकारं दशस्था-
नेषु दुष्टोपरि निमग्नं भावयेत्॥ पञ्चवर्णान् एभिर्मन्त्रपदैः॥ ॐ आः हूँ हो हंक्षः हूँ २ फट् २ वज्रकीलक कायवाक्चित्त-
ज्ञानाधिपते सर्वदुष्टदुर्जनशत्रूणां सर्वविघ्नविनायकादिदुष्टानां कायवाक्चित्तज्ञानानि कीलय २ हूँ हूँ फट् २॥ ततो वज्रमु-
द्गरमन्त्रः॥ ॐ ह्लूः वज्रमुद्गर मारादीनां शिरसि कण्ठे हृदये नाभौ गुह्ये वज्रकीलकानाकोटय २ क्षं क्षां क्षिं क्षीं क्षुं क्षूं क्षुं
क्षें क्षैं क्षौं हूँ २ फट् २॥ इति कीलनविधिः॥ ततः कीलकानां रक्षार्थं दशक्रोधराजान् पूर्वोक्तविधिना न्यसेदिति॥ ततो वामदक्षि-
णपादतले हूँ फट् विन्यस्य पञ्चशूकवज्रमुद्रया पादतले संस्पृश्य वज्रपदे मण्डलमध्ये भूम्यां चंक्रमेत्॥ कालचक्रमूर्त्याली

रुद्रत्वालीढपदैः समपदैश्च ॥ पूर्वे यंयाः पादतले दत्वा खड्गमुद्रयास्पृष्ट्वा मण्डलपदैः चंक्रमेत् ॥ दक्षिणे रंराः दत्वा रत्नमुद्रयास्पृष्ट्वा ललितपदैश्चक्रमेत् ॥ पश्चिमे लंलाः दत्वा चक्रमुद्रयापृष्ट्वा वज्रासनेनाधिष्ठयेत् ॥ विशाखपदैर्वा ॥ उत्तरे वंवाः दत्वा पद्ममुद्रयास्पृष्ट्वा पद्मासनेनाधिष्ठाय ताण्डवपदैश्च क्रमेत् इति ततो वज्रगन्धादिभिर्मन्त्रपदैः गन्धादिद्रव्यैर्मण्डलभूमिमर्च्चयित्वा वज्रभूमिमावाहयेत् ॥ पूर्वोक्तविधिना ॥ अत्र मन्त्रपदानि ॥ ॐ लां आः हूं वज्रभूमि तिष्ठ मा चल हूं हूं फट् वज्रधर आज्ञापयति स्वाहा ॥ ततो भूयो ऽर्घादिकं कारयेन्मन्त्री ॥ इति भूम्याधिवासनविधिः ॥ ततो वज्रकलशानधिवासयेत् ॥ तत्र मन्त्रपदानि ॥ ॐ हं हां हिं हीं हुं हूं हृं हॄं ह्लृं ह्लॄं वज्रपद्मामृतघट हुं विशुद्धधर्मधातुस्वभाव सर्वधर्मान् सुविशुद्धधर्मधातुस्वभावान् कुरु२ स्वाहा ॥ मण्डलमध्ये विजयकलशं स्थापयेत् ॥ गन्धादिकं दत्वेति घटाधिवासनं ॥ ततो वज्रसूत्राधिवासनं कुर्यात् ॥ तत्र मन्त्रपदानि ॥ ॐ आः ईं कं ऊं लं वज्रसूत्र सर्वधर्मैकस्वभाव सर्वधर्मान् एकाकारस्वभावान् कुरु२ स्वाहा ॥ गन्धादीन्दत्वा पूर्वभूम्यां निवेशयेत् ॥ सूत्राधिवासनविधिः ॥ ततो वज्ररजोऽधिवासनं करोति ॥ अत्र मन्त्रपदानि ॥ ॐ अं इं कं उं लं हुं विशुद्धपञ्चस्कन्धान् सुविशुद्धधर्मान् कुरु२ स्वाहा ॥ गन्धादिकं दत्वा रजोभाराणि पश्चिमभूम्यां निवेशयेदिति ॥ रजोऽधिवासनविधिः ॥ ततो वज्राधिवासनं ॥ तत्र मन्त्रपदानि ॥ ॐ हूं क्रोधवज्र सर्वसत्त्वकरुणात्मक सर्वधर्मैकसुखस्वभाव सर्वधर्मान् वज्रसुखस्वभावान् कुरु२ स्वाहा ॥ गन्धादिकं दत्वा दक्षिणे निवेशयेदिति वज्राधिवासनविधिः ॥ ततो वज्रघण्टाधिवासनं करोति ॥ तत्र मन्त्रपदानि ॥ ॐ हो व

ज्रघण्टेसर्वधर्मैकप्रज्ञाध्वनिःस्वभाविसर्वाकारसर्वधर्मप्रबोधनिसर्वधर्मान्निःस्वभावेनप्रबोधयरस्वाहा॥गन्धादिकंदत्वाउत्तर
भूम्यांनिवेशयेदिति॥वज्रघण्टाधिवासनविधिः॥इतिभूम्यादिसंग्रहविधिः॥ततःशिष्याधिवासनंआदौमण्डलाधिवासनकाले
मध्येभूम्यादिसंग्रहे॥अनेनमण्डलप्रवेशकालेचसर्वत्रमण्डलंकृत्वादन्तकाष्ठंदत्वाततोरक्षांकरोति॥तत्रैषविधिः॥स्नातस्यधौ
तवस्त्रस्यस्नानाद्यादिकर्मानुरूपेणतस्यामेवभूम्यांमण्डलंकृत्वाउदुम्बरंदन्तकाष्ठंवाद्दशाङ्गुलंअन्यक्षीरवृक्षजंवाशिरसिपुष्पमा
लावद्धंगन्धादिभिरर्चयित्वापूर्वाभिमुखस्यदेयमनेनमन्त्रेण॥ॐआःहूंहोःहंक्षःवज्रदन्तकाष्ठचतुर्विमोक्षमुखविशुद्धस्वभा
वकायवाक्चित्तज्ञानमुखदन्तादिमलंविशोधयस्वाहा॥इतिदन्तकाष्ठंदत्वाअन्याधिवासेनऊर्ध्वतःप्रक्षिप्तं॥मण्डलेपतितंद
न्तकाष्ठंलक्षयेत्॥यत्रपततियेनशिरसातत्रस्कंकर्मप्रसरादिकंतस्यसिध्यति॥इतिदन्तकाष्ठविधिः॥ततोमण्डलभूम्यांशि
ष्यंप्रवेश्यशिरसिकण्ठेहृदिनाभौउष्णीषेतुहो॥ॐआःहूंहोःहंक्षः॥षट्कुलेन्यासंकृत्वावज्रसत्त्वंप्रबोधयेत्॥एभिर्मन्त्रपदैः
॥ॐअआअंअःवज्रसत्त्वमहासुखवज्रकालचक्रशिष्यस्याभिमुखोभवसंतुष्टोभववरदोभवकायवाक्चित्ताधिष्ठानंकुरु२
स्वाहा॥इतिशिष्याधिवासनविधिः॥ततःशिष्यंविसर्जयित्वामण्डलमध्येविजयकलशं॥पूर्वेवज्रसूत्रं॥पश्चिमेवज्ररजोभा
ण्डानि॥दक्षिणेवज्रं॥उत्तरेघण्टां॥द्वारविभागेज्ञात्वादत्वाचार्यआततस्मान्पञ्चस्कन्धेषुदत्वादक्षिणेभागेअभिनिमित्ता
र्थंशय्याधिवासनंकरोति॥अनेनमन्त्रेण॥ॐहोवज्रकमलदलगर्भेशय्येवज्रसुखमहानिद्रांकरोमियथातथागतेनकृ

ताहः स्वाहा ॥ इति शय्याधिवासनं ॥ ततः आचार्यः पश्चिमशिरः पूर्वपादः शयनं करोति ॥ तत्र निमित्तं पश्यति ॥ भावनाबलेन वा स्वप्नेन वा यदि पश्यति बुद्धबोधिसत्वदेवीगणान् वीणादिचिह्नहस्तान् ॥ तदा शोभनं ॥ अथ वज्रडाकिनीकर्त्रिकपालहस्ता क्रोधेन्द्रान् वा मारविघ्नविनायकादीनां विनाशं कुर्वतो रक्षाचक्रान्ते यावत् तथापि शोभनं ॥ अथ किंचित् पश्यति ॥ तदा मध्यमं ॥ अथ मारकायिकान् कृष्णिमाशाञ्जनसदृशशुष्ककायान् कर्तृकपालहस्तान् स्वाङ्गजनापकारतान् पश्येदाचार्य्यः ॥ शिष्यो वा तदा दुर्निमित्तं भवति ॥ तं दृष्ट्वा वज्राचार्य्यः शय्यां विहाय मण्डलपूर्वभूम्यां पूर्वोक्तरक्षाचक्रं ध्यात्वा पुनस्तेभ्यो महोदारबलिं दद्यात् ॥ पूर्वोक्तविधिना ॥ पुनरपरशोधनमन्त्रः ॥ ॐ फ्रें वज्रडाकिनी वज्रभाल्वीश्वरी गगनस्वभावसर्वद्रव्यविशोधनि सर्वद्रव्याणि विशोधय हूं फें फट् ॥ इति बलिविशोधनमन्त्रः ॥ विघ्नोपशमने ॥ ततो भुञ्जानावाहयेत् ॥ आयान्तु भुञ्जाः पितरः समातरः सपुत्रभृत्यैः सहमित्रवान्धवैः ॥ वृताः समयाः सुरदेवनागैः संतोष्यमाणा वरवज्रसत्वे ॥ इत्यनया गाथया तथागतादीन् स्वकाये स्वस्वधातौ विन्यसेदिति ॥ भुञ्जावाहनविधिः ॥ ततो वज्रडाकिनीमाकर्षयेत् ॥ तत्र मन्त्रपदानि ॥ ॐ हह हा हि ही वज्रभैरव आकर्षय २ प्रवेशय २ बन्धय २ तोषय २ जः हूं वं होः वज्रडाकिनीनां हृदयं हुँ हूं फें फें फट् ॥ इत्याकर्षणमन्त्रः ॥ ततो वज्रमुद्रया वज्रडाकिनीनां बलिं गन्धपुष्पधूपप्रदीपाक्षतसहितं पूर्वोक्तविधिना दत्वा वाह्ये श्मशानभूमौ स्नानपानं कुर्वतीश्चिन्तयेदिति ॥ डाकिन्याकर्षणमन्त्रः ॥ ततो मारविघ्नोपद्रवशमनाय रक्षाचक्रपूर्वकं वज्रभैरवयोगमालेख्यसाधनविधिना षडङ्गादिमन्त्रन्यासं कृत्वा ज्ञानसत्वमेकीकृत्य समयस

त्वेन सह सार्धं नोक्तविधिना वक्ष्यमाणां षड्विंशतिभुजं द्वादशलोचनं षट्स्कन्धं चतुर्मुखं त्रिग्रीवं द्विचरणं वक्ष्यमाणायुधधरं विचिन्त्य पूर्वोक्तानि
बीजाक्षराणि स्वशरीरे विन्यस्य ततोऽभिषेकं प्रार्थयेदिति॥ तत्र मन्त्रपदानि॥ ॐ हं हां हिं हीं हुं हूं हृं हॄं ह्लृं ह्लॄं आ ई ॠ ॡ वज्रडाकिन्याव
ज्ञामृतघटैरभिषिञ्चन्तु मां स्वाहा॥ ॐ अं ईं ॠं ऊं ॡं सर्वबुद्धा वज्रमुकुटं मम पञ्चबुद्धात्मकं बध्नन्तु हुं हूं फट्॥ ॐ अ आ अं अः
ह हा हं हः जिं तोः सर्वपारमिता मम वज्रपट्टं बध्नन्तु हुं हूं फट्॥ ॐ हुं हो विज्ञानज्ञानस्वभावैकरसरागप्रज्ञात्मके वज्र वज्रघण्टे सव्ये
तरकरयोर्मम वज्रसत्त्वः सप्रज्ञो ददातु हुं हूं फट्॥ ॐ अ आ ए ऐ अर् आर् ओ औ अल् आल् अं अः सर्वबोधिसत्त्वाः सभार्याः स
र्वदा सर्वकामोपभोगं वज्रव्रतं मम ददन्तु स्वाहा॥ ॐ ह हा य या र रा व वा ल ला सर्वक्रोधराजाः सभार्याः मैत्रीकरुणामुदितोपेक्षास
र्वसमतास्वभाववज्रपूर्वंगमं नाम मे ददन्तु हुं हूं फट्॥ ॐ एवंमम वज्रचिह्नौ प्रज्ञोपायौ मण्डलाधिपती वज्रमुखवज्ञानाङ्कं मम दद
तां हुं हः हूं फट्॥ इत्यभिषेचनं कृत्वा ततोऽभिषिक्तं सप्ताभिषेकैरात्मानं भावयेदिति॥ ततः सप्ताभिषेकलब्धोऽहंकारमावहेत्॥ ॐ
सर्वतथागतसप्ताभिषेकसप्तभूमिप्राप्तोऽहमिति॥ सप्ताभिषेकानुज्ञाविधिः॥ ततो मन्त्री कलशादिकमुत्तराभिषेकं प्रार्थयेदे
भिर्मन्त्रपदैः॥ ॐ ॐ प्रज्ञोपायौ कलशाभिषेकं मे ददतां हुं हूं फट्॥ ॐ आः प्रज्ञोपायौ गुह्याभिषेकं मे ददतां हुं हूं फट्॥ ॐ हुं
प्रज्ञोपायौ वज्रसत्त्वविश्वमातरौ प्रज्ञाज्ञानाभिषेकं मे ददतां हुं हूं फट्॥ इत्यभ्यर्थ्य तत आत्मानं वक्ष्यमाणविधिनाभिषिक्तं भावये
त्॥ ततोऽहंकारमावहेत्॥ ॐ ॐ वज्रसत्त्वेन वज्रकलशाभिषेकेनाभिषिक्तो वज्रसत्त्वपुत्रोऽचलाभूमिलब्धोऽहमिति॥ ॐ आः व

ज्रसत्वेन उदकाभिषेकेनाभिषिक्तो वज्रसत्वसुवर्जोनवभूमिलब्धोऽहम्॥ ॐ हुं वज्रसत्वेन प्रज्ञाज्ञानेनाभिषिक्तो द्वितीयवज्रधरोऽ
हं धर्ममेघाभूमिलब्धोऽहमित्यहंकारं कुर्यादित्युत्तराभिषेकविधिः॥ तत उत्तरं गुरुं चतुर्थाभिषेकमुपदेशातः प्रार्थयेदनेन
मन्त्रेण॥ ॐ हो प्रज्ञोपायात्मक वज्रसत्व महासुखज्ञानाभिषेकं मे प्रयच्छ॥ ॐ आः हूं हो फट्॥ अनेनाधिष्ठानात्मानं वै सत्वेनाभिषि
क्तं भावयेत्॥ ततो वज्रसत्वाहंकारमुद्वहेत्॥ ॐ हो धर्मधात्वक्षर चतुर्थाभिषेकेणाभिषिक्तो वज्रसत्वात्मनाहं द्वितीयो द्वादश
भूमिलब्धो वज्रसत्वो महार्थः परमाक्षरः॥ त्रैलोक्यविजयः कालचक्रो भगवान्॥ एवं कारयेत्॥ इत्युत्तराभिषेकविधिः॥
॥ ॥ इदानीं षण्मुद्रामन्त्रपदानि॥ ॐ हं हः वामदक्षिणकर्णयोः वज्रकुण्डले हुं हूं फट्॥ ॐ अं अः कण्ठे वज्रमेखला
वज्रकण्ठिके हुं हूं फट्॥ ॐ अ आ वामदक्षिणकरयोः वज्ररुचकौ हुं हूं फट्॥ ॐ हु हू वामदक्षिणपादयोः वज्रनूपुरे हुं हूं फट्
॥ ॐ हं वं पञ्चाक्षरमहासुखस्वभाव महावज्रशिरोमणि शिरसि सर्वाङ्गे भस्म हुं हूं फट्॥ ॐ अं अर्द्धनारीश्वर वज्रार्द्धचन्द्र
वज्रपट्टौ हुं हूं फट्॥ ॐ अ अः अं वज्रस्वैरकनिस्वरस्वभाववज्रयज्ञोपवीत स्कन्धे हुं हूं फट्॥ इति षण्मुद्राविधिः॥ ततो वक्ष्य
माणा गजचर्ममुद्राद्या महापरचतुर्मुद्रामन्त्रपदानि॥ ॐ क्षः दुर्दान्ताभिमानेक्षयंकरव्याघ्रचर्मकट्यां हुं हूं फट्॥ ॐ हं क्षः त्रिं
शत्स्वरसम्प्रतिहृस्वदीर्घव्यञ्जनस्वभावे देहजलखानशिरोभिर्मुण्डमालावलम्बिनी स्कन्धे हुं हूं फट्॥ ॐ हा हि ह हु हू पञ्च
स्कन्धविशुद्धस्वभावे शिरसि कपालमाले हुं हूं फट्॥ इति चतुर्मुद्राविधिः॥ एवं दशमुद्रा दशपारमिताभेदेन षोडशस्थानेभि

दन्तैषोडशभिन्यसेत इति मुद्रान्यासविधिः॥ ततो दक्षिणवामकरे चास्त्राणि भावयेत्॥ तत्र मन्त्रपदानि॥ अस्त्रबीजेनोच्चारयेत्॥ ओं क्षुः
क्रोधवज्र हूं फट्॥ ओं क्षुः वज्रखड्ग हूं फट्॥ ओं क्षुः वज्रत्रिशूल हूं फट्॥ ओं क्षुः वज्रकर्त्रि हूं फट्॥ ओं क्षुः वज्रबाण हूं फट्॥ ओं क्षुः
वज्राङ्कुश हूं फट्॥ ओं क्षुः वज्रडमरुक हूं फट्॥ ओं क्षुः वज्रमुद्गर हूं फट्॥ ओं क्षुः वज्रचक्र हूं फट्॥ ओं क्षुः वज्रकुन्त हूं फट्
ओं क्षुः वज्रदण्ड हूं फट्॥ ओं क्षुः वज्रपर्शु हूं फट्॥ इति दक्षिणायुधन्यासः॥ ततो वामे मन्त्रपदानि॥ ओं हां कारादिनोच्चारये
त्॥ ओं हां वज्रघण्टा हो फ्रें फट्॥ ओं हां वज्रखेटक हो फ्रें फट्॥ ओं हां वज्रखट्वाङ्ग होः फ्रें फट्॥ ओं हां वज्रकपाल हो फ्रें फट्
ओं हां वज्रचाप होः फ्रें फट्॥ ओं हां वज्रपाश होः फ्रें फट्॥ ओं हां वज्ररत्न होः फ्रें फट्॥ ओं हां वज्रपद्म होः फ्रें फट्॥ ओं हां वज्र
शङ्ख होः फ्रें फट्॥ ओं हां वज्रादर्श होः फ्रें फट्॥ ओं हां वज्रशृङ्खले होः फ्रें फट्॥ ओं हां वज्रचतुर्वेदकुरक्षभावब्रह्मशिरः होः १८४
फ्रें फट्॥ इति वामकरे भुविन्यासविधिः॥ ततो गजचर्ममन्त्रपदानि॥ ओं क्षक्षा क्षिक्षी क्षृक्षॄ क्षुक्षू क्ष्लृक्ष्लॄ क्षंक्षः॥ हहा हिही हहृ
हृहॄ हॢहॣ हंहः॥ सर्वविघ्नविदारिणि गजचर्मपटार्द्र रक्तप्रवर हुं फें सव्यवामकरमुष्टिभ्यां सतर्जनीभ्यां दक्षिणे शिरोऽग्रपृष्ठपाद
द्वये लम्बमाने पादद्वये त्र्यम्बकं चिन्तयेदिति॥ चर्मोद्धरणविधिः॥ ततो दशनागराजान् विन्यसेत्॥ तत्र मन्त्रपदानि॥ ओं हूं वज्र
जयनागेन्द्र वज्रजटामुकुटं बन्धे तिष्ठ २ हुं हूं फट्॥ ओं श्रूं वज्रविजयनागेन्द्र वज्रपन्नगबन्धे तिष्ठ २ हुं हूं फट्॥ ओं ह्यं यो वज्रक
र्कोटक वज्रपद्मवामदक्षिणकुण्डलयोः तिष्ठ २ हुं हूं फट्॥ ओं हं हा वज्रवासुकि कंखपालो वामदक्षिणरुचकयोः तिष्ठ २ हुं हूं फट्

ॐ हुँ हा वज्रानन्तकुलिकौ मेखलाकण्ठिकयोः तिष्ठ २ हुँ हुँ फट्॥ ॐ हुँ ला वज्रन[illegible]कमहापद्मौ वामदक्षिणपादनूपुरयोः तिष्ठ
२ हुँ हुँ फट्॥ एवं सर्वमन्त्रमुद्राविन्यासं कृत्वा॥ ततः षोडशपदिकं डाकिनीजालसहितं दुष्टनिग्रहमन्त्रं मारादिनिग्रहार्थं कालच
क्रभगवतआवर्त्तयेन्मन्त्री जितेनियमनः॥ तत्र मन्त्रपदानि॥ तद्यथा॥ ॐ नमो वज्रसत्त्वाय॥ नमो बुद्धबोधिसत्त्वेभ्यः॥ नमो वज्रक्रो
धेन्द्रराजेभ्यः॥ नमो विश्वमात्रे॥ नमो बुद्धबोधिसत्त्वदेवीभ्यः॥ नमो वज्रडाकिनीभ्यः॥ ॐ नमो भगवते कालचक्राय १ वज्रभैर
वभीकराय २ महेन्द्रनीलवर्णशरीराय ३ नारकिशहृदयाक्रान्तसितरक्तचरणाय ४ कृष्णरक्तसितकण्ठाय ५ नीलसितपीत
रक्तदंष्ट्राकरालोग्रभीषणमुखाय ६ कृष्णरक्तसितसव्येतरस्कन्धाय ७ द्वादशभुजाय ८ षड्विंशतिकराय ९ वज्रखड्गत्रिशू
लकर्त्तिकावाणाङ्कुशडमरुकमुद्गरचक्रकुन्तदण्डपर्शुवज्रघण्टाखेटखट्वाङ्गकपालचापपाशरत्नकमलशंखआद
र्शशृंखलाब्रह्मशिरोगजचर्मधृतकराय १० व्याघ्रचर्मनिवसनाय ११ स्कन्धे मुण्डमालावलम्बिने १२ शिरसि वज्रप[illegible]मुकु
टवज्रकपालमालार्द्धचन्द्रधराय १३ कुण्डलहारचककण्ठिकामेखलानूपुरभस्मयज्ञोपवीतशिरोमणिमहाभुजगनागेन्द्रवि
भूषणाय १४ वज्रडाकिनीसंतोषितहृदयाय १५ इन्द्राग्नियमनैरृत्यवरुणवायुकुवेरईशानब्रह्मविष्णुविनायकका
र्त्तिकेयनन्दिमहाकालग्रहनक्षत्रक्षेत्रपालसुरेन्द्रासुरेन्द्रफणीन्द्रभूतेन्द्रनरेन्द्रसंस्तुतचरणाय १६ इति षोडशपदिकं
मन्त्रं भगवतोस्य कोटिजापेन सर्वकर्माणि सिध्यन्ति॥ सर्वाष्टमहासिद्धिपादशलक्षहोमेनेति॥ पूर्वसेवानियमः॥ ततः पठित

मोत्रेण सर्वं करोति॥ ॥इदानीं मारशत्रुजलधरमाला बीजानि डाकिनीजालस्यापि तान्येव॥ ह हा क्ष क्षा ङ ञा कः काः न ना म मा ण णा न
ना हुं हूं फ्रें फ्रें फट् फट् श्मशाने॥ क्रृ क्रॄ ळ ळ्ह ट टृ ष षी ह हा हुं हूं फट् इत्याकाशचक्रे॥ ञ्रृ ञ्रॄ ङ ङ्ह ह हृ डि डी य या हुं हूं फट्॥ इति वायुचक्रे॥ म्रृ
म्रॄ ण ण्ह ट्ह टृ ठि ठी र रा हुं हूं फट्॥ इत्यग्निचक्रे॥ न्रृ न्रॄ ञ ञ्ह व वृ भि भी व वा हुं हूं फट्॥ इत्युदकचक्रे॥ न्रृ न्रॄ ण ण्ह थ थृ ह हृ धि धी ल ला हुं हूं फ
ट्॥ इति पृथिवीचक्रे॥ म्लृ म्लॄ च च्ह श शृ शि शी हं हः हुं हूं फट् इति ज्ञानचक्रे॥ एवं यथासंख्यं वज्रखड्गरत्नपद्मचक्रकर्तृकावलयो ह
कारादिभिर्दशबीजैश्चक्रादिकनायिका इति॥ ह हा हि ही हु हू हृ हॄ इति प्रज्ञोपाययोः हस्तद्वये शेषाष्टकपालानि देवीनामन्तरा
न्तरे अ आः अं अः ह हा हं हः फ्रें होः इति दशपारमिता इति डाकिनीजालमन्त्रपदानि पञ्चमपटले इदं मन्त्रं वक्ष्यति रौद्रकर्मणी
ति नियमः॥ ॥इदानीं भगवतो मालामन्त्र प्रत्यक्षमुच्यते॥ ॐ आः हूं होः हं क्षः ह्म्ल्व्र्यं कालचक्र १ दुर्दान्तदमक जातिजरामरणा
न्तक २ त्रैलोक्यविजय ३ महावीरेश्वर ४ वज्रभैरव ५ वज्रकाय ६ वज्रगात्र ७ वज्रनेत्र ८ वज्रश्रोत्र ९ वज्रघ्राण १० वज्रजिह्व ११ वज्र
दन्त १२ वज्रनख १३ वज्रकेश १४ वज्रलोम १५ वज्राभरण १६ वज्रहास १७ वज्रगीत १८ वज्रनृत्य १९ वज्रायुधकर २० वज्रक्रोधाधि
पते २१ वज्रडाक २२ वज्रडाकिनीजालपरिवृत २३ शीघ्रमागच्छ २४ वज्रसत्वाज्ञया सर्वमारविघ्नविनायककिंनरकिंपुरुषगरु
ड गन्धर्वयक्षराक्षसभूतमहाप्रेतकुम्भाण्डापस्मारक्षेत्रपालवेताडपूतनदुष्टनागग्रहादयो ये सर्वे ज्वरसर्वव्याधिरुजोपद्रवका
रिणः सर्वसत्वानां सर्वापकाररतास्तान् जः शीघ्रं वज्राङ्कुशेनाकृष्याकृष्य २५ ऊर्ध्वदिशिगतानाकृष्याकृष्य २६ पूर्वदिशिगतानाकृष्या

कृष्य २७ दक्षिणादिशिगतानाकृष्याकृष्य २८ उतरदिशिगतानाकृष्याकृष्य २९ पश्चिमदिशिगतानांकृष्याकृष्य ३० वायुव्यदिशिगता
नांकृष्याकृष्य ३१ ईशानदिशिगतानाकृष्याकृष्य ३२ नैर्ऋत्यदिशिगतानांकृष्याकृष्य ३३ आग्नेयदिशिगतानाकृष्याकृष्य ३४ अधो
दिशिगतानाकृष्याकृष्य ३५ आकाशमण्डलगतानाकृष्याकृष्य ३६ वायुमण्डलगतानाकृष्याकृष्य ३७ तेजोमण्डलगतानाकृष्याकृ
ष्य ३८ तोयमण्डलगतानाकृष्याकृष्य ३९ पृथ्वीमण्डलगतानाकृष्याकृष्य ४० कामधातुगतानाकृष्याकृष्य ४१ रूपधातुगतानाकृष्या
कृष्य ४२ अरूपधातुगतानाकृष्याकृष्य ४३ कायधातुगतानाकृष्याकृष्य ४४ वाग्धातुगतानाकृष्याकृष्य ४५ चित्तधातुगतानाकृष्याकृ
ष्य ४६ पञ्चस्कन्धगतानाकृष्याकृष्य ४७ पञ्चधातुगतानाकृष्याकृष्य ४८ पञ्चेन्द्रियगतानाकृष्याकृष्य ४९ पञ्चविषयगतानाकृ
ष्याकृष्य ५० पञ्चकर्मेन्द्रियगतानाकृष्याकृष्य ५१ सर्वतोपत्रकृत्वचित्तगतानाकृष्याकृष्य ५२ महाश्मशाने वज्राग्निज्वलितभूम्यां
नपातय २। ५४ वज्रपाशेनसर्वभिजेभबन्धय २। ५५ वज्रशृङ्खलयासर्वपादेषुनिरोधय २। ५६ सर्वसत्वकायवाक्चित्तोपद्रवकारकतान
तान महाक्रोधवज्रेणचूर्णय २। ५७ वज्रखड्गेननिकृन्तय २। ५८ वज्रत्रिशूलेनभेदय २। ५९ वज्रकर्त्रिकयाहन २। ६० वज्रबाणेन
विध्य २। ६१ वज्रकीलकेः कीलय २। ६२ वज्रमुद्गरेणाकोटय २। ६३ वज्रचक्रेणछेदय २। ६४ वज्रकुन्तेनभिन्द २। ६५ वज्रदण्डे
नताडय २। ६६ वज्रपर्शुनाछिन्न २। ६७ सार्द्धत्रिकोटिखण्डंकृत्वाश्मशानभूम्यांसर्वभूतेभ्योबलिंकुरु २। ६८ वज्रडमरुके
नवज्रडाकिनीरावाहय २। ६९ वज्रडाकिनीभ्योमारकायिकानांरुधिरंनिवेधय २। ७० पञ्चामृतमहाहारिणीभ्यः पञ्चामृतंनिवे

दय२।७१सर्ववज्रडाकिनीसंहितः सर्वसत्वानांशान्तिकंपौष्टिकंरक्षावरणंतुछिन्तुस्वरु हुँ ह्रीँ फट्॥७२। अमिप्रस्फमालामन्त्रोभ
गवतोवज्रभैरवकालचक्रस्यसर्वमारविघ्नापराजितप्रेताधिपतीनांसर्वदुष्टानांसप्तवारमावर्जितोनिग्रहंकरोति॥ अस्यापिपू
र्वंकोटिजापोदशलक्षहोमःकर्त्तव्यः॥ प्रत्येककर्मणिदशलक्षजापोदशांशतोहोमइतिनियमः॥ ततोमारनिग्रहंकृत्वाउनः
पुनःशय्यासनेकुर्यात्॥ यावच्छुभनिमित्तंलभते॥ ततःशय्यांविहायवज्रवज्रघण्टांगृहीत्वाउत्तरेवबलिंदद्यात्॥ ततोमण्ड
लपश्चिमभूम्यांपूर्वाभिमुखोवज्रसूत्रंगन्धधूपादिभिःसंपूज्य॥ ततःश्रीखण्डशालिपिष्टरुधिरविषचित्रकारेण॥ ॐकमर
कचन्दनहरिद्रातालकोदकेनशान्त्यादिकर्माभिप्रायेणाचार्योवामनुष्याशिष्योदक्षिणानुष्ठ्यापश्चिमाभिमुखःसूत्रंसं
गृह्यपश्चिमपूर्वभूम्यांप्रसार्यइदंमन्त्रमुच्चारयेत्॥ ॐ आः हूँ अकायवाक्चित्तैकभूताःसर्वधर्माःसकाकारेणवज्रसत्वो हूँ
वज्रभूमिंसूत्रयामि हूँ आः फट्॥ ततोवज्रसूत्रेणमन्त्रमुदाहरेत्॥ ॐ वज्रसूत्रैकाकारस्वरूपेण जः जः जः सर्वधर्माःसूत्र
य ॐ आः हूँ हो हं क्षः फट्॥ वामार्द्धपर्यङ्कोदक्षिणपादोऽवनौनिषण्णः शिष्योदक्षिणपर्यङ्कोवामपादोभूमौनिषण्णः॥ पू
र्वापरंब्रह्मसूत्रंपातयेत्॥ ततआचार्योदक्षिणभूम्यांस्थितःशिष्यउत्तरभूम्यांस्थितःदक्षिणोत्तरंब्रह्मसूत्रंचतुर्वारेभगतंपू
र्वापरदक्षिणोत्तरकीलकमूर्द्धे॥ ततःस्वरुचिनाकोणसूत्रंपातयेत्॥ पुनस्तेनैवपर्यङ्कादिविधिनावायव्याग्नेयसूत्रंपातये
त्॥ नैर्ऋत्येशानंततोदिशापरिघंवर्जयित्वापूर्वापरब्रह्मसूत्रादारभ्यदक्षिणभूम्यांसूत्रंपातयेत्॥ ततउत्तरभूम्यांततोदक्षि

णो नर ब्रह्मसूत्रात् पश्चिमभूम्यां ततः पूर्वभूम्यां ॥ ततो मन्त्रधूपादिकं दत्वा मण्डलकार्मसूत्राणि संरक्ष्य सर्वशेषाणि लोपये
त् ॥ सर्वधारारिणां संक्षोभ्य पुनर्गन्धधूपादिकं बलिं दत्वा पूर्वोक्तविधिना मन्त्रजापं कुर्य्यादिति ॥ ॥ इति मूलतन्त्रानुसारिण्यां
लघुकालचक्रतन्त्रराजटीकायां षोडशसाहस्रिकायां विमलप्रभायां रक्षाचक्रे पूर्वङ्गमभूम्यादिसंग्रहमहोद्देशोऽभिषे
कपटले द्वितीयः ॥ ॥
सूत्रं वै ब्रह्मसूत्राद्दलनवनिरिदं दिग्विभागप्रदेशे स्रुवे रश्मीन्दुलीलैर्भवति वसुयुगैः मण्डले गर्भमध्ये ॥ गभी
र्वाह्ये समस्ते रचितमपि महामण्डलं वारसीम्नः प्राकारैस्तोरणाद्यैः शिखिचलवलयं दर्शयेद्बाह्यभूम्यां ॥ २६ ॥
प्रणिपत्य त्रिवज्राग्रं कालचक्रं महासुखं ॥ नायकं मण्डलेशानां मण्डले षष्टभागिके ॥ चन्द्रार्ककलाभागैर्वज्रसूत्रप्रपाति
ते ॥ भूयो भूयः कलाभागैः कायवाक्चित्तमण्डले ॥ मूलतन्त्रानुसारेण लक्षणं वितनोम्यहं ॥ लघुतन्त्रे प्रपञ्चेन यदुक्तं मञ्जुवज्रि
णा ॥ अहंकारविनाशार्थं मूर्खाणां जातिवादिनां ॥ चतुर्हस्तेऽङ्गुलीर्द्वे सितसूत्रैः श्रीमण्डलत्रये ॥ इह परमादिबुद्धोद्धृते मण्डल
लक्षणं पञ्चविंशतमादिवृत्तैः सङ्गीतं मञ्जुश्रिया यत्तदिदानीं वितन्यते मूलतन्त्रानुसारेण सूत्रामित्यादिना ॥ इह पूर्वं मण्डल
भूम्यां पश्चिमे वज्राचार्यः पूर्वाभिमुखः पूर्वे शिष्यः कर्मवज्री पश्चिमाभिमुखेन ॥ मण्डलभूमिं चतुरस्रां मापयित्वा मध्ये ब्रह्मसूत्रं

पातयेत्॥ ततआचार्यो दक्षिणे उत्तराभिमुखः शिष्य उत्तरे दक्षिणाभिमुखः॥ ब्रह्मसूत्रं पातयेदिति॥ ब्रह्मसूत्रनियमः॥ कोणसूत्रं
पातयेद्वा कोणभ्रमार्थं ततो ब्रह्मसूत्रात् सूत्रं रसनवतिरिदं दिग्विभागे प्रदेयमिति॥ इह मध्यब्रह्मसूत्रात् दक्षिणदिग्विभागे षड्
नवतिः॥ उत्तरे षण्णवतिः॥ पूर्वे षण्णवति॥ पश्चिमे षण्णवतिरिति॥ सूत्राशादत्वा प्रकर्षेण सूत्रैरक्षांगुलीके भवति वसुयुगैरिति
॥ तेषु सूत्रेषु षट्चत्वारिंशत् सूत्रैर्मण्डलगर्भमध्ये चितमण्डलं भवतीत्यर्थः॥ गर्भार्धं वाह्ये समस्तैरिति॥ जानतत्यधिकशतेन रचितमिति
महामण्डलं द्वारसीमेति॥ गर्भमण्डलसूत्रेभ्यो द्विगुणसूत्रैर्वाह्यमण्डलं भवति द्वारसीमत्वः॥ वाह्यमण्डलसूत्रेभ्यो द्विगुणैः कायमण्ड
लं भवति॥ द्वारपर्यन्तमिति॥ ततः कायमण्डले पञ्चप्राकारान् तोरणांश्च पृथिव्यादिवलयचतुष्कं वज्रावलिं दर्शयेत्॥ वायुभूम्या १५७
आकाशभूम्यामित्यर्थः॥ ॥

चक्रस्याजं हि भर्तुश्चित्रगुणमपि भवेद्देवतानामसराणां ब्रह्मस्थानेऽर्ककोष्ठैः पुनरपि शशिना साम्यवज्रावली स्यात्॥ उष्णाय
श्लैश्चतुर्भिः प्रभवति शशिना वाह्यवज्रावली च देवीवृन्दोत्तराले भवति घटकपालासनस्था त्रिकोष्ठैः॥ ३७ ॥

इति सूत्रपातनियमोऽयं सम्प्रपञ्चार्थेनोक्तः॥ चतुरतोऽस्य पश्चिमपञ्चाशदादिवृत्तबन्धेनोक्तं॥ षड्घ्नकार्येक सूर्यैरित्यादिभागैर्नि
यमः॥ तस्मादभिरब्धांगुलोत्कृष्टकोष्ठैर्यन्मानं तन्नाचार्यप्रपञ्चार्थं॥ यदपरं षट्स्वादिभागैर्बालशिष्यप्रबोधाय उक्तमिति॥ तस्मा

मानि सूत्राणि लोपनीयानि ॥ तानि न पातयानि ॥ इत्यपरविशेषो नियमः ॥ तस्मान्मूलतन्त्रानुसारेण सूत्रपात उच्यते ॥ निःप्रपञ्चचन्द्र
कलाभृद्भाति ॥ तथा भगवानाह ॥ चतुरस्रं समे भूम्यां कृत्वा षोडशभागिकं ॥ कायमण्डलकं त्यक्त्वा पुनः षोडशभागिकं ॥ वागाख्यं मण्ड
लं कुर्यात्ततो वाङ्मण्डलं न्यसेत् ॥ चित्तमण्डलकं कुर्यात्पुनः षोडशभागिकं ॥ एवं त्रिपञ्चसंयुक्तं मण्डलं त्रितयात्मकं ॥ ततो घ्या
दिभागेस्तं सूत्रेयन्मण्डलत्रयमित्यादि सूत्रनियमः ॥ कायवाक्चित्तमण्डले भगवतोक्तेनानेन मूलतन्त्रोक्तविधिना वज्राचार्येण
सूत्रपातः कर्त्तव्यो लोप्यानि सूत्राणि वर्जयित्वेति नियमः ॥ ॥ अत्रापि चित्रणाय द्वृवर्त्तिविभागाः कोष्ठका उक्ता भवन्ति ॥ चतु
र्हस्तात्मके त्रिमण्डले ॥ तत्र षोडशविभागेषु प्रत्येकविभागो द्वादशकोष्ठो भवति ॥ एवं षोडशभागेषु चित्रणा अष्टवत्यकोष्ठं
लानि भवन्ति ॥ अतः प्रथमं षोडशविभागं मण्डलार्थं भूमितलं कर्त्तव्यं ॥ ततो बाह्ये चतुर्दिक्षु चतुर्विभागं त्यक्त्वा उभयपार्श्वेष्ट
भागांस्त्यक्त्वा भवन्ति वाङ्मण्डलार्थं ॥ ततो वाङ्मण्डले भागाष्टकं यत्तदेव षोडशविभागं कुर्यात् ॥ प्रत्येकभागमध्ये सूत्रं दत्वा ॥ तत्र
षोडशविभागाः षड्कोष्ठका भवन्ति ॥ ते पुनश्चित्तमण्डलार्थं पूर्वे भागचतुष्कं अपरेप्येवं वामदक्षिणेप्येवं त्यक्त्वा अपरं
गर्भभागाष्टकं षोडशविभागं कुर्यात् ॥ प्रत्येकभागमध्ये सूत्रं दत्वा तत्र षोडशविभागास्सप्तकोष्ठका भवन्ति ॥ चित्तमण्डले ॥ ए
वं भवति वज्रपुंगेरष्टचत्वारिंशाधिरकोष्ठकैस्सप्तकोष्ठकात्मकैः षोडशविभागैरिति ॥ ते सूत्रतस्सूत्रात वामदक्षिणपूर्वापरं भाग
द्वयं चतुर्वीरमातार्थमुक्तं भगवता चित्तमण्डले ॥ एवं सप्तकोष्ठकं भागचतुष्कं वाङ्मण्डलद्वारार्थमुक्तं ॥ तथा सप्तकोष्ठकं भागाष्ट

कंकायमण्डलं वाराणर्थमुक्तमिति ॥ एवं चित्रवाकाय मण्डले चक्राष्टभागिकं वारं स्वस्वचक्रमानाद्भवति ॥ चक्रं च प्राकारादिसी
म्नो वेदितव्यो त्रिमण्डले प्येवं ॥ ॥ तत्स्थानाद्रङ्गभूमिर्भवति दिनकरेश्च विरेखं हियावद्दिक्कोणस्थाधिकोष्ठेः शशिरवि
कमलान्येव गन्धादिकानां ॥ सोर्द्धकेसरत्रिरेखं भवति कटतुरस्रे वीरनिर्व्यूहकाश्च तत्पक्षे कपाले त्रिभिरपि चमहावेदिका
स्तम्भमण्डपः ॥ ३८ ॥
तस्यार्द्धेन रङ्गकालेर्भवति मणिमयापट्टिकाधारभूमिं स्वस्तम्भं तोरणस्या त्रिगुणितदशाभिर्वारमूलादि तथ्य ॥ सूत्रा
र्द्धमूर्ध्वं बद्धं प्रभवति वङ्कुलीचार्द्धहारावसाने षट्कोष्ठतोरणार्थी वस्तुकमलपुतनापट्टिका योगिनीनां ॥ ३९ ॥
ब्रह्मसूत्राद्वामदक्षिणपूर्वापरमङ्गुलार्द्धद्वयं त्यक्त्वा सूत्रं पातयेत् ॥ गर्भकमलकर्णिकानायकासनार्थं चतुर्षु दिक्षु द्वारे
षु देवतापञ्चासनार्थमिति ॥ ततो वामदक्षिणपूर्वापरदिक्षु अष्टविरिति चतुरर्द्धाङ्गुलानि कमलदलानि भवन्ति ॥ नायकक
मलं शेषाणां देवतादेवीनामासनानां विगुणं ॥ एवं ब्रह्मस्थाने अर्ककोष्ठे रिति द्वादशार्द्धाङ्गुले भगवतः पञ्चपद्मत्रिभा
गिका कर्णिका चतुरर्द्धाङ्गुला भवतीति नियमः ॥ दिक्षु पत्रमध्ये सूत्रं पातयित्वा शेषं त्र्यर्द्धाङ्गुलं द्विधा कृत्वा सपादाङ्गु
लविभागेन गर्भमण्डले रेखात्रयं भवति ॥ अपरेण पक्षकं भवति ॥ ततः कमलपत्रवाले एकेनार्द्धाङ्गुलभागेन वज्रावलिस्था

नं॥ ततश्चतुर्भिरर्द्धाङ्गुलैर्देवताकमलानि कमलमध्ये सूत्रं पातयित्वा पूर्ववज्रावलीभागेन सार्द्धं चीरापर्द्धाङ्गुलानि भवन्ति
नि षु मध्ये सूत्रं दत्वा कपालस्थाने प्राकारभूमिस्तोरणास्तम्भा भवन्ति॥ सार्द्ध सार्द्ध विभागेनेति॥ ततोऽब्जासनाद्व्यङ्गुलार्द्धे
न बाह्ये वज्रावली भवति ऽब्जदेवीनां मध्ये॥ कर्णेष्वस्त्रासनानि घटानां कपालानां वा भवन्ति॥ अष्टाङ्गुलविभागेन वामदक्षि
णेन षोडशस्तम्भान्तरे॥ शेषं ऽब्जासनमानेनेति॥ ततो वज्रावल्याः अर्द्धाङ्गुलं भागद्वयं त्यक्त्वाऽर्द्धाङ्गुलेन सूत्रं पातयि
त्वा॥ ततश्चतुर्भिर्गन्धादीनां देवीनां घ्राणादीनां देवतानामासनार्थं सूत्रं पातयेत्॥ ततोऽर्द्धाङ्गुलं त्यक्त्वा सार्द्धार्द्धाङ्गुलेन
प्राकारत्रयं भवति॥ एवं प्राकारभूमेर्द्विगुणा वेदिकाभूमिः॥ वेदिकार्द्धेन रत्नपट्टिका रत्नपट्टिकाद्विगुणा हारार्द्धभू
मिः॥ हारभूमेरर्द्धा वकुलीकवशीर्षकं॥ एवं द्वारतुल्यं निर्यूहं निर्यूहतुल्यं पक्षकं कपालं च तथा द्वारमानात् स्तम्भोपरि
त्रिगुणं तोरणं॥ एवं गर्भमण्डले सूत्रपातनियमः॥ एवं सूत्रे वै प्रसूत्रादित्यारभ्य प्रभवति वकुलीचार्द्धहारावसान
इति पर्यन्तं पूर्वसूत्रपातः॥ पुनर्मण्डलार्थमपरो षष्ठिकाष्टेक इत्यारभ्य तोरणं प्रोक्तभागैरिति पर्यन्तं चित्तमण्डलेऽ
भयसूत्रपातः प्रोक्त इति चित्तमण्डले नियमः॥ इदानीं मूलमन्त्रोक्ततोरणलक्षणमुच्यते॥ इह तोरणं सर्वत्र द्वारमाना
त्त्रिगुणं भवति॥ तत्र चित्तमण्डलेऽर्द्धाङ्गुलैः षड्भिर्द्वारं तनस्त्रिगुणं॥ अष्टादशार्द्धाङ्गुलैस्तोरणं भवति॥ तदेव त्रिगुणं
कारयेत्॥ प्रथमे पुरमर्द्धाङ्गुलैः षड्भिः॥ द्वितीये सार्द्धचतुर्भिः॥ तृतीये त्रिभिः सार्द्धैः॥ ततो हर्मिका स्यां। वाभ्यां कलशमि

ति॥ एवमष्टादशभागैस्त्रिपुरं तोरणमिति॥ तत्र प्रथमपुरे। अर्द्धाङ्गुलविभागेन स्तम्भोपरि पट्टिका दीर्घत्वेन चतुर्विंशत्यङ्गुला॥ तदुपरि अर्द्धाङ्गुलविभागेन मत्तवारणा दीर्घत्वेन षोडशार्द्धाङ्गुलं तदुपरि गर्भकर्णिका मानेन चतुरस्रं मध्ये दुर्गादेवीनां स्थानं॥ तस्य सव्यावसव्ये अर्द्धाङ्गुलेन स्तम्भं तयोः सव्यावसव्ययोर्देवीस्थानं॥ ततः पुनः स्तम्भं सव्यावसव्ये॥ तयोः सव्यावसव्ये तोरणस्तम्भोपरि आक्रान्तगजेसिंहयुगलं मूर्द्धि शिरसादर्शयेत्॥ तयोः शिरउपरि अधः पट्टिकार्द्धभागेन चतुःस्तम्भोपरि दीर्घत्वेनाष्टादशार्द्धाङ्गुला पट्टिका भवति॥ तदुपरि स्तलमत्तवारणावत् मत्तवारणा दीर्घत्वेन द्वादशार्द्धाङ्गुलं॥ तदुपरि पादोनार्द्धाङ्गुलविभागेन प्रत्येकस्तम्भं॥ स्तम्भान्तराले त्रिभिस्त्रिभिरर्द्धाङ्गुलैश्रीरीदेवतास्थानानि चिह्नस्थानानि वा बाह्यस्तम्भयोः सव्यावसव्यं सालभञ्जिकां कुर्यात्॥ तयोः शिरउपरि चतुःस्तम्भोपरि पुनरर्द्धाङ्गुलार्द्धभागेन पट्टिका दीर्घत्वेन पञ्चदशार्द्धाङ्गुला॥ तदुपरि मत्तवारणा पूर्ववत्॥ अर्द्धाङ्गुलेन दीर्घत्वेनाष्टार्द्धाङ्गुलं तदुपरि अङ्गुलार्द्धार्द्ध विभागेन प्रत्येकस्तम्भं कुर्यात्॥ स्तम्भान्तरान्तरे स्तलपुरदेवतास्थानार्द्धविभागेन स्थानत्रयं तत्र बाह्यस्तम्भयोः सव्योपसव्यं पुनः सालभञ्जिकां कुर्यात्॥ तदुपरि भागार्द्धेन पट्टिका द्वादशार्द्धाङ्गुला॥ तदुपरि अष्टार्द्धाङ्गुला दीर्घत्वेन हर्मि॥ तदुपरि घण्टाकलसं सव्यावसव्यं ध्वजदण्डस्थाने॥ एवं प्रत्येकपट्टिकाग्रे चामराणि॥ आदर्शश्च लम्बमानो ध्वजश्चेति॥ ग॥

तोरणमानलक्षणं मूलतन्त्रोक्तमिति॥ ॥इदानीमाब्जमण्डलमुच्यते॥ षट्कोष्ठैस्तोरणार्धं चमुकमलयुता पट्टिका योगिनीनामिति॥ इह वाब्जमण्डले ये चतुर्विभागाः चतुर्दिक्षु षडर्धाङ्गुलात्मकास्तेषु भागद्वयेन गर्भमण्डलप्राकारवेदिकारत्नपट्टिकाहारार्द्धहारबकुलीकवशीर्षाणि भवन्ति तानि॥ शेषं भागद्वयं तिष्ठति॥ तयोरेकभागं त्यक्त्वा॥ अपरभागे षट्कोष्ठेषु अर्धऊर्ध्वं कोष्ठमेकैकं वर्जयित्वा मध्ये चतुर्विभागे योगिनीनामष्टकमलपट्टिका सर्वदिक्षु कोणेषु पद्मानि॥ तोरणार्धे दिक्षु द्वितीयपरिमन्तवारणं चतुरर्धाङ्गुलमात्रं भञ्जयित्वा योगिनीनां कमलं कुर्यात्॥ स्तम्भमुखमपशारयित्वाऽर्धाङ्गुलार्धमात्रं॥ देवतीनामभावे पुनः पूर्वोक्तलक्षणं॥ तेनैव लक्षणेन वाह्येवाब्जले सर्वं द्विगुणं भवति॥ द्वारादारभ्य तोरणान्तमिति नियमः॥

॥ तस्मात्पृथ्वीरक्षभूमीरसगुणितकरैः पञ्चरेखा हि यावत् दिक्कोणेष्वर्कपत्रं त्रिगुणमनुदलं सूर्यकोष्ठैः प्रकुर्यात्॥ गर्भं वा द्विगुणं त्रिगुणमनुदलाकारमब्जं च वाह्यं प्राकारार्धं तथैव त्रिवलयरचनं अष्टकेश्च प्रकुर्यात्॥ ४० ॥

इदानीं कायमण्डलमुच्यते॥ तस्मादित्यादिना॥ इह कायमण्डले चतुर्दिक्षु ये चतुर्भागा द्वादशार्धाङ्गुलात्मकाः॥ तेषु भागद्वये वाब्जमण्डलप्राकारवेदिकारत्नपट्टिकाहारार्द्धहारबकुलीकवशीर्षाणि भवन्ति तानि॥ शेषं भागद्वयं तिष्ठति॥ तस्माद्वाब्जमण्डलान्तात्पृथ्वीरक्षभूमिः॥ रसगुणितगुणैरिति॥ चतुर्विंशद्विरर्धाङ्गुलेर्भवति पञ्चरेखा हि यावदिति नियमः॥ दिक्कोणेषु तत्र मण्डले

अर्कपममिति द्वादशपद्मानि द्वितरा मत्तु दलानीति॥ अष्टाविंशद्दलानि॥ सर्वकोष्ठैर्द्वादशार्धाङ्गुलभागैरिति॥ तानि द्वादशार्धाङ्गुला
नि सप्तविभागं कृत्वा मध्यभागेन कर्णिका द्वितीयसप्तावसप्तभागेन चतुर्दलं॥ तृतीयसप्तावसप्तेनाष्टदलानि॥ चतुर्थसप्तावस
प्तेन षोडशदलानि एवमष्टाविंशद्दलानि कुर्यादिति॥ एवं गर्भद्वारं तु सोत्तरावशात्॥ तस्मान्मध्यमण्डलद्वारं सोत्तरावशाद्द्वितलं
तस्मात्स्वस्तोत्तरावशात्कायमण्डलद्वारं चतुस्तलमिति॥ एवं प्राकारं पंतोरणा पंत्रिवलयरचनोदकतेजोवायुवलयरचनौ अष्ट
केश्चेति॥ चतुर्विंशद्भिः प्रकुर्यात्॥ ॥
तेषामायन्तभागे रविशशिवलयं बाह्यवज्रावलीं च कुर्यात्कोष्ठैस्सार्धैर्यदनिलवलये मण्डलान्ते च चक्रे॥ स्तंभा
धो मण्डलं च प्रभवति कर्णिनास्यन्दने देवतानां सूर्यैश्च द्वारसंधेर्नभसि भुवितले पूर्वभागे परे च॥ ४१ ॥ १५०
तेषां त्रिवलयानां आदिभागे रविशश्युदयवलयं कुर्यात्॥ अर्ककोष्ठैर्द्वादशभिरिति॥ तेषामन्ते वज्रावलिं कुर्यात् द्वादशभिः॥ चतुर्वि
शद्भिर्वज्रार्धैरिति॥ तत्र पन्थारान्तचक्रं॥ तद्वाय्वग्निवलयमध्ये प्रत्येकमष्टारं द्वादशभिरिति॥ बाह्यमण्डलस्तम्भाधो वेदिकायामा
स्तनं कर्णीनां वाय्वादिमण्डलं द्वादशभि॥ स्यन्दनं द्वारमध्ये द्वादशभिः॥ तत्रैव बाह्यमण्डले तोरणं द्वादशाङ्गुलं वर्जयित्वा द्वितीये द्वा
रस्योर्ध्वं स्यन्दनं कुर्यात्॥ इन्द्रादिदेवतानां पङ्क्तिकातुल्यं॥ पूर्वापरं तोरणाकलशं वर्जयित्वा आकाशपातालरथं दर्शयेत्॥ कायमण्डल
इति मण्डलसूत्रमाननियमः॥ ॥

वज्राद्यैः पञ्चरत्नैः कनकमरकतैर्विद्रुमैर्मुक्तिकाद्यैः सर्वैर्वा पञ्चभेदैर्बहुविधमणिभिः पिष्टरङ्गैस्तथैव ॥ दिग्भागे र-
ङ्गभूमौ भवति नृपरजःपातनं बुद्धभेदैः पीतैः श्वेतारुणाद्यैः क्षितिजलवलये वह्निवाय्वोः क्रमेण ॥ ४२ ॥

इदानीं रजःपातविधिमाह ॥ वज्राद्यैरित्यादिना ॥ इह सूत्रपाते कृते सर्वदेवतास्थाने शोधिते ततो बलिं दत्वा गन्धपुष्पादिभिः पश्चाद्रजःपा-
तनमाहरेत् ॥ तत्र विभवानुरूपेण पञ्चरजःकरणीयाः चक्रवर्तिविभावे वज्राद्यैः पञ्चरत्नैश्चूर्णं कारयेत् ॥ तत्र मरकतैर्हरितचूर्णं
इन्द्रनीलैः कृष्णं ॥ पद्मरागै रक्तं ॥ चन्द्रकान्तैः श्वेतं ॥ कर्केतकैः पीतं ॥ महानीलैर्नीलमिति ॥ तथा सामान्यचक्रवर्तिनः ॥ कनकचूर्णं पीतं
मुक्ताचूर्णं शुक्लं ॥ प्रवालचूर्णं रक्तं ॥ राजावर्त्तचूर्णं कृष्णं ॥ हरितं च मुरक्रमिश्रमिति ॥ सर्वैर्वा पञ्चभेदैरिति ॥ मुक्ताद्यैस्तण्डुलैर्वा ऽ
न्यरङ्गैर्बहुविधमणिभिश्चूर्णरङ्गैः पिष्टरङ्गैर्वा साधारणैः सर्वसत्वानामिति ॥ यथा वज्रैस्तथा रत्नसस्यैः ॥ यथा मरकतादिचूर्णैः ॥ तथा
पिष्टरङ्गैः ॥ यथाविभवतस्त्रिभिर्दिग्विभागभूमौ रजःपातनं भवति हे नृपते देवबुद्धभेदैर्वर्णक्रमारोपं मण्डले ॥ वाह्यतः क्षितिवलये
पीतेन । उदके श्वेतेन वह्नौ रक्तेन ॥ वायुवलये कृष्णेन क्रमेणेति ॥ ॥

पूर्वं वीथीकृष्णभूमिर्भवति रविनिभा दक्षिणे पश्चिमे च हेमाभा चोत्तरेऽन्याशशधरधवला वज्रणावक्रभेदैः ॥ श्वेताकृष्णा-
म्बरकाक्रमपरिरचिता पट्टिकाभारभूमिः पद्मान्तः कर्कवेकैरमलशशिनिभा रक्तकृष्णा त्रिरेखा ॥ ४३ ॥

इदानीं रजोभूमिवर्ण उच्यते ॥ पूर्वे इत्यादिना ॥ इहाधिपतिचिह्नवक्त्रवशात् ॥ दिग्विभागो मण्डले भवति भूम्यां कृष्णा वक्त्रादिना तेन पूर्वे धीकृ
ष्णाभूमिः ॥ चित्तविशुद्ध्या भवति ॥ रविनिभा दक्षिणे वा विशुद्ध्या पश्चिमे हेमाभा पीता ज्ञानवक्त्रविशुद्ध्या ॥ उत्तरे चान्याः शुक्ला कायवक्त्रविशु
द्ध्या ॥ एवं वज्रिणो वक्त्रभेदे दिक्षु रजःपातनं कर्त्तव्यं ॥ तच्चैशानीं दिशमारभ्य मध्येन रंगादिकं कर्मानुसारेण दिक्षु पातयित्वा ततो वक्त्रभेदेन
पातनीयमिति नियमः ॥ इदानीं वेदिकादीनां रजोवर्णमाह ॥ मध्ये इत्यादिना ॥ इह वेदिकामध्ये तास्तम्भाः पीताः ॥ कवशीर्षाणि शुक्लानि ॥ देवता
कमलानि चन्द्रवर्णानि सूर्यवर्णानि यथा सर्वे गर्भमण्डले कायवाक्चित्तशुद्ध्या शुक्लरक्तकृष्णा रेखा भवति प्राकाराणामिति ॥ ।

मध्ये पद्माष्टपत्रं हरितमणिनिभा स्तम्भवज्रावली स्यात् ईशे दैत्येऽग्निवाय्वोः शशिरविवपुषो कृष्णपीतौ क्रमेण ॥ हंसो ग
रुडो मणिश्च क्रमश इति च तथा मध्ये तकल्पाष्टसन्धौ चन्द्रो वक्त्रो जन्मर्द्धिप्रवहति दिनकृद्वह्नितपमस्य चोर्द्धं ॥ ४४ ॥

गर्भपद्मादिवर्णमाह ॥ मध्ये इत्यादिना ॥ इह चित्तमण्डलमध्ये ऽधिपतिकमलं हरितमष्टपत्रं शान्तिकादिषु मध्येन वर्णादिकं भवति सा
मान्येन हरितं ॥ अलिनिभा स्तम्भवज्रावली स्यात् ॥ पद्मबाह्ये षोडशस्तम्भाः ॥ पूर्वादयः खड्गरत्नचक्रपद्मावली शुक्लाः ॥ चत्वारश्चत्वारः एव
॥ इह गर्भकमलस्य चतुर्षु कोणेषु यथासंख्यं ईशे शशिवर्णः शंखः ॥ नैरृत्ये रविवर्णा धर्मगण्डी ॥ अग्निकोणे कृष्णवर्णः चिन्तामणिः ॥ वा
युकोणे पीतः कल्पवृक्षा इति ॥ एवं चतुर्दिक्षु षोडशस्तम्भान्तराले बुद्धदेवीनां च मध्ये तत्स्तम्भाः ॥ अष्टदिक्षु कमलोपरिस्थिताः ॥ कमलमुख

इति॥ ॥एकान्ते देवतीनां भवन्ति शशधरस्याद्यना कर्णिकायां श्वेताभ्रे कर्णिकायां भवति दिनकरा देवतीनां च दिक्षु॥ वाह्येव
ज्रावली स्यात् विश्वकमलवशी दे दिकास्थेन वर्णो पीतास्तम्भा हिमाभाप्रभवन्ति वज्जुलीतोरणं विश्ववर्णं॥ ४५ ॥

अत्र चन्द्रास्तवं रूपमोपरि देवीनां भवति॥ देवतानां श्वेताभ्रमूर्द्धं सूर्यासनं भवति॥ कमलविभागकर्णिकायां॥ अष्टदलानि वर्जयित्वा
वज्रासनमपि॥ देवीनां कोणेषु देवतानां दिक्षु सर्ववाह्ये वज्रावली स्यात्॥ विश्वकमलवर्णवशात्॥ कर्त्तव्या तोरणं विश्ववर्णं कर्त्त
व्यमिति॥ स्थूलमण्डले रजःपातवर्णनियमः॥ ॥

श्वेताभा योगिनीनामपि वसुकमलापङ्क्तिका सर्वदिक्षु दिग्भागे रक्तपद्मं भवति जिनवशाच्छेतपद्मं च कोणे॥ चन्द्रादित्ये
विहीनं द्विगुणमष्टदलं वा मरणान्तथैव मण्डले वा रेखाः प्रकृतिगुणवशात्ता त्रिभागान्तरस्थाः॥ ४६ ॥

इदानीं वाह्यमण्डलदेवतापङ्क्तिकादि वर्णमाह॥ श्वेताभेति॥ इह वाह्यमण्डले योगिनीनां निरुक्षादीनां प्रतीच्छादीनां कायम
ण्डले पङ्क्तिका श्वेताभा भवति॥ अपि वसुकमला अष्टकमलाधार पङ्क्तिका॥ सर्वदिक्षु विदिक्षु॥ तत्र च दिग्भागे रक्तवर्णानि पद्मा
नि भवन्ति॥ जिनवशात् बुद्धवशात् श्वेतपद्मं च कोणे पद्मानीति॥ तानि चन्द्रार्कासनविहीनानि॥ अष्टदलानि॥ तथैवामरणां द्वि
गुणमष्टदलं अष्टाविंशद्दलं चन्द्रसूर्यविहीनं॥ वाह्यमण्डले रेखा घाः पाः पञ्च रेखाः प्रकृतिगुणवशात्॥ तास्त्रिभागान्तरस्था इ

ति॥ इह वाह्यमण्डले प्रकृतिराकाशादिमण्डलप्रवाहः॥ तेन शान्त्यादिवश्यादिकर्मणि वामसंचारवशेन स्पर्शयोगेन आकाशवायुतेजउ
दकपृथ्वीहरितकृष्णारक्तशुक्लपीतवर्णा यथानुक्रमेण गर्भाधारभूवेदिकायां यावदिति॥ एवं मारणादिके स्तम्भनादिके पृथिव्यादयः
कार्या इति॥ प्रकृतिगुणवशात् भवन्तीति॥ भागमेकं त्यक्त्वा भागद्वयेन प्रत्येकं रेखा भवतीत्यतः॥ तस्मात् प्राकारभूमिः पञ्चदश
भागिका ज्ञातव्येति॥ एवं गर्भमण्डलप्राकारभूमिः॥ नवमितामिका॥ तथा कायमण्डले प्रकृतिरुच्यते॥ इह काये पञ्चाङ्गुलीनां क
निष्ठादीनामाकादिप्रकृतिः॥ तेन शान्तिकादौ मण्डले हरितवर्णादिरेखा स्पृष्टिभेदेन॥ मारणादौ पृथ्वीभेदेन संहारक्रमेणेति॥
प्राकाररेखानियमः॥ ॥

स्तम्भाधो द्वारसन्धौ प्रभवति करणीनां मण्डलं मारुताद्यं ऐशान्ये दैत्यकोणे क्षितिवलयगतं चन्द्रसूर्यैर्नरेन्द्र॥ वाह्यहारे
र्द्धभागे समन्तागमपि भवेद्धर्मचक्रं घनाभं सव्येरलोघटः स्यात्सघनदवसरोडुंडुभिर्वोधिवृक्षः॥ ४१ ॥

इदानीं नागराजानामासनान्युच्यन्ते॥ स्तम्भाध इत्यादिना॥ इह वाह्यकायमण्डले तोरणस्तम्भानामधो वेदिकास्थाने द्वारसन्धौ प्रभवति
करणीनामासने मारुताद्यं पूर्वद्वारस्य सव्यावसव्ये वृत्तमारुतमण्डलं भवति॥ गर्भपद्मानेन॥ दक्षिणे त्रिकोणं वह्निमण्डलं॥ आ
दिशब्दात् पृथ्वीमण्डलं चतुरस्रं॥ उत्तरे अर्द्धचन्द्राकारं उदकमण्डलं॥ कृष्णरक्तपीतशुक्लं यथाक्रमेण॥ विन्दुस्वस्तिकवज्रपद्म

लांछनमिति॥एवंकृष्णरक्तपीतशुक्लहरितनीलजराद्दिस्पन्दनाः॥श्मशानचकारिणाचन्द्रार्कवर्णानि॥यद्वक्ष्यतिचक्रेश्वेतंचरक्तमि
ति॥तथागतवर्णभेदेनसर्वत्ररजोभूमिरिति॥इदानींचन्द्रादित्योदयस्थानमुच्यते॥इहकायमण्डलतोरणावसानेयत्पृथ्वीवल
यं वादशार्धाङ्गुलैरचितंपीतवर्णं॥तेवैशान्यांरात्रिवशात्॥चन्द्रोदयंदर्शयेत्पूर्णिमायां॥तथादैत्यकोणेनैर्ऋत्येसूर्योद्गमनंद
र्शयेत्॥एवंक्षितिवलयगतौचन्द्रसूर्यौभवतः॥इतरेद्र॥ततःकायमण्डलेबाह्यहारार्द्धभागेप्रथमपुटेतोरणस्यमध्यस्थाने
षोडशार्धाङ्गुलात्मके॥स्तूपमपिभवेत्धर्मचक्रेपताकां॥चित्रवस्त्रविभूषासव्यावसव्येचक्रस्यन्दगोमृगीति॥ततोपरस्थाने
पूजादेवतायथावर्णतः॥एवंसव्येदक्षिणतोरणेरक्तवर्णोभद्रघटोवाग्विशुद्धातस्यसव्यावसव्येशंखपद्मौ॥सघनदवहरेण॥
धनदेदुन्दुभिचक्रःश्वेतासव्यावसव्येदण्डमुद्गरे॥पश्चिमेबोधिवृक्षःपीतःसव्यावसव्येकिन्नरकिन्नरीतिनियमः॥

घण्टादर्शपताकाःशशधरधवलास्तोरणाल्लम्बमानां हारार्द्धश्वेतवर्णोभवतिजलवशात्स्पन्दनेद्वारमध्ये॥चक्रे
श्वेतंचरक्तंस्वजिनजलवशान्मारुतेद्वारबाह्ये वज्रज्वालास्फुरद्भिर्भवतिनरपतेबाह्यवज्रावलीच॥ ४८ ॥

एवंघण्टादर्शाःपताकाःशशधरधवलास्तोरणाल्लम्बमानाः॥हारार्द्धःश्वेतवर्णोभवतिजलवशात्स्पन्दनोद्वारमध्ये॥चक्रे
श्वेतंचरक्तंस्वजिनजलवशात्मारुतेद्वारबाह्ये॥वज्रज्वालास्फुरद्भिःभवतिनरपतेबाह्यवज्रावलीचेति॥इहवज्रावल्याः॥आध

लं पुष्पं दत्वा तदाहे पञ्चरश्मिमयीं ज्वालां दर्शयेत्॥ ततो मण्डलनिष्पत्तिः॥ पृथ्वीवलयकवशीर्षयोर्मध्ये यथाशोभाति पूजावस्तू निकारयेदिति॥ मण्डले रजोवर्णनियमः॥ ॥

स्फूला व्याधिं करोति प्रकटयति कृषा द्रव्यहानिं कुलेखा छिन्ना मृत्युं च वक्रा सन्तापजनपदोच्चाटनं तन्न देव॥ चिह्ने चिह्नेऽर्कचक्रे भवभयमथनी मन्त्रिणां नास्ति सिद्धिः गोत्रच्छेदो विमिश्रे रजसि जिनकुले मण्डले वेदितव्यः॥ ४९॥

इदानीं प्राकाररेखाणां विलक्षणदोषमाह॥ स्फूलेत्यादि॥ इहशानो उष्टोप्यकारेखा विलक्षणा भवति॥ तदा कर्मविपर्यासो भवति॥ तत्र स्फूला व्याधिं करोति दातुराचार्यस्य वा कृषा द्रव्यहानिं प्रकटयति जरेखा छिन्ना मृत्युं च प्रकटयति वक्रा सन्तापजनपदस्य उच्चाटनं करोति॥ तद्देवेति चिह्ने छिन्ने सति॥ चन्द्रार्कासने वा छिन्ने भवभयमथनी या सिद्धिर्मन्त्रिणां सा नास्ति परस्पररजोभिर्मिश्रितैः॥ गोत्रच्छेदो भवति॥ दानपतिसंताने॥ आचार्यसंतानेपि जिनकुले मण्डलेनेन वेदितव्यः सर्वरजोविधिः॥ प्रयत्नत इति नियमः॥ इदानीं चिह्नविलक्षणमुच्यते॥ इह चक्रं द्विविधं॥ एकं देवतीनां समूहं॥ अपरमष्टार आधाररूपं॥ तत्राष्टारकोरोच्येतं॥ दिक्षु रकं॥ समूहरूपं॥ पुनः स्वजिनकुलवशात्॥ स्वजिनवर्णेन देवीनां वर्ण इत्यर्थः॥ ॥

यच्चोक्तं तच्च मध्ये प्रकटमपि जिने मण्डले तत्र देयं चिह्नं शोभाहेतोर्जिनजनककुले मारचिह्नं न देव॥ तस्मात्तत्रो

क्तचिह्नं भवति कुलवशान्मण्डले द्वारसीम्नो हारार्द्धान्ते प्रकुर्यात् क्षितितलनिलये पद्मकुम्भादिशोभां॥ ५० ॥

यत्रेति॥ इह मन्त्रनये यस्मिन्तन्त्रे चिह्नं नोक्तं वज्रकमपि जिनैस्तथागतैस्तच्चिह्नं मण्डले न देयं शोभार्थं कृतो यतो मारचिह्नं तद्भवति॥ वि
पर्यासात्॥ अधिकत्वादिति॥ जिनजनककुले वज्रसत्वकुले वज्राचार्यस्येति॥ तस्मात्तत्रोक्तविधिचिह्नं भवति॥ कुलवशात् मण्डले द्वार
सीम्नः॥ हारार्द्धान्ते प्रकुर्यादिति॥ हारार्द्धोपलम्भनात् वज्रकुलीकवशीर्षान्ते कायमण्डलान्ते क्षितिवलयगते पद्मकुम्भादिशोभां कुर्यादि
ति नियमः॥ ॥

कृष्णादेः पादवृध्या भवति च रजसः प्रान्तिर्विवेकात् प्राकाराणां त्रिगुणाद्दिनकरशशिनो रक्तरेखाद्विगुणा॥ गर्भाद्वा
द्विगुणा भवति नरपते प्रान्तिर्मण्डलेस्मिन् हारार्द्धान्ते विवेका क्षितिजलहुतभुग्वायुवज्रावलीभिः॥ ५१ ॥

इदानीं रजःप्रान्तिरुच्यते॥ कृष्णादेरित्यादिना॥ इह गर्भमण्डले वाय्वादिगुणभेदेन पादादिवृध्या रजःपातना भवतीति॥ य
वस्यैकपादः॥ कृष्णरजःप्रान्तिः॥ पूर्वे स्पर्शगुणावृध्या॥ रक्तस्य द्वौ पादौ स्पर्शरूपगुणद्वयविवृध्या दक्षिणे श्वेतस्य त्रिपादाः
स्पर्शरूपरसगुणविवृध्या उत्तरे॥ पीतस्य स्पर्शरूपरसगन्धचतुर्गुणविवृध्या चतुष्पादाः प्रान्तिः पश्चिमे॥ एवं बाह्यमण्डले
द्विगुणे॥ कायमण्डले चतुर्गुणे॥ प्रान्तिरिति नियमः॥ यवोपि स्वस्वमण्डलाष्टप[illegible]धिकसप्तसप्तांशिको वेदितव्य इति॥ एवं प्राका

राणां चोक्तमिति चित्ररागा पीतरजः प्रोक्तमिति ॥ अन्यारे स्वासामान्यापीतरजसा विचित्ररागा भवति ॥ कमलानां पत्राण्येकमलासनपङ्क्ति-
कानामिति ॥ दिनकरशशिनो रजो रेखा विचित्ररागा नियमो गर्भाद्बाह्ये विचित्ररागा मध्यमण्डले ॥ तद्विचित्ररागाः कायमण्डले ऽस्मिन् हारार्द्धी-
ति पुष्पिकाकवशीर्षान्ते बाह्ये पूजाभूमौ ॥ एवं क्षितिजलहुतभुग्वायुवलयेषु वज्रावली चतुरस्रकद्वये प्राकारमानेन कायमण्ड-
ले स्यादिति रजोऽत्रोक्तमिति नियमो बाह्यतत्त्वरागाभेदेन ॥ अपरः पाठः सर्वत्र चित्ररागाभेदेन समानः सर्वभूमिषु प्राकाराणां चित्ररागा स्त्रिवल-
य प्रमाणादिति रजोविशुद्धिः ॥ ॥

गर्भाद्द्वारादिसिद्धो भवति वसुमतीमण्डले लोकधातोर्बाह्येऽभ्यथर्विकान्ते चित्ररागस्फुरितपुरवरे रत्नालयः स्यात् ॥ त-
स्मिन्नेन्द्रकोष्ठे रविशशिवलयं वायुरेवं नभः स्यात् बाह्ये न द्विगुण्याः क्षितिजलहुतभुग्मारुत्कादर्शनीयाः ॥ ५२ ॥ १९४

इदानीं लोकधातुशुद्ध्या रजोमण्डलशुद्धिरुच्यते ॥ गर्भेत्यादिना ॥ इह यथा बाह्ये तथा देहे ॥ यथा देहे तथा परे रजोमण्डले ॥ तत्र लोकधा-
तोर्पञ्चमानं चतुर्लक्षयोजनानां ॥ तद्देहे हस्तचतुष्टयं ॥ एवं मण्डलेऽपि एकहस्तमारभ्य सहस्रहस्तं यावत् ॥ सर्वमेव स्वहस्तेन चतुर्ह-
स्तं मण्डलं षड्भवति चतुराष्टाङ्गुलात्मकविभागत्वादिति ॥ अन्यच्चतुर्हस्तात्मकं सर्वमण्डलं भवति ॥ तेन गर्भाद्द्वारादिसिद्धो
भवति ॥ वसुमतीवलयत्वात् ॥ सर्वदिक्षु द्वारपर्यन्तं चतुर्विंशत्यङ्गुलैर्वसुमती भवति ॥ तत्र गर्भपर्यन्तं द्वादशाङ्गुलं पश्चाद्

योजनसहस्रार्द्धमानेन तथागलग्नं सर्वदिक्षु गङ्गासमुद्रद्वयं पर्वतानन्तमध्योर्द्धं मेरुमानेन पञ्चाशत्सहस्रयोजनं ॥ ततः पृथ्वीव
लयं सर्वत्र पञ्चविंशतिसहस्रयोजनं ॥ मण्डलेरजोभूमिः ॥ वारान्ते । एवं गर्भमण्डले समस्तं लक्षयोजनं ॥ अष्टचत्वारिंशद्द
ण्डकुलविभागिकमिति नियमः ॥ एवं वारादिसीमा भवति वसुमती मण्डले लोकधातोरिति ॥ एवं वारेभ्यश्चतुर्भिश्चतुर्दिक्षु चर्चि
कालेक्षाररत्नालये ॥ क्षीरोदकवलये त्रिगुणाष्टशिपुरेश्चतुर्दिक्षु चतुर्विंशत्यङ्गुले ॥ एवं बाह्यमण्डलं सर्वदिक्षु लक्षद्वयं भव
ति ॥ पूर्वान्पराद्ध्यावदिति नियमः ॥ तस्माद्बाह्यमण्डलद्वारात्त्रिगुणाष्टशिपुरे जिनेन्द्रकोष्ठैः सर्वदिक्षु चतुर्विंशत्यङ्गुले
रपि शिखिवलयं ॥ बाह्यमण्डलकवशीर्षान्ते ॥ ततः स्थानात् पृथ्वीपरं लोकधातुलक्षत्रये योजनानामिति नियमः ॥ बाह्येवं ततः
स्थानात् ॥ तस्मात्कवशीर्षात् जिनेन्द्रकोष्ठैश्चतुर्विंशत्यङ्गुलैः ॥ सर्वदिक्षु कायमण्डलद्वारान्ते वायुवलयं लोकधातोरिति ॥ एवं पूर्वाप
रं चतुर्लक्षं लोकधातुमण्डले वाह्निसंवृतिक्षितस्य विभागिकमिति ॥ कायमण्डलनियमः ॥ पुनस्तद्बाह्ये कायमण्डलतोरणावसाने
न द्विगुणाः पृथिवीवलयादि विशुद्धा मेरुं वर्जयित्वा क्षितिवलयं द्वादशार्द्धाङ्गुलैः ॥ शिखाशिप्रत्येकं चतुर्विंशत्यर्द्धाङ्गुलैर्दर्शनीया
नि ॥ ततो बाह्ये वज्रावली द्वादशभिः ॥ सर्वासां मध्ये भागावयवत्वा मध्ये पद्मा गो वज्रावली कर्तव्या ॥ ततो बाह्ये वज्रार्चिश्चतुर्विंशभिरि
ति ॥ लोकधातुविशुद्धिनियमः ॥ ॥
उष्णीषं वज्रकरण्डं त्रिगुणाष्टशिपुरे मण्डले शोधनीयं तस्मान्मेरुः समस्तं त्रिगुणाष्टपुरे मेदिनीयावदेव ॥ पद्मपद्

कोष्ठैकेन शतस्तुःमहिवलयं सप्तपातालमेवं एवं भूम्यादि सर्वं पुनरपि च तथा शोधनीयं स्वदेहे ॥ ५३ ॥
ब्रह्मस्थिकाद्यैश्च सूर्यैर्वर्द्धतुरसशिखिविनोऽस्त्राब्धिकालार्धकालैः कालैः कालाब्धिभिर्वा वसुभिरपि रसैर्दीर्घभागैः क्रमेण
गर्भश्रीकर्णिकाब्जदलमपि नतं सत्यवज्रावली च पश्चे वज्रावली च क्षितिरपि च तल्प्राकारनिर्यूहकायं ॥ ५४ ॥
स्तम्भप्राकारवेद्यः पुनरपि च ततः पट्टिकाहारभूमिं आदर्शं चामाच प[illegible] भवति नरपतेस्तोरणं पट्टिकाद्यैः ॥ वाह्ये ता
रादि सर्वं त्रिगुणमपि भवेज्जि[illegible]तल्पं च वाह्ये वाह्ये पद्मानि चक्राण्यपि च दिनकरैः स्यन्दनं मण्डलानि ॥ ५५ ॥

इदानीं स्वशीर्षाविशुद्धिरुच्यते ॥ उष्णीषमित्यादिना ॥ उष्णीषं पंचविंशत्सहस्रं द्वादशांगुलविभागिकं मध्ये गर्भपद्मं तद्वि
भागिकं ॥ ततो वक्त्रं लक्षार्द्धं कण्ठं पंचविंशत्सहस्रं तेन प्रथमे भागे ब्रह्मचक्रं द्वितीये वक्षोर्द्धं पंचविंशत्सहस्रं अपरचक्रं ॥ शेष
भागद्वये रजोभूमिर्वारणं ॥ एवं मूर्धाधः कण्ठान्तं लक्षयोजनं लोकधातुमण्डलं ॥ हस्तमेकं समन्तादिति गर्भमण्डलनियमः ॥
एवमुष्णीषं वक्त्रकण्ठं त्रिगुणपरिणतैर्मण्डले सर्वावयवे शोधनीयमिति नियमः ॥ तस्मात्करणान्मेरुः समस्तः ॥ लक्ष
योजनैकघनं ॥ ऊर्ध्वाधः त्रिगुणपरिणतैश्चतुर्विंशत्यंगुलैः सर्वावयवं शोधनीयं ॥ मण्डलेवाकलक्षणे इति ॥ मेदिनी याव
देवाधः ॥ तस्मात् षट्षट्कोष्ठैः कोणापंचविंशात् योजनसहस्राण्येकैः षड्विभागिकैः लक्षद्वयं ॥ अष्टविभागं कृत्वा ॥ अहिभुवने

स्फुटं सप्तपाताले नरकभुवनं प्रत्येकं शोधनीयं शरीरे ॥ कटिमारभ्य पादतलान्तं अष्टविभागं कृत्वा रजोमण्डले शोधनीयं ॥ कायमण्डला-
न्तं ॥ सर्वदिक्षु चतुर्वारपर्यन्तं ब्रह्मस्थानादिति नियमः ॥ एवं भूम्यादि सर्वं उत्तरपि च ततः शोधनीयं स्वदेहे सर्वेषां सत्वानां मनुष्यादीना-
मिति ॥ मण्डलविधिनियमः ॥ तथा मूलतन्त्रे काअपरशुद्धिरुच्यते ॥ इह सर्वसत्वानां हृदयान्तर्गतं ज्ञानं तत्त्वानाहतध्वनिः स्पन्दनादलक्षणः
॥ ततः तन्मण्डलं मध्ये कृत्वा हृदयचक्रं ॥ ततः कण्ठनाभ्योर्मध्ये अर्द्धमानं गृहीत्वा चित्तमण्डलं भगवतः ॥ सार्द्धद्वादशमात्रात्मकं कुर्यात् ॥
कण्ठान्नाभ्यन्ते पञ्चविंशन्मात्रात्मकं वाङ्मण्डलं कुर्यात् ॥ ऊर्णास्थानात् मेढ्रान्तं पञ्चाशन्मात्रात्मकं कायमण्डलं कुर्यात् इति ॥ ततः चतुः
कायद्वाराणि विसृत्र शुक्ल उष्णीषरन्ध्राणि वाङ्मण्डलद्वाराणि ललनारसनावधूतीसंधिनीति ॥ कण्ठनाभिसीमः ॥ चित्तमण्डल-
द्वाराणि जाग्रत्स्वप्नसुषुप्ततुरीयस्थानलक्षणानीति ॥ एवं द्वादशद्वारात्मकं कायवाक्चित्तमण्डलं परमादिबुद्धं षोडशचन्द्रकलाविभा-
गिकं ॥ यथा बाह्ये तथा देहे यथा देहे तथा परे त्रिविधं मण्डलं ज्ञात्वा आचार्यो मण्डलं लिखेत् इति सर्वत्र नियमः ॥ उष्णीषकादिना सूत्रमु-
क्तं ॥ पूर्वसूत्रपातेन सार्द्धमिति ॥ ॥

ॐकारज्ञानजाते जिनवरकमले चन्द्रसूर्यासनोर्द्ध आद्यैः काद्यैः सपूर्वैस्त्रिभुवनजननीमातृकास्थापनीया ॥ अन्त्ये-
ऽकारे विलग्ने स्फुररचितपरे कायवाक्चित्तवज्रं संभूतिर्मन्त्रयोनिः स्फुररचितपरं ज्ञानवज्रं चतुर्थं ॥ ५६ ॥

इदानीं मण्डलदेवतामन्त्रविन्यासमुच्यते ॥ ॐकारेत्यादिना ॥ इह सर्वत्र तन्त्रराजेश्वरजोमण्डले । ॐकारः कायवज्रः ॥ तेन मण्डलं

निष्पादितं॥ ॐकारं ज्ञानजातमित्युच्यते॥ तस्मात् ओंकारजाते मण्डले जिनवरकमले चतुर्विंशतिकमलेषु॥ चन्द्रसूर्यासनानि वर्णभेदेन॥ द्वादशपूर्णिमाभेदेन द्वादशचन्द्रासनानि द्वादशामावास्याभेदेन द्वादशसूर्यासनानि प्रज्ञोपायविशुद्ध्या। तेषु चन्द्रसूर्यासनेषूर्द्ध्वं कर्णिकोपरिस्थितेषु॥ आद्ये स्थिताकाराद्यैः स्वरैः काद्ये स्थितककाराद्यैर्व्यञ्जनैः सम्पूर्य्येरिति। बिन्दुविसर्गसहितैः॥ तैः सार्द्धं त्रिभुवनजननी शून्यता॥ सर्वाकारानाहतरूपिणी बिन्दुमूर्द्ध्नि मात्रिकावेधातुकजननी॥ अनाहतध्वनिरिति॥ प्रज्ञापारमिता बुद्धजननी॥ परमार्थसत्याश्रयेण स्थापनीया। सर्वमन्त्राणां मूर्द्ध्नि अकारादिककारादीनां नशून्यानां॥ तेन तैः सार्द्धं सा उच्यते॥ एवं भगवानपि महासुखरूपीन त्रालगनः॥ इदानीं मध्यशून्येषु प्रत्याहारधर्मिणां कावादि मन्त्राणां उत्पादमुच्यते शून्यप इत्यादिना॥ शून्ये प्रथमपदस्लोकमन्त्रस्थाने वा नाडी अनुस्वार इति॥ पूर्वापरे अकारद्वये दक्षिणानाडी विसर्गो बिन्दुद्वये॥ स्वररहितपरे इति॥ अनाहते हकारे अस्वरे॥ कायवाक्चित्तज्ञानवज्राणि सम्भूतानि॥ तेषु प्रथमं तावत् कायोत्पादः कथ्यते॥ इह प्रथमम् अनुस्वारः॥ ततोऽकारः॥ उभयोर्मध्ये विसर्गः॥ अनुस्वारान्ते दीर्घः आकारः॥ एवं दीर्घे स्वरे परभूते पूर्वोऽनुस्वारो मत्वमापद्यते॥ मकारे च परेऽकारात्परो विसर्गः॥ उकारः स्यात्॥ पश्चाद् अकारेण गुणे सति ओकारः तमो निरुक्तिलक्षणो वर्णनाशोऽस्तीति॥ मकारं विश्लिष्य अन्ते आकारो लोप्यः॥ एवं त्रिगुणात्मक ओंकारः॥ कायवज्रः॥ अउम इति कथ्यते॥ स्वपरस्मिध्याने॥ इदानीं वाग्वज्र उच्यते॥ इह पूर्वापरमकारद्वयं॥ दीर्घीकृत्य विसर्गोऽन्ते देयः॥ तेन आःकारः त्रिगुणात्मको भवति॥ अ आ इति कथ्यते॥ इदानीं चित्तवज्र उच्यते॥ इ

१९६

हूं पूर्वं हकारो ऽस्वरः ॥ ततो ह्रस्वो ऽकारः ततो विसर्गः ॥ ततो बिन्दुः ॥ ततो दीर्घ आकारः ॥ एवं पूर्ववदुकारो विसर्गस्य ॥ आद्यन्ताका-
रयोर्लोपः ॥ ततो हूँकारस्त्रिगुणात्मकः ॥ हुउम् इति कथ्यते ॥ एवं कायवाक्चित्तमन्त्रसंभूतं ॥ मन्त्राणां योनिर्जनकमित्यर्थः ॥ इदं वी
ज्ञानवज्र उच्यते ॥ अत्र पूर्वं हकारो ऽस्वरः ॥ ततो ऽकारः ॥ ततो विसर्गः ॥ ततो ऽनुस्वारः ॥ ततो दीर्घ आकारः ॥ एवं पूर्ववद्विसर्गात् उकारः ॥ पूर्व-
स्वरेण गुणेन हकारेण संयोगः ॥ अपर आकारमकारयोर्लोपः ॥ एवं त्रिगुणात्मकः होकार इति ॥ ह अ उ इत्युच्यते ॥ एवं ज्ञानवज्रे गुणत्रयं ॥
अविद्या ॥ संस्काराः ॥ विज्ञानं ॥ कायवज्रे ॥ नामरूपं ॥ षडायतनं ॥ स्पर्शः ॥ वाग्वज्रे ॥ वेदना ॥ तृष्णा ॥ उपादानं ॥ चित्तवज्रे ॥ भवो जातिर्जरामर-
णं ॥ बिन्दुरूपवज्रादिति ॥ एवमविद्यादीनां जनकं ॥ परमसुखकरं ॥ ज्ञानवज्रं चतुर्थमिति ॥ मन्त्राणां योनिः ॥ सर्वं यद्दशाकारकाय-
वाक्चित्तज्ञानवज्रमिति ॥ भगवतो नियमः ॥ ॥

हूंकारो हि विश्ववर्णो जिनपतिकमले चन्द्रसूर्याग्निमूर्ध्नि दिक्पत्रेष्वादिपूर्व्यं विदिशि च दलके हादिपूर्वं द्वये तु तुर्यो ॥ ईदी-
तोक्तं त्वकारो हि खविनिच यवेन कायवाक्चित्तरागे हीकाराद्यं यदान्तं भवति च दशकं हं ह इत्यत्र चान्ते ॥ ५८ ॥

इदानीं मन्त्रचिह्नन्यास उच्यते ॥ इह सर्वत्र रजोमण्डले त्रिविधो न्यासः ॥ चन्द्रसूर्यासनेषु ॥ स्थूलसूक्ष्मपरभेदेन ॥ तत्र परभेदो मन्त्रबी-
जन्यासः ॥ सूक्ष्मभेदो मन्त्रबीजपरिणतो वज्रादिचिह्नन्यासः ॥ स्थूलभेदो वज्रादिचिह्नपरिणतो देवतारूपन्यासः ॥ इत्येवं यथानुक्रमेण
मन्त्रबीजन्यासे कृते सति चिह्नन्यासाद्यं वेदितव्यमिति नियमः ॥ तेन अस्मिन् मन्त्रविन्यासः प्रधानत्वेनोक्त इति ॥ हूंकारो विश्ववर्णो हरितवर्णो
ज

जिनपतिकमले चन्द्रसूर्याग्निमूर्द्धि इति॥ इह चन्द्रसूर्यराहूणां योगो ऽमावास्यान्ते ग्रहणकाले तदेव चन्द्रसूर्याग्निसंघट्टं मण्डलन्यासने॥ अ
ध्यात्मनि ललनारसनावधूतीसंपुटे हृत्कमले तस्य कर्णिकायां चन्द्रसूर्यराहुमूर्द्धि हूँकारं बीजं लिखेत् नीलवर्णसा॥ अथ वानन्यरिणातं
नीलवज्रं विश्वकं लिखेदिति॥ उक्तं तन्त्रे रजोमण्डले देवतारूपं न लेख्यं लोकावध्यानपरिहारायेति॥ अधिपतिबीजन्यासः॥ ततः पद्मदलपू
तादिपारमितान्यासः कर्त्तव्यः॥ दिक्पत्रेष्वादिशून्यमिति॥ पूर्वपत्रे अ॥ दक्षिणे अः॥ उत्तरे अं॥ पश्चिमे आ॥ इति॥ अथ चिह्नानि पूर्वपत्रे
धूपदवी दक्षिणे प्रदीपः। उत्तरे नैवेद्यं॥ पश्चिमे शंख इति॥ इह वक्ष्यमाणे यच्चिह्नं यस्य यस्या भगवतिकरतले सा च मुद्रा वाहीनाइति वच
नात्॥ चिह्नन्यासो वक्ष्यमाणानियमेनेति॥ एवं विदिक्षि चन्द्रके हादिशून्यं चतुर्द्धेति॥ इहाग्नेय्यां ह। नैर्ऋत्ये हः॥ ईशे हं॥ वायव्ये हा॥ अथ
वा हकारकण्ठक्रमपीतचामराणि लिखेदिति॥ ततो विदिक्पत्रबाह्ये चतुःकोणेषु यथासंख्यं॥ ईशकोणे वज्रं। अग्निकोणे धर्मशंखो वा। नैऋ
त्यकोणे वा खड्गं आः॥ धर्मगण्डी। शिखिनि खित्तवज्रं। हूं चिन्तामणिर्वा पवने रागं ज्ञानवज्रं भो कल्पवृक्षो वा लिखनीयं इति गर्भकमलन्या
सः॥ इपतो द्वितीयपुटे न्यास उच्यते॥ इह द्वितीयपुटे अष्टकक्षप्रदेशेषु पूर्वादिषु पूर्वदेवताकमलस्थाने वामे हि॥ दक्षिणे ही। घटपूर्व
को दक्षिणे देवतायाः॥ पूर्वे ह॥ पश्चिमे हु। घटो वा॥ पश्चिमदेवतायाः॥ दक्षिणे हृ। उत्तरे हॄ। घटो वा। उत्तरदेवतायाः॥ पश्चिमे हु।
पूर्वे हू। घटो वा॥ हं हः पूर्वापरद्वारनिर्गमे क्रोधसोमपरे जम्बीश्रुणा॥ हीकाराष्टदशके भवतीति॥ कलशाबीजन्यासः॥ ॥

पूर्वाक्षौर्द्धे इकारः श्लिखिकमलगतो दीर्घ ईकारं एवं याम्ये दैत्ये हकारे धनदहनगतो ह्रस्वदीर्घौ ऋकारौ॥ वायुरेपवाह्यको

रौ॰ पिचकमलगतौ ह्रस्वदीर्घौ ऋकारौ ऋ ऐशोरश्मौ च शुक्लौ वरकनकनिभौ वक्त्रभेदेन देयौ ॥ ५८ ॥

ततो देवतावीजन्यासः॥ इह पूर्वाक्षोर्ध्वे सूर्यासने इकारः॥ रवक्षौ वा संस्कारस्य। त्रिविक्रमलगतश्चन्द्रमण्डलगतो दीर्घ ईकारः॥ रवक्षौ वा
उत्पलं वा वायुधातोः॥ एवं याम्ये ऋकारे रत्नं वा वेदनायाः॥ नैर्ऋत्ये ॠ तेजोधातो रक्तपद्मं वा चन्द्रे॥ एवं धनदे उकारो वा श्वेतपद्मं। संज्ञायाः
हरयते ऌ श्वेतजलवलयं वा तोयधातोः॥ एवं वारुण्येऽपि च ऌकारो वा चक्रं रूपस्य॥ वायुकोणे ॡ पृथ्वीधातोः चक्रं वेति॥ स्कन्धधातुन्यासः।
आकाशधातुविज्ञानयोरेकमेव चिह्नं वज्रं कर्णिकायां॥ ऋ ऐशौ। पूर्वाग्नेयो रक्तौ दक्षिणनैर्ऋत्ये॥ शुक्लौ उत्तरेशे। पीतौ पश्चिमवायव्ये। वक्त्रभेदे
न देयोऽत्र नस्ति नियमः॥ ॥

पूर्वद्वारस्य सव्ये त्रिविक्रमलगतौ ह्रस्वदीर्घौ तथैव तद्वच्चाकारयुग्मं यमदनुगगनं पश्चिमे द्वारयुग्मं॥ उभौ पक्षौ च तद्वद्
रवरुणा वरद्वारवामे सपक्षे अं अः श्वा धाकेमेणात्वमपि च यवलाद्वारपद्मेसु राध्ये ॥ ५९ ॥

इदानीं षडिन्द्रियषड्विषयविशुद्ध्यादेवतादेवीबीजान्युच्यते॥ तृतीयपद्ये॥ इह पूर्वद्वारस्य सव्ये सूर्यमण्डले कमलोपरिस्थे एकारो घ्राण
स्य त्रिविक्रमलगतो अग्निकोणे चन्द्रमण्डले ऐकारः॥ स्पर्शवज्रायाः एवं दक्षिणद्वारपश्चिमे अरकारः॥ चक्षुषः॥ नैर्ऋत्ये तद्वत्। आरका
रो रसवज्रायाः॥ इति युग्मे॥ एवं पश्चिमे अलकारः। कायेन्द्रियस्य। आलकारो वायव्ये। गन्धवज्राया इति॥ ओ यक्षे जिह्वायाः। औ रुद्रे रूपवज्रा

याः इति ॥ चतुरवदनयमजारकोमेस्यपक्षे ॥ इति ॥ इह पूर्वद्वारे न रे सूर्यमण्डले अं मनइन्द्रियस्य ॥ वरुणद्वारस्य दक्षिणे आः कोऽधर्मधातो ॥ आनन्द्रायम इति दक्षिणद्वारे पूर्वे अकारः सूर्ये श्रोत्रेन्द्रियस्येति ॥ सर्वत्र वामे भगवतः चतुर्मुखभेदतः ॥ यक्षेऽजनरद्वारे पश्चिमे ॥ आःकारः शब्दवज्राया इति ॥ द्वादशायतनबीजन्यासः ॥ इदानीं द्वारपालबीजन्यास उच्यते ॥ क्रमेणाग्निपिचयरवला द्वारपमेशुएफे ॥ इह पूर्वद्वारे सूर्यमण्डले चन्द्रे वा यकारो वागीन्द्रियस्य ॥ दक्षिणे सूर्ये पाणीन्द्रियस्य रेफः ॥ उत्तरे च पादेन्द्रियस्य ॥ पश्चिमे लउडेन्द्रियस्य ॥ इति न्यासः ॥ ॥

पूर्वद्वारे च सव्ये भवति शशधराश्वासनं क्रोधयोश्च सूर्यः सव्ये परे च भवति कमलिन्यासनं द्वंद्वयोश्च ॥ प्रज्ञोपायप्रभेदैः भवति हि सकलं चन्द्रसूर्यासनं च सव्ये पृष्ठे रविः स्यात्तुरविगधने दे चन्द्रनेवासनं स्यात् ॥ ९० ॥

इदानीं चन्द्रसूर्यासननियम उच्यते ॥ इह पूर्वद्वारे ऽवसव्यद्वारे भवति शशधरश्वासनं क्रोधयोश्चेति ॥ चकारात् सूर्यो वा ॥ सूर्यः सव्ये ऽपरे च भवति प्रज्ञोपायाङ्गभेदेन ॥ अथो पायासनं सूर्यः ॥ प्रज्ञासनं चन्द्रः ॥ स्वस्वकमलेषु ॥ अथ पूर्वाग्निद[illegible]नादीनां खड्गः ॥ दक्षिणे नैर्ऋत्यानां रत्नं ॥ उत्तरे ईशानीपद्मं ॥ पश्चिमवायव्यानां चक्रं ॥ ऊर्ध्वाधो देवतानां वज्रमिति ॥ अथवा विषयभेदे[illegible]न्दस्य वीणा स्पर्शस्य वस्त्रं रूपस्यादर्शः ॥ रसस्य पात्रं ॥ गन्धस्य गन्धशंखः ॥ धर्मधातोः कर्मोदयमिति ॥ एवं वागीन्द्रियस्य खड्गः ॥ पाणीन्द्रियस्य दण्डः ॥ पादेन्द्रियस्य पद्मं ॥ पायिन्द्रियस्य ककरं चेति ॥ गर्भमण्डले चिह्नन्यासः ॥ ॥ ॥

बिन्द्वाकारै र्विभिन्नैः खलु कमलगतं कादिवर्णाक्षरं क्ष कन्दे नाले दले च क्रमपरिरचितं केशरे कर्णिकायां॥ भूम्याद्यं
चातुरान्तं कखगघङ॰मिति ह्रस्वदीर्घः स्वभूमौ बिन्दुश्चन्द्रो विसर्गो भवति दिनकरश्चासनं कर्णिकोर्द्ध्वं॥ ६१ ॥

इदानीं कमलबीजान्युच्यन्ते॥ बिन्द्वाकारैरित्यादिना॥ इह चतुर्विंशतिकमले षकादिवर्णाक्षरं॥ कन्दादिषु बिन्द्वादिभिन्नं
॥ अं अः॥ अ आ॥ एभिर्भिन्नैर्देयं देवम्॥ जलवशादिति॥ श्रोत्रस्य कमलस्य कन्दे कं नाले खं। दले गं। केशरे घं। कर्णिकायां ङ॰मिति॥
वर्णधातोः का खा गा घा ङा इति॥ मनइन्द्रियस्य सं षं वं शं क्षं इति॥ शब्दस्य सः षः वः शः क्षः इति परिणतं कमलमेभिः पञ्चाक्षरैः॥ सं
स्कारस्य कमले चछजझञ इति॥ एवं घ्राणस्य॥ चं छं जं झं ञं॥ तथा वायुधातोः॥ चा छा जा झा ञा इति॥ स्पर्शस्य चः छः जः झः ञः इति॥
वेदनायाः टठडढण इति चक्षुषः टं ठं डं ढं णं इति॥ तेजोधातोः टा ठा डा ढा णा इति॥ रसवज्रायाः॥ टः ठः डः ढः णः इति॥ संज्ञायाः॥
पफबभम इति। जिह्वायाः॥ पं फं बं भं मं। उदकधातोः पा फा बा भा मा इति। रूपवज्रायाः पः फः बः भः मः इति॥ रूपस्य तथदधन
इति॥ कायेन्द्रियस्य तं थं दं धं नं इति॥ पृथ्वीधातोः॥ ता था दा धा ना इति॥ गन्धस्य तः थः दः धः नः इति॥ एवं चछजझञ वागिन्द्रियस्य॥ ट
ठडढण पाणीन्द्रियस्य॥ पफबभम पादेन्द्रियस्य॥ तथदधन पाय्विन्द्रियस्य॥ कमले विज्ञाया इति॥ कमलबीजन्यासे ह्रस्वदीर्घः स्व
भूमाविति नियमः॥ एवं बिन्दुनाऽकारेण हकारेण वा चन्द्रासनानि विसर्गेण रेफेण क्षकारेण वा सूर्यासनानि कर्णिकोर्द्ध्वं॥ अतिपति
कमले सं षं वं शं क्षं कर्णिकोर्द्ध्वं अं अः आ। चन्द्रसूर्यराहासनानीति न्यासः॥ ॥

षंडूगांडूस्वदीर्घं प्रकृतित्रणवशांते दिकास्तम्भपार्श्वे गन्धादीनां क्रमेण उज्जलम्भुविगताः पूर्वभागात्स्वदिक्षु ॥ वायोविन्दु
द्विभिन्नास्थितो णान्तरविभिवेदिकायां तथैव सर्वेष्वानां समन्तात्तुज्जलदिग्गता वर्णभेदेर्जितानां ॥ ६२ ॥
इदानीं पूजादेवीनां वीजान्युच्यन्ते ॥ षडङ्गैन्यादिना ॥ इह चित्तमण्डले पूर्वे वेदिकायां स्तोरणस्तम्भे मूले वामे हूं गन्धायाः ॥ सव्ये हूं ना
लायाः ॥ एवं दक्षिणे हूं धूपायाः ॥ हूं दीपायाः ॥ पश्चिमे हूं लास्यायाः ॥ हूं हास्यायाः ॥ उत्तरे हूं अमृतायाः ॥ हूं हूं दलाक्षतायाः ॥ हूं यायाः ॥
हूं नृत्यायाः ॥ पूर्वतोरणोपरि स्रीं हूं वाद्यायाः ॥ पश्चिमे मकारतोरणोपरि हूं गीतायाः ॥ हूं उत्तरतोरणोपरि हूं कामायाः ॥ द
क्षिणतोरणोपरि ॥ अथ चिह्नं हूं निजं स्वमालादर्वीवृद्धीपमकुद्धारकलशा हूं ब ब रत्नमण्डलवज्रपद्मानीति पूर्वभागात् हूं सीति येना श मि
नियमः ॥ इदानीं षड्गिंशादिकायां वीजान्युच्यन्ते ॥ वाद्यस्वादिना ॥ इह वाहिर्वाह्यमण्डले वेदिकायां ॥ पूर्वद्वार दक्षिणे वेदिकायां चः छः जः झः ञः ॥ द
क्षिणे टः ठः डः ढः णः ॥ पश्चिमे तः थः दः धः नः ॥ उत्तरे पः फः वः भः मः ॥ पूर्वद्वारवामे सः षः शः क्षः हूं उत्तरद्वार पश्चिमे लः वः रः यः हः ॥ द
क्षिणद्वारवेदिकायां कः खः गः घः ङः ॥ पश्चिमद्वार दक्षिणे क्षः इति वाह्यमण्डले ॥ कायमण्डले तु भित्तरद्वारे र उस्वारसंयुक्ते अकारादि स्वरैः
प्रतीच्छानां वीजानि चिह्नानि रूपाणि वाह्ये स्वनीयानि ॥ गर्भवेदिकायां ॥ अनेकाः पूजादेवताः धारिण्यः समन्तात्त्वेख्याः इति ॥ धारणीनां वीज
न्यासः ॥ एवं सर्वेषानां समन्तात्सुज्जलदिग्गता वर्णभेदेर्जितानां वर्णवेदिगताः ॥ पञ्चवर्णरजसेति सर्वत्र नियमः ॥ ॥

ह्रस्वो दीर्घो हकारौ तु रधनदपरे दक्षिणे चर्चिकादेवेशान्यादेः क्षकारः शिखिहरपवनेशादिभिन्नश्च देव्यः ॥ याम्याः क्षाम्यास्तु
सरम्याः कमलदलगताः पूर्वपृष्ठेऽष्टदिक्षु यायाःषट् ह्रस्वदीर्घास्तु रकमलदले वह्निपत्रेक्रमेण ॥ ६३ ॥

इदानीं बाह्यखण्डे चर्चिकादीनां बीजान्युच्यन्ते ॥ ह्रस्वावित्यादिना ॥ ऊर्ध्वपश्चिमायां साधनाग्रदले चर्चिकाकमलासनं ब्रह्माणं तदुपरि कमलमष्टदलं ॥ नीदेवलिखनीयं रजसारक्तवर्णं कमलमपि ॥ तत्र ह्रस्वो दीर्घो हकाराविति ॥ उपरि कर्णिकायां चर्चिकायां ह ॥ धनदे रैदे ब्राह्मणोपरि पद्मकर्णिकायां हं ॥ दक्षिणे वाराह्या महिषोपरि हः ॥ अपरे ऐन्द्र्या गजोपरि हा इति दिक्षु चर्चिकादेः ॥ वेशाद्यादेः क्षकारौ ॥ एवं शिखिकोणे गरुडोपरि कमलकर्णिकायां क्ष ॥ एवं हरे महालक्ष्म्याः सिंहोपरि ॥ वायव्ये ब्रह्माण्याः हंसोपरि क्षा ॥ नैर्ऋत्ये कौमार्याः क्षः मयूरकमलकर्णिकोपरि ॥ एषु चन्द्रासना भाव इति चर्चिकादि भेदेन देव्य इति नियमः ॥ इदानीं भीमादीनां चतुःषष्टियोगिनीनां बीजानि कमलदले प्रोच्यन्ते ॥ याम्या इत्यादिना इह याम्या इह याया अष्टसंख्यात्वाद्धि चर्चिकाया अग्रतः पद्मपत्रे भीमायाः पृष्ठे ही वायुवेगायाः ॥ स्वदिक्षु नेत्र पूर्वदिशि ॥ याम्याः षट् ह्रस्वाः ॥ भीमादि दक्षिणावर्तेन ॥ तथा भीमायाः द्वितीयपत्रे वायुवेगायाः ॥ तृतीये पिकमलदंष्ट्रायाः ॥ चतुर्थे पृज्वलदलनचण्डायाः ॥ तेनो वायुवेगा पश्चिमे पत्रे उक्ता ॥ षष्ठे तु प्रचण्डायाः ॥ सप्तमे सूर्यप्राख्याः ॥ अष्टमे संकुलनाशायाः ॥ अथवा कर्णिकोपरि सर्वत्र कर्णिकास्विह चर्चिकादीनां ॥ इति तु रकमले पूर्वकमलेनासः ॥ इह वह्निपत्रादिषु क्षाम अष्टसंख्याः तत्रैवेशान्याग्रतः ॥ सिद्धिदाः ॥ ह्रस्वी ॥ परमविजयायाः ॥ एवं यायां ॥ मायायाः याकी ॥ त्यायीलक्ष्म्या पूजमायाः षष्ठपत्रे पू ॥ जयन्त्या पूर्वकायाः ॥ अष्टमे पत्रे ॥ अर्थ सर्वत्र चक्रचिह्नमिति ॥ वह्निपत्रे क्रमेणेति नियमः ॥ ॥

एवं याम्येचरणाद्युक्कमलदले ह्रस्वदीर्घप्रभेदे यीक्षे हृद्रे चदेव्याः सजलधिपवने पद्मपत्रे वलायाः॥ पूर्वद्वारस्य सव्ये
कमलदलगतो मातृभिन्नेष्ववर्गे ह्रस्वो देव्यस्य दीर्घो भवति च पवनस्याग्निकोणे स्थितस्य ॥ ६४ ॥
एवं याम्ये चरणा इति॥ इह दक्षिणायाराग्यो अग्रतः॥ रुं कंकाल्याः॥ पृष्ठे ह्रूं कराल्याः॥ पश्चिमे पवने तो राग्याः कालरात्र्याः॥ ऊं कं पिनवननासारि॥
कालजिह्वायाः रूं॥ काल्याः रूं॥ पिरायाः ऌं। विरूपाक्ष्यायां॥ एवं दतुनैऋत्यकमलदले कोमार्याः॥ अग्रतः॥ क्षं पमायाः पृष्ठे भूं रत्नमालायाः॥ ततो यथा
केमेरा अनङ्गमायाः॥ ऊं मार्यारी॥ मदनातिगमनायाः रूं। ऊं नेत्रायाः रूं। क्लिन्नायाः रूं। भजायाः॥ इति दत्तकमले। ह्रस्वदीर्घप्रभेदैः। पक्षे हृद्रे खवा
याइति॥ इह पक्षे रैं घ्राः अग्रतः॥ ऊं भीमायाः॥ पृष्ठे रूं। तोमा मलाः मध्यमे दले। ततो वाराह्याः ऋमेराः गङ्गायाः व। नित्यायाः विं॥ परमन्तरीतायाः रं॥ लक्ष
णायाः हुं। पिङ्गलायाः ह्रूं। कृष्णायाः वं। इति पक्षे। रुद्रे महालक्ष्म्याः। अग्रतः। हुं श्रीभीषणायाः॥ पृष्ठे क्रूं ष्टन्याः॥ ततो वायुः चन्द्रलेखायाः वा। शशधर
धवलायाः वीं। हंसवदनायाः ह्रूं। पक्षिणायाः दं। नारनेत्रायाः ह्रूं। विमलशशधरायाः वः॥ इति हरे॥ सजलधिपवते पद्मपत्रे सुलायाः इति॥ इह वरु
णैन्द्र्याः॥ अग्रतः॥ ह्रूं वज्राभायाः॥ पृष्ठे क्रूं चित्रलेखायाः॥ ततो लायाः। वज्रगात्रायाः लं। वरकनकवत्याः लिं। उर्वश्याः लुं। रम्भायाः लुं। अह
ल्याः ह्रूं। तारण्याः लं इति। पावने ब्रह्माण्याः॥ अग्रतः क्षूं जाविन्याः॥ पृष्ठे भूं वागीश्वर्याः॥ ततो लायाः दीर्घाः॥ इह द्वितीयपत्रे लापद्मनेत्रायाः॥ लीज
लीजवन्याः॥ ल्लूं तुष्ट्याः॥ ल्लूं गायत्र्याः॥ ल्लृं विद्युत्प्रभायाः॥ लः स्मृत्याः॥ इति कमलदलेषु बीजन्यासः॥ अथ वा सर्वत्र वाराह्यादिषु दण्ड चिह्नं॥
कौमार्यादिषु शक्तिः॥ रौद्र्यादिषु त्रिशूलं। लक्ष्म्यादिषु पद्मं। खड्गो वा। ऐन्द्र्यादिषु वज्रं। ब्रह्माण्यादिषु भूर्च्चिः पात्रं वेति। वा खण्डले बीजचिह्न्या

सः॥ चर्चिकादीनां लेख्य इति॥ भगवतो नियमः॥ ॥ इदानीं कायमण्डले नैर्ऋत्यादीनां बीजान्युच्यन्ते॥ पूर्वद्वारस्येत्यादिना॥ इह कायमण्ड
ले नैर्ऋत्यादीनां द्वादशदेवतानां अष्टाविंशतिदलकमलानि॥ चैत्रादयः षट्त्रिंशत्तिथयः॥ अधिदेवताः॥ तासां पूर्णिमा अमावास्या बी
जानि कर्णिकायां। शेषाणि पत्रपंक्तिषु। इह चैत्रवैशाखौ वसन्तो वायुर्विष्णुः॥ ते तत्त्ववर्गो ह्रस्वो दैत्यस्य॥ दीर्घमात्राभिन्नः पवनस्याग्निकोण
स्थितस्य॥ अत्र पूर्वद्वारे दक्षिणे प्रथमदले अ अ वज्रायाः॥ एवं सर्वत्र यथा शुक्लप्रतिपत्तिथौ॥ अ वज्रायाः॥ तथा द्वितीयदले इ इ वज्रायाः
॥ एवं वज्रनामान्याः सर्वा तिथयो विदितव्याः॥ पौर्णमासी प्रथमामावास्या पापः॥ एवं तृतीयदले ऋ॥ चतुर्थ्यां क्रमेण छु छू पं॥ जृ जि जृ जु जू
जं॥ ज जि इति चतुर्दशदले॥ ततः पूर्णिमा कर्णिकायां॥ जृ जॄ वज्रायाः॥ ततः पञ्चदशदले उ एवं क्रमेण जू जं। छ छि छृ छु छू छं। च चि चृ चु
चू इत्यष्टाविंशतिमे दले॥ ततोऽमावास्यायाः बीजं कर्णिकायां चं॥ वैशाखस्य शुक्लप्रतिपत्तिथौ प्रथमे। चा चा वज्रायाः॥ एवं सर्वासां तिथीनां वज्राणां
नाम॥ तथा द्वितीयदले द्वितीयायाः ची ची वज्रायाः॥ एवं क्रमेण चृ चॄ चु चू चः॥ छा छी छृ छॄ छु छू छः॥ जा जी इति चतुर्दशमे दले॥ ततो वैशाखपूर्णिमायां
बीजं कर्णिकायां॥ जृ जॄ वज्रायाः॥ ततः पञ्चदशदले कृष्णप्रतिपत्॥ जु जू जः॥ झा झी झृ झॄ झु झू झः॥ ताभि त्रॄ त्रू इत्यष्टाविंशतिमे दले॥
ततः अमावास्यायाः पवनस्य बीजं ञः कर्णिकायामिति दीर्घश्च वर्गः पवनस्येति नियमः॥ ॥

एवं दीर्घश्च सर्वो भवति वक्तव्यम् अस्योत्तरे पश्चिमे च ह्रस्वो दीर्घः शवर्गो भवति पशुपतेर्जम्भतस्यैव राजन्॥ दैत्यादीनां सु
बीजं भवति तत्त्वदले स्वस्ववर्गान्तमध्ये अष्टाविंशतत्पत्रेष्वपि दिव्यवशात् स्वस्ववर्गो भ्रमणेन॥ ६५ ॥

एवं याम्ये॥ दक्षिणद्वारस्य पश्चिमे ह्रस्वः॥ टवर्गो णादिना ज्येष्ठतिथिस्तु हृ ढं॥ कर्णिकायां शिखिनः रसमुखस्येति॥ षण्मुखस्य दीर्घः॥ आषाढतिथौ ता
दीर्घचवर्गवत् कर्णिकायां हृ णः इति ह्रस्वदीर्घप्रभेदैः॥ एवं वामे उत्तरे जलनिधेः॥ ह्रस्वपवर्गः॥ वृं॥ श्रावणपूर्णिमामावास्ययोः ईशाने दीर्घ
भेदैः॥ गणस्य विनायकस्य कर्णिकायां वृ मः॥ भाद्रपदपूर्णिमाऽमावास्ययोः॥ एवं शक्रस्य वरुणे ह्रस्वस्तवर्गः॥ तादिना कर्णिकायां हृ तं॥ आश्वि
न पूर्णिमाऽमावास्ययोः॥ एवं पवने नाथादिना त्रुलरणः कर्णिकायां हृ नः॥ इति कार्त्तिकपूर्णिमाऽमावास्ययोः॥ एवं पूर्वद्वारवसथेदनुरिपो
र्विशेषः ह्रस्वः॥ पमपत्रे कवर्गः॥ छादिना कर्णिकायां हृ कं॥ इति माघपूर्णिमाऽमावास्ययोः॥ ॥ ॥ ॥

एवं याम्ये टवर्गः शिखिरसमुखयोर्ह्रस्वदीर्घप्रभेदैर्वामे चेशे पवर्गो भवति जलनिधेर्दीर्घभेदे गणस्य॥ शक्रस्य ब्रह्मणोर्वेस
वरुणपवने ह्रस्वदीर्घस्तवर्गः पूर्वद्वारस्य वामे भवति दनुरिपोः पमपत्रे कवर्गः॥ ६६ ॥

दीर्घः सव्येसव्यद्वारस्य पूर्वे यमस्य कादिना कर्णिकायां हृ ङः॥ इति फाल्गुणपूर्णिमाऽमावास्ययोः॥ अथ उत्तरे उत्तरद्वारपश्चिमे ह्रस्वः सव
र्गः॥ क्षादिना षष्ठपत्रेः कर्णिकायां हृ सं॥ मार्गशीर्षपूर्णिमामावास्ययोरिति॥ एवं पश्चिमद्वार दक्षिणे दीर्घः साआदिना पत्रेषु कर्णिकायां य
क्षस्य॥ हृ क्षुः इति॥ पौषपूर्णिमावास्ययोः॥ एवं वसन्तग्रीष्मवर्षाशरच्छिशिरहेमन्तऋतुभेदेन वायुतेजउदकपृथ्वीज्ञानकाशधा
तवः॥ तिथिभेदेन पञ्चमण्डलिषट्चक्रभेदेन कायमण्डले बीजन्यासः॥ अथ वा नायकचिह्नभेदेन चिह्नानि सर्वदलेषु॥ अत्र चिह्नानि कर्णि

कायां नैर्ऋत्यादीनां क्रमेण। खड्गः। तूष्णः। शक्तिः। कुन्तः। पाशः। पर्शुः। वज्रं। सूचिः। चक्रं। दण्डं। त्रिशूलं। गदा चेति॥ चिह्नन्यासनियमः॥ तथ
थाकेत्यादीनां स्वबीजं भवति नवदलेषु स्ववर्गान्तमध्ये अक्षरविंशत्कृमवेत्रेष्वपि दिवसवध्यात् स्वस्ववर्गाक्षराणीति॥ कायमण्डले वश्युत्तरविंश
तिवज्रातिथिन्यासनियमः॥ ॥

याराबालाश्च हंसाः खलु बडपिरथे पूर्ध्वभागे स्वरादेः काराः सव्यावसव्ये प्रभवति करिणां यादिरूढो हकारः॥ सवर्गी
कूटरूपान्यपि हयरवला क्षादिषु क्लाश्च पाया दिक्षु केकादिवर्गाश्च लवलयगताश्चादयोऽन्येऽचलोमाः॥ ६७॥

इदानीं द्वारपालरथस्थदेवीनां बीजानि। क्रोधराजानामुच्यते॥ याराइत्यादिना॥ इह पूर्वद्वारे मारेच्याः लाः। नीलदण्डस्य यं। दक्षि
णद्वारे चुन्दायाः वाः। टक्किराजस्य रं। उत्तरद्वारे भृकुटाराः। अचलस्य वं। पश्चिमे वज्रशृङ्खलायाः याः। महाबलस्य लं। आकाशपु
ष्पा पूर्वद्वाराग्रतः नीलायाः हः। उष्णीषस्य हां। पातालवसुध्या पश्चिमद्वाराग्रतो रौद्रेक्षणायाः हा। सुम्भराजस्य हूं। अथवा चिह्ना
नि। दण्डः। बाणाः। मुषलः। गदा। वज्रः। त्रिशूलः। इति। शूकरहयसिंहगज। अनिल। अष्टापदरथे इतिनियमः॥ इदानीं नाग
बीजान्युच्यन्ते। इह पूर्वादिद्वारान्तः सव्यावसव्ये विदिकायां यादिरूढो हकारः। फणीनां यथाक्रमेण पद्मादीनामिति॥ इह पूर्वद्वारवामे
कर्कोटकस्य वायुमण्डले ह्यु। दक्षिणे ह्या पद्मस्य। अथवा ध्वजचिह्नं। एवं दक्षिणपूर्व वह्निमण्डले पश्चिमे च॥ हू हूः स्वस्तिकं वा॥ वा
सुकिः शंखपालयोः॥ उत्तरपूर्वापरे। ह्व ह्वा। उदकमण्डले कुलिकानन्तयोः॥ पद्मं वा। पश्चिमद्वारदक्षिणोत्तरेण हू हू॥ पृथ्वीम

ण्डलेन षट्कमहापद्मयोः॥ वज्रं वा इति चिह्नन्यासः॥ इदानीं श्मशाने देवीनां वीजन्तु चयेनो॥ अङ्ग गेह इत्यादिना॥ इह पूर्वाद्यष्टसु महाश्मशानेषु
यथासंख्यं॥ दिक्षु कादिवर्ग इति॥ क्षू इति॥ पूर्वचक्रे मूर्द्धकजीवा॥ पश्चिमे स्थ्यु इति॥ उत्तरे ल्व्यु दक्षिणे क्षादिषु काः ल्यू इति एतेन वलय
हि वलयमध्ये चक्रमष्टारं कृत्वा तत्र ह्यू उपरि॥ वायव्ये तु लोमो। विदिक्षु क्ष्यू अग्नौ क्ष्म्यू नैरृत्ये तु वा ह्यू यव्ये क्ष्म्यू ईशाने इति॥ तो अथ सर्वत्र कर्त्रि
काचिह्नं नियमः॥ ॥

पूर्वे याम्येऽवसव्ये वरुण इह विदले चेशवाय्वोः क्रमेण अं अः श्वासार्कयोर्वै क्षितित्रिभुवनगताभूतवृन्दस्य वृन्दः॥ हूंका
रो धर्मचक्रस्य च भवति तथाकारवीजे घटस्य ओंकारो दुन्दुभेः स्यात् प्रभवति वरुणे बोधिवृक्षस्य होश्च॥ ५८ ॥

पूर्वे याम्येऽवसव्ये वरुण इह विदले चेशवाय्वोः क्रमेणेति॥ इह पृथ्वीवलये अं चन्द्रस्य। अः सूर्यस्य वीजं क्षितित्रिभुवनगताभूतवृन्दस्य सार्द्ध-त्रि
कोटिसंख्यागणस्य भूतवृन्दस्यानन्तमन्त्रास्तत्संख्या इति॥ अथ वा नानाचिह्नानि वायुवलये कार्याणीति नियमः॥ इदानीं धर्मचक्रादीनां वीजानि
पूर्वे तोरणे धर्मचक्रस्य हूं दक्षिणे भद्रघटस्य आः। उत्तरे दुन्दुभेः ओं। पश्चिमे बोधिवृक्षस्य हो॥

इत्येवं मातृकाया भवति कुलवशान्मण्डले मन्त्रभेदस्तु जाप्यहोमानि वर्णे भवति हि सकलं वज्रिणो वक्त्रभेदैः॥ करोतु होमं च
तद्वद्भवति च पुनरावाहनं तीर्थिकानां शीघ्रं संप्रोक्षणं चार्घविधिरपि तथा मारनिर्घाटनञ्च॥ ५९ ॥

इत्येवं मातृकाख्या भवति कुलवशान् मण्डले मन्त्रभेदः उग्राभिचारुकानि वर्णो भवति हि सकलं वज्रिणो वक्त्रभेदेः क्रूरे होमं च तस्मिन्भवति च पुन
रावाहने तीर्थिकानां ॥ श्रीभूम्यां प्रोक्षणं चार्घविधिरपि तथा मारनिर्घाटनञ्चेति ॥ वक्ष्यमाणक्रमेणात्र सर्वं वेदितव्यम् अस्मिन् वृत्ते संगृहीतमि
ति सर्वत्र नियमः ॥ ॥

द्वाराणां रक्षणार्थं व्रतनियमयुताः शुक्लशिष्याः प्रदेया योगिन्यः श्रीघटानां शिशुविद उपवने चेशकोणक्रमेण ॥ आचा
र्यैः श्रीगणेशो भवति नरपते कर्मवज्री प्रकृत्या शिष्याभावे गणेशः स्वयमपि कुरुते होमकर्मादिकञ्च ॥ २० ॥

इदानीं मण्डले द्वाररक्षणाय शिष्या उच्यन्ते ॥ द्वारेत्यादिना ॥ इह पूर्वादिद्वाराणां रक्षणार्थं व्रतनियमयुता इति ॥ व्रतानि पञ्चविंशतिर्व
क्ष्यमाणानि ॥ नियमो भक्ष्याभक्ष्यज्ञा ॥ तैर्युक्ताः ॥ व्रतनियमयुताः शुक्लशिष्याः ॥ चतुर्दशमूलापत्तिरहिता ॥ ते प्रकर्षेण देया इति ॥ द्वारे शु
वज्रवज्रघण्टाहस्ता अभिषिक्ताः प्रज्ञाता इति योगिन्यः श्रीघटानां ॥ शिशुविद उपवने चेशकोणक्रमेणेति ॥ एवं व्रतादिपरिशुद्धा दे
या इति ॥ तदा वज्राचार्यो गणेशो भवति नरपते कर्मवज्रि प्रकृत्येति ॥ इह पञ्चमः शुक्लशिष्यः सर्वकर्मज्ञः कालो दशतत्त्वपरिज्ञाता ते होमादिक
र्मकाण्डे कर्मवज्रि कृत्वा मण्डले प्रतिष्ठां तदुः कुरुते इत्थंभूते शिष्याभावे स्वयमपि गणेशो होमादिकं करोति कर्मेति ॥ चकारादन्यदपि व
क्ष्यमाणक्रममिति ॥ ॥ मूलतन्त्रानुसारिण्यां द्वादशसाहस्रिकायां लघुकालचक्रतन्त्रराजटीकायां विमलप्रभायां मण्डलवर्तनं नाम
महोद्देशस्तृतीयः ॥ ॥

वृत्तं वा वेदकोणं भवति जलवशात्खाति त्र्यश्रं कुण्डं वामे वाष्टकोणेऽपि च धवलमहो मूलपद्मं द्वितयं ॥ खातिम्नप्र
माणं भवति तदुदरे मूलपद्मं सचिह्नं पद्मार्द्धं पद्मवाह्ये सघटमपि भवेत्खड्गरत्नादिचिह्नं ॥ ७१ ॥

हुतं तु नित्यं स्वगृहादिषु समिधादिकं ॥ प्रसंगाज्ज्ञानमर्चितं वक्ष्यते कुण्डलक्षणं ॥ कुण्डमष्टविधं प्रोक्तं शान्तिकादिप्रभेदतः ॥ प्रत्य
कदिग्विभागेन नवमं सार्वकर्मिकं ॥ मूलतत्त्वात्मकं वृत्तं देशितं मण्डवच्छ्रिया ॥ संक्षिप्ते मूलतन्त्राऽनुसारि रूपान्तरं वितन्यते ॥ इह संप्रति वृ
त्तादि वृत्तैरुक्तं ॥ सार्वकर्मकार्द्धानां कुण्डानां लक्षणमुच्यते ॥ वृत्तं वेत्यादिना ॥ इह सर्वत्र चतुर्हस्ते मण्डले सार्वकर्मिकं वर्तुलं कुण्डं ज्ञानेन मण्ड
लार्द्धं पृष्ठे चतुरस्रं मण्डलं तुल्यं च ॥ तत्र तावत् जलवशात् खातं चक्रं सर्वत्र गर्भे वज्रावलीस्तम्भान्ते ॥ मण्डलादर्द्धभागं भवति वाह्यखातार्द्ध
मानेनेति निम्नमानं ॥ तदर्द्धेन मूलपद्मं ॥ तस्मात् गर्भपद्मात् द्वितयं ॥ पृष्ठे हस्तद्वयं चतुरस्रं वृत्तं गर्भपद्मप्रमाणं चैकहस्तं ॥ सर्वेषामप्यादि
मध्ये प्रयाणार्थं ॥ अथ कर्मानुरूपेण वामे वाष्टकोणे वापि च धवलमहो रजो मण्डलवज्रज्वाला वाह्ये हस्तद्वयान्तरेणेति ॥ तत्र चतुरस्रं कुण्ड
हस्तद्वयं विष्कम्भेण वाह्ये च खातार्द्धमानेन खातिः ॥ पद्मप्रमाणेनेति ॥ इह तु अष्टकुण्डे खातिः पद्मप्रमाणा वितस्तिद्वयं भवति ॥ वृत्ते वितस्तिमा
त्रा भवति ॥ तदुदरे गर्भपद्मं ॥ यथा मण्डले चतुर्हस्ते सचिह्नं तथा चतुरस्रे कुण्डे ॥ यथा द्विहस्तमण्डलेन तथा वृत्तकुण्डगर्भे भवतीति ॥ एवं यथा
मण्डले पद्मार्द्धं पद्मवाह्ये सघटं खड्गादिचिह्नं ॥ दिक्षु विदिक्षु तथा कुण्डगर्भेऽप्यङ्कुरजादिनास्तिकपाता ॥ मूलपद्माधिकं कर्त्तव्यं सर्वकुण्डे
षु पश्चात् कर्मानुरूपेण पृष्ठे मण्डले पिष्टतण्डुलादिना वर्णैः कर्त्तव्य इति ॥ चिह्नानि मण्डलचिह्नानि यथा ॥ एवं कुण्डतले वृत्तस्थानात् इति संक

२०३

भाग एकं हस्तस्यान्तरसूत्रः॥ अर्द्धभागस्तु चकज्जरण्डे ती॥ एवं द्वौ द्वौ विभागौ पूर्वापरेऽपि॥ तद्वत्सव्योत्तरेऽपि॥ एवं चतुर्हस्तं करण्डं प्राकारसी
म्नः॥ चक्षुरादिस्थानान्तमिति नियमः॥ चतुर्हस्तं चतुरस्रं तदर्द्धं षट्तं द्विहस्तान्तमण्डलमिति॥ ॥

तस्योर्द्ध्वे नापि वीथ्यष्ट द्विगुणमपि ततो वेदिकायामभाग ओष्ठार्द्धेनोच्छ्रिता वै प्रभवति नियता मूर्द्ध्नि वज्रावली च॥ वाह्ये
धिः पद्मपत्राण्यपि कुशारचनां सर्वदिक्षु प्रकुर्यात्तस्मात्ते पश्चिमेन प्रभवति नियतं द्वारमेकं त्रिरेखं॥ ७२ ॥

तस्योर्द्ध्वे नापि वीथ्यष्टमिति॥ तस्य पद्मार्द्धस्य तथा गतस्थानस्योर्द्ध्वेन तिर्यक्तु कुर्येरोति॥ प्राकारमानेन तिर्यग्विभागेन नियमः॥ तेनैव माने
न मण्डले वेदिकार्द्धं यावदिति॥ तदुपरि तदर्द्धेन निर्गमो कुर्यमोष्ठं वाह्यपरिरेखामण्डलं॥ एवं मण्डलवेदिकान्ते परिकुर्द्धं द्विगुणमपि
ततो वेदिकायामभाग इति॥ ततो गर्भोष्ठमानान्द्विगुणान्तिर्यग्विभागेन निःसृता वेदिका॥ एवं रत्नपङ्क्तिका हारार्द्धहारभूमिवज्रलीपर्यन्ते
वेदिका सर्वत्र कर्त्तव्या॥ ततो वज्रलीकवरीषभागमात्रं अर्द्धं तिर्यग्विभागेन निःसृतमिति॥ तत्र वेदिकायां मूर्द्ध्नि मध्यभागे वेदिका पञ्च
विभागे कृत्वा मध्यभागत्रयेण वेदिकोपरि वज्रावलीसार्वकर्मिककरण्डे ओष्ठमानोर्द्ध्वेन उच्छ्रिता॥ यदा मूर्द्ध्नि मयी भवति तदा मध्यस्थ
कस्यो[illegible]र्द्धकुकुर्यं॥ पद्मरजसा तत्तो वज्र्य नियम इति॥ वाह्ये अधोऽधो याणि पद्मपत्राणि भूमिपर्यन्तं वेदिकार्द्धमानेन कर्त्तव्यानी
ति॥ ततो वाह्ये॥ सर्वदिक्षु भूम्यां कुशारचनां कुर्यादिति॥ तस्य कुशप्रस्तारस्य वाह्ये पश्चिमदिग्विभागे प्रभवति नियतं द्वारमेकं त्रिरेख

मिति॥ इह कुण्डवाह्ये हस्तद्वयं त्यक्त्वा वाह्येष्वेतरक्तकृष्णारजसा प्राकारत्रयं कृत्वा ततः पश्चिमेन प्राकारदीर्घमानाष्टभागिकं द्वारं त्रिरेखं मण्डलद्वा
रवत् सतोरणं॥ एवं सर्वकुण्डेषु ऊर्द्ध्वमेखलप्रेकेषु हस्तद्वयं त्यक्त्वा प्राकारत्रयनियमः॥ ॥

आचार्यस्यासने वै खलु भवति समं गर्भपद्माद्द्विगुणं वामे चार्यासने स्याद्भवति नरपतेर्होमपात्रस्य सव्ये॥ सर्वेषां वज्र
चिह्नं भवति जिनपतेर्वाथ पद्मं हि सोत्तुर्वके तथैव कुण्डे द्विविधमपि भवेद्वाह्यदेहे च राजन्॥ ७२ ॥

आचार्यस्यासनं खलु भवति समं चतुरस्रं कुण्डे गर्भपद्मात् द्विगुणमिति॥ हस्तद्वयं चतुरस्रं॥ एवं सर्वकुण्डेषु हस्तमेकं विष्कंभं॥ एवं वा
मे चार्यासने हस्तमेकं स्यात्॥ तथा सव्ये होमपात्रस्यासने हस्तमेकं॥ पृष्ठे द्विहस्तमिति॥ सर्वेषामासनानां मध्ये पतितानि पद्मदलानि॥ आ
सनमध्ये विश्ववज्रचिह्नं दातव्यं जिनपतेर्वा वज्रसत्वस्य वाथ पद्मं हि मात्रोर्द्ध्वमेर्दयो दातव्य इति सार्वकर्मिके वृत्तकुण्डस्य स्वदीनां हवनार्थं
तुल्यकुण्डं कृतामृताहुतीर्दानीयेति॥ एवं द्विविधमपि भवेत् पद्मं वाह्ये देहे च राजन्निति संबोधनं॥ एवं सार्वकर्मिककुण्डलक्षणनियमः
॥ ॥ इदानीं पूर्वोद्दिशितानां शान्त्यादीनां लक्षणानि निर्दिश्यन्ते॥ इह वृत्ते कुण्डे हस्तमात्रे हस्तमात्रं गर्भपद्मं पुष्कर्णिकायां पद्मं पत्रे
षु चक्रादिचिह्नं॥ पद्मोर्द्धेन खाता निःपद्मद्वादशभागिकमोष्ठं॥ तिर्यग्निःसूत्रे॥ ऊर्द्ध्वेन च मदर्द्धेन निर्यग्निर्गमो वेदिकोच्छ्रयः॥ पद्मपक्षागिका
वेदिका पञ्चभागानां भागद्वयं त्यक्त्वा भागत्रयेण पद्मावलीनेमी वेदिकाधः॥ वाह्ये पद्मपत्राणि॥ दूर्वास्तरणं कुर्यात्॥ प्राकारत्रयं द्वारं तोरणं

सुस्वरां भवति॥ आचार्यस्यासनं॥ अर्घासनं॥ हेमासनं॥ आचार्यस्यासनस्य वामे सव्ये कर्तव्ये योष्टिके हस्तद्वयं पद्मं ओष्ठादिकं द्वादशादिविभागिकं कर्णिकायां चक्रं॥ दले वज्रादिचिह्नं॥ कोणे लोचनादिचिह्नं॥ वेदिकायां चक्रावली॥ शेषं पूर्वकमेव तु॥ एवं चतुराकारं शान्तिकुण्डं सर्वसिद्धिदितं॥ मध्ये कमले द्वादशाङ्गुलेन दूर्ध्वेन स्वातिः॥ ओष्ठादिकं सर्वं पूर्ववत् द्वादशादिभागिकं॥ पद्मपत्रस्कोने चिह्नं करतलाङ्गुलीमालार्धः योल्पि स्तृतं केकेशररचना कमलकर्णिकायां कर्त्री॥ वेदिकोपरि कर्णिकावलीति॥ आचार्यासनं॥ चतुराकारं कर्तृकालाञ्छितं॥ यथा शान्तोपमलाञ्छितं॥ पुष्टौ चक्रलाञ्छितं नेमिति पञ्चकोणं शान्तिकुण्डप्रमाणं॥ पञ्चकोणोपरि वेदिकायां॥ वज्रावली॥ गर्भचिह्नं स्वरूपकं॥ वाह्यधकारूपिडूमालाम्बू अर्धीकृतयोनू॥ कृष्णावर्णा वा हि भूतरक्षापत्ररचनेति॥ त्रिकोणे कर्णान्तकर्णं हस्तमेकं॥ कर्णान्मध्यभागे विशान्तं तु लग्नं गर्भपद्मनेनेव मानेन दशाङ्गुलापमार्जीस्वाति॥ शेषं द्वादशभागादिना ओष्ठादिकं पूर्ववत्॥ वेदिकायां बाणावली॥ अघोरके पञ्चमेति॥ बाह्यरक्तपुष्परचना सत्रकोणस्यच्छितं वेदिकायां वज्राङ्कुशावली॥ शेषं त्रिकोणवर्णं॥ गर्भचिह्नं त्रिकोणवाणः॥ अष्टके वज्राङ्कुशः॥ षट्कोणं॥ त्रिंशदङ्गुलं षट्कोणोपरि वेदिकायां॥ नागपाशावली गर्भचिह्नं नागपाशः॥ पीनार्कदलानि बाह्ये पीतपुष्परचना इति॥ अष्टकोणं पूर्वच्छितस्य॥ गर्भचिह्नं वज्रशृङ्खला॥ वेदिकायां वज्रशृङ्खलावली॥ अथ षट्कोणवत् आकारत्रयं सर्वत्र हस्तद्वयं॥ तत्र आचार्यासनं सर्वत्र कुण्डाकारेणार्घासनं॥ हेमासनं वा॥ कुण्डानां कर्णान्तकर्णमानेनेति॥ तिर्यग्विभागनियमः॥ ॥ इदानीं कुण्डानां स्वभावमुच्यते॥ इह शान्तिकुण्डं चन्द्रस्वभावं आदित्यचिह्नलाञ्छितं॥ पुष्टिकुण्डं चन्द्रच्छितं सूर्यसमच्छितं वा तु॥ चन्द्रचिह्नलाञ्छितं॥ मारणकुण्डं राहुलक्षणं॥ कालाग्निचिह्नलाञ्छि

तं॥ उच्चाटनकुण्डं वायुलक्षणं॥ तेजःस्वभावमिश्रं स्वचिह्नाङ्कितं॥ त्रिकोणकुण्डं कालाग्निलक्षणं स्वचिह्नाङ्कितं॥ आकृष्टे कुण्डं पृथ्वीतेजोत्तरात्मकं॥ अ
ङ्कुशाचिह्नलाञ्छितं॥ षट्कोणं॥ ८ राकु पृथिव्यात्मकं॥ सर्पचिह्नाङ्कितं॥ रोहो मो हितं॥ स्तम्भनकुण्डं उभयमेरु पृथिवीमण्डलं॥ उभयचिह्नाङ्कितं
मिति॥ इति कुण्डलक्षणनियमः॥ ॥ पूर्वोक्तासने होमद्रव्यादि नियमो मन्त्रिणा वेदितव्यमिति॥ सर्वयोगयोगिनीतन्त्रादिके भगवतो नि
यमः॥ ॥

कृत्वा कुण्डस्य रक्षां दशदिशि वलये क्रोधराजैः सदेव्यैः श्रीवज्रैः प्रोक्षणाद्यं सशलिलकुसुमै रर्घमेवानलस्य॥ देयं तद्योगयुक्तैः
स्वहृदयकमले भावयित्वेन्दुमूर्द्धि रकास्यं श्विनवर्णं भगकरकमले कुण्डिकाज्ञं हि वामे॥ ७४ ॥
सव्ये दण्डाक्षसूत्रं सुकपिलजटिनं पिङ्गनेत्रं स्ववक्त्रं वक्त्रे हव्यं च चन्द्रमूर्द्धस्फुरदमलकरं भावयेद्योगयुक्तः शम्भोर्गात्रेण कृत्वं स्व
देहं करुत्तु समरसं सर्वगं ज्ञानसत्वं एवं कुण्डे च सम्यग्भवति नृपतथावाहने पावकस्य॥ ७५ ॥

इदानीं होमविधिरुच्यते॥ कृत्वेत्यादिना॥ इह कुण्डस्य प्रथमं दशदिक्षु रक्षां कृत्वा क्रोधराजैः सदेव्यैः क्रोधैर्देवीभिः सार्द्धं पूर्वोक्तमन्त्रपदैः
कीलकान्निधापयित्वा ततः श्रीवज्रैः प्रोक्षणाद्यं ॐ आः हूं हः फट् हुं अनेन कुण्डस्य दशदिक्षु कुशेनार्घपात्रात् गन्धतोयं गृहीत्वा प्रोक्षयेदिति प्रथ
मं॥ ततः योगमालम्ब्य स्वहृदये कुण्डे च वैश्वानरं प्रतिष्ठाप्य॥ ततः सशलिलकुसुमैरर्घमेवानलस्य देयं॥ तद्योगयुक्तैः स्वहृदयकमले भा

वयित्वेन तु मूर्द्ध्नि सर्वकर्मणि॥ एकास्यं श्यामवर्णं चतुर्हस्तं द्विपादं॥ अत्र सर्वकर्मणि॥ सव्ये प्रथमकरे वज्रं द्वितीये अक्षसूत्रं॥ वामे परशुप
क्षमिति॥ सुकपिलजटिलं॥ पिङ्गनेत्रं॥ पिङ्गवस्त्रं॥ सर्वकर्मणि॥ अधोऽन्यशिरोधारिणमिति॥ समयसत्वं निध्यायतः तस्य हृदये चन्द्रम
ण्डलं॥ तन्मूर्द्ध्नि स्फुरदमलकरं भावयेत्॥ जःकारबीजपरिणतं वज्राङ्कुशेनाकृष्य ज्ञानसत्वं सर्वं संकृत्य समरसं समयसत्वेन सह
॥ एवं कृत्वे च सम्यक् स्वहृदयान्निश्चार्य निःश्वासेन वक्ष्यमाणया वज्राङ्कुशाद्या ऽऽवाहनं कृत्वा वज्रमुष्ट्या ऊर्द्ध्वाङ्गुष्ठया कमलकर्णि
कायां स्थापयेदिति॥ शान्तौ शुक्लवर्णं सवस्त्रममिताभमौलिनं। दक्षिणे पद्मस्फटिकाक्षसूत्रधरं वामे कुण्डिकाशंखधरं॥ पौष्टिके सव्ये चक्र
मुक्तादलाक्षसूत्रधरं॥ वामे पद्मकमण्डलुधरं॥ मारणे कृष्णवर्णं सवस्त्रममोघसिद्धिमौलिनं॥ सव्ये कर्त्रित्रिशूलहस्तं। वामे कपाल
खट्वाङ्गहस्तं॥ उच्चाटने विद्वेषणे च दक्षिणे खड्गत्रिशूलहस्तं॥ वामे कपालखट्वाङ्गहस्तं। वश्ये कुङ्कुमवर्णं सवस्त्रं। सव्ये सररत्नहस्तं
॥ वामे चापदर्पणहस्तं॥ रत्नेशमुकुटिनं॥ आकृष्टौ सव्ये वज्राङ्कुशरत्नधरं॥ वामे वज्रपाशदर्पणाकरं॥ मोहने सव्ये सर्पदण्डधरं॥ वामे
चक्रडमरुहस्तं। स्तम्भने कीलने च सव्ये शृङ्खलमुद्गरधारिणं। वामे चक्रवज्रकीलकहस्तं॥ पीतवर्णं सवस्त्रं वैरोचनमौलिनं भाव
येदिति॥ इह प्रथमे चन्दनकाष्ठैरग्निं प्रज्वाल्य सर्वकर्मणि॥ देवगृहादानयित्वा॥ शान्तिपुष्ट्योर्ब्राह्मणगृहात्॥ मारणे डोम्बगृहात्॥
कर्षणयोः क्षत्रियगृहात्॥ स्तम्भनादौ वैश्यगृहात्॥ मारणे उनश्च चण्डालगृहादानयित्वा प्रज्वालयेत्॥ कण्टककाष्ठैरिति॥ स्तम्भने कषायका
ष्ठैः॥ वश्यपरकेः खदिरादिकाष्ठैः॥ शान्तौ क्षीरवृक्षकाष्ठैः॥ सर्वकर्मणि चन्दनागुरुदेवदार्वादि सुगन्धिकाष्ठैः॥ क्षीरवृक्षादिभिर्वेति॥ त

नो वैश्वानरमावाहयेत्॥ एभिर्मन्त्रपदैः॥ ॐ एहि एहि महाभूतदेव ऋषिद्विजसत्तम गृहीत्वापुर्षं महारश्मि अस्मिन् सन्निहितो भव वज्रध
र आज्ञापयति स्वाहेत्युच्चार्य। अङ्कुशमुद्रयाकर्षयेत्॥ वज्रमुद्रया प्रवेशयेत्॥ पाशमुद्रया बन्धयेत्॥ घण्टामुद्रया वक्ष्यमाणया तोष
येदिति॥ एवमन्येके बीजाक्षरं जः हूं वं होः इत्युच्चारयेत्॥ ततो वज्रघण्टां वादयित्वा वशं कुर्यादिति॥ अर्घं देयं॥ ॐ प्रवरसत्का
रं महारश्मीन् प्रतीच्छ स्वाहा॥ इत्यर्घदानमन्त्रः॥ ततोर्चनं एवं वज्रगन्धं प्रतीच्छ स्वाहा॥ वज्रपुष्पं प्रतीच्छ स्वाहा॥ वज्रधूपं प्रतीच्छ
स्वाहा॥ वज्रदीपं प्रतीच्छ स्वाहा॥ वज्रनैवेद्यं प्रतीच्छ स्वाहा॥ वज्रलास्यं प्रतीच्छ स्वाहा॥ वज्रहास्यं प्रतीच्छ स्वाहा॥ वज्रवाद्यं प्रतीच्छ स्वा
हा॥ वज्रनृत्यं प्रतीच्छ स्वाहा॥ वज्रगीतं प्रतीच्छ स्वाहा॥ वज्रकामं प्रतीच्छ स्वाहा॥ एवं पूर्वोक्तैर्द्रव्यैः कर्मानुसारेण एभिर्मन्त्रपदैः
अग्निपूजाविषये स्वाहान्तैरर्चनं॥ मण्डले नमोन्तैरिति सर्वत्र नियमः॥ एवं सर्वं पाद्यं प्रतिपादयित्वा ततः पूर्वोक्तसमिधादिभिः
पूर्वोक्तआसनविधिना पूर्वोक्तहोमद्रव्यैः कर्मानुसारेण समाधिस्थो वज्राचार्यः॥ होमं कारयेत्॥ समिधं दग्धाहस्तेन॥ ततः
श्रुवकेन सर्वहोमद्रव्याणि आहुतीपात्रादापयेत्॥ तदभावे सर्वं स्वकरेण वरदेनाष्ठेनाग्निमुखे होमं कुर्यादिति नियमः॥ ॥अत्र वैश्वा
नरविशुद्धिरुच्यते॥ इह वैश्वानरस्त्रिविधः॥ दक्षिणाग्निः॥ गार्हपत्यः॥ आवनीय इति॥ दक्षिणाग्निरत्र विष्णुः॥ गार्हपत्यः सूर्यः॥ आ
वहनीयः क्रव्यादः॥ सन्यस्त्वतुर्थो ज्ञानाग्निनानन्दधर्मा॥ अनन्तस्यार्थः सर्वस्व होमः क्रियते॥ तथा वेदान्ते चाह॥ क्रव्यादमग्निं प्रहिणो
मि दूरं। यमराज्यं गच्छतु रूकप्रवाहः॥ इहैवायमितरो जातवेदाः॥ देवेभ्यो हव्यं प्रवहति प्रजादित्य इति वेदार्थः॥ अत्रापि सस्वार्थः॥

क्रव्यादाग्नेः॥ अनेन मन्त्रपदेन॥ ॐ सर्वपापदहनवज्राग्निवज्रसत्त्वसर्वपापं दह दह स्वाहेति नियमात् कामाग्नेरावाहनं॥ तथा सूर्यस्थापीह हव्यवाहनमन्त्रसमयो॥ ॐ वज्रानल सर्वभूतान् ज्वालय सर्वान् भस्मीकुरु सर्वजनदुष्टान् हूं फट् स्वाहेति नियमात् सूर्यः सप्तवसप्तवाराधिपतिः॥ सप्ततुरगरथः सप्तजिह्वावारभेदेन॥ शान्तौ शोमजिह्वः॥ पुष्टौ सूर्यजिह्वः॥ मारणे उच्चाटने विद्वेषणे च शनिजिह्वः॥ वश्ये शुक्रजिह्वः॥ आकृष्टौ बृहस्पतिजिह्वः॥ मोहने बुधजिह्वः॥ स्तम्भने मंगलजिह्वः॥ एवं प्रत्येकवार विशुध्या प्रत्येकेककर्मणि॥ एकमुखः॥ अहर्निशाविशुध्या द्विचरणः॥ चतुःसंध्या विशुध्या चतुर्भुज इति नियमः॥ शान्तिकादौ कर्मणि मारणे केतु विशुध्या द्विभुजः॥ कर्त्तिकाकपालहस्तः॥ विद्वेषे च शनिविशुध्या खड्गकपालहस्त इति पक्षान्तर नियमः॥ शनिवारे पूर्वार्द्धापरार्द्धभेदेनेति॥ सर्वकर्मणि राहुविशुध्या कालाग्निविशुध्या उत्पादप्रलयधर्मत्वात्॥ कामाग्निराहवनीमध्यदेवतासर्वशरीरव्यापकत्वात्॥ जाताग्निरिति पूजनीयो वज्राचार्येणा पूर्वविधिनेति वैश्वानरावाहननियमः॥ ॥

अङ्गुष्ठेन प्रकुर्याद् अपि वरदकरे होममग्नेर्मुखे च वज्रे वज्रेश्वभर्तुः शरणसन्निधानं श्यपदुर्वाद्यदुग्धैः॥ पर्यङ्कस्थः प्रशान्तस्त्वचपलहृदयो मन्त्रविन्मन्त्रमूर्त्तिराचार्यः कर्मवज्री पुनरपि शिखिने चाहुतिं स्वं ददाति॥ ७६॥

हवनीहोमपूजादिकमुच्यते॥ अङ्गुष्ठेत्यादिना॥ इह यदा स्रुवकाभावः॥ तदा वज्राचार्यः पूर्वोक्तासनस्थो वामकरजानर्कहत्वा दक्षिणावरदकरेणाङ्गुष्ठकेन होमद्रव्यं चालयित्वा वैश्वानरस्य स्फारितमुखस्य मुखे होमयेत्॥ स च भक्ष्यमाणश्चिन्तनीय इति॥ वज्रे रि

ं एवमायतनेश्च अ आ। इ ई ऋ। ॠ ओ औ अल् आल् अं अः स्वाहा॥ इति द्वादशायतनैरष्टोत्तरशतं॥ २ ॥

ति॥ ॐ आः हूं हो हं क्षः स्वाहा॥ एभिः पञ्चशतसमिधान् नैतानष्टोत्तरशतं जुहुयात्॥ ततो ॐ हिरिति॥ ॐ हुं हूं ह्रीं ह्रां स्वाहा॥ इति॥ अओ रष्टोत्त
रशतं॥ वाकारात् पञ्चस्कन्धैर्धातुभिः॥ अ आ इ ई ऋ ॠ उ ऊ ऌ ॡ अं अः स्वाहा॥ एभिरष्टोत्तरशतं॥ ततः कर्मेन्द्रियैः सविषयैश्च हतु
यपाररावबालल्ला हं हः स्वाहा॥ एभिरष्टोत्तरशतं॥ एवं चत्वारिंशदधिकपञ्चशतैः पञ्चशतसंख्याग्रहणेन॥ प्रत्येकमष्टोत्तरशतं सञ्जपनी
यं॥ षट्त्रिंशल्लक्षणेन॥ अशास्ततु अनन्तः॥ तदष्टोत्तरशते॥ तेभ्यः कायवाक्चित्तज्ञानस्कन्धानि वर्जयित्वा॥ शेषाण्यष्टोत्तरशतानि अक्षसूत्रमालायां
मेरौ वज्रचतुष्टयं॥ तेन सर्वत्राष्टोत्तरशतं मानं होमे सर्वकर्मणि उपसंहारार्थं ततः शस्यादिकं होमद्रव्यमपि ऽनेनैव विधिना सस्य दू
र्वाङ्कुरं। एभिरष्टोत्तरशतभेदेन वज्रादिभिर्होमः कार्यः। समिधः शस्यानि च घृतेनाक्तानि। दूर्वाङ्कुरा कालेनस्यात् ततः पूर्णाहुतिर्हृदय
मन्त्रेण घृतेन पात्रीं पूरयित्वा पर्यङ्कस्थः प्रशान्तस्वचपलहृदयो मन्त्री विन्यस्तमूर्तिराचार्यकर्म वज्री च पुनरपि शिष्येनैव ददाति ॐ २०९
हूं इत्यनेन मन्त्रेण पूर्णाहुतिं दत्वा ततो भक्तं तोयं गृहीत्वा स्वस्त्ययनं करोति॥ ॐ भूर्भुवः स्वाहा॥ नमो देवेभ्यः॥ स्वस्ति प्रजाभ्यः॥ स्वाहा राजभ्यः
स्वधा पितृभ्यः॥ अलं भूतेभ्यः॥ वषट् इन्द्राय तिजर्वेन्जरुं वायो विनिर्गतं नाय भक्तं वायौ प्रक्षिप्य॥ तत्राचमनं कृत्वा उनमण्डलगृ
ह प्रविश्य पावकस्यापि कृशतो येनाचमनं जयात् ॐ आः हूं कायवाक्चित्तस्वभाव शुद्ध स्वाहा॥ अनेन मन्त्रेण अग्निकुण्ड प्रज्वालनकाले॥
तमुखवातकर्त्तव्यं॥ अग्निसंदीपनार्थं व्यजनवातादिना कुर्यादिति॥ ॥
होमं कृत्वा क्रमेणाचमनमपि तथा पावकस्यात्मनश्च दत्वा गन्धादिधूपैः सहृदयकमले ज्ञानवह्निं विसर्ज्य॥ पश्चाच्छिष्य

स्यसेकं सकलतृष्णानिधिः श्रीतत्त्वैर्ददाति आभोपञ्चामृतेनैव जिनवरकुलिशाधिष्ठितेनशुद्धिहेतोः ॥ ७७ ॥
एवं होमं कृत्वा क्रमेण शोचमनमपि तथा पावकस्यात्मनश्च। देवतागणमादिधर्म पूर्वोक्तक्रमेण उभतः स्वहृदयकमले उच्छ्वासेन ज्ञानवह्निं विसर्जयेत्॥
ॐ जः गच्छ २ महारश्मि स्वस्थानं स्वं स्वं ब्रीहि पुनरागमिष्यसि देवास्यप्रदाह्वयामि स्वाहा इति॥ विसर्ज्यैतान वह्निं पश्चाच्छिष्यस्य सेकं ददाति पु
न् वक्ष्यमाणक्रमेण सकलतृष्णानिधिः सेकार्थं प्रथमं पंचामृतं जिनवरकुलिशाधिष्ठितमिति॥ ॐ आः हूं हो हं क्षः इति पञ्चामृतं सप्ताभिमन्त्रि
तं कृत्वा उत्काशुक्तिकायां स्थापयेत्॥ शंखशुक्तिकायां वा सर्वपञ्चप्रदीपशुद्धिका॥ तत्रैव शुक्तिकायां शुद्धिहेतोरिति॥ प्राक्साधनीयं॥ सप्ता
भिषेकार्थमिति॥ होमविधिः सर्वतन्त्रेषु भगवतोनियमः॥ ॥
सिद्धे होमे सुमन्त्रै रजसि च पतिते सत्त्वचित्तप्रदत्ते कोणे संस्थापनीयाः ४ स्फटिकसितपयोवेष्टिः पञ्चसूत्रैः ॥ आवा
र्यः पूर्ववक्त्रैः कुलिशकमलजैर्लूनितैः क्रोधराजैः आकृष्टा ज्ञानचक्रं रजसि समरसं सेकहेतोः करोति॥ ७८ ॥
इदानीं मण्डलप्रतिष्ठायै समाधिरुच्यते॥ सिद्धे इत्यादिना॥ इह होमे सिद्धे सति स्वमन्त्रैरिति॥ क्रियायोगयोगात्तु विश्वयोगिनीतन्त्रेषु अनेके
षु उक्ताः स्वमन्त्रा कामन्त्राः तैः स्वमन्त्रैः स्वतन्त्रोक्तविधिना होमे सिद्धे सति॥ प्रथमं होमे॥ तत्र स्वमण्डले रजसी पतिते सति गर्भचक्रे देवतागणास्य दत्ते
सति स्वस्वतन्त्रोक्तविधिना कोणे संस्थापनीयाः स्फटिकसितपयोवेष्टिताः पञ्चसूत्रैः शान्तैः। शोभं पूर्वोक्तविधिना वेष्टिताः पञ्चसूत्रैः॥ करोतव

स्थवद्धाः। पूर्वभूम्यां मण्डलबाह्ये विजयकलशं पञ्चकलशकार्येषु॥ तदुपरि स्थाप्यो विजयशंखः॥ दशकलशकार्येषूत्तरस्यां दिक्षु अष्टघटजयो
विजयः पूर्वापरकलशबाह्ये अङ्गुलद्वयेनास्पृष्टः॥ तत्र पूर्वविजयकलशोपरि महाविजयकलशः॥ एकादशमः शंखं इति कलशनियमः॥
एवं शतसहस्रकलशेऽपि महाविजयशंखः॥ शान्तौ पुष्टौ सर्वकर्मणि च क्रूरकर्मणि कपाले। वरुणदेवताग्रे। सुवर्णशक्तिः। स्तम्भने सर्वं॥
मोहनाद्येऽपि। तत्र स्थापयित्वा कर्मानुरूपेण सूत्रैर्वेष्टयित्वा वस्त्रैः कण्ठान् कृत्वा॥ आचार्येणाम्रपल्लवमुखाः॥ स्थापनीयाः॥ तत्र आचार्यः
पूर्ववत्कृत्स्थितः॥ वक्ष्यमाणसाधनविधिना पापदेशनादिकं कृत्वा मण्डलराजाग्री कर्मराजाग्री बिन्दुयोगं सूक्ष्मयोगं कृत्वा ततः प्रज्ञोपायो
द्भूतैः कुलिशकमलजैः। उद्भूतैः क्रोधरजैरिति साधनोपायिकाविधिना जः हूं वं होः॥ एभिर्मन्त्रपदैः॥ जःकारेणाकृष्य हूंकारेण प्रवेश
येत्॥ वंकारेण बन्धयेत्॥ होःकारेण तोषयित्वा ज्ञानचक्रं रजोमण्डले समयमण्डलं ध्यात्वा तत्र समरसं करोति सेकहेतोः॥ ततः प्रतिष्ठापयि
त्वा पूर्वोक्तविधिनार्घं दत्वा ॐ आः हूं होः वे वान्तुकेश्वर कालचक्र अर्घं प्रतीच्छ सपरिवारस्त्वं भगवन् मे वरदो भव शिष्याणाञ्च इत्यर्घेष्या
र्घं मण्डलरजो बाह्ये मण्डलं कृत्वा स्थापयेत्॥ ततोऽपरमण्डलविजयकलशाग्रतः कृत्वा हस्ते॥ ततः पूर्वोक्तगन्धादिकं पात्रे प्रस्थापयेत्
एवं सर्वदिक्षु विदिक्षु प्रत्येकं देवतानामपि नैवेद्यादिकं देयं सर्वदिक्षु रजोमण्डलबाह्ये रजोभूम्यां पूर्व्यादिकं न दातव्यं॥ दत्ते रजो विलोपो
भवति॥ प्रतिष्ठापितमण्डलरजो विलोपात् स्तूपभेद इति॥ तेन मण्डलबाह्ये पूर्वद्वारे विजयकलशोपरि पुष्पक्षेपः कर्तव्यः। जलपरीक्षार्थं
अन्यथा सहस्रहस्तमण्डले जलः पुष्पं पतिष्यति॥ शिष्येण क्षिप्तं पूर्ववज्रार्चिषं तत्कावज्रज्वालापितवसपादहस्तशान्तं भवति॥ कथं तालं पवि

त्वोदेवताधिष्ठानं विनाजलादिषु पुष्पं पतिष्यति॥ तस्माद्विजयकलशे होमपश्चाद्विहानिकृत्वा तत्र प्रथमो यो वक्ष्यमाणः कर्त्तव्यः॥ तेन गन्धादिकं मण्डलवा लिमरजो भूम्यां॥ रजोमण्डले भगवतः कार्यो वेदितव्य इति नियमः॥

सर्वेषां नामपूर्वं प्रणव इति भवेद्देवतादेवतीनां होमे स्वाहान्तमन्त्रो हृदयमपि तथैवार्चने वै नमोन्तः॥ जः हूं वं हो ऽहोङ्कुशाद्याः क्रमपरिरचिता वाहने च प्रवेशे बन्धे तोषेऽर्घदाने भवति उत्तरिदं शृह्न यहार्घकर्मे॥ ७९ ॥

इदानीं मन्त्रनियममाह॥ सर्वेषामित्यादिना॥ इह सर्वेषां मण्डलनायकानुनायिकानां॥ नाममन्त्रस्य पूर्वं प्रणवं भवति॥ ॐकार इत्यर्थः॥ अमुकमन्त्राणामपि॥ सर्वत्र प्रणवं प्रथममिति विज्ञेयं॥ होमे स्वाहान्तमन्त्रः॥ सर्वेषां नाममन्त्रो हृदयमुच्यते॥ स एव होमकार्ये स्वाहान्तो भवति॥ सर्वकर्मणि अर्चने नमोन्तो भवति स एवेति नियमः॥ जः हूं वं होऽङ्कुशाद्या इति॥ इह देवताऽवाहने जःकारेण अङ्कुर्यात्॥ प्रवेशे हूंकारेण वज्रबन्धने वंकारेण पाशं॥ तोषणे होःकारेण वज्रपरणमिति॥ यथाक्रमरचिता वज्राङ्कुशाद्याः॥ ततोऽर्घदाने भवति नाममन्त्रावसाने॥ अमुके दंश हृ इ अर्घकर्मे उत्तरिति नियमः॥ ॥

पुष्टौ स्वाहान्तमन्त्रो भवति नरपते शान्तिके सो नमोऽन्त आकृष्टौ वौडन्तो भवति च वषडन्तश्च वश्ये तथैव॥ हूंकारान्ताभिचारे प्रकृतिगणवशात्कीलनाये फडन्तः श्वेतारक्तश्च कृष्णो वरकनकनिभः कर्मभेदेश्च मन्त्रः॥ ८० ॥

इदानीं पुष्ट्यादिकर्मभेदेन मन्त्रविधिरुच्यते॥ पुष्ट्यावित्यादिना॥ इह सर्वत्र मन्त्रजापे होमे वा पुष्टौ॥ ओंकारादि स्वाहान्तो मन्त्रो भवति॥ मरणे तु
ति संबोधनं॥ शान्तिकेऽसौ मन्त्रो नमोन्तः॥ स एवाकृष्टौ वौषडन्तो भवति च॥ स एव वषडन्तो वश्ये पतथे वा॥ हुंकारान्तोऽभिचारे विद्वेषोच्चाटने मारणे च
॥ प्रकृतिगुणवशात्॥ कीलनस्तम्भने मोहने फट्कारान्तो भवति॥ अथ प्रकृतिः पुष्टौ साई पृथ्वीप्रकृतिस्तेन स्वाहा॥ शान्तौ तोयः प्रकृतिः नमः॥ आकृष्टौ अग्नि
पृथ्वीप्रकृतिर्वौषट्॥ वश्येऽग्निप्रकृतिर्वषट्॥ मारणोच्चाटने विद्वेषे वायु अग्निप्रकृतिः हुंकारः॥ कीलनस्तम्भने मोहे पृथ्वीप्रकृतिः फट्कारः॥ मो
हनेऽपि वायुपृथ्वीप्रकृतिरिति॥ अथवा सर्वत्र मारणादिषु मोहनादिषु त्रिषु कर्मसु हुंफट्कारान्तो मन्त्रजापो होमेऽपि॥ अर्चनादिकर्मापि कर्तव्यं
मन्त्रिणेति नियमः॥ देवतावर्णाः शान्तौ पुष्टौ श्वेतः॥ वश्ये पीतरक्तः॥ मारणादौ कृष्णः॥ मोहनादौ पीतः॥ इति कर्मभेदेष्व मन्त्रा भवतीति नियमः
॥ ॥

पूर्वे श्री चित्तवज्रं कषणघननिभं चोत्तरे कायवज्रं वाग्वज्रं दक्षिणे च स्फुरदधिगगनं पश्चिमे ज्ञानवज्रं॥ श्वेतं रक्तं च
पीतं भवति कुलवशाद्व्यापकं भूमिभागे वाय्वग्न्यम्बुक्षितीनां इऋउऌन्न पते योनयो देवतानां॥ ८१ ॥

इदानीं मण्डलभूमिविशुद्धिबीजान्युच्यन्ते॥ इह पूर्वे चित्तवज्रे व्यापकं भूमिभागे कृष्णवर्णं वायुविशुद्ध्या॥ उत्तरे कायवज्रे उदकशुद्ध्या श्वेतं॥ वाग्वज्रं
दक्षिणे अग्निशुद्ध्या रक्तं स्वकुलपृथ्वी दिशि गतं पश्चिमे ज्ञानवज्रे पीतं॥ एवं राहुचन्द्रसूर्यकालाग्निशुद्ध्या चतुर्वर्णभेदेन भूमिभागः॥ अतो यथा
संख्यं वायोर्योनिः॥ इ अग्नेर्योनिः॥ ऋ उदकस्य योनिः॥ उ क्षितेर्योनिः लृ॥ एवं योनयो वाय्वादीनां देवतानां॥ इकारादि स्वस्वबीजानि संस्कारे वेदना

संज्ञारूपस्वभावानि॥ अकारोऽनुत्तरो दीप। आकाशयोनिः॥ विज्ञानस्कन्धलक्षणा इति सर्वत्र नियमः॥ अइउण्ऋऌक् इति प्रत्याहारपाठात्॥ सृष्टिक्र-
मेण उत्पत्तिक्रमे रेति नियमः॥ ॥

ॐ आः हूँ च त्रिमुद्राः स्वहृदयदसहितादीर्घभेदाच्च पञ्च हूँ आः ॐ होः सर्वक्षोरपपरमपि तथा नाहं मे पञ्चमे स्यात्॥ सा-
र्द्धं हूँकारस्य ह्रं भवति रसपदैः श्रीषडङ्गेन मायैः फेंकारो विश्वमातुर्भवति दशविधः कूटमन्त्रो जिनस्य॥ ८२ ॥

इदानीं मुद्राबीजान्युच्यन्ते॥ मुद्रार्थं॥ उद्रार्थं॥ इह कायमुद्रा ललाटे ॐकारः शुक्लः। कण्ठे आःकारो वाग्मुद्रा रक्तः॥ हृदये हूँकारः कृष्णः चित्त-
मुद्रा इति॥ मुद्रा उपायस्य॥ प्रज्ञाया नाभौ स्वा। तथैव हो। आभ्यां सह पञ्च। यतः त्रिदशाशापदे पञ्च वर्णस्वरे लोके कायाः सर्वे काले इति। वचनाद्धार-
विकारत्रयमुक्तं दीर्घभेदादिति॥ एवं चोक्तं विधानमूले हूस्वः॥ ॐ कायवज्रं। आः वाग्वज्रं। हूँ चित्तवज्रं। होः ज्ञानवज्रमिति॥ अपरमपि तथाह तं
पञ्चमं मैत्रेयनाथवक्त्रे मुद्रितः॥ नैवं पञ्चाक्षरं मन्त्रराजस्यमिति नियमः॥ तथा साध्यमिति आयैः षड्स्वरैः॥ सार्द्धं हूँकारषड्क्तं भवति॥ रसपदैः षड्भिः सा-
र्द्धं षडङ्गं नमआयैरिति॥ ॐ ह्रूं नमः॥ ॐ ह्रूं स्वाहा॥ ॐ हूँ वौषट्॥ ॐ ह्रीं हूँ भैं हुं वषट्॥ ॐ हूँः फट्॥ इति यथासंख्यं हृदये शिरः शिखा कवचे ने-
त्रेऽस्त्रमिति॥ पृथिव्यप्तेजोवाय्वाकाशस्वभावान् स्वरसहितो हूँकारमन्त्र एव षडङ्गः॥ तथा फेंकारो विश्वमातुर्बीजमन्त्रो जिनस्य कालचक्रस्य ममतास्य
कृष्णा इति॥ ॥ हूंकारो ज्ञानबीजं हृदयमपि महाकूटमन्त्राः सर्वकाहाँ कालायां षडङ्गं स्युः हृदयमिदं कायवज्रादि युक्तं॥ मा सा

मन्त्रस्तथान्यो भवति वहुविधः कर्मभेदैरनेकै र्ज्ञातव्यो मण्डलेऽस्मिन् प्रकृतिगुणवशाद्देवतादेवतीनां ॥ ८३ ॥

तस्यैव भगवतः पृथगुत्पादाय हूँकारो ज्ञानवीजं प्रक्षेपाय पृथगुत्पादाय हृदयमपि तथा कूटमन्त्रो जिनस्य पूर्वोक्तः ॥ ॐ आः हूँ हो इति चतुर्बीजसहितः । हूँकारोपं यडक्षतपदं हृदयं भगवतः ॥ ॐकारस्मादिभूतेन शुक्लं जापार्थी ॥ ॐ फ्रं क्रीं हैं हूँ ह्रूँ हः इति षड्क्षरेण सर्वकर्मसाधनो । क्रूरे संहारकर्मणि जाप इति ॥ मालामन्त्रः ॥ तथाऽन्यो भवति देवतादेवतीनां स च वहुविधोऽनेकपदिको भवति ॥ कर्मभेदैरनेकै र्ज्ञातव्यो मण्डलेऽस्मिन् कालचक्रे पृथिव्यादिप्रकृतिः ॥ तद्गुणवशादिति वक्ष्यमाणे वक्तव्यं ॥ एवं सर्वतन्त्रान्तरेऽपि नियमः ॥ ॥

रत्नैर्हेमेन्दुपुष्पै र्वहुविविधपटैर्गन्धधूपप्रदीपै र्घंटादर्शै र्वितानै र्विविधफलपताकादिभि र्नृत्यवाद्यैः ॥ कृत्वा पूजां विचित्रामपरदशविधां चात्मशक्त्या यथोक्तं आचार्यस्यांघ्रिमूले ददति वरसुतो दक्षिणां शुद्धिहेतोः ॥ ८४ ॥ २१०

इदानीं देवतार्चनमुच्यते ॥ रत्नैरित्यादिना ॥ इह पूर्वोक्तविधिना देवतालम्बनं कृत्वा ततो ज्ञानचक्रं समयचक्रेण सह एकीकृत्वा अर्घादिकं दत्वा पूर्वमन्त्रपदैः ॥ ततोऽर्चनार्थं प्रथमं गन्धं चन्दनादिकं गृहीत्वा अङ्गुष्ठानामिकाभ्यां चालिकतमण्डलेनाम्पकादीनर्चयेत् ॥ सर्वेषां नाम पूर्वं प्रणवं देयं ॥ अर्चने सर्वकर्मणि नमोन्तेनान्यो भवति ॥ अन्यकर्मणि पुष्पादौ स्वाहान्तो वेदितव्य इति ॥ इह सर्वकर्मणि अर्चने नाम देवतानां मन्त्रपदानि ॥ तद्यथा मूलतन्त्रे ॥ ॐ वुद्धाय नमः ॥ ॐ धर्माय नमः ॥ ॐ संघाय नमः ॥ ॐ वज्रसत्वाय नमः ॥ ॐ प्रज्ञापारमितायै नमः ॥ ॐ स्वाभाविककायाय नमः ॥ ॐ धर्मकायाय नमः ॥ ॐ सम्भोगकायाय नमः ॥ ॐ निर्माणकायाय नमः ॥ ॐ

लि २

ज्ञानवज्रायनमः॥ ॐ चित्तवज्रायनमः॥ ॐ वाग्वज्रायनमः॥ ॐ कायवज्रायनमः॥ ॐ चतुर्विमोक्षेभ्योनमः॥ ॐ चतुर्ब्रह्मविहारेभ्योनमः॥ ॐ सप्तत्रिंशबोधि
पाक्षिकधर्मेभ्योनमः॥ ॐ चतुरशीतिसहस्रधर्मस्कन्धेभ्योनमः॥ ॐ सर्वधर्मदेशकेभ्योनमः॥ ॐ रत्नत्रयायनमः॥ ॐ शाक्यमुनयेनमः॥ ॐ कालचक्रा
यनमः॥ ॐ दानपारमितायैनमः॥ ॐ शीलपारमितायैनमः॥ ॐ क्षान्तिपारमितायैनमः॥ ॐ वीर्यपारमितायैनमः॥ ॐ ध्यानपारमितायैन
मः॥ ॐ प्रज्ञापारमितायैनमः॥ ॐ उपायपारमितायैनमः॥ ॐ प्रणिधिपारमितायैनमः॥ ॐ बलपारमितायैनमः॥ ॐ ज्ञानपारमिता
यैनमः॥ ॐ जयघटेभ्योनमः॥ ॐ विजयघटेभ्योनमः॥ ॐ सर्वचिह्नेभ्योनमः॥ ॐ सर्वमुद्राभ्योनमः॥ ॐ चिन्तामणयेनमः॥ ॐ ध
र्मगण्ड्यैनमः॥ ॐ धर्मशंखायनमः॥ ॐ कल्पवृक्षायनमः॥ ॐ अक्षोभ्यायनमः॥ ॐ अमोघसिद्धयेनमः॥ ॐ रत्नसंभवायनमः॥ ॐ
अमिताभायनमः॥ ॐ वैरोचनायनमः॥ ॐ लोचनायैनमः॥ ॐ मामक्यैनमः॥ ॐ पाण्डरायैनमः॥ ॐ तारायैनमः॥ ॐ वज्रधात्वीश्वर्यै
नमः॥ ॐ वज्रपाणयेनमः॥ ॐ खगर्भायनमः॥ ॐ क्षितिगर्भायनमः॥ ॐ लोकेश्वरायनमः॥ ॐ सर्वनिवरणविष्कंभिनेनमः॥ ॐ स
मन्तभद्रायनमः॥ ॐ गन्धवज्रायैनमः॥ ॐ रूपवज्रायैनमः॥ ॐ रसवज्रायैनमः॥ ॐ स्पर्शवज्रायैनमः॥ ॐ शब्दवज्रायैनमः॥ ॐ
धर्मधातुवज्रायैनमः॥ ॐ उष्णीषायनमः॥ ॐ विघ्नान्तकायनमः॥ ॐ प्रज्ञान्तकायनमः॥ ॐ पद्मान्तकायनमः॥ ॐ यमान्तकायनमः॥
ॐ स्तम्भन्यैनमः॥ ॐ मानिन्यैनमः॥ ॐ क्षोभन्यैनमः॥ ॐ अतिवीर्यायैनमः॥ ॐ अतिनीलायैनमः॥ ॐ सर्वधारणीभ्योनमः॥ ॐ स
र्वज्ञायनमः॥ इति चित्तमण्डले अर्चनविधिः॥ अतो वाग्मण्डले॥ तद्यथा॥ ॐ वज्रचर्चिकायैनमः॥ ॐ वज्रवाराह्यैनमः॥ ॐ वज्रमाहेश्व

यै नमः॥ ॐ वज्रऐन्द्र्यै नमः॥ ॐ वज्रब्रह्माण्यै नमः॥ ॐ वज्रमहालक्ष्म्यै नमः॥ ॐ वज्रकौमार्यै नमः॥ ॐ वज्रवैष्णव्यै नमः॥ ॐ अष्टाष्टकेन च-
तुःषष्टिवज्रयोगिनीभ्यो नमः॥ ॐ षट्त्रिंशद्दिक्षाभ्यो नमः॥ इति वाग्मण्डलेऽर्चनविधिः॥ ततः कायमण्डले॥ तद्यथा॥ ॐ वज्रविष्णवे नमः॥
ॐ वज्रनैऋत्याय नमः॥ ॐ वज्राग्नये नमः॥ ॐ वज्रोदधये नमः॥ ॐ वज्रेन्द्राय नमः॥ ॐ वज्रेश्वराय नमः॥ ॐ वज्रब्रह्मणे नमः॥ ॐ वज्रविनाय-
काय नमः॥ ॐ वज्रकार्त्तिकेयाय नमः॥ ॐ वज्रवायवे नमः॥ ॐ वज्रयमाय नमः॥ ॐ वज्रयक्षेभ्यो नमः॥ ॐ वारुण्यै नमः॥ ॐ वायव्यै नमः॥ ॐ
यामिन्यै नमः॥ ॐ यक्षिण्यै नमः॥ ॐ महाबलाय नमः॥ ॐ अबलाय नमः॥ ॐ टक्किराजाय नमः॥ ॐ नीलदण्डाय नमः॥ ॐ सुम्भराजाय नमः॥
ॐ रौद्राक्ष्यै नमः॥ ॐ वज्रशृङ्खलायै नमः॥ ॐ चुन्दायै नमः॥ ॐ भृकुट्यै नमः॥ ॐ मारीच्यै नमः॥ ॐ प्रत्येकमासभेदेन षष्ट्युत्तरत्रिशतवज्र-
तिथिदेवीभ्यो नमः॥ ॐ षड्विंशतप्रतीक्षाभ्यो नमः॥ ॐ वज्रजयाय नमः॥ ॐ वज्रकर्कोटाय नमः॥ ॐ वज्रवासुकये नमः॥ ॐ वज्रानन्ताय नमः॥
ॐ वज्रतक्षकाय नमः॥ ॐ वज्रमहापद्माय नमः॥ ॐ वज्रकुलिकाय नमः॥ ॐ वज्रशंखपालाय नमः॥ ॐ वज्रपद्माय नमः॥ ॐ वज्रविजया-
य नमः॥ इति कायमण्डले॥ ततः श्मशानेषु॥ तद्यथा॥ ॐ श्वानास्ये नमः॥ ॐ शूकरास्ये नमः॥ ॐ व्याघ्रास्ये नमः॥ ॐ जम्बुकास्यायै नमः॥ ॐ गरुडास्या-
यै नमः॥ ॐ उलूकास्यायै नमः॥ ॐ गृध्रास्यायै नमः॥ ॐ काकास्यायै नमः॥ ॐ सर्वभूतेभ्यो नमः॥ इत्यष्टश्मशानेषु॥ ततो बाह्यलोकदेवतानां॥ ॐ
वज्रचन्द्राय नमः॥ ॐ वज्रसूर्याय नमः॥ ॐ वज्रसुकृराय नमः॥ ॐ वज्रबुधाय नमः॥ ॐ वज्रबृहस्पतये नमः॥ ॐ वज्रशुक्राय नमः॥ ॐ व-
ज्रशनैश्चराय नमः॥ ॐ वज्रकेतवे नमः॥ ॐ वज्रराहवे नमः॥ ॐ वज्रकालाग्नये नमः॥ ॐ वज्रध्रुवे नमः॥ ॐ वज्रअगस्त्याय नमः॥ ॐ सर्वनक्षत्रे-

भ्यो नमः॥ॐ द्वादशराशिभ्यो नमः॥ॐ षोडशकलाभ्यो नमः॥ॐ दशदिग्लोकपालेभ्यो नमः॥ॐ वज्रनन्दिकेश्वराय नमः॥ॐ वज्रमहाकालाय नमः
ॐ वज्रघण्टाकराय नमः॥ॐ वज्रभृङ्गिने नमः॥ॐ सर्वक्षेत्रपालेभ्यो नमः॥ॐ सर्वदूतीभ्यो नमः॥ॐ हारित्यै नमः॥ॐ सर्वसिद्धिभ्यो नमः॥ॐ ध
र्मचक्राय नमः॥ॐ भद्रघटाय नमः॥ॐ वज्रदुन्दुभ्यै नमः॥ॐ बोधिवृक्षाय नमः॥ॐ तरुस्कन्धबोधिसत्त्वेभ्यो नमः॥ इत्यर्चनविधिः॥ततो रत्नैरिन्द्रनी
लादिभिः॥हिमवुष्ट्यैर्वैडुविधपटैः पञ्चवर्णैर्वस्त्रैर्गन्धधूपप्रदीपैः॥पश्चाद्दूर्वावितानैर्विविधफलैः पञ्चवर्णपताकाभिः नृत्यैर्वाद्यैः पूजां विचित्रां कृत्वा
पिदशविधामिति वक्ष्यमाणेन कृत्वा॥ स्वयं शिष्य आत्मशान्त्यर्थं कनकं गृहीत्वा॥ तत आचार्यस्याग्रप्रमण्डलं कृत्वा ददाति वरसुतेन दक्षिणां शु
द्धिहेतोः॥ ॥

द्रव्यात्मानं विशुध्यास्वसुतदुहितरं कन्यकां गोत्रजान्यां अर्घ्येवाहं जिनानां शरणमधिगतो रौद्रसंसारभीतः॥ युष्म
त्पादाब्जयोर्वै भवभयहरयोः कायवाक्चित्तशुध्या इत्यर्घ्येष्या तरुः स्यात् सकनककुसुमैर्मण्डलं कारयित्वा॥ ८५ ॥

द्रव्यमात्मानं त्रिशुध्या कायवाक्चित्तशुध्यास्वसुतदुहितरं दत्त्वा कन्यकां॥ गोत्रजामन्यां यदि स्वकीया नास्ति॥ एवं दक्षिणां दत्त्वा ततोऽर्घ्यप्रणां
करोति प्रणिधानं च॥ अर्घ्येवाहं जिनानां शरणमधिगतो बोधिसत्त्वः॥ युष्मत्पादाब्जयोर्वै भवभयहरयोः कायवाक्चित्तशुध्या इति अर्घ्येष्या तरुः स्यात्
सकनककुसुमैर्मण्डलं कारयित्वा ततः प्रणिधानं करोति॥ ॥

वज्रं घण्टाञ्च मुद्रांतहमपि शिरसा धारयामीष्ट वज्रे दानं दास्यामि रत्ने जिनवरसमये पालयाम्यत्र चक्रे ॥ पूजां ख
ड्गे करोमि स्फुटजलजकुले संवरं पालयामि सत्त्वानां मोक्षहेतोर्जिनजनककुले बोधिमुत्पादयामि ॥ ८६ ॥

वज्रं घण्टाश्च मुद्रांतहरपि शिरसा धारयामीष्ट वज्रे ॥ वज्रकुले स्थितः ॥ इमं समयं गृह्णामि ॥ दानं दास्यामि रत्नकुले स्थितः ॥ सुरणसंभाररत्नाश्च
दशविधं दानं दास्यामि लोहरत्नानि गोवाजिगजकन्यावस्त्रधाइत्याभार्यास्वामी स्यामि दानं दशविधं मतमिति चिन्तामणिंसाधयित्वा दानं दास्या
मीति प्रणिधानं ॥ जिनवरसमये पालयाम्यत्र चक्रे ॥ चक्रकुले स्थितः पञ्चामृतायं गोकुदहने रक्षेन्द्रियसमूहं रक्षामीति प्रणिधानं ॥ पूजां खड्गे करोमी खड्गे स्थि
तः सन्तरुतुष्ठ बोधिसत्त्वानां ॥ अन्येषामपि पूजां सर्वोपकरैः करोमीति प्रणिधानं स्फुटजलजकुले पद्मकुले स्थितः ॥ वर्णावर्णाभिगमने स्फुटं पद्मसं
पर्के संवरं ब्रह्मचर्यं पालयामि ॥ शीलसंभारेणेति प्रणिधानं करोमि ॥ सत्त्वानां मोक्षहेतोर्जिनजनककुले । एकभूक वज्रे स्थितः सन्तु बोधिमुत्पादयामि भू
स्यनाकरुणात्मिको महत्तुष्ठाप्सिद्धिमिति प्रणिधानं करोमि ॥ ॥

स्नात्नो गन्धानुलिप्तो व्रतनियमयुतः पूर्वभूम्यान्निवेश्य सिध्यर्थं दत्तकाष्ठं जिनवरकुलिशेनाभिमन्त्र्य प्रदेयं ॥ जिह्वा
यां चामृतं वै जिनवरसमये धूपमावेशनार्थे मन्त्रं हूंकारमेकं त्वरलपिसहितं चोदनं कोधभर्तुः ॥ ८७ ॥

इति प्रणिधानं कृते सति अभिषेकाय प्रार्थितो गुरुः हृष्टतुष्टसन्निदिष्टं स्नातं गन्धानुलिप्तं व्रतनियमयुतं पूर्वभूम्यां मण्डलबाह्ये निवेश्य सिध्यर्थं दन्त

काष्ठं पूर्वोक्तविधिना जिनवरकलशेरिति॥ ॐ आः ह्रीं॥ एभिः सप्ताभिमन्त्रितं कृत्वा तत उज्ज्वालयित्वा मण्डले क्षिपेत्॥ येन दिग्विभागेन पतति तत्कर्मप्रसरं तस्य सिध्यति॥ पूर्वोक्तैशान्यादिकमष्टदिक्षु॥ ततो मुखे उलूकवायसमुदकस्य प्रक्षिप्य पिंडं कृत्वा मरणेनैकारुपरं दत्वा पूर्वे भूम्या मारयित्वा शिष्यं॥ ततस्तस्य जिह्वायां पञ्चामृतं दद्यात्॥ जिनवरसमयैः पञ्चामृतपञ्चप्रदीपैः॥ पूर्वे धूपं साधयित्वा तदेव धूपं देवतावेष्टनार्थं। तत्र मन्त्रे हुंकारमेकं। अरलप्रियहितमिति॥ ॐ अररररललललवज्रावेशाय हुं॥ एतेन मन्त्रेण चोदने कृत्वा क्रोधभर्तुः क्रोधावेशनमित्यर्थः॥ अस्य कोटिजापेन दशलक्षहोमेन पूर्वसेवां कुर्यात्॥ ततः सिध्यति॥ स्मरणमात्रेण क्रोधावेशं करोति॥ तच्चेदं लक्षणं भवति॥ तद्यथा॥ सप्ताशीतिमेन वृत्तेन उक्तम्॥

॥ ॥

आविष्टः क्रोधराजः प्रहरणसुकरैस्तर्जयन्मारवृन्दं प्रत्यालीढादिपादैर्वहुविधकरणैर्नृत्यते वज्रनृत्यं॥ हास्यं हुंका-
रमिश्रं भयदमपि रिपोर्वज्रगीतं करोति निर्लज्जो निर्विशङ्को भवति तु गणवशाद्देवतान्याच सौम्या॥ ८८ ॥

आविष्टः क्रोधराजः प्रहरणसुकरैस्तर्जयन्मारविन्दमिति॥ इति शिष्यः क्रोधराजआविष्टः सन् प्रहरणशोभितकरैः स्थावरजंगमं संहन्तीशानन्दं करोति॥ यं तर्जयति तर्जन्या मारवृन्दं धर्मविहितर्वं तं भूम्यां पातयति॥ निश्चेष्टतां नयति॥ तथा प्रत्यालीढादिपदैः विविधकरणैर्नृत्यति वज्रनृत्यमिति॥ इह यः शिष्यः प्राक् किंचिन्नापि लक्षणं न जानाति॥ स एव क्रोधाविष्टः सन् वज्रनृत्यं करोति॥ अन्यानि शिक्षे वहुविधकरणैरिति नृत्यति॥ अथ हास्यं करोति॥ तत्र हुंकारमिश्रं भयमपि रिपोर्मारसमूहस्येति॥ तथा पूर्वमज्ञोसौ यः शिष्यः स क्रोधाविष्टोऽमनुष्यादीनामगम्यध्वनिना

गीतं करोति॥ अनेकतन्त्रान्तरेष्वप्युक्तमिति॥ अतः क्रोधराजाविष्टो निर्लज्जो निर्विशङ्को भवति तद्गुणावशात् क्रोधस्वभावात्॥ देवतास्याविष्टोस्मीति अथवो
चनादि देवतासोस्मीति॥ क्रोधराजावेशनियमः॥ अथवा विक्षिप्तेरणमरुद्दशक्रोधानां दशप्रकृतयोऽञ्जबन्धेन वेदितव्याः॥ येन चिह्नेन यस्योन्मादः॥ तस्मा
च्चनस्य हस्तमुद्रा भवति॥ तत्तया ज्ञातव्य इति नियमः॥ ॥

कायावेशेन योगी प्रकृतिगुणवशात् कायकृत्यं करोति वागावेशेन वादी भवति च विजयी देवभूतासुराणां॥ चित्तावे
शेन सर्वं परहृदयगतं ज्ञायते भूतभव्यं ज्ञानावेशेन बुद्धो भवति सुरगुरुश्चर्द्धिमानेकशास्त्री॥ ८२ ॥

इदानीं क्रोधराजस्य बोधिसत्त्वस्य वा कायाद्यधिष्ठानमुच्यते॥ कायेत्यादिना इह कायावेशेन योगी॥ देवताकायवज्रेणाधिष्ठितः सन् प्रकृतिगुणवशात् रौ
द्रशान्तस्वभावात्॥ कायकृत्यं करोति शिष्यः॥ यथा क्रोधा बोधिसत्त्वाः कुर्वन्ति आकाशगमनं। तथा शिष्यः करोति पातालगमनं॥ मण्डलादिकमष्टं वर्त
यति॥ पर्वतमुत्पादयतीत्यादिकायकृत्यं करोति॥ दिव्यदेवताकायवज्रेणाधिष्ठितः सन्निति॥ तथा वागावेशाद्वादि त्रिभुवने विजयी देवतासुराणां
भवति॥ यथा मञ्जुश्री॥ तथा सूर्योपि शिष्यो देवतावाग्वज्रेणाधिष्ठितो भवतीति नियमः॥ तथा दिव्यदेवताचित्तावेशेन शिष्यः सर्वपरहृदयगतं ज्ञाय
ते अतीतानागतं वर्तमानमदृष्टं सर्वमिति चित्तावेशनियमः॥ अथ पूर्वजन्मवासनावेशेन कश्चित् ज्ञानावेशो भवति॥ न कामरण्डलेखिष्यति॥ बुद्धो भवति
सुरैरपि गुरुरिति॥ षडभिज्ञालाभी दशभूमीश्वरो भवति बुद्धवत् सुपचारवचनैः॥ ऋद्धिमानेकशास्त्र्येवं॥ कायवाक्चित्तज्ञानाधिष्ठानलक्षणनि
यमः॥ ॥

भूम्यावेशेन योगी भवति गिरिसमोऽम्बोऽश्वशीतं प्रयाति वह्न्यावेशेन दाहं व्रजति च मरुता शोषमेव प्रयाति ॥ अभ्न्यावेशे रदृ-
शो भवति भुवितले खेचरत्वं प्रयाति एवं रूपादिसर्वं प्रकृतिगुणवशाद्वेदितव्यं क्रमेण ॥ ६० ॥

इदानीं लोचनाद्यधिष्ठानमुच्यते ॥ भूमीत्यादिना ॥ इह यत्तच्छिष्यो भूम्यावेशेन योगी अधिष्ठितः सन् गिरिसमो भवति ॥ अनेकशातमनुष्यैश्चालयि-
तुं न शक्यत इति ॥ अम्बोऽश्वशीतं प्रयाति ॥ इह मामकाधिष्ठितो योगी यं दाहज्वरेणापि ग्रस्तमालिङ्गयति ॥ तं ज्वरापगतं करोतीति ॥ वह्न्यावेशेन दाहं व्रजति ॥ इ-
ह यदा पावकेनाधिष्ठितो भवति ॥ तदा यं स्पृशति तं दहतीति ॥ मारुतावेशेनाधिष्ठितः ॥ शोषमेव प्रयाति ॥ यमालिङ्गयति ॥ तमुच्चाटयति ॥ अनेकयोजनानीति ॥
एवं अभ्न्यावेशे रदृश्यो भवति ॥ यं स्पृशति स सर्वादृश्यो भवति ॥ भुवितले खेचरत्वं प्रयातीति ॥ नियमः ॥ एवं सर्वं प्रकृतिगुणवशाद्वेदितव्यं ॥ इह यदा दिव्य-
चक्षुरावेशो भवति तदा दिव्यरूपं पश्यति ॥ अदृष्टं दृश्यं च ॥ यदा दिव्यश्रोत्रावेशो भवति तदाश्रुतं शब्दं मनुष्यत्वानां न शृणोति ॥ यदा दिव्यमनआवेशो भ-
वति ॥ तदा परचित्तज्ञानं जानाति ॥ यदा दिव्यकायेन्द्रियावेशो भवति ॥ तदा दिव्यं स्पर्शं गृह्णाति ॥ पूर्वावासं जानाति ॥ यदा दिव्यजिह्वावेशो भवति ॥ तदा दिव्यरसा-
स्वादं भवति ॥ तेनाम्नाशक्तिर्भवति ॥ यदा दिव्यघ्राणावेशो भवति ॥ तदा दिव्यगन्धं गृह्णाति ॥ तेन सर्वज्ञाधिष्ठानं भवतीति नियमः ॥

आवेशो मन्त्रिणां स्वे भवति नरपतेर्भावनायाबलेन सेवाभेदैः कदाचिद्बहुविधसमयैर्मन्त्रजापादिभिश्च ॥ उद्वेगात्स्व-
घमानैः क्वचिदमृतवशान्मराडले भव्यसत्त्वेनोन्नत्याधिष्ठानहीना बहुविधभवे मन्त्रिणां सिद्धिरस्ति ॥ ६१ ॥

इदानीं दिव्यावेशाद्युत्पादलक्षणमुच्यते॥ आवेश इत्यादिना॥ इह दिव्यावेशो यः स मन्त्रिणामाचार्याणां वै एकान्ते भवति॥ भावनाया बलेन पूर्वसेवाभेदैरिति नानाविधिभिः॥ बहुविधसमयै रक्षितैर्वोधिक्विजविन्द्वादिभिः॥ तथा मन्त्रजापादिभिश्चावेशो भवति॥ अन्यथा न भवतीति॥ कदाचित् तरुपर्वक्रमेणाविष्टस्य शिष्यस्य वेडेराख्यायमानैः कश्चिदमृतवशात् मण्डलेऽभ्यस्तूनो भवति॥ न रपतेदित्यामवर्णं॥ तस्याधिष्ठानहीना बहुविविधभवेन्मन्त्रिणां सिद्धिरस्ति॥ अक निष्टश्च वनपर्यन्तं यावत्॥ तथा गतेस्तत्संज्ञोद्भिकीति॥ इहावेशो दिव्यानां॥ अस्येऽनन्तावेशाभृतराक्षसवेटकादीनां॥ तेषां लक्षणं पञ्चमपटले कानि सिद्धे वकर्थं गुर्वाज्ञालक्षणमपि॥ अवमण्डलप्रवेशो॥ तेनेनोक्तं तदिति भगवंतो नियमः॥ ॥

त्यक्तावेशस्य पश्चाच्छिरसि च हृदये मूर्ध्नि नाभौ च कण्ठे तत्परक्षा जिनाद्यैः शुक्लभूविगतैः कारयेत्सूत्रिवजैः॥ दत्वाभि
मीनवस्त्रस्य पिहितनयनस्यात्र शिष्यस्य वेशः सम्पूत्यर्थं व्रतानि प्रवरगतिगतान्येव देयानि तानि॥ ८२ ॥

इदानीमावेशोपशमनादिकमुच्यते। त्यक्तेत्यादिना॥ इह यदा शिष्यः क्रोधदेवतादिभिरधिष्ठितः॥ तदाचार्येणात्रष्टव्यः॥ यत्किंचित्कार्यमभिगते॥ ततः॥ ॐ त्याः ह्रूं अक्षरैः शुष्यमभिमन्त्र्य शिरसि तालयेत्॥ तदा आवेशं त्यजति॥ स्वस्थानं गच्छति॥ एवं त्यक्तावेशो भवति॥ ततः त्यक्तावेशस्य पश्चात् शिरसि रक्षा जिनैश्चेति वचनात्॥ ॐकारेण शिरसि हृदये हूंकारेण॥ मूर्ध्नि उष्णीषे हंकारेण इत्युपायस्य स्वचित्तवज्रैः कायवाक्चित्तैरिति॥ एवं नाभौ हीकारेण॥ कण्ठे आंकारेण॥ ॐ क्षःकारेण॥ इति प्रज्ञायाः स्वचित्रवज्रैः कायवाक्चित्तैरिति॥ अनयोर्मध्ये कायवाक्चित्तवज्रविषये॥ दीर्घोहूंकारो वाग्वज्रं॥ ह्रस्वश्चित्तवज्रं॥ अत्र

त्रयवाप्तितनीतोरक्षां कृत्वादत्तोऽसौ पीतवस्त्रस्य पिहितनयनस्य भवमण्डले शिष्यस्य प्रवेशोऽभिधेयः॥ प्रथमं सम्यक्त्वार्थं व्रतान्यो बोधिपर्यन्तो॥ संबुद्धिः पुरापादि संभारः तस्यार्थं तदर्थं नामित्रवरगतिगतानीति॥ प्रवराभद्रकल्पेन मन्त्रविपक्षपादयः शाक्यमुनिपर्यन्तास्तथागताः॥ तेषां गतिः पुण्यशीलज्ञानसंभारसंभृतकास्तेषां पदनीतिप्रवरगतिगतानि सर्वदेशितानि॥ शिष्याचार्ये लोमितथागतनियमः॥ ॥

हिंसासत्यं परस्त्रीं त्यजस्व परधनं मद्यपानं तथैव संसारे वज्रपाशः सुकुलनिधनं पापमेतानि पञ्च॥ यो यत्काले बभूव त्रिदशनरगुरुस्तस्य नाम्नी प्रदेया रक्षाज्ञा विश्वभर्तुर्भवभयमथनी पालनीया त्वयापि॥ २३ ॥

तत्र व्रतान्या बोधिपर्यन्तमाह भगवान् हिंसाऽसत्यं परस्त्रीं त्यजतु परधनं मद्यपानं तथैवेति॥ पञ्च व्रतानि नियमं कृत्वार्थं॥ कस्मात् यतः संसारे वज्रपाशाः सुकुलनिधनमिमानि पापकर्माणीति पञ्च अतोऽनर्थकानीति नियमः॥ कस्य विश्वभर्तुरिति॥ यो यत्काले बभूव तथागतस्त्रिदशनरगुरुस्तस्य नाम्ना प्रदेया॥ रक्षाज्ञा विश्वभर्तुर्भवभयमथनी पालनीया त्वयापि॥ यथाज्ञप्तैः जलदुहितृभिः पालिता उपसंभारेयेति॥ तथागतनियमात्॥ पञ्च शिक्षापदी॥ ॥

घृतं सावद्यभोज्यं कुवचनपथनं भक्तदेत्येन्द्रधर्मं गोबालस्त्रीनराणां त्रिदशनरगुरोः पञ्च हत्यां न कुर्यात्॥ द्रोहं मित्रप्रभूतं त्रिदशनरगुरोः संघविश्वासिनां च आशक्तिस्त्विन्द्रियाणामिति भुवनपतेः पञ्चविंशाङ्गतानि॥ २४ ॥

ततोपरीक्षितत्वाऽपराणि देयानि॥ तत्र मूलं तावत् यमोऽयं पूर्वोक्तं जवचनपं० नम्र तधर्मं पितृकार्ये यागकार्ये वेदोक्तं॥ दैन्यधर्मं निःक्षुधर्मं च कर्मादि न्यूनपापकानि पश्चात्तथा पूर्वापराणां दशानामादिमा पञ्चहत्यां न कुर्यात् सर्वदा गोहत्या बालहत्या स्त्रीहत्या ऋषहत्या न्द्रिदशानन्तरेरिति॥ प्रतिमात्मानमदेवीं समत्वोद्दऽपराहस्येति॥ तथा मित्रद्रोहं। प्रभुद्रोहं। स्वद्रोहं। संघद्रोहं। विश्वस्तद्रोहमिति। पञ्च न कुर्यादिति॥ तथाष्टाशक्तिस्त्विन्द्रियाणामिति॥ रूपाशक्तिः॥ शब्दाशक्तिः॥ गन्धाशक्तिः॥ रसाशक्तिः। स्पर्शाशक्तिरिति॥ एवं नयेनैवं व्रतत्वस्य नियमेन पञ्चविंशद्व्रतानि पालनीयानि शिष्येणेति व्रताचार्येण देयानि॥ श्रीकालोशिष्यायेति व्रतदाननियमः॥ ॥

श्रीमन्त्रेणाभिमन्त्र्या करकमलपुटे पुष्पमेकं प्रदेप्रदेयं आदौ भ्राम्य त्रिवारान्करकमलपुटान्मण्डले पुष्पमोक्षः॥ यस्मिन्
स्थाने तु पुष्पं पतति नरपतेनत्कुलं तस्य तूनं पश्चात्सन्नाभिषेकस्त्रिविध इह यथानुक्रमः संप्रदेयः॥ २५ ॥ २१५

इदानीं मण्डलप्रवेश उच्यते॥ श्रीमन्त्रेणेत्यादिना॥ इह प्रथमं व्रतदानानन्तरं। पीतवस्त्रेण रक्तवस्त्रेण वा सर्वकर्मणि मुखं बन्धयेत्॥ शान्त्यादिषु वर्णेन देवतावर्णवर्णेन॥ सूक्ष्मवस्त्रेणानेन मन्त्रेण॥ ॐ द्वादशाक्षरि रोधकारिणि हूं फट्॥ ततः चक्षुरादीनि निरोधयित्वा कल्याणमित्र आदौ भ्राम्य त्रिवारान्मण्डले॥ ततः पूर्वद्वारे आचार्योनापरमूर्त्यास्थितः॥ यदि देवता मण्डले उत्थिता प्रत्यालीढादिपादेन॥ तत आचार्य उत्थितः शिष्याय सेकं ददाति॥ अथ विघ्नडणा। तदा निषण्णेन ददाति॥ ततः कल्याणमित्रेण समर्पितस्य शिष्यस्य शिरसि शंखोदकेन प्रोक्षणं कृत्वा॥ ॐ आः हूं इति त्र्यक्षरैः पुष्पमेकं समाभिमन्त्रि

तं गन्धस्य कमण्डलुं आसनमन्त्राद्यैः संपूज्याञ्जलिं विधाय ॥ ततः करकमण्डलुं दत्त्वा वाद्यैर्मण्डलस्य जयकलशोपरि उद्धृत्य मोक्षयापूर्वोक्तनियमेन
निवेद्य योगपथेन ध्यानयेत् ॥ अथ शाकपुष्पमोक्षं कृत्वा पश्चादुद्घोटयेत् ॥ अनेन मन्त्रेण ॥ ॐ दिव्येन्द्रिया एषु घ्राटय स्वाहा इति ॥ नेत्रोद्घाट
नं कृत्वा यस्मिन्स्कोणे सूत्रबद्धं अक्षराभिमन्त्रितं पतति ॥ तत्रस्कोदेवता तस्य कुलदेवता भवति ॥ मयाकर्मसु जापसिद्धिरिति नियमनानन्तस्य कुल
देवतां दर्शयित्वा पश्चात्स्नानाभिषेक उदकादिकः त्रिविध इह यथा कलशादिकः ॥ तथा कर्मसु जापं पूजयित्वा अनन्तरे वक्ष्यमाणः संप्रदायः ॥ इ
त्याचार्यस्य तथागतनियमः ॥ ॥

नागै राजश्चतुर्भिर्मणिकनकमयैः मृन्मयैर्वा सरत्नैरोषध्या गन्धयुक्तैर्जयविजयघटैः स्नापयेद्देवतीनां ॥ मौलिं बु
द्धभेदैर्ददति वरगुरुः शक्तिभिः पट्टमेवं स्वर्णपट्टार्कचन्द्राङ्कितमपि विषयैः स्वेन्द्रियैर्योजनीयं ॥ ९६ ॥

इदानीं स्नानाभिषेकस्य विधिरुच्यते ॥ नागैरित्यादिना ॥ इह नागैरित्यष्टाभिश्चतुर्भिर्वा जयविजयघटैः पञ्चभिर्विजयघटैः ॥ अष्टघ
टपक्षे त्रिभिर्जयघटैः ॥ त्रिभिर्विजयघटैः ॥ चतुर्घटपक्षे मणिकनकघटैः ॥ तदभावे मृन्मयैर्वा सरत्नैः ॥ ओषध्या गन्धयुक्तैरिति ॥ तत्रौषध्यः
पूर्वोक्ता गन्धकक्षपुटेनैवादिभागैः संग्राह्याः ॥ पञ्चविंशतीनां मध्ये ॥ यथालाभतः पञ्च ग्राह्याः ॥ आचार्येण मूलतन्त्रोक्तविधानेन ॥ त
त्र भगवानाह ॥ गन्धकक्षपुटे राजन्नौषधीः पातयेत्क्रमात् ॥ नेत्रेन्द्वग्न्यादिभागैर्ब्राह्म्याद्याः पञ्च पञ्चकैः ॥ ब्राह्मी नारायणी ऐन्द्री इच्छ

रीपरमेश्वरी॥ ऐन्द्रीलक्ष्मीचवाराहीकौमारीचर्चिकातथा॥ पृथिवीवारुणीज्योतिर्वायवीखेचरीतथा॥ मातावभगिनीपुत्रीभागिनेयास्व
जातथा॥ ब्राह्मणीक्षत्रिणीवैश्याशूद्रीडोम्बीतथास्मृता॥ इत्येषाषष्ठोमहासिद्धिउक्तिरुद्रप्रदासदेति॥ इदानींमासांप्रकल्पनामानुच्यते
इहब्राह्मीतिब्रह्मदण्डीभाग २॥ नारायणी·विष्णुकान्ताभाग १॥ रौद्रीति·रुद्रजटाभाग ३॥ ईश्वरीप्रसिद्धाभाग ४॥ परमेश्वरी·देव
दालीभाग ५॥ इतिप्रथमपातः॥ ॥ततोद्वितीयोच्यते॥ ऐन्द्रीति·इन्द्रवारुणीभाग ३॥ लक्ष्मीति·लक्ष्मणाभाग ४॥ वाराहीतिवरा
हकर्णीभाग ५॥ कौमारीति·कर्णिकाभाग ५॥ कौमारीति·कर्णिकाभाग २॥ चर्चिकेति·अघोपुष्पिकाभाग १॥ इतिद्वितीयपञ्चन्यासगा॥
ततस्तृतीयउच्यते॥ पार्थिवीति·मुसलीभाग ५॥ वारुणीति·रुदन्तीभाग २॥ ज्योतिरिति·ज्योतिष्मतीभाग १॥ वायवी·लज्जालुभाग २
॥खेचरी·अर्कभाग ४॥ इतितृतीयपञ्चकं॥ ॥ततश्चतुर्थन्यासउच्यते॥ मातेति·पुटंजारीभाग १॥ भगिनी·सहदेवाभाग ३॥ पु
त्रीति·रुदाञ्जलिभाग ४॥ भागिनेया·अजकर्णीभाग ५॥ स्वजामोहनीवत्पत्रिकाभाग २॥ इतिचतुर्थपञ्चकं॥ ॥ततःपञ्चमोन्या २१६
सउच्यते॥ ब्राह्मणीति·ब्रह्मनीभाग ४॥ क्षत्रिणी·भृङ्गराजभाग ५ वैश्याषष्ठी·मधुभाग २ शूद्री·कण्ठकारीभाग १ डोम्बी·मयूर
शिखाभाग ३॥ इतिपञ्चमन्यास॥ ॥एवंयथासंख्येधान्यादिशस्यसमूहं॥ धान्यंमहाधान्यं॥ माषाः॥ श्वेतचनकाः॥ कृष्णतिला
इतिप्रथमपञ्चकं॥ द्वितीयेकोद्रवाः॥ मुद्गाः॥ कला॥ शुक्लतिलाः॥ गोधूमाः॥ तृतीयेमोठं त्रिपुटः॥ कृष्णसर्षपाः॥ यवाः॥ माषाः॥ चतुर्थे
मसूरिकाः॥ शुक्लसर्षपाः॥ कङ्गुतुवरिका॥ वर्बटिका॥ पंचमेअतसी॥ वरटी॥ वर्णा॥ कुलत्थाः॥ कृष्णचणकाः॥ इतिपञ्चशस्यानितथा

लब्धानि याप्यानि ॥ कक्षपुटप्रयोगेनेति अत्र भागं तुलिसंख्याः ॥ ततो रत्नानि ॥ ब्रह्मक्षत्रविट्शूद्रजातीनि ॥ वज्राणि तथा ॥ इन्द्रनील ॥ पद्मराग ॥ चन्द्रका
न्तो कर्केटकमरकतानीति ॥ प्रधानानि ॥ तथा लोहानि ॥ सुवर्णरूप्यताम्रतीक्ष्णअयःकान्तानि ॥ तथा मध्यमरत्नानि ॥ मुक्ताप्रवालराजपट्टभूलमणिवह्नि
स्तुकश्चेति ॥ तथाधमानि स्फटिकजीवजाति ॥ डाहरी । काच । हरितमणय इति ॥ एतानि यथाविभवतो ग्राह्याणि ॥ अथ देवतागानां मणयप्रत्या
चक्रवर्तिनो महारत्नाभिषेके पञ्चवर्णा भवन्ति ॥ तदभावे पञ्चवर्णानि सौरभ्यपुष्पाणीति निम्नोदरि जारणां ॥ एवं पञ्चमोये वीसरत्नैः ॥ अथ हरि
तरत्नं विजयशंखे नीलरत्नं पूर्वापरजयविजयघटे ॥ कृष्णं पूर्वाग्नेयघटे ॥ रक्तं दक्षिणनैऋत्यघटे ॥ श्वेतमुत्तरेशानघटे ॥ पीतं पश्चिमवायव्य
घटे ॥ एवमयःकान्तं तीक्ष्णं ताम्रं रूप्यं सुवर्णं ॥ तथा भोगयः ॥ इति एकभागिका जयविजयघटे ॥ द्विभागिका पूर्वाग्नेयौ त्रिभागिका यमदेशे ॥ च
तुर्भागिका उत्तरे हरे ॥ पञ्चमभागिका पश्चिमे वायव्ये इति ॥ तथा तुडिकाभेदेन शस्यानि ॥ तथा पूर्वान्कक्षपुटे षध्यः पञ्चेति ॥ एवं लोहानि ॥
रत्नानि वेनो षध्यः शस्यानि ॥ गन्धद्रव्याणि घटे सुक्षिप्यातैः पञ्चविंशतिभिः पुनः पोट्टलिकां बद्ध्वा विजयशंखे क्षिपेत् ॥ तोयपूर्णे ॥ तेन पञ्चसु
जन्मस्थाने सुसिञ्चयेत् ॥ उष्णीषे स्कन्धबाहुसंधौ सव्ये वामे ॥ एवं हि द्विचक्रकटिसन्धौ ॥ ततः कलशदेवताविशोधनाय पुष्पक्षेपमन्त्रः ॥ ॐ स
र्वतथागतकुलविशोधनि स्वाहा ॥ अनेन मन्त्रेण आचार्यः पुष्पमोक्षं शिष्यं कारयति ॥ अनेन मन्त्रेण उद्घाटनं ॥ ॐ दिव्यनयनं उद्घाटयामि स्वा
हा ॥ इति ततः कलशदेवतामण्डलेनापक्रमादिक्रमेणादर्शयेन्मण्डलं समस्तं ॥ ततः पूर्वद्वारे ॥ कुलशुद्धिं कृत्वाचार्यः शिष्यं वामहस्तेन चाल्य
कर्मवज्रिणा त्रिः प्रदक्षिणं कृत्वा उत्तरद्वारे नीत्वा ॥ ततः कायविशुद्ध्यर्थं ॥ तारादिदेवीमन्त्रैः सर्वकलशेभ्यो तोयं गृहीत्वा विजयशंखे प्रक्षिप्यउ

दकाभिषेकं पुनः पञ्चजन्मस्थानेषु अभिषेचयेत्॥ अनेन मन्त्रेण। ॐ आ पूर्णजल पञ्चधातु विशोधनि स्वाहा॥ ततो मुकुटाभिषेके पञ्चसु जन्मस्था
नेषु अभिषेचयेत्॥ अनेन मन्त्रेण॥ ॐ पञ्चकुल पञ्चतथागतपरिशुद्ध स्वाहा॥ ततो रत्नहेममुकुटं वस्त्रमुकुटं वा बन्धयेत्॥ एवमभिषेक
द्वयेन धातुस्कन्धपरिशुद्धौ कायविशुद्धिर्भवति॥ कायवज्रस्य मां कायशुद्धिं कृत्वा ततो दक्षिणावर्त्तेन पुनर्दक्षिणावर्त्ते वाग्विशुद्ध्यर्थं नीत्वा शि
ष्यं पञ्चसु जन्मस्थानेषु अभिषिंचेत् पद्माभिषेके अनेन मन्त्रेण॥ ॐ अ आ अं अः ह हा हं हः होः ह्रीं दशपारमितापरिपूरणि स्वाहा॥ इति ततो रत्नपट्टं
स्वर्णपट्टं वा॥ अलाभे तु पञ्चमालां ललाटे बन्धयेदिति॥ ततो वज्रवज्रमरस्थाभिषेके पञ्चसु जन्मस्थानेषु अभिषिंच्य अनेन मन्त्रेण॥ ॐ हूं होः सूर्य्य
चन्द्र विशोधक स्वाहेति॥ ततो वज्रवज्रपर्यङ्कं शिरसि दत्वा शंखोदकेनाभिषेचयेदिति॥ ततोभिषेकद्वयेन वाग्वज्रं विशोधयित्वा वज्राङ्गुष्ठं दत्वा द
क्षिणावर्त्तेन पुनः प्रदक्षिणं कृत्वा पूर्ववत् चित्तवज्रशोधनार्थं पञ्चसु जन्मस्थानेषु अभिषेचयेत्॥ वज्रव्रताभिषेके अनेन मन्त्रेण॥ ॐ अ आ
इ ई उ ऊ ऋ ॠ ओ औ ऌ ॡ विषयेन्द्रियविशोधनि स्वाहा॥ इति॥ ॥

क्रोधैर्मैत्र्यादिना स्फुटजिनपतिना ज्ञानप्रदेया समाना वज्रं घण्टां प्रदेयाद्वरकरुणया देशयेत् शुद्धधर्मं॥ जया
न्यारागातिपाते खड्गकुलिशकुले सत्यवाक्यं च खड्गे रत्नेहार्य्यं परस्वं वरकमलकुलेप्यवहार्या परस्त्री॥ ८२ ॥

ततः श्रोत्रादिषु पुष्पं दत्वा पुनर्नामाभिषेके पञ्चसु जन्मस्थानेषु अभिषिंच्य अनेन मन्त्रेण॥ ॐ हर हर पयाररावबालबाला चतुर्ब्रह्मविहारविशुद्ध

स्वाहा ॥ इति ॥ ततो हस्तपादपुष्पमालावस्त्राकर्णकुण्डलादीनाम्भावेन ततोभिषेकेन व्याकुर्यात् ॥ अमुक वज्रसत्त्व मिति कृत्वा ॥ ततो ज्ञानाभिषेकं द्विमिमि

तेचित्त वज्रं विशोधयित्वा अभिषेकं दद्येन ॥ उनर्दक्षिणा वज्रेन शिष्यमानयित्वा पश्चिमचक्रे पश्चाज्जनस्कन्धेभु अजाभिषेके अभिषिञ्च्य

तेन मन्त्रेण ॥ ॐ हूं धाः धर्मचक्रप्रवर्तक स्वाहा इति ॥ अभिषेकं दत्वा कायवाक्चित्तज्ञान वज्रकाणि सप्ताभिषेके विशोध्य ततः शिष्याय वज्रं वज्रघण्टां

करे दत्वा अमुक वज्रनाभ्याम आचार्यः ॥ वज्रं वज्रघण्टां प्रदाय प्रवरकरुणाया देशयेत्सुधर्मं ॥ अनेन मार्गेण वज्रदयेन ॥ न सम्याकुर्यात् प्राणा

तिपातं स्वलुञ्जलिशज्जले इत्यादिना मण्डले संप्रदेया इति पर्यन्तेन ॥ इति सप्ताभिषेक विधिं मण्डले कृत्वा ततः शिष्याय गुह्याभिषेकं चिन्तयेत् ॥ वज्रा

चार्यो ज्येष्ठकनिष्ठार्थं सम्बन्धादिक गुह्योपयाति ॥ इह अमुक सम्वत्सरे अमुक कल्कि राजधर्म देशनायां ॥ अमुक मासे अमुक पक्ष पूर्णिमायां अमुक वारे । अमुक

तिथौ अमुक नक्षत्रे । अमुक योगे । अमुक करणे । मया अमुक आचार्येण अमुक शिष्याभिषिक्तः ॥ परमादिबुद्ध अनेनाम मण्डले सप्ताभिषेके यो कृतो अमुक नातो म

या लौकिक सिद्धि साधनाय कनिष्ठ भवनपर्यन्तं नायकत्वेन सर्वसत्त्वानां उपाय ज्ञान मद्दत्वा प्रथे । इति सप्ताभिषेक नियमः ॥ ॥ इहान्यतन्त्रान्तरे

मणुक्तं पञ्च तथागत विशुद्ध्या पञ्चाभिषेका बालजनावतारणे ॥ वैरोचने न उदकाभिषेको रत्नसम्भवेन मुकुट इति ॥ नत्र पूर्वापरविरोधः ॥ सर्वत

त्रिभुमण्डले उष्णीषे शिष्यस्य जलदेवता ॥ न च जलदिव्यानन्त जलमद्यान स्यसिद्धिरिति भगवतो नियमः ॥ तेन नाम संगीत्या ॥ पंच बुद्धात्म

मज इति वचनात् ॥ यस्तु उष्णीषं पतति स तथागतो मध्ये मौलौ भवति ॥ न सर्वत्र रत्न सम्भवः ॥ एवं लघुतन्त्रे नो यादि प्रसिद्धिर्नास्ति ॥ अपरं विधेर्वचन

त्वादिति ॥ इदानीं विधु अधर्म देशनामाह ॥ जयीं प्राणातिपातमित्यादिना ॥ इह प्राणातिपातादयः ॥ समयादिधाने या धर्मे न नीतार्थे न वा यादि

कार्येति॥ तत्रवाद्ये प्राणातिपातं भगवान्स तनूकुर्यात्॥ तत्स्थानत्वेपकारिणां उद्धशास्तनामपकारिणां समस्थभेदितामितिनियमः॥ तदेव पश्चात्तन्नार्थं पू
र्वीपरं ज्ञात्वा॥ इह कश्चित्पूर्वं पश्चात्तन्तं पकारी पश्चात्प्रत्यपकर्त्ता भवति वररुशोकाथमौर्योकवत्॥ तस्मात्तस्य प्रकारेण न रक्षं भवति मन्त्रिणः॥ अ
भाष्य भकर्मी परिज्ञानात्॥ तेन यावत्पश्चात्तिज्ञानं भवति॥ तावन्मन्त्रिणा क्रूरकर्म न कर्त्तव्यं॥ शान्तिपुष्टिवश्यकृष्टिभिर्विना॥ एवं मृषावादः॥
परोपकारतः॥ अदत्तादानमपि॥ परस्त्रीग्रहणमपि॥ कमयशोवानराणांवर्णाभिगमनं स्वशरीरस्य पर्यन्ते दानमपि न स्वार्थमर्हति॥ इत्यात्री सदा आ
मरणान्तं पश्चानन्तर्यं करोति॥ तदा पूर्वसाधितं मन्त्रं क्षीणं कृत्वा ऽभ्यस्तमाभिनाऽनेन मारणं कुर्यात्॥ अत्र वातीति नेयार्थः॥ एवममार्गप
तितानामनुद्धरणाय मृषावाक्यं वक्तव्यं न स्वार्थतः॥ एवमदत्तादानं॥ प्रेतगतिप्रमदनिवारणाय न स्वार्थतः॥ तथा परस्त्रीग्रहणं निर्यता
तिगमननिवारणाय न स्वार्थतः॥ समयात्पश्चात्तत्रायान्सेवयेत्॥ जलग्रहविनाशाय॥ एवं कर्मचतुष्टयप्रतिस्मार्थं ज्ञान्याश्चाः स्त्रियो नावम
स्नित॥ उपरपसन्नाऽपमहानानंददा इति॥ एवं स्वकुंडले॥ रत्नकुंडले॥ पद्मकुंडले॥ चक्रकुंडले॥ कर्णिकाकुंडले॥ मन्त्रान्साधयित्वा सामर्थ्ययुक्तः स
न्योगी सर्वं कुर्यात्॥ यथा लोके हास्यं न भवतीति नेयार्थः॥ इदानीं नीतार्थ उच्यते॥ इह स्वशरीरे प्राणस्यातिपातनात् प्राणातिपातः कुलिशाङ्गे
उष्णीषे निरोधं कुर्यात्॥ तेन प्राणातिपातेन योगी बुद्धो भवतीति नियमः॥ असत्यवाक्यं चरवक्रे इहासत्यं नामाप्रतिष्ठितवचनेनेत्यर्थे
न॥ नीतार्थेन सर्वसत्वरुतं वाक्यं योगपर्यन्तसत्वानां धर्मदेशकं तदेव हृदयेऽनाहतध्वनिरिति नियमः॥ रत्ने हार्यं परस्वं॥ परस्वमिति॥ इह
परो वज्रसत्वः॥ तस्य स्वं रत्नं चिन्तामणिः॥ तस्यापहरणं॥ रत्नकुंडले॥ कण्ठे अष्टमभूमिस्थाने इति नियमः॥ वरकमलकुंडलेऽपि वहार्या परस्त्री

ति।। परस्त्रीमहाप्रज्ञातस्यापहरणं परस्त्रीग्रहणं। स्तार्यो। कमलकुले। ललाटे दशमभूमिस्थाने ऊर्द्ध्वरेतसेति नियमः।। ||

मद्यं दीपाश्च भक्ष्याः स्वसकलविषयाः सेवनीयाश्च चक्रे डोम्ब्याद्याः कर्त्रिकायां स्वसकलवनिता नावमन्याः स्वपक्षे
।। दीपाः सत्त्वार्थहेतोः स्वपतु न तु रियं न त्वयारक्षणीया बुद्धत्वं नान्यथा वै भवति कुशलतानन्तकल्पैर्जिनोक्तं।। ९८ ||

मद्यं दीपाश्च भक्ष्याः स्वसकलविषयाः सेवनीयाश्च चक्रे इति।। इह मद्यं सहजानन्दं। दीपा गोकादिकानि पञ्चेन्द्रियाणि। अभ्यासभक्ष्याः।।
पञ्चामृतानि चक्रे नाभिकमले सेवनीया भक्षणीयाः।। बोधिचित्तशुक्रकाश्रावः कर्त्तव्य इति नीतार्थः।। डोम्ब्याद्याः स्त्रियः कर्त्रिकायां उष्णीषकम
ले नावमन्याः स्वपक्षे योगिनो मन्त्रस्थाने ब्रह्मचर्येणेति।। बोधिशुक्राच्यवनेनेति नियमः।। दीपाः सत्त्वार्थहेतोः सहधनेन पुत्रकलत्रादिभिः सार्द्धं स्व
न तु गा प्रदेया दानसम्भारार्थं।। एवं शीलसम्भारार्थं। स्त्रियो नावमन्याः स्वपक्षे अनतः दानशीलसम्भाराभ्यां ज्ञानसम्भारः।। एवं सम्भारद्वयेन
सम्यक्तं बुद्धत्वं न भवति हे जलपुत्र।। नान्यथा।। अनन्तकल्पैर्यज्जिनेनोक्तमिति।। विशुद्धधर्मदेशना नियमः।। इह सर्वतन्त्रेषु।। ||

तोयेनाप्यादिदेवो मुकुट इह जिनाः शाक्यो वीरपट्टो वज्रघण्टार्कचक्रो व्रतमपि विषयानाममैत्र्यादियोगः।। आज्ञासंबोधि
लक्ष्मीभवभयमथनी कालचक्रानुविद्धा एते सप्ताभिषेकाः कलुषमलहरा मण्डले संप्रदेयाः।। ९९ ||

इदानीं शोधकविशुद्धिरुच्यते ॥ तोयं तारादिदेव्य इत्यादिना ॥ इह तोयाभिषेकोऽपःसवाय्वादिपञ्चधातुविशुद्धिर्निरावरणेति ॥ एवं छजयाभिषेको विज्ञानादिपञ्चस्कन्धविशुद्धिः ॥ वीरपट्टाभिषेको दानाद्या दश शक्तयः पारमिता परिपूरयन्तीति ॥ वज्रवज्रघण्टाभिषेको ललनारसनाविशुद्धिः ॥ चन्द्रादित्यनिरावरणेति ॥ व्रताभिषेको रूपादिविषयचक्षुरादीन्द्रियविशुद्धिः ॥ दिव्यचक्षुरादिप्रवृत्तिरिति ॥ नामाभिषेको मैत्र्यादिचतुर्ब्रह्मविहारेण सर्वकालं ॥ रागद्वेषादिविशुद्धिः ॥ निरावरणेति ॥ आज्ञाभिषेकः संबोधिलक्ष्मीर्धर्मचक्रप्रवर्त्तने धर्मदेशना ॥ सा च भवभयमथनी परोपकारतः ॥ कालचक्रानुविज्ञा अच्युतसुखानुविज्ञाप्य न नादेशनेति नियमः ॥ एवं वै ते सप्ताभिषेकाः कलुषमलहरा मण्डले संप्रदेयाः ॥ आचार्येण शिष्येभ्य इति तथागतनियमः ॥ सप्ताभिषेकदाने वज्राचार्याणामिति ॥ ॥

सिक्तः सप्ताभिषेकैर्व्रजति शुभवशात्सप्तभूमिश्वरत्वं भूयो वै वर्त्तिकायां प्रविशति नियतं जन्म गुह्याभिषिक्तः ॥ प्रज्ञाज्ञानाभिषिक्तो भवभयमथनं मन्त्रयोगत्वमेति मूलापत्तिं कदाचिद्व्रजति शठवशान्नारकं दुःखमेतत् ॥ १०० ॥

इदानीमभिषेकफलमुच्यते ॥ सिक्त इत्यादिना ॥ इह सप्ताभिषेकैरभिषिक्तः सन् महामण्डले व्रजति शुभवशात्सप्तभूमीश्वरत्वं ॥ यदि मण्डलचक्रं साक्षात्करोति ॥ तदा तेनैव कायेन सप्तभूमीश्वरत्वं व्रजति ॥ अथ दशाकुशलरहितो म्रियते ॥ तदा तस्मात् शुभवशात् ॥ सप्तभूमीश्वरत्वं व्रजतीति नियमः ॥ उरमसंभारेण ॥ भूयो वै वर्त्तिकायां प्रविशति नियतं जन्म गुह्याभिषिक्त इति ॥ इह ज्ञानगुह्याभिम

भिक्षुकः सन् शीलवशात्॥ अवैवर्त्तिकामचलां व्रजति॥ आदिशब्देन साधुमतिं व्रजति॥ अचला बोधिचित्तस्याचलनं॥ योगिनं ध्यानेन साधुमतीमहासुख
चित्तं॥ इह प्रज्ञाज्ञानाभिषिक्तः शीलसम्भारबलेन भवभयमथनं मञ्जुघोषत्वमेति॥ धर्ममेघां व्रजति॥ धर्ममेघा महासुखवृष्टिः॥ स्वार्थपरार्थकारि
णीति नियमः॥ एवं गुणशीलसम्भारपूर्वंगमो ज्ञानसंभारः॥ ततो द्वादशभूम्यां बुद्धत्वं योगिनामिति तथागतनियमः॥ ॥ अथ मूलापत्तिं
वशमारेण शठवशात् दशाकुशलप्रवृत्तिवशात्॥ ततो नारकं दुःखमेति॥ समसंसेकादिकं भवति॥ विपर्यासवशादिति नियमः॥ ॥

मूलापत्तेर्विशुद्धिर्भवति हि गुणिनः सप्तसेके स्थितस्य कुम्भे गुह्ये कदाचिद्व्रतनियमवशादुत्तरे नास्ति सिद्धिः॥ मूलापत्तिं
गतो यो विशति पुनरिदं मण्डलं सिद्धिहेतो रज्ञो लब्धाभिभूयो व्रजति गणाजले ज्येष्ठनामा लघुत्वं॥ १०१ ॥

इदानीं मूलापत्तिविशुद्धिरुच्यते॥ मूलापत्तेरित्यादिना॥ इह यदा वक्ष्यमाणा मूलापत्तिर्भवति॥ तदा सप्ताभिषेके स्थितस्य सप्तजापैः षड्भिः शुद्धिः
सहस्रैः शुद्धिर्भवति गुणिनः॥ पश्चादकरणसम्वरे स्थितस्यापि कुम्भे गुह्ये स्थितस्याभिषिक्तस्य यदा मूलापत्तिर्भवति तदा कदाचिद्व्रतनियमवशात्
गुणशीलसम्भारवशात् शुद्धिर्भवति॥ तत्रैवाचार्येणादरणीयेनोव्रतनियमेनेति॥ उत्तरे नास्ति शुद्धिरिति॥ प्रज्ञाज्ञानाभिषिक्तस्य यदा मूलापत्तिर्भ
वति तदा शुद्धिर्नास्ति इति कार्यः॥ अत्राचार्येणास्य दण्डो न देयः॥ गुणशीलबलेन स्वेन आत्मनः पापदेशनादिकं कृत्वा बुद्धबोधिसत्त्वानां साधिष्ठानं
नत्वा आत्मना शुद्धिं नयतीति मतं बुद्धानामिति॥ मूलापत्तिं गतो यो विशति पुनरिदं मण्डलं शुद्धिहेतोरिति॥ इह सप्ताभिषेके स्थितः कुम्भे गुह्ये वा स्थि

तः मूलापत्तिं व्रजति यदा तदा तस्य शुद्धिहेतोरिदं मण्डलं वर्त्तयित्वा पुनर्मण्डलप्रवेशादिकं करोति पुनरकरणोपेयमि॥ ततो व्रतं लब्ध्वा हि भूयो व्रजति गणकुले गोत्रमध्ये यः श्राद्धः ज्येष्ठनामा स लघुत्वं व्रजति॥ कनिष्ठो भवतीति पुनरकरणसम्बरणं तथागतनियमः शिष्येण यत्नेन करणीयं॥ ॥

मूलापत्तिः सुतानां भवति शशधर श्रीगुरोश्चित्तखेदात् तस्याज्ञालङ्घनेऽन्या भवति खलु तथा भ्रातृकोपात्तृतीया॥ मैत्रीत्यागाच्चतुर्थी भवति पुनरपि बोधिचित्तप्रणाशात् षष्ठी सिद्धान्तनिन्दा गिरिरपि चलने ऽपक्वचित्ते तु गुह्यदानात्॥ १०२ ॥

इदानीं मूलापत्तय उच्यन्ते॥ मूलापत्तिरित्यादिना॥ इह सर्वतन्त्रेषु मूलापत्तयश्चतुर्दश तेषु प्रत्येकं भवति॥ यथा तथाह॥ मूलापत्तिः सुतानां अभिषिक्तानां शिष्याणां भवति शशधरेति प्रथमा श्रीगुरोश्चित्तखेदादिति॥ अत्र गुरुर्द्विधा सद्गुरुः असद्गुरुश्चेति॥ तयोश्चित्तखेदाद्द्विधा परार्थतः स्वार्थतश्चेति॥ तत्र यस्य परार्थतः चित्तखेदः स श्रीगुरुः॥ यस्य स्वार्थतः चित्तखेदः सोऽसद्गुरुरिति॥ अत्र श्रीगुरोश्चित्तखेदो दशाकुशलप्रवृत्त्या शिष्यस्य भवति॥ तस्माच्चित्तखेदान्मूलापत्तिर्भवति॥ न स्वार्थप्रवृत्तस्य गुरोर्दशाकुशलप्रवृत्तेरिति नियमः॥ तस्याज्ञालङ्घनेऽन्या द्वितीया मूलापत्तिर्भवति गुरोः॥ परोक्षेऽपि दशाकुशलं कुर्वत इति॥ एवं भ्रातृकोपात्तृतीया भवति॥ यदा ज्येष्ठो वा कनिष्ठो वा तत्र भ्रातरि शिक्षायमारोप्य प्रकोपं करोति मैत्रीत्यागाच्चतुर्थीति॥ इह मैत्रीत्यागश्चतुःप्रकारः॥ मृदुमध्याधिमात्राधिमात्रभेदेन॥ तत्र मृदुर्जले दण्डरेखावत् मैत्रीत्यागः॥ क्षणमात्रेण ततो निवर्त्तयति॥ मध्यमो वालुकारेखावत् तेन पुनः समत्वं याति॥ अधिमात्रात्मको भूमिस्फुटितवत्॥ वर्षोदकेन पुनः समत्वं याति॥ ततो मैत्रीचित्तं अधि

मात्राधिमात्रात्मकं मरिपङ्कं यथा सा याराभिन्नः। उ नरो नैकचित्तसम्पूर्णः समरसो भवति॥ यथा वा पङ्कमध्ये न हृष्येति तिष्ठति॥ तन्मैत्रीपरित्यागः सत्वानां
॥ तेन चतुर्थी मूलापत्तिर्भवतीति नियमः॥ इषुरिति पञ्चमी भवति॥ बोधिचित्तप्रणाशादिति॥ इह बोधिचित्तं शुक्रं तस्य विनाशात् भस्तुनसुखेन भ
वति॥ यतोऽनन्त्विनो द्वीन्द्रियसुखेन तथ्यत्यक्ताभिरागं पञ्चमी मूलापत्तिर्भवति॥ षष्ठी सिद्धान्तनिन्दा॥ सिद्धान्ते प्रज्ञापारमितानये मन्त्रनये तत्वपटलेन
स्य निन्दायां षष्ठीति॥ गिरिरिति सप्तमी भवति॥ अपाचितेन नरे श्रावकमार्गस्थिते तथ्यदानात् महासुखदानात् आचार्याणामापत्तिः॥ ॥

स्कन्धक्लेशाद् दहिः स्यात् उ नरपि नवमी शुद्धधर्मेऽरुचिर्या मायामैत्री च नामादिरहितसुखदे कल्पनादिश्च रुद्रा॥ शुद्धे सत्वे
प्रदोषात् उ चिरपि समये लब्धके भागजोऽन्या सर्वस्त्रीणां जुगुप्सा खलु भवति मनुर्वज्रयाने स्थितानां॥ १०२ ॥

स्कन्धक्लेशाद् दहीत्यष्टमी॥ स्कन्धक्लेशादिरूपवासः॥ संन्यस्तादिशरीरछेदनादिकमुच्यते॥ तस्मादष्टमी भवति॥ उ नरपि नवमी शुद्धधर्मे शून्यता
धर्मेऽरुचिर्या भवति॥ मायामैत्री च सुखेनोऽन्यसत्वाक्प्रमिष्टं॥ हृदये न्यायचित्तेनेति॥ मायामैत्री यासादिगिति॥ दशमी॥ नामादिरहिते सुखदे तथागतत्वे
कल्पना या सा रुद्रेति एकादशी॥ शुद्धसत्वे योगिनी प्रदोषात् रचिरिति द्वादशी भवति॥ समये लब्धे सति त्यागतो गणचक्रे ऽन्यात्रयोदशी भवति॥ सर्व
स्त्रीणां जुगुप्सा या सा मनुरिति चतुर्दशी॥ खल्विति निश्चितार्था भवतीति नियमः॥ केषां वज्रयाने स्थितानां अभिषिक्तानामिति नियमो वज्रधरस्य सकुलापत्त
योऽनेकास्ता सांख्यस्यदण्डो भवतीति नियमः॥ ॥ इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां दशसाहस्रिकायां विमलप्रभा

श्रीमण्डलाभिषेकमहोद्देशश्चतुर्थः॥ ॥नागैराज्यैश्चतुर्भिर्मणिकनकघटैर्मन्त्रयेद्वीजरत्नैरोषध्या गन्धयुक्तैर्जयविजयघटैः स्नापयेत्
पीठमध्ये॥नागैः श्रीमौलिबद्धे वज्रदलकमले पट्टबद्धैश्चतुर्भिर्मुद्रायां श्रीघटेनाचकमलरहिते पश्चिरेखेविवर्ज्ये॥ १०४ १ ॥
हंत्वा प्रतिष्ठां सगुरारेन्द्रैर्यावन्दितो नागनरेन्द्रवृन्दैः। अनेकालचक्रं प्रणिपत्य मूर्ध्ना वक्ष्ये प्रतिष्ठां प्रतिमादिकानां॥ इह श्रीपरमादिबुद्धात् प्रतिष्ठाविधिर्मञ्जु
श्रियाचतुरधिकशतादिष्टेनोत्स्फृतः टीकया वितन्यते॥ नागैरित्यादिना॥ इह प्रथमं वक्ष्यमाणैः फलशादिभिरभिषेकैरभिषेच्य ततो ज्ञानसर्वतत्त्वः शिष्योत्तम
राणाभिषेचनीयो वज्राचार्याधिपतये प्रतिज्ञारूढः॥ इदानीं मया सर्वं भगवन्मार्गेन वप्रसादान्महेश्वीत्तेराज्ञानमिजितेरोमिवस्यप्रतिज्ञां करोति॥ इतः काला
दारभ्य नान्यस्य तोराराधनेकरोमितावत्प्रबोधिसत्वान् विहायेति॥ प्रतिज्ञारूढे शिष्ये हष्ठा सर्वतरणान्विते॥ ततः पूर्वोक्तजयविजयघटाः॥ तैर्नागैर्वाष्टभि
श्चतुर्भिर्वा। घटैर्नैकेन वा त्रिवाधिपतित्वे देयं॥ नागैर्भिक्षोर्वज्रधरस्य आचार्यस्य चतुर्भिः॥ गृहस्थस्यैकेनेति॥ एवं पूर्वोक्तविधिना ओषध्यादिभियुक्तैर्घटैः सै
कः॥ अथ मण्डलगृहबाह्ये समभूमिभागे चतुर्हस्ते॥ पश्चिमप्राकाररेखायाः कृत्वा मध्यहस्तद्वयं पद्ममष्टदलं॥ पश्चिमचिह्नरहितं विश्ववर्णं॥ एतदेव पीठपद्मं
पद्मं परिलिखेत्॥ पश्चिमरेखे स्वस्य पद्मस्य मध्ये॥ उपरि स्थापयित्वा भिक्षुं स्थापयेत्॥ अष्टघटैर्जयविजयसहितैः॥ दशभिः कन्यकाभिः स्वरूपाभिस्स
र्वालंकारयुक्ताभिरप्रसूताभिरष्टभिः॥ नाभ्यां जमारिकाभ्यां जमारिकाभ्यां अक्षतयोनिभ्यां स्नापयेत्॥ शिरसि मौलिं बन्धापयत् मुद्रासहितां॥ इति भिक्षोर्व
ज्रधरजयार्थं तदुत्पन्नजनतत्परे॥ काषायदर्शनाद्यस्य देन्या यानि रसानलमिति॥ एवं नागैः श्रीमौलिबद्धे वज्रदलकमले इति॥ पट्टबद्धेन॥ आचार्यस्य॥ पट्ट
बन्धाः समुद्रिकाः॥ चतुर्भिः कन्याभिः॥ नाभ्यां जमारिकाभ्यां स्नापयेत्॥ रजः पद्मं विहाय॥ पश्चिमरेखां कृत्वा॥ मध्यपद्मे दत्वेति॥ एवं मध्यमाचार्यः॥ ततो मुद्रायामिति॥

अङ्गुष्ठवज्रं दत्वा॥ घटेनैकेन विजयेन॥ एकया कन्यया एकया कुमारिकया स्नापयेदिति॥ मध्वरेखां विहाय॥ सामान्येन लक्षणेन रेखां वर्त्तयित्वा सामान्यपीठं दत्वा स्नापयेत्॥ भगवानाचार्यः॥ एवं यथोक्तक्रमेण चतुर्हस्तादिहस्तं एकहस्तपीठं कृत्वा भिक्षुचेलकं एकहस्तमभिषेकं देयं वज्राचार्येणाँ वाचामतज्ञात्वा वा तन्त्रदेशनार्थमिति नियमः॥ ॥

आदौ वोपासको वै भवति हि सलिले श्रामणेरो घटे स्याद्भिक्षुस्तुर्याभिषेके स्थविर इति भवेदुत्तरे कारणे च। मुद्रां पञ्चत्वमौलिं ददति वरगुरुर्वज्रयज्ञोपवीतं तेषामाचार्यहेतोः स्वजिनजलवशाद्वज्रमुद्रां विशुद्धां ॥ १०५ ॥

अतः शिष्यविधिरुच्यते॥ आदावित्यादिना॥ आदौ सप्ताभिषेके सलिलकलशके अभिषिक्तः सन् सप्तभूमिव्याकरणात्॥ उपासक इत्युच्यते॥ द्वितीयोपासको भवतीति नियमः॥ श्रामणेरो घटे स्यात् दशलाव्याकरणात्॥ ऊर्द्धप्रवज्जमारहस्यर्थः॥ ततो तुर्याभिषेके भिक्षुर्भवति साधुमतीव्याकरणात्॥ ऊर्द्धप्रवराजः॥ स्थविर इति। ततः प्रज्ञाज्ञानाभिषेके उत्तरे लतीये कारणे॥ अभिषिक्तः॥ धर्मदेशकः॥ शिष्यकर्त्ता भवति॥ धर्ममेघायां व्याकृतत्वादिति॥ ऊर्द्धस्थविर द्वितीयः॥ तथा च भगवान्नामसंगीत्यां॥ त्रैलोक्यैककुमाराङ्ग स्थविरो वृद्धः प्रजापतिः॥ द्वात्रिंशल्लक्षणधरः कान्तस्त्रैलोक्यसुन्दरः॥ इति॥ तथा अवैवर्त्तिको ह्यनागामी खड्गः प्रत्येकनायकः॥ नानानिर्याणनिर्यातो महाभूतैककारणः॥ अर्हन्क्षीणास्रवो भिक्षुर्वीतरागो जितेन्द्रियः॥ क्षेमप्राप्तो भयप्राप्तः शीतिभूतो ह्यनाविलः इति॥ तथा॥ महाव्रतधरो मौञ्जी ब्रह्मचारी व्रतोत्तमः॥ महातपाः तपोनिष्ठः स्नातको गौतमोऽग्रणी॥ ब्रह्मविद्ब्राह्मणो ब्रह्मा ब्रह्मनिर्वाणमाप्तवान्॥ मुक्तिर्मोक्षो विमोक्षाङ्गो विमुक्तिः

शान्तनाशिवः॥ इत्याचार्याभिषेकः॥ अतःकायवाक्चित्तवज्रकरणाय वज्रकायपञ्चोदकानि पञ्चमौलिं ददाति॥ विश्वकरणाय चित्तवज्रकरणायेत्य
र्थः॥ वज्रयज्ञोपवीतं सुवर्णमयं पञ्चसूत्रमयं वा कायवज्रधरकरणाय ददाति ब्रह्मकरणायेति॥ तेषां श्रेष्ठकानिष्ठानां आचार्य हेतोः स्वजिनकुलवशा
त् पुष्यपानवशादेव॥ उज्ञं ददाति॥ विशुद्धामभिषिक्तां वाग्वज्रविशुद्धकरणाय महेश्वरकरणायेति॥ एवंकायवज्रधरो ब्रह्मा वाग्वज्रस्तु महे
श्वरः॥ चित्तवज्रधरो राजा सच विष्णुर्महर्द्धिकोनत्राचार्य इति॥ तथा भगवानाह॥ नामसंगीत्यां॥ शिखी शिखण्डी जटिलो जटी मौण्डी किरीटि
वान्॥ पञ्चाननः पञ्चशिखः पञ्चचीरकशेखरः॥ इति भगवतः सर्वतन्त्रान्तरेषु नियमः॥ इह देशकाभिषेको अभिषिक्तेन भिक्षुणा वा श्रावणेरेण वा
गृहस्थेन वा सेवादिधर्मो गृहधर्मो न करणीयो ऽक्षिमसिद्धाणिताद्दिकायदि करोति तदा आज्ञाभङ्गो भवति॥ आज्ञाभंगादवीचिगमनं भवति॥ आचा
र्यधर्मविलोपनादिति॥ वज्राचार्याधिपत्याभिषेकविधिप्रतिष्ठानियमः॥ ॥

ऊर्द्धं दत्वा वितानं क्षितितलनिलये वेदिरेखं समन्तात् तासां कोणे सतोयामणिकनकघटाः स्थिताः पञ्चवक्राः॥ शंखवाद्ये
हमपात्रेत्वथ रजतमये साधये जन्मतोये गर्भे पीठं प्रदाय स्फुटकनकमयं स्नानमारम्भयेज्जनत्॥ १०६ ॥
पुष्पाद्ये गन्धैतैलैर्विविधशिखिपतितैर्देवताभ्यर्चनीया चूर्णैरुद्वर्त्यित्वा मधुघृतदधिभिः स्नापयेत्क्षीरतोयैः॥ सिद्धा
र्थैश्च प्रदीपैर्वरविविधफलैरर्चनिर्मथ्यपित्वा तत्स्नाना चालनीयाजतुरपि पिहिता रक्तवस्त्रेण सम्यक्॥ १०७ ॥

कृत्वा श्रीमण्डलान्ते सममम हितिलये पश्चरेखाजिनाङ्के मध्ये पद्माष्टपत्रं स्फुजलदिशिगतं भूषितं पंचचिह्नैः ॥ तन्मध्ये
रक्तापतीयपरभुरवकमलादेवतादेवतीवा चेत्यायं भुत्कस्वापट इतिच तथा संभुरवं तस्समन्त्री ॥ १०८ ॥
कृत्वाथ स्वस्वभावं जिनवरसहितं कायवाक्चित्तवज्रं पश्चात्सर्वांकयोगैः शशिरविपविजं भावयेत्कालचक्रं ॥ विषादे
व्यादिभुज्ञानलिकलिकलजानस्वबीजैश्च जानानां हृत्कण्ठनाभितस्ये शिरसि कलवशाद्भावयेन्मूर्द्धिचक्रे ॥ १०९ ॥
एवं वै भावनीयाः पुनरपि सकला देवताश्चाश्च कायेभ्याकृष्य ज्ञानसत्त्वे विभवभवसमे क्रोधराज्यैः स्वकाये ॥ वेशास्वं
श्चैतोषं समरसकरणं देवताश्चाभिषेकं पूर्वोदाचार्ययोगे वतस्मात्प्रकटितवदन्या देवता वन्दनीया ॥ ११० ॥
षड्बीजं प्रोद्दिकाद्याः स्फुजलतरणगतं देवतादेवतीनां हृन्मध्ये तत्त्वबीजे शशिरविपुटगं कायवाक्चित्तमुक्तं ॥ द्वात्रिंश
ल्लक्षणाद्यैः सकलतनुगतैर्व्यञ्जनैः साधुभिश्च वर्णैर्भिन्नं नदेवप्रकटदलदलेषु षट्कानाश्च भाव्यं ॥ १११ ॥
श्रीचक्रे चैत्यगर्भे पविरविकमले चाङ्घ्रिरेवोत्तरेण हूँकारं लक्षसंख्येमणिपरिगणना लक्षणं व्यञ्जनानि ॥ षडाठकाय
स्वराश्च त्रिगुणितदशाकादिव्यवर्गाश्च वर्गैस्तेवै वज्रोपवीते दशगुणितवसुव्यञ्जनान्युत्तरीणं ॥ ११२ ॥
कायावर्गाः समाद्या गगनरसगुणायोगपट्टे स्वभाव्या हूं हः श्रीजगडस्वभाव्यान्त्वमहतिगुगलेकण्ठिकामेखलास्वं ॥ एवं
वाकारपुग्मे भवति कटकयोर्नूपुराणां हकारश्च पश्चाकारं हि तस्मात्सकलतनुगतं भस्मना भावनीयं ॥ ११३ ॥

ज्ञानाकान्स्वदेहाच्चितुरणितदशार्कस्कन्धधात्वादिसर्वान्न्यस्तव्यं देवतानां सुहृदयकमलास्वस्ववीजैः क्रमेण ॥ वीजन्यस्तेप्र
तिष्ठा भवति नरपतेस्तूपलेप्यादिकानां वीजावेशोस्वकामे जरुकरजलिशैलेपसंहारकाले ॥ ११४ ॥
आदर्शेस्नानमत्र प्रथममभिभवेच्चित्रितानां पटानां पश्चाद्गन्धैश्च धूपैः सुसुरभिकुसुमैर्देवताभ्यर्चनीया गीतैर्वाद्यैश्च
नृत्यैर्वरविविधपटैश्चामरैरातपत्रैरेवंकृत्वा प्रतिष्ठां वरविविधरसैः संघभोज्यं प्रदेयं ॥ ११५ ॥
कूपे वाप्यां तडागे दिशि विदिशि वसून्विन्यसेन्नागराजान्सप्ताम्भोधिः सुवीजैर्मधुशालितिलयुतं क्षेपयेत्पंचगव्यं ॥ सौ
मन्त्री वापि काष्ठे वरुणमतिशिते पाशहस्तं विभाव्य उद्याने कल्पवृक्षं सकलनरगणैः सेकयित्वेकवृक्षं ॥ ११६ ॥
मौलीपट्टं च हारं कटकमपि तथा कुण्डलं मेखलादिं आचार्याय प्रदेयं भवति नरपते दक्षिणां चात्मशक्त्या ॥ सत्त्वावेडरूप
हेतोः सकलजगताञ्जले प्रार्थनीये परार्थं उत्क्षेपमानेन सत्त्वास्त्रिविधपथगतास्तुत्तरं यान्तु वोधिं ॥ ११७ ॥ २२२

इह प्रतिमादीनां प्रतिष्ठा ॥ ऊर्ध्वं दत्वा वितानं क्षितितलमतिलेपे च त्रिरेखं समन्तादित्यादिकं वृत्तमारभ्य यावद्दशवृत्तानि सुवोधानि यावत्प्रणिधानं शिष्यः उत्क्षेपपरि
णामनं करोति ॥ उत्क्षेपमानेन सत्त्वास्त्रिविधभवगतास्तुत्तरं यान्तु वोधिमिति पर्यन्तं सुवोधं प्रतिष्ठाविधानं नेनात्र टीका न कृतेति ॥ ॥

दिग्वर्षं यावदेका भवति दशविधा दर्शनस्पर्शनीया तस्मादालिङ्गनीयाः सरसजलधयः सेवनीयाश्च तायाः ॥ विषव

र्योस्व सुताः परमभयकराः क्रोधभूताः सुराख्याः सेकार्थं षड्वत्सरः शमसुखफलदास्त्वा पराभावनार्थं॥ ११८॥

इदानीं कुमार्यभिषेकविधानमुच्यते॥ द्विवर्षमित्यादिना॥ इह कलशाभिषेकार्थं। कुजां द्विवर्षं दशवर्षं यावद् वर्जयेत् कुमारिकां॥ यत एकाब्दा पारमिता दशविधा भवति॥ दानादिविशुद्ध्या प्रतिवार्षिका अत्रापि यावत् दन्तपातो न भवति तावत् ज्ञानधातुरप्रपन्नत्वात् ततो दन्तपातात् प्रकाशधातुः॥ सर्वधातुद्वयेन कुमारिका अभ्यर्तेयानिः॥ स्त्रीत्वेन दर्शनीया स्पर्शनीया पूजनीयेति॥ तस्माद् दशवर्षादेकादशवर्षमारभ्य कन्या यावद् विंशतिवर्षाणि आलिङ्गनीया सरसजलधय इति॥ षड्भिः सहवत्सरैः सेवनीयाश्च नाधावा पादप इति॥ अतो वायुधातुरेकादशो वर्षे वा द्वादशो तेजः॥ त्रयोदशो तोयं॥ चतुर्दशो पृथिवीति वत्सरः॥ पञ्चदशो शब्दः॥ षोडशो स्पर्शः॥ सप्तदशो रसः॥ अष्टादशो रूपं॥ एकोनविंशतिमे गन्धः॥ विंशतिमे धर्मधातुरिति॥ ततो विंशतिवर्षाद् ऊर्द्ध्वं सुताः परमभयकराः क्रोधभूताः ऽसुरेन्द्रा इति॥ इह विंशतिवर्षादेकविंशतिवर्षमारभ्य प्रत्येकवार्षिका यथा संख्यं॥ अतिनीला॥ अतिबला॥ यम्बीमानी॥ सम्बी॥ मारेचीचरणा। भृकुटी। वज्रशृङ्खला॥ रौद्राक्षीति। [illegible] क्रोधदेव्यः॥ ततः एकत्रिंशद्वर्षादष्टौ भूतांशाः॥ चर्चिका वाराही। रौद्री ऐन्द्री ब्रह्माणी॥ महालक्ष्मीः। कौमारी। वैष्णवीति। ततः एकोनचत्वारिंशद्वर्षादष्टौ असुरेश्वरः॥ श्वानास्या शूकरास्या व्याघ्रास्या जम्बुकास्या गरुडास्या उलूकास्या गृध्रास्या काकास्येति॥ षट्चत्वारिंशद्वर्षाणि यावत् सुराभावनार्थं॥ सेकार्थं उत्सर्षट्वत्सरः समसुखफलदाः। तिओधातुमारभ्य यावद्धर्मधातुरिति वाग्धातुरजस्त्वात् न ग्राह्येति नियमः॥ ॥

श्रीप्रज्ञास्पर्शनं यत् प्रथमसमधिकं चैव कुम्भसेकः सरूप तत् हिं तत्याभिषेको भवति शशधरास्वादनालोकनाभ्यां॥ प्रज्ञा
ज्ञानाभिषेके सकलजिनजलैः शोधयित्वाङ्गवज्रौ गुह्ये शिष्याय देया जिनसमर्पितरत्नसाक्षिणं चात्र कृत्वा॥ ११९ ॥
इह उत्तराभिषेको द्विधा॥ एकः सत्त्वावतारणार्थं मार्गपरिज्ञानाय॥ तन्त्रश्रुताधिकारायेति॥ अपरो महाचार्यपदप्रदानाय देशकरणायेति॥ अत्र पूर्वा
भिषेकेनावत्॥ वस्त्रादिभाजनादिदोषरहितानां दशाब्दादिष्ठकन्यामहिपाचिन्ताशिष्येण गुरवे समर्पणीया॥ ततो ध्येयरणादिकं कृत्वा॥ शिष्यात् तत्सम्मुख्यस्थापि
वक्षमारणस्तुत्या॥ ततस्तुष्टो गुरुर्लोकसंवृत्त्या स्तनस्पर्शकारयति स्वजायाः सेन कलशाभिषेकः स एव॥ तेनोत्तराप्रज्ञां कृत्वा विद्यायाः सूतं करोति॥ तत्राभ
ग्ध्वालोकापयति॥ तेन गुह्याभिषेको भवति॥ शशधरास्वादनालोकनाभ्यां॥ ततः प्रज्ञाज्ञानाभिषेके॥ पञ्चजलपञ्चकलशादिभिः कृत्वा ओंकारादिबीजैः॥ ततो प्र
ज्ञा सा शिष्याय देया पाणिभ्यां निबद्धकरणाय वज्रतरणा॥ जिनवज्रसत्त्वसाक्षिणं कृत्वा॥ यथा वै बुद्धभगः स्मृतः॥ अस्याधिकारः प्रभावनादिकैः॥ तत्रश्व
गणाय॥ न शिष्याणां तत्त्वदेशनाय॥ गणचक्रलालेखनायेति॥ अथ मे शिष्यावतारणे अभिषेकविषयः॥ तथाह॥ हसितेनाचार्यो जितरागात्मकः॥ एकस्तु
स्वेन देवाविष्ठ्यात हसितेक्षणेन जितरागात्मकविष्ठ्या। पाणिभ्यामिति॥ चतुर्थगणात्मकविष्ठ्याद्वन्द्वमिति पञ्चतरागात्मकगुह्यस्वेन देवाविष्ठ्या इत्या
दि पञ्चमे पटले वक्ष्यमाणो परमाक्षरज्ञानाभिषेको वक्तव्यः॥ इति लोकसंवृत्त्या सत्त्वावतारणाय॥ चतुर्विधोऽभिषेकनियमः॥ ततः सर्वतन्त्रे श्रुते ज्ञाने सर्व
के महाधिपतित्वाय यथा उक्ते गणाकादशविद्याः समर्पणीया गुरुणा शिष्येण गुरवे॥ अत्र मूलतन्त्रे भगवानाह॥ भागिनेयी दुहिता च भगिनी जननी तथा॥
भार्या प्रजननी चैव मातुलस्य तथा स्नुषा॥ पितृभ्रातुस्तथा भार्या भगिनीजनकस्य तु॥ स्वमातृभगिनी चैव स्वभार्या वररूपिणी॥ ताराधर्मधात्वनाद्दशविद्याः

स्वगोत्रजाः ॥ सेकाकाले प्रदानस्य गृहिणो मोक्षकांक्षिणः ॥ न दद्यात्पितरो विघ्नायायेनाः जलरक्षणान् ॥ न दद्यात्सेकोतनयस्य स्वाभिर्गृहवासिनां ॥ म
राडूले स्वाभिर्विषिकाभिरन्याभिः पूजाजातिभिः ॥ भिक्षुरूपां स्वावेशेन रूपं दानत्योत्तरूणान्य ॥ चास्यायात्तु क्रमान्मद्धौ भवितलीनथा ॥ वेश्यातो भीव
कैवर्तीनटिकारजकीनथा ॥ चर्मकारी च चाण्डाली धर्मधात्वन्त्यकादशा ॥ महाविद्यासमाख्याता उक्तिसिद्धिफलप्रदा ॥ इति ॥ स्वयं तु ऋक्केनेराद्दशपारमि
तादशावशितादशभूमिभिर्दशबलान्याभिर्विभूषिताभिश्च यजति ॥ तथा हसम्मगीत्वा ॥ धर्मधातुर्नो वैभगवान् ॥ महावैरोचनेत्तुक्ता महासोनी महासु
नि ॥ महामन्त्रनयोद्भूतो महामन्त्रनयात्मकः ॥ दशपारमिताप्राप्तो दशपारमिताश्रयः ॥ दशपारमिताशुद्धिर्दशपारमितानयः ॥ दशभूमीश्वरो नाथो
दशभूमिप्रतिष्ठितः ॥ दशज्ञानविशुद्धात्मा दशज्ञानविशुद्धधृक् ॥ दशाकारो दशार्थार्थो मुनीन्द्रो दशबलो विभुः ॥ अशेषविश्वार्थकरो दशाकारवशी
महान् ॥ अभिषिपतिकरणाय दशतत्त्वजादेव्याः ॥ महामण्डलाचार्यपदाभिलाषिणेभ्निस्तथागतनियमः ॥ एवं दशतत्त्वजाः समर्पयित्वा शिष्यो [illegible] ॥ ततआ
दिशं प्रार्थयति ॥ इदानीं मया किं कर्तव्यं हे भगवन् सर्वपारमिताप्राप्तेन भावार्थीभूते ॥ इमां स्वकीयां भार्यां गृहीत्वा दशानां मध्ये न या सार्द्धं मम मध्येष
णं कुरु ॥ भिक्षुश्चावेशेन णां च चाण्डालीस्वभावा कर्तव्या ॥ ततो गुरुनियमेन तां गृहीत्वा कन्यादिकं शुभे मण्डलं ऊर्ध्वतो जिनेनाध्येषयमसः ॥ नमस्का
रं च कारयन् सर्वावरणहानये ॥ परमाक्षरसुखवापूर्णं ज्ञानकायनमोऽस्तु ते ॥ अनन्ताकरुणाभिर्बोधिचित्तपदक्षरं ॥ तेन सेकेन मे नाथ प्रशादं कुरु सांप्र
तं ॥ पुत्रदारादिभिः सार्द्धं दासोहं तव सर्वदा ॥ आबोधिमण्डपर्यन्तं नान्योऽस्ति शरणं मम ॥ इत्यध्येषितवत्सलं समत्विकं शिष्यं दृष्ट्वाचार्यः ॥ शब्दव
ज्रोमसर्वालङ्काराननपसार्य नग्नीकृत्वा लिङ्गयति ॥ गृहीत्वा स्तुभार्याया मातरं ॥ ततः पूर्वे तारा ॥ दक्षिणे पाण्डरा । उत्तरे मामकी । पश्चिमे लोचना ॥ आ

नेयां स्पर्शवज्रा॥ नैर्ऋत्ये रसवज्रा॥ इशाने रूपवज्रा॥ वायव्ये गन्धवज्रा इति॥ योगिनीचक्रेन ग्नं ठन्मे केशे कर्णिकाकमालक्ष्मीं विरचयेत् नवविद्याभिर्यथानु
क्रमेणेति॥ एवं पूर्वाभिषेकः॥ तोयादिना सप्तविधः॥ ॥ ततउत्तराभिषेकः सामान्यकर्म कृत्वा उत्तरोत्तराभिषेकः पूर्वोक्ताभिः ष्टृड्रादिभिः॥
मुद्रासमर्पणाय दशभिः॥ तोरैरष्टभिर्घटैः॥ जयविजयाभ्यां स्थापयेत् भिक्षुं। आवरणे तासां मध्ये पञ्चिठ्ठाभिश्चतुर्भिः कलशैः स्थापयेत् [illegible] विद्य
स्याभ्यांच पि॥ शृहस्तं तासां नवानां मध्ये एकया स्वभार्यया॥ एकेन विजयघटेन अभिषेचयेत्॥ पूर्वोक्तविधिना॥ ततो मुद्रां समर्पयेत्॥ कलशेसेकपाना
र्थमिति॥ ॥

सर्वालङ्कारयुक्तां तु कनकनिभां षोडशाब्दां तु कन्यां प्रशोभायात्मकेन स्वकलिशामणिना कामयित्वा सरागा॥ ज्ञात्वा शिष्यस्य
शुद्धिं कलिशमपि मुखे क्षेपयित्वा सवीजं पश्चाद्द्यात्तु मुद्रां त्वथ उनरपराक्ष्मनाज्ञादिउक्ता॥ १२० ॥

अत्र सर्वालङ्कारयुक्तां तु कनकनिभां षोडशाब्दां तु कन्यां विंशतिवर्षपर्यन्तां प्रशोभायात्मकेन देवतायोगेन वक्ष्यमाणेन स्वकलिशामणिना कामयित्वा सरा
गां रजस्वलां ज्ञात्वा शिष्यस्य शुद्धिं॥ उत्तरोत्तराभिषेके कलिशमपि मुखे क्षेपयित्वा सवीर्यं पश्चाद्द्यात्स्वमुद्रां आचार्येण यागालिङ्गिता॥ अथवा उत्तरसमा
र्पां स्वपमाचार्योऽपि गच्छति॥ ततः सेकधरो ज्ञात्वा शिष्याय तु ततः स्वभार्यां समर्पयेत्॥ अथवा प्रणयात्मना स्पर्शनमुपाकरोति॥ गुरोः शिष्यभार्या करो
ति कलशाभिषेके॥ तृतीयोऽभिषेके शिष्यभार्यायां मुखे वज्रं क्षिपेत्॥ शिष्यस्य अक्षिं बध्वा तरुः प्रणायानर नासिकां दर्शयेत्॥ ततो भार्याज्ञानेन स्वमुद्रां स
मर्पयेत्॥ आचार्य इति॥ सर्वत्र सेकविधिर्महाधिपत्ये॥ यदि दशतु जातदायां यो कामयितुं समर्थः शिष्यस्तां तां समर्पयेत्॥ अर्धरात्रात् पटिकाद्वयोर्ध्वया

वतमयेदं येनतेनो विसर्जयेत्॥ गछन्त्वकं॥ विसर्जयित्वा शिष्याय सम्वरं दद्यात्॥ इदं यन्मया कथितं संवृत्या विरमान्ते सहजक्षणं यच्छिन्नं त्रयानन्तेनाच्छिद्य त्या न भवति॥ विहत्या अणुमेतुरवं योगिनां॥ तेनेदं त्वया महासुखं रक्षणीयं॥ तथादिष्टं भगवान्॥ कर्मशुजावसंक्षेपि ज्ञानशुजात्रपाणि॥ रक्षणीयं महामोक्षं बोधिचित्तं द्वयवर्जितं॥ अंगुलिकृत्यं प्रतिष्ठाप्य बोधिचित्तेन बोधिसृजेत्॥ भावयेद्बुद्धविम्बत्रेवेधतुकमशेषतः॥ येनेनरक्षितेने वज्रधरत्वमिहजन्मनि॥ शीलसंभारसंपूर्णं पुरणज्ञानसमन्वितं॥ दशपारमिताप्राप्ताः सम्पूर्णाम्बर्धवर्जितं॥ अनेन सर्वसम्बुद्धैर्धर्मचक्रं प्रवर्त्तितं॥ अतः परतरं नास्ति ज्ञानं त्रैधातुकेश्वरं॥ सुस्वताकरुणाभिन्नं स्वपरार्थं प्रसिद्धये॥ यदिपालयसि मे पुत्र सम्वरं सर्वतायिनां॥ तत्पालयसि मे बोधिं सर्वबुद्धैरधिष्ठितः॥ अथ रागाभिभूतात्मान पालयसि सम्वरं॥ गृहीत्वा पुरतो भर्तुसन्नद्धा यास्यसि रौरवं॥ शुद्धचित्ताय दायोत्तो बोधिचित्तं ध्रुतं भवेत्॥ पसवालेन न दाग्राह्यं ज्ञात्वा तज्ज्ञोस्वजितह्येति॥ सम्वरं दत्वा आचार्यः शिष्याय॥ शिष्यो पि गुरुदक्षिणां दत्वा॥ पुनर्मण्डलं कृत्वा प्रार्थयेत्॥ ते भगवान् सेकप्रक्रिया प्रसादं करोतु॥ ततः शिष्यमामन्त्रयेद्गुरुः॥ श्रृणुत्वेयत्र यथा संवृत्या षोडशानन्दलक्षणं सर्वसत्त्वानां सुखं साधारणं शाविंशादधिक शालादिवृत्ते सुखूतं परमादिबुद्धानमस्तु वज्रगणकामाक्षोभमित्यादिति॥

वस्ता विभ्रान्तचित्ता शठपरवशगा व्याधियुक्ता प्रसूता कुब्जासक्तध्यापलोलानृतकलहरता स्वाङ्गहीनाऽविशुद्धा॥ सताः प्रज्ञाभिषेके सुनिपुणगुरुणा वर्जनीया नरेन्द्र प्रवीलाङ्गवभन्यागुरुसमयधरा वन्दनीयार्चनीया॥ १२१॥

इदं सर्वस्य जगतः कामामनस्मिक्षोभं करोति ॥ प्रथमानन्द इति ॥ ततः पूर्णतां याति पूर्णावस्थाकाललोदे बोधिचित्तपूर्णत्वात् प्रज्ञालिङ्गनादिना
द्वितीयः परमानन्द इति ॥ ततः पूर्ण उत्तमाङ्गात् मेघ्रे ज्वाला वस्था विन्दुं अवनिशाधाररंध्रावधिगतत्वात् तीयविरमानन्दं करोतीति ॥ ततो म
वस्था विन्दुच्यवनकाले कामवाकुचित विन्दु नामवसाने चतुर्विन्दुनिर्गमकाले सहजानन्दं करोतीति ॥ एवं प्रतिपदादि पञ्चपञ्च कलाभिरा
काशवायुतेज उदक पृथिवीस्वरूपाभिर्नन्दाभद्राजयारिक्तापूर्णाख्याभिः ॥ अरक्षउलृक ॥ अरहअरओअलूर ॥ हृयरवलाङि मितनहसर
धर्मिणीभिः ॥ एवं पञ्चमी आनन्दपूर्णा ॥ दशमी परमानन्दपूर्णा ॥ पूर्णिमा विरमानन्दपूर्णा ॥ सहजानन्द इति ॥ षोडशी कला सर्वधातूनां समा
हारो मेलापकः समाजः संवर इति ॥ एवं रागो बोधिचित्तस्य उक्तप्रकारः ॥ विरागः रूपमाह इति ॥ यथा नामसंगीत्यां ॥ अगुकावाह ॥ विरागा
दि महारागो विश्ववर्णोज्ज्वलप्रभः ॥ सम्बुद्धवज्रपर्यङ्को बुद्धसंगीतिधर्मधृक् ॥ इति ॥ तथा सर्वाकारो निराकारः षोडशार्धार्धबिन्दुधृक् ॥
अकलः कलनातीतश्चतुर्थध्यानकोटिधृगिति भगवतो नियमः ॥ एवं विहत्यां पञ्चमपटले महामुद्राज्ञाने चित्तवैराग्यकेन्द्रमिति ॥ ते नामनवि
स्वारितमिति ॥ ॥

कामाक्षोभं करोतीत्युत्तमनस्मिजगतः पूर्णतां याति पूर्णं पूर्णात् ज्वालातु विन्दुं अवनिशाधाररंध्रावधिन्वोत्तमाङ्गात् ॥
उष्णीषाद्धृत्कण्ठं प्रकृत्या ददनि वरतुरवं विन्दुमोक्षं प्रयाते आलोकस्पर्शसंगक्षरणतुरवमथानन्दभेदादिनेतत् ॥ १२२ ॥
कामानन्दं करोति प्रथममपि हृदयं चक्षुरालोकेनेनमपश्चात्पूर्णं प्रसङ्गे पुनरपि परमानन्दमेवं स्वकाये ॥ ज्वालाविन्दुं

अवनीरुद्धतिश्च विरमानन्दवक्त्रे च पद्मे तु ज्ञाविन्दुत्रयान्ते क्षरत्यतः सहजानन्दवज्रं करोति ॥ १२३ ॥
कामानन्दं तु कण्ठ्याक्षरमपि च चतुष्कोणयोगः स एकः पूर्णांशश्चेन्दुबिम्बे भवति च परमानन्दमेवं द्वितीयः ॥
ज्वाला बिन्दुश्च धूम्रा तु नरपि विरमानन्द एवं तृतीय ओंऽग्रानादश्च निद्राभवति च सहजानन्द एवं चतुर्थः ॥ १२४ ॥

इदानीं षोडशानन्दानां चतुर्योगाद् उच्यन्ते ॥ कामाहमित्यादिना ॥ इह सर्वसत्त्वानां जाग्रत्स्वप्नसुषुप्ततुर्याभेदेन कायवाक्चित्तज्ञानयोगः ॥ तिचानन्दादिभेदेन षोडश ॥ तत्र कामाह इति कायानन्दः ॥ आनन्द इति वागानन्दः ॥ कस्माद् इति चित्तानन्दः ॥ अक्षर इति ज्ञानानन्दः ॥ एवं चतुष्कोणाख्यानन्दयोग एक इति ॥ तथा पूर्णा इति ॥ कायपरमानन्दः ॥ अंशश्च परमानन्दो द्वितीयो नादिनाला इति ज्ञानवज्रांशि इन्दोर्बिम्बादिति ॥ अतः परमानन्द इति वाक्परमानन्दः ॥ उक्तं च इति चित्तपरमानन्दः ॥ ह्रीकारिति ज्ञानपरमानन्दः ॥ इति द्वितीयो योगः ॥ ज्वाला इति ॥ कायविरमानन्दः ॥ विरमानन्द इति वाग्विरमानन्दः ॥ धूम्रेति चित्तविरमानन्दः ॥ बिन्दुरिति ज्ञानविरमानन्दः ॥ इति तृतीयो योगः ॥ तथा ओंकार इति कायसहजानन्दः ॥ सहजानन्द इति वाक्सहजानन्दः ॥ निद्रेति चित्तसहजानन्दः ॥ नाद इति ज्ञानसहजानन्दः ॥ एवं चतुर्विधः कायः ॥ निर्माणसंभोगधर्मस्वाभाविकभेदेन ॥ वाक् चतुर्धा ॥ तथा चित्तं चतुर्धा । ज्ञानं चतुर्धेति । एवं षोडशानन्दभेदाः विस्तरेण वक्ष्यमाणे वक्तव्याः ॥ इति षोडशानन्दसहजमिति नियमः ॥ ॥

माता चित्तेन चिन्त्या भवति च भगिनीस्पर्शनालिङ्गनेन पुत्री वज्रप्रवेशे सकरुणसुरते भागिनेया च नित्यं ॥ भार्या बिन्दुप्रपाते त्वपरकुलगता योगिनी नष्टरागे एताः षड्योगमुद्राः क्षितिजलहुतभुग्वायुखोद्भेदभावा ॥ १२५ ॥

इदानीं कर्ममुद्राविशुद्धिरुच्यते ॥ मातेत्यादिना ॥ इह सर्वतन्त्रेषु मात्रादिमुद्रा साधारणेनौकायोगिनामनुरागरणाय ॥ सा च बोधिचित्तस्थिरीकृता नानान्येषां लोकव्यवहारिका स्त्री ॥ अवस्थाभेदेन मात्रिकाद्या भवन्ति ॥ इह यस्यां योगी स्त्रीचिन्तां करोति ॥ तस्या चित्तेन चिन्त्या सति माता भवति ॥ भगिनीस्पर्शनेन ॥ पुत्री वज्रप्रवेशेन भवति ॥ सकरुणसुरते सति भागिनेया भवति ॥ भार्या बिन्दुप्रपाते सति ॥ अपरकुलगता चण्डाली योगिनी नष्टरागे सति ॥ विरागात्स्वमीति ॥ एताः षड्योगमुद्राः पृथिव्यादयो योगिनीनां ॥ इह प्रथमं पृथ्वीधातुक्षोभः ॥ एवं तोयतेजोऽनिलाकाशधातूनां क्षोभः ॥ शुध्यानाच्यवनं ॥ अतः क्षितिजलहुतभुग्वायुखोद्भेदभावाः ॥ अवस्थाः षडिति ॥ एवं सप्तावस्थेमध्ये मरणलक्षणेऽपि च्यवनकाले वेदितव्या मात्रादिविशुद्धेति ॥ चक्रीकुण्डलकण्ठिकारुचकमेखलाभस्मविशुद्ध्या मुद्रा योगिनामिति ॥ तथा दानादिषट्पारमिता विशुद्धा इति नियमः ॥ ॥

अङ्गे वज्रप्रवेशः शिखिनि च मरुतो बिन्दुपातस्तृतीय एते योगत्रयस्य प्रकटितनियता कायवाक्चित्तमुद्रा ॥ रागाद्रागान्तगाया परमसुखनिधिर्योगगम्या चतुर्थी मुद्राणां सा तु माता भवति दशविधा श्रीगुरोर्वक्त्रमेषा ॥ १२६ ॥

इदानीं कायादिमुद्रात्रयमुच्यते॥ अथ इत्यादिना॥ इह सर्वतन्त्रेषु वाख्येनेयार्थेन॥ ललाटे कायमुद्रा॥ कण्ठे वाङ्मुद्रा॥ हृदये चित्तमुद्रेति। नीतार्थेन पुनः

अन्तेवज्रप्रवेशो वज्रस्य सदा उत्थाने कायमुद्रा॥ शिरसि निचमत्कृतः॥ मध्यनाड्यां प्राणवायोः प्रवेशो वाङ्मुद्रा बिन्दुपातः चित्तमुद्रा। एतेषां योगत्रयस्य मध्य

माश्रितस्य कायवाक्चित्तमुद्रा यथासंख्यं भवतीति तदुपरि रागाद्रागान्तगामीति॥ रागः शुक्लपक्षः। तस्मान्नागा अरागः कृष्णपक्षः॥ तस्माद्यास्सर्वं रागाद्रागा

न्तगा या षोडशकलास्थानीया यावन्न च्यवति तावत् सा सकलतलनिधिरक्षरसुखदायिका योगगम्या चतुर्थी॥ सहज योगेन गम्या योगिनां॥ नान्येषां मुद्रा

णां पूर्वापराणां॥ नवानां मासु माता जननी गर्भोत्पादकालाद्दामरणान्तं भवति॥ दशविधा॥ साधुमादिभेदेन दानादिपारमितार्थी वज्रसत्त्वस्य वक्त्रे म

साज्ञानवक्त्रं चतुर्थमित्यर्थः॥ स्वाभाविककायधर्मिणीसितिनियमः॥ एवं शिष्यस्य सेकार्थं मुद्रालक्षणं प्रतिपादयित्वा गणचक्रापनियमं दर्शनितरुः॥ तत्र

प। त्रिंशत्कलेदवतीर्निमन्त्रयेत् तन्मतोऽद्दिवाकाले कुमारकुमारिकानां दशकं पायसादिमधुराहारेण भोजयित्वा दक्षिणां दत्त्वा विसर्जयेत्॥ ततः सप्तप

टिकायां भिक्षुभिक्षुणीसंघं सन्तर्पयित्वा निरामिषेण मधुराहारेण च प्रथमं कृत्वा संपाद्य दक्षिणां दत्त्वा महार्घसंघेविहारे प्रवेश्य ततो निजे गृहे नि

धिंड्रवीरवीरेश्वरीणां गणचक्रविधानेन स्थानानि विचित्रयेदिति॥ अत्र विभवानुरूपेण नायको गुरुः प्रज्ञोपायात्मको मध्ये॥ चतुर्दिग्विभागे

चतस्रो योगिन्यः॥ मध्ये डोम्बी। पूर्वे शूद्री। दक्षिणे क्षत्रिणी। उत्तरे ब्राह्मणी। पश्चिमे वैश्यिनि। पश्चात्मको गणनायकः। आसामासनं। नरचर्म। श्वच

र्मि। अश्वचर्म। गजचर्माणीति। ततो द्वितीयं विदिक्षु ईशाने मुत्रभाण्डं वायव्ये विड्भाण्डं नैरृत्ये रक्तभाण्डं आग्नेय्यां मज्जाभाण्डमिति॥ ततो द्वितीयपरि

मण्डले चित्तचक्रस्थाने॥ पूर्वे कंशकारी। दक्षिणे वेणुनर्त्तकी। उत्तरे मणिकारी। पश्चिमे रजकी। आग्नेय्यां शालिनी। नैरृत्यां शोण्डिनी। ऐशान्यां

हेमकारी। वायव्यां मालाकारीति। योगिन्यष्टकं॥ आसामासनानि यथासंख्यं मेषचर्म। अरण्यश्वचर्म। उष्ट्रचर्म खड्ग सिंहचर्म अश्वचर्म हरिणचर्म॥ खरचर्म
॥ शूकरचर्माणीति॥ ततस्तृतीयपरिमण्डले वाक्चक्रस्थाने॥ पूर्वे वज्रिनी। आग्नेय्यां जम्भकारी। दक्षिणे कन्दुकी। नैरृत्ये गणिका। पश्चिमे शिविका। वाय
व्ये फेवनी। उत्तरे नटी। ईशाने रजकी। योगिन्यष्टकं॥ आसामासनानि॥ जम्बीरचर्म। कपर्दक उत्र कर्कटकि पुत्र शुष्कसर्म॥ मकरचर्म। दर्दुरचर्म। कूर्मक
रोटकं शंख इति॥ यथासंख्यं। ततश्चतुर्थपरिमण्डले कायस्थाने॥ पूर्वे लोहकारी। दक्षिणे लाक्षाकारी। पश्चिमे कोषकारी। उत्तरे तैलिनी। आग्नेय्यां वेणुका
री। नैरृत्ये काष्ठकारी। वायव्ये चर्मकारी। ईशाने नापिती। नित्यष्टकं॥ आसनानि॥ गण्डचर्म। व्याघ्रचर्म। ऋक्षचर्म। नकुलचर्म। चमरीचर्म। जम्बुकचर्म
उद्रचर्म। विडालचर्माणीति॥ ततः पञ्चमे परिमण्डले श्मशानस्थाने॥ पूर्वे म्लेच्छा। दक्षिणे हड्डी। पश्चिमे मातङ्गी। उत्तरे व्याधिनी। आग्नेय्यां वर्वरी॥
नैरृत्ये पुक्कसी॥ वायव्ये भिल्ली। ईशाने शबरी। इत्यष्टौ प्रचण्डा॥ आसामासनानि॥ गोधाचर्म। मूषकचर्म। शालिजातचर्म। कपिचर्म। शशकचर्म
शल्लकीचर्म। इष्टकपृष्ठचर्म। कृकलासचर्माणीति॥ एषां चर्मणामभावे॥ पूर्वे आग्नेय्यां श्वचर्म। दक्षिणे नैरृत्यां मत्स्यचर्म। पश्चिमवायव्यां गजच
र्म। उत्तरेशाने गोचर्माणीति। मध्ये नरचर्म। एवमासनानि दत्त्वा योगिनीर्निवेशयेत्॥ एभिश्चर्मभिः॥ पुत्तलिकां स्थापयेत्॥ तथा करोटकानि पूर्वे भृ
कुटिका। अग्नौ तथा॥ दक्षिणे नैरृत्ये नारिकेलकरोटकं पश्चिमे वायव्ये शरावः। उत्तरे ईशाने नरकपालं। मध्ये दारुपात्रमिति॥ ततो मद्यादिकं दत्त्वा
भक्ष्यभोज्यादिकं प्रदीपसहितं वक्ष्यमाणं दशप्रकारं तोयार्घादिकं दत्त्वा मण्डलं कृत्वा शिष्यः कर्मवज्रिभिः सार्द्धं पूजाद्रव्यं ढौकयेत्॥ इत्येवं गणचक्रे
स्थानजलनियमः॥ ॥
॥ ॥ प्रज्ञामानाः स्वमानास्त्रिभुवनजननी लोचनाद्या भगिन्यः षड्ज्ञा भागिनेयाः पृथुजनभयदानप्ररथ्यचिकाद्याः॥ चक्रस्थाः

सर्वकालं स्वकुलभुविगता योगिभिः सेवनीया क्षेत्रे पीठे श्मशाने न सकलविजने मोचनीयाः कदाचित् ॥ १२७ ॥

ततः पञ्चमपटलोक्तविधिना सञ्चारः कर्त्तव्यः । मिथुनेनैवेति ॥ ततः सञ्चारे प्रज्ञामातॄणां मध्ये गणनायिका सा तु मातेति । डोम्बी च चण्डाली चेति गणचक्रे सर्वत्र स्थितानां योगिनां । लोचना याश्च तेभ्यो योगिभ्यः ॥ शब्दवज्रायाः षट् । नीलादीजाभीदि भागिनेयिके ॥ पञ्चजनभयदानतत्परश्चर्चिकायाः शोनाथकरस्थाः सर्वकालं संचारेणागताः स्वकुलभुविगताः । योगिभिः सेवनीयाः । पीठे क्षेत्रे मेलापके । श्मशाने द्वादशभूम्यागताः शेवनीया सजने या ममध्ये गणचक्रे वा हि विजनेन मोचनीया कदाचिदिति नियमः ॥ ॥

श्रीवज्री श्रीजनेता त्रिभुवनजनको भ्रातरः सर्वबुद्धा नेत्र्या या भ्रातृपुत्रास्त्वपरबहुविधा नप्तारो नप्तृपुत्राः ॥ चक्रस्था योगिनीभिः स्वकुलभुविगताः सेवनीयाः प्रहृष्टा क्षेत्रे पीठे श्मशाने न सजनविजने मोचनीयाः कदाचित् ॥ १२८ ॥

सर्वस्मान्नत्याविवस्त्रामुक्तकेशाः करोदकर्त्तिकाहस्ताः संचरन्ति ॥ एवं श्रीवज्री आचार्यो डोम्ब इति श्रीजनेता स एव चाण्डालः नायकत्वात् ॥ डोम्बी चण्डाली उच्छिष्टभक्षणेन ॥ तन्मैथुनकरणादिति ॥ एवं कुलविशुद्ध्या योगिनां स्वमात्रादयो गोत्रजाभागताः स्वभुवि न वर्जनीयाः ॥ न तत्र लज्जा कार्येति योगिभिः श्रीवज्री श्रीजनेता त्रिभुवनजनको वज्रसत्त्ववत् द्रष्टव्यः ॥ भ्रातरः सर्वबुद्धाः ॥ भूपादयो हड्डिकादयः ॥ नेत्र्याः ॥ भागिनेयाः ॥ कंशकारादयः ॥ नप्तारो ष्टोरवड्डिकादयः ॥ नप्तृपुत्रा लोहकारादयः ॥ तत्सजनेन विजने मोचनीया योगिनीभिरिति ॥ परस्परचित्तविशुद्धिनियमः ॥ ॥

याकाचिद्वज्रप्रजांददतिहिवनिताउरएपहेतोस्त्रिउष्मा आचार्यायेन्दुवक्त्राउज्वलयलयनादिव्यगन्धानुलिप्ता॥ यन्तुरंपेभू
मिदानेगजतुरगरथानेककन्याप्रदाने तस्मात्तन्सर्वपुरंपंभवतिनरपते स्वस्थचन्द्रार्कसीम्नः॥ १२९ ॥

तत्रगणावेके याकाचिद्वज्रप्रजांददतिहिवनिताउरएपहेतोस्त्रिशुभ्रा॥ आचार्यायसवीरायचन्द्रवक्त्राउज्वलयनयनादिव्यगन्धानुलिप्तायन्तुरंपभूमिदा
नेगजतुरगरथानेककन्याप्रदानेभवति॥ तस्याद्योगिन्यास्तत्सर्वंउरंपभवतिनरपतेमत्यामत्त्वेन॥ स्वस्थचन्द्रार्कसीम्नोऽभयमित्यर्थः॥ ॥

नाराभ्रडीचतुर्धाभवतिभुविनतेपारडराक्षत्रिरीच क्ष्मावेश्मा त्रिप्रकारा द्विजजनजलजासप्तधामामकीस्यात्॥ शब्दाख्याका
न्तकारीखलुरस्तजलिशाक्षौरिडनीरूपवज्रा सम्पद्वेहेमकारी भवतिनरपतेगन्धवज्राधराणां॥ १३० ॥ २२९
मालाकारीप्रसीजाप्रकृतितरावशान्स्पर्शवज्राङ्ककारी वज्रान्नाधर्मधातुर्भवतिहिमणिकारीचलोकेप्रसिद्धा॥ चामुराड्डा
खड्गिकीस्यात्प्रकृतितरावशाद्वेष्याबीजमध्यकारी वाराहीकन्दुकीवेभवतिचगणिकाखञ्जुखीशीविकेन्द्री॥ १३१ ॥

इदानींनारादिजलादिभूजादिवर्णानुपमन्ते॥ नारेत्यादिना॥ इहमर्त्यलोकेकर्मानुरूपेणजलेनवभ्रडीचतुर्विधाभूमिचमकोगोपालामृत्तिकाकर्मकरोगृ
हादीनांस्फपतिकइति॥ एवंनाराभ्रडीचतुर्विधाभवतिभुविनले॥ पारडराक्षत्रिरीचतुर्धाभवत्रधर्मेण॥ वदन्ति॥ भभ्यवोरोगजारोहोरथारोहश्चेति॥ क्ष्मालो
चनावेश्यात्रिप्रकारा वेश्यधर्मात्॥ वणिककायस्थोवैश्यश्चेति॥ द्विजजनजलजामामकीसप्तधाब्राह्मणी॥ द्विजकर्मतः॥ स्मृतृशाखा॥ यजुःशाखा॥ शामशा

ख। अथ वेशांशाख। बारप्रस्थपत्नी॥ पतिपत्नी। ऊकपत्री। तिसप्रधा॥ ए वंशब्द वज्राकंशकारी। रसवज्रा शोरिदनी॥ रूपवज्रा सुवर्णकारी॥ गन्धवज्रा मा
लाकारी। स्पर्शवज्रा नच्छ्वापी॥ धर्मधातुवज्रा मणिकारी। रोङ्गाक्षी कूपकर्त्री। अतिनीला वेणु नर्त्तकी। डोम्बनटीति। तथा चाण्डाल खड्गिकी। वेश्या वी जम्भक
री। बाएही कन्तुकी। कौमारी वेश्या। ओन्द्री जीविका॥ ॥

ब्रह्माणी धीवरी स्यात् क्षितितलनिलये चेश्वरी नर्त्तकी च लक्ष्मी पूर्णेन्दुवक्त्रा भवति च रजकी चाष्टमी भूतयोनिः॥ रक्ताका
री च जम्भी भवति नरपते स्तम्भकी कोषकारी मालाख्या नेतपीजा सुरहदति वला लोहकारी चतुर्थी॥ १३२ ॥

ब्रह्माणी कैवर्त्ती। रौद्री नटी। लक्ष्मी रजकी त्यष्टौ॥ तथा जम्भी लाभाकारी॥ मानिनी तैलिनी। अतिवला लोहकारी॥ ॥

मारीची चर्मकारी स भवति भृकुटी काष्ठकारी तथैव श्रीउष्णानापिनी च क्षितिभुवनगता शृंखला वंशकारी॥ वज्राक्षी
कूपकर्त्री भवति च दशमी वेणुनृत्यातिशीला क्रोधागा क्रोधजाताः खलु दशवनिता योगिनी पूजनीया॥ १३३ ॥

मारेची चर्मकारी। भृकुटी काष्ठकारी। उष्णा नापितिनी। वज्रशृंखला वेणुकारी त्यष्टौ क्रोधजातीयाः॥ ॥

हेवज्री श्रीध्यानवक्त्रा भवति नरपते हड्डिनी शूकरास्या मातङ्गी जम्बुकास्या क्षितितलनिलये नापिनी व्याघ्रवक्त्रा॥ का

कास्या वर्वरी च शूकरास्तु नियता पुक्कसी गृध्रवक्त्रा भिल्ली तार्क्ष्यवक्त्रा भवति हि शवरी चाष्टमोलूकवक्त्रा ॥ ११४ ॥

श्वानास्या सिंही । शूकरास्या हड्डिनी । जम्बुकास्या मातङ्गी । व्याघ्रास्या नापिनी । काकास्या वर्वरी । गृध्रास्या पुक्कसी । गरुडास्या भिल्ली । उलूकास्या शवरीत्यष्टौ प्रचण्डा ॥ ॥

षट्त्रिंशद्वर्णभेदैः क्षितितलनिलये योगिनीनां कुलानि क्षेत्रे पीठोपपीठे विषयपुरवरे श्रीवने संस्थितानि ॥ मूर्खाणां वञ्चनानि प्रवरमहितले योगिनां सिद्धिदानि चत्वारः षट्पदाष्टौ सहदशवसवश्चैकमेकं क्रमेण ॥ १२५ ॥

एवं षट्त्रिंशद्वर्णभेदैः क्षितितलनिलये योगिनीनां कुलानि ॥ पीठक्षेत्रोपक्षेत्रविषयपुरवरे श्रीवने संस्थितानि ॥ मूर्खाणां वञ्चनानि प्रवरभुवितले योगिनां सिद्धिदानीति ॥ ॥ २३०

चत्वारोऽब्जभेदाः खलु पुनः षड्बोधिसत्त्वप्रभेदाः क्रोधानां दिक्प्रभेदाः क्षितितलनिलये प्रेतभेदास्तथाष्टौ ॥ दैत्यानां चाष्टभेदाः फणिभुवनगता योगिना वेदितव्या एकैको विश्वभर्तुस्त्रिभुवननिलये व्यापकः श्रीकुलानि ॥ १२६ ॥

एषां पुनर्भेदाश्चत्वारः ऽब्जादयः ॥ षट्शब्दवज्रादयः ॥ तथाष्टौ चर्चिकादयः ॥ दश क्रोधभेदाः ॥ ते योगेश्वर्यादिकुलप्रविष्टा वसवोऽष्टभेदाः ॥ श्वानास्यादयः एवं चत्वारोऽब्जभेदाः ॥ षड् बोधिसत्त्वप्रभेदाः ॥ प्रेतानामष्टभेदाः ॥ क्रोधानां दश ॥ दैत्यानामष्टभेदाः । फणिभुवनगता इति ॥ षट्त्रिंशद्भेदा योगिनीनां योगिनां

विदितव्याः॥ एकैको विश्वमातुस्त्रिभुवननिलये सत्रिंशतिमः॥ व्यापकः। श्रीजलाभामिति॥ ॥

पाताले ष्वष्टचण्डा दशदिशि वलये क्रोधजा मर्त्यलोके प्रेताख्याः प्रेतलोके सुरवरनिलये शब्दवज्रादिषट्कं॥ ब्र-
ह्माण्डे श्रीललाटे प्रवरशिवपुरे ऽप्येकमाता त्रिधातो विश्वं संहारयन्ति प्रकुपितवदनाः पालयन्त्येव तुष्टाः॥ १३७॥

एवं पातालेष्वष्टचण्डाः। अधोनास्यादयः॥ दशदिशि वलये क्रोधजा मर्त्यलोके॥ अष्टौ प्रेताख्याः प्रेतलोके। सुरवरनिलये शब्दवज्रादिषट्कं॥ षट्कामाव-
चराणां। ब्रह्माण्डे श्रीचतस्रः॥ ब्रह्मकायिकादीनां रूपिणां पृथ्वीकृत्स्नादिभावितानामरूपिणां आरूप्यधातुः॥ प्रवरशिवपुरे एकमाता ज्ञानधातुः प्रज्ञा-
पारमिता॥ एता विश्वंशरीरं संहारयन्ति॥ प्रकुपितवदनाः पालयन्त्यच तुष्टाः॥ इति योगिनीजलनियमः॥ ॥

बाला वृद्धा सुरूपा समलिननरवो ब्राह्मणी क्षत्रिणी च वैश्या शूद्रान्त्यजा वा गतनयनकरा छिन्ननासोष्ठकर्णा॥
आचार्यैर्बोधिहेतोः सकरुणहृदयैः पूजनीयाः समस्ताः प्रज्ञोपायेन राजन्व्यपगतकलुषैर्बोधिचर्यान्वरूढैः॥ १३८॥

इदानीं वज्रपूजानियमो योगिनीकर्मपूजासिद्ध्यर्थमुच्यते॥ बालेत्यादिना॥ इह गणचक्रे एकान्ते भावनाकाले वा विजने वा बाला वृद्धा सुरूपा वा समलिनं नन-
वो वा ब्राह्मणी वा क्षत्रिणी वा वैश्या वा शूद्री वा। अन्त्यजा वा। गतनयनकरा वा। छिन्नकर्णा वा। छिन्ननासा वा। छिन्नोष्ठा वा॥ इत्याद्यङ्गविकला आचार्यैर्योगिभि

र्वीबोधिहेतोः परमकरुणयासेवनीयाः समस्ताः प्रज्ञोपायात्मकेनयोगेनव्यपगतकलुषैः ॥ मानादिदोषमुक्तैः ॥ बोधिचर्यानुरूपैः ॥ सर्वसङ्गवासगृहच्छन्नैरिति भगवतो नियमः ॥ ॥

आद्ये स्त्री गुह्यमुद्रा भवति हि समये श्रीनरोद्दिव्यमुद्रा क्रीडाङ्के कर्म्ममुद्रा भवति समसुखे द्वीन्द्रियेर्द्धर्म्ममुद्रा ॥ दूतीनां पञ्च गन्धास्तु कमलगता जातयः पञ्च तासां कस्तूरी पद्म सूत्राः प्रकृतिगुणवशा दामिषः पूतिगन्धः ॥ १३९ ॥

इदानीं वज्रपूजायां चतुर्मुद्रासंज्ञोच्यते ॥ आद्यावित्यादिना ॥ इह समयमेलापके चतुर्द्धा संज्ञा ॥ आद्ये या प्रज्ञा स्त्री सा तत्र गुह्यमुद्रोच्यते ॥ श्रीनरो योगी उपायो दिव्यमुद्रा भवति समये । तयोर्मेलापके क्रीडायां चुम्बनादीनादिकं कर्ममुद्रोच्यते ॥ द्वीन्द्रियसंयोगे समसुखेर्द्धर्ममुद्रोच्यते ॥ चतुर्द्धा समयभाषा ॥ वज्रपूजायामुक्ता ॥ इदानीं दूतीनां शरीरे वा योनौ वा गन्धलक्षणमुच्यते ॥ दूतीनामित्यादिना ॥ इह दूतीनां पञ्च गन्धा भवन्ति ॥ तत्र गताः । कमलगता वा ॥ एवं जातयः पञ्च तासां भवति ॥ तत्र कस्तूरीगन्धः । पद्मगन्धः । सूत्रगन्धः । प्रकृतिरेकांशादि ॥ तस्य गुणवशात् । आमिषः । पूतिगन्धः ॥ ॥

२२१

श्रीमुद्रा पद्मिनी वै भवति जलचरी चित्रिणी हस्तिनी च श्रीस्तारा पाण्डराख्या भवति कुलवशान्मामकी लोचना च ॥ योगी सिंहो मृगोऽश्वो भवति च वृषभः कुञ्जरो जातिभेदा दक्षोभ्यो मोघसिद्धिर्विमलमणिकरो पद्मपाणिश्च चक्री ॥ १४० ॥

यथासंख्येन श्रीमुद्रा पद्मिनी शंखिनी चित्रिणी हस्तिनीति ॥ आसां कस्तूरिकादि गन्धो यथाक्रमेण भवति ॥ श्रीरिति । वज्रधात्वीश्वरी ॥ श्रीशुभद्रा । तारा । पद्मिनी । पाण्डु

रा। शंखिनी। चित्रिणी। लोचना। हस्तिनी चा। एवं योग्यपि पञ्चधा।। सिंहो मृगोऽश्वो वृषभः कुञ्जरो जातिभेदात्।। अक्षोभ्यः सिंहः। अमोघसिद्धिर्मृगः। रत्नसम्भवोऽश्वः। अमिताभो वृषभः। वैरोचनो गज इति।। ततः पूर्ववत्। गन्धनियमो जातिनियमश्चेति।। ।।

तन्वङ्गी सूक्ष्मकेशा मृदुकरचरणा वत्सलाक्षी सुभद्रा किञ्चिन्नम्री प्रलम्बा त्वचपलनयना पद्मिनी वक्रकेशा।। निर्लज्जा
तीव्रकामा बहुकलहरता शंखिनी स्वल्पकेशा दीर्घा सर्वाङ्गपूर्णा खलु लघुविषया चित्रिणी दीर्घकेशा।। १४१।।

इदानीं शरीरलक्षणमुच्यते।। तन्वङ्गीत्यादिना।। इह सुभद्रा तन्वंगी।। सूक्ष्मकेशा मृदुकरचरणा सत्ववत्सलेति। वज्रधात्वीश्वरी। एवं किञ्चित्प्रलम्बाऽचपलनयना पद्मिनी वक्रकेशेति तारा। तथा निर्लज्जा तीव्रकामा बहुकलहरता शंखिनी स्वल्पकेशेति पाण्डरा।। दीर्घा सर्वाङ्गपूर्णा खलु लघुविषया चित्रिणी दीर्घकेशेति मामकी।। ।।

स्थूला खर्वा दृढाङ्गी सुकठिनविषया हस्तिनी स्थूलकेशा स्त्रीनां शुद्धजातिः क्वचिदिह हि भवेत्सर्वदा मिश्रजातिः
सिंहश्चैकान्तवासी विषयविरहितो निर्भयस्त्यागशीलः शारङ्गः शीघ्रगामी खरलघुविषयस्त्रस्तचित्तोऽतिभीतः।। १४२

एवं स्थूला खर्वा दृढाङ्गी सुकठिनविषया हस्तिनी स्थूलकेशेति लोचना।। एवं स्त्रीनां शुद्धजातिः क्वचिदिह हि भवेत् सर्वदा मिश्रजातिः। षड्विंशतीनां नियमः।। ।। इदानीं योगिनां लक्षणमुच्यते।। सिंहश्चैकान्तवासी विषयविरहितो निर्भयस्त्यागशीलः।। अक्षोभ्य इति।। सारङ्गः शी

प्रगाभिसरलघुविषयस्त्रस्तचित्तोऽतिभीतः । अमोघसिद्धिरिति ॥ ॥ ॥ ॥

अश्वो वै कामलोलो भवति परवशो मूत्रगन्धः परार्थी स्तब्धाक्षो मन्दगामी प्रकृतिगुरुजडो मत्स्यगन्धो वृषः स्यात् ॥ कामी
वै मन्दगामी भवति खलु गजः पूतिगन्धोऽतिमूर्खः षड्विंशद्वर्णभेदः क्षितितलनिलये वर्णगन्धः स्वभावः ॥ १४३ ॥

अश्वो वै कामलोलो भवति परवशो मूत्रगन्धः परार्थी निरत्नसंभवः । स्तब्धाक्षो मन्दगामी प्रकृतिगुरुजडो मत्स्यगन्धो वृषः स्यादित्यमितनाभः ॥ कामी
वै मन्दगामी भवति खलु गजः पूतिगन्धोऽतिमूर्खः । इति वैरोचनः । इत्येवं कथितं शुद्धजातिः ॥ योगिनां सर्वत्र मिश्रजातिः ॥ एवं षड्विंशद्भेदभिन्नाः क्षि
तितलनिलये वर्णगन्धस्वभावा अन्योन्यमिश्रजाः स्मृताः ॥ ॥ ॥ ॥

पूजार्थं कामशास्त्रं बहुगुणनिलयं योगिनां वेदितव्यं नातुष्टा सिद्धिदा स्यात् सुरतमपि गता योगिनी योगिनश्च ॥ दि
व्या देवी पिशाची भवति च मनुजा राक्षसी नागिनी च दिव्या श्रीधर्मधात्री भवति गुणवशा छद्मवक्त्रा च देवी ॥ १४४ ॥
पैशाची गन्धवक्त्रा भवति च मनुजा रूपवक्त्रा नरेन्द्र क्रूरा सा राक्षसी या खलु रसकुलिशा नागिनी स्पर्शवक्त्रा ॥ दिव्या सत्वो
पकारी व्रतनियमरता संयमध्यानशीला देवी भोगातुरक्ता भवति हि मलिनो च्छिद्ररक्ता पिशाची ॥ १४५ ॥

अथ तासां दूतीनां पूजार्थं कामशास्त्रं बहुत्र सानिन्यं योगिना वेदितव्यमिति ॥ अतो यत्नेनानुष्ठात्सिद्धिः स्यात् उत्तममपि गता योगिनी योगिनस्थेन्येतो
ह्लोकिकसिद्ध्यर्थं कामशास्त्रं ज्ञातव्यमिति नियमः ॥ ॥ इदानीं दूतीनां धर्मधात्वादिजलक्ष्यते ॥ दिव्येत्यादिना ॥ इह दिव्या धर्मधातुः ॥ देवी शब्दवज्रा
पिशाची गन्धवज्रा । मनुजा रूपवज्रा । नागिनी स्पर्शवज्रेति ॥ तद्वदिव्या सत्त्वोपकारी व्रतनियमरता संयमध्यानशीला देवी भोगा उत्तमा प्रभवति मलिनो छि-
द्रकापिशाची ॥ ॥

जारी कामातुरक्ता नररुधिररता राक्षसी मारस्थिता क्षीरासा रागिनी च प्रवरमहितले योगिना पूजनीया ॥ एवं चान्ये स्वभावा
प्रकृतिगुणवशा योगिना वेदितव्याः षड्विंशाद्भेदभिन्ना क्षितितलनिलये खेचरी भूचरीणाम् ॥ १४६ ॥

नारीकामातुरक्ता नररुधिररता राक्षसी मारचित्ता ॥ क्षीरासा नागिनी स्यात् प्रवरभुवितले योगिना पूजनीया ॥ सर्वत्र पीठोपपीठादिके स्थिति नियमतः ए-
वं चान्ये मिश्रस्वभावाः प्रकृतिगुणवशात् योगिना वेदितव्याः ॥ चर्चिकादीनामिच्छाप्रतीच्छास्वभावेन वक्ष्यमाणविधिना साधनापटले ॥ एवं षड्विंशद्भेद-
भिन्नाः क्षितितलनिलये भूचरी खेचरीणां ॥ ॥

मध्ये प्रज्ञास्वभावं समधुकगुडजं धान्यजं वृक्षजं वा मुद्राहीनं पिबेद्यः स भवति विषयी चाहतो मारवृन्दैः ॥ तस्मा-
त्प्रज्ञाधियुक्तं सकलमलहरं मन्त्रिणां सिद्धिदं स्यान्मुद्रायां किञ्चिदस्मिन् समयविरहिता पानहेतोः प्रकुर्यात् ॥ १४७

इदानीं देशकस्य पाननियमम् उच्यते ॥ मद्यमित्यादिना ॥ इह सर्वं मद्यं प्रज्ञास्वभावे मण्डजं तु उडजं । धान्यजं वृक्षजं वा । अन्यथा तु ग्राहीनः पिबेयः ॥ आचार्यैः
सम्भवन्ति विषयी मद्यप इत्यर्थः ॥ आहतो मारहन्तेर्भवति ॥ तस्मात्प्रज्ञाभिषेकं कृत्वा अमलहरे मन्त्रिणां सिद्धिदं स्यादिति ॥ उत्तमा यो कांक्षितदस्मि मद्यपानं कौले
मण्डले गणचक्रं विना समयविरहितानपि पानं हेतोः प्रकुर्यात् ॥ वज्रपूजार्थमिति नियमः ॥ ॥

एको राजन् शशाङ्को मरणभयहरः सेवितः सर्वकालं प्रज्ञाधर्मोदयस्थो दिनकरसहितः किं पुनर्योगयुक्तः ॥ अक्षोभ्यो
ऽमोघसिद्धिर्जिनवरसहितः श्वाश्वगोहस्तिपक्षैः केशानां वज्रदण्डः पशुजनभयदश्चाष्टमोऽम्भोऽमितिरोजः ॥ १४८ ॥

येन चतुर्थसमयो भवति से विनीयो योगिनां तस्य तराउच्यते ॥ एको राजन् शशाङ्को मरणभयहरः किं पुनर्योगयुक्तोऽमृतकृन्न इत्यर्थः ॥ अक्षोभ्यामृतं अमोघसि- २३२
द्धिर्मज्जा जिनवरे वैरोचनः । तेन युक्तो मरणभयहरः ॥ तथाश्वाश्वगोहस्तिपक्षैः ॥ केशानां वज्रदण्डः पशुजनभयदश्चाष्टमोऽम्भोऽलिरोजः ॥ मद्यमांससमपदि
नि ॥ एवं विण्मूत्रमज्जा पञ्चप्रदीपाः ॥ अष्टसमयादीवन्नादिभ्यो एवं दशविधा पूजा पंचामृतैः पञ्चप्रदीपैर्भवति ॥ गणचक्रे इति ॥ मद्यपानं मैथुनं हतभक्षणानि ति
समयचतुष्टयं कर्तव्यं । आचार्येण ॥ अन्यथा मारहन्तैर्हृत्येनेति तथागतनियमः ॥ ॥

श्वाश्वो गो हस्ति मेषाः स्वजहरि राखराः शूकरोष्ट्रादितेच कुम्भीराखुः कुलीरो झष इति मकरो दर्दुरः कूर्म शंखः ॥ गरोडो व्याघ्र
ऋक्षः सनकुलचमरी जम्बुको क्रोविडालः आरण्यश्वा ससिंहो वसुदशाक मिदं भृतजं क्रोधजञ्च ॥ १४९ ॥

इदानीं षड्विंशात् समयाद् उच्यते ॥ योगिनां रूपपरिवर्त्तनेनेति ॥ स्याऽश्वेत्यादिना इहस्थानारा ॥ अश्वः पाण्डरा ॥ गौर्मर्मकी ॥ हस्ती लोचना ॥ वज्रधा-
त्वीश्वरी सर्वरूपधारिणीति ॥ सिंहः शब्दवज्रा । अजा स्पर्शवज्रा । हरिणी रसवज्रा । खरः रूपवज्रा । शूकरो गन्धवज्रा । उष्ट्रो धर्मधातुवज्रा इति ॥ दि-
गिति दशभुजे बोधिसत्त्वजलभेदेन ॥ तथा जम्बीरः चर्च्चिका । कपर्दिका वैष्णवी । जलीरो वाराही । मत्स्यः कौमारी । मकर ऐन्द्री । दर्दुरो ब्रह्माणी । कू-
र्म ईश्वरी । शंखो महालक्ष्मीति ॥ भूतजाष्टकं । गण्डा जम्भी । व्याघ्रः स्तम्भी । रूपी मानिनी । नकुलोऽन्ति मलाला ॥ चमरी वज्रशृंखला । जम्बुकोऽश्व-
कूधी । उद्रः कुम्भार विडालो मारीची । अरण्यश्वाऽतिनीला । आरण्यमहिषो रोऽजाक्षीति दशकं क्रोधजं ॥

गोराखुः शालिजातः कपिरपि शशकः शल्लकी खुक्कु कोष्ट्रे मानीपक्षी शुकश्च प्रकटितजलधिः कोकिला शारिका च ॥
सारसपारावतोऽन्यो बक इति चटकः चक्रवाकश्च हंसः श्रीजप्या कोकिलाक्षी रजकभगवती तित्तिरी सारमान्च ॥ १५० ॥

तथा गोधा काक्कास्या । मूषकः शूकरास्या । शालिजातकोऽनम्बुकास्या । कपिरपि व्याघ्रास्या । शशकः श्वानास्या । शल्लकी गृध्रास्या । इमुकः गरुडास्या । क-
कलासः उलूकास्येति ॥ अष्टौ असुरजातीनां समया ॥ रूपपरिवर्त्तनेन च ॥ एवं भूचरजलचरसमयनियमः ॥ ॥ इदानीं खेचरसमया
उच्यन्ते ॥ मानीत्यादिना ॥ इहाष्टादिचतुष्कं यथा ॥ तथा मानीपक्षी वानरः शुकः कोकिला शारिकेति ॥ प्रकटितजलधिश्चत्वारः ॥ समयास्तारा
दयः ॥ तथा शब्दवज्रादयः षट् ॥ लावः पारावतः बकः चक्रवाकः हंसः इति नियमः ॥ तथा भूतजाः समयाः ॥ अष्टौ कृष्णा कोकिलाक्षाः ॥ र

जकी। भगवतीति॥ पोतकी। तित्तिरः सारसः॥ ॥ नीलो विष्टो बलाकः सह रसवसवो वेदितव्याः क्रमेण काको गृध्रोप्युलूको मृगरिपुशिखिनौ
कुक्कुटो भेडघाराः॥ व्याजी वृक्षौ वरेण्यः प्रभवति दशकं क्रोधजं क्रोधजातिः नीलाक्षः श्रीचकोरस्त्वनिलगुडमुखो दुर्गिमार्येषु शायी॥ १५१ ॥

नीरविष्ट इति॥ जलकाकः॥ बलाक इति। वसवोष्टौ वेदितव्याः॥ चाउरङ्गादीनां क्रमेणेति॥ तथा क्रोधानां समया दश॥ काकः। गृध्र। उलूकः। मृगारि छागिति॥ महापाजी। शि
खी कुक्कुट। भेड इति सचाराः। घोर इति विज्ञा। फाजी वृक्षारी ति क्रोधजातिर्जम्भादिकं यथाक्रमेण॥ तथाष्टानां ग्या पञ्चो आसुरीणां समयाः नीलाक्षः॥ चकोरः। अनि
लः। वाग्गुलिका। उदकुस्व इति। डकीति। वानूहः। पार्वती पीटिग्निका॥ ॥

भेरुण्डश्चासुरीको भवति नरपते चाष्टमो दिव्यपक्षी षड्विंशज्जातिभेदैः क्षितिभुवनगना भूचरीखेचरीणां॥ पूजाका
ले समस्ताः कुलगतसमया योगिनी पूजनीया मूर्खो मोहात्कदाचित्त्यजति नरपते क्षिप्रनाशं प्रयाति॥ १५२ ॥ २३४

भेरुण्डः। अम्बरीक इति। नरपते काकास्यादीनामासुरीणां भवति॥ दिव्यपक्ष्यष्टकं एवं षड्विंशज्जातिभेदाः क्षितिभुवनगना भूचरीखेचरीणां॥ कासन्नति
समयाः॥ पूजाकाले समस्ताः कुलगतसमया योगिनाभवरीपास्ते उन योगिनीभिर्दत्ताः॥ मूर्खो मोहात्कदाचित् यागचक्रादिके दत्तान् समयान् त्यजति॥
तदा क्षिप्रं नाशं प्रयाति॥ उत्पत्त्या चिन्तनेनेति॥ ॥

दन्तैः केशैस्त्वगाद्यैः स्वपिसितमदनैर्वस्तिचर्मास्थि पञ्चैर्यकाभिर्लोमकीटैः प्रवरनरपते फुप्फुसैरन्त्रमेदैः॥ वार्यैः पि

त्वास्थुपूयैर्विविधनवगमैर्लोहितैः स्वेदमेदैः अश्रुश्वोरखेटसिंहाणिजलनमिवशावर्णगन्धेष्वनोयैः॥ १५३ ॥

मणानीं शारीरे वयवसमया उच्यते। दन्तैरित्यादिना। दन्तैः केशैः त्वग्भिः पिण्डीतैः। नहारुभिरस्थिभिर्वृक्कैः मज्जैर्योनिभिः। मूकाभिर्लोमभिः कीटैः फुप्फुसैः। अन्त्रैः मेढ्रैः। वसैः। पित्तैरसृग्भिः पूयैर्विविधनवगतैः सत्वानां शरीरे गतैरिति लोहितैः स्वेदैः मेदैः रश्रुश्वोरखेटकाश्वोसिंहाणाश्वो जलैर्लसिभिः वशाभिर्नानावर्णैर्नानागन्धैर्जिह्वाभिः रक्षिभिः करौर्नासिकाभिः शशीति शुक्रैः। दिनकरैरिति रजोभिः समपद्यैः दैवताः पूजनीयाः। योगिभिरिति नियमो गणचक्रे षड्विंशच्चाक्षरराशिना नासौ प्रकृतिगुणवशात्॥ आकाशादिधातुवशात् इति। ङ· घ ग ख क· ञ झ ज छ च· ण ढ ड ठ ट· म भ ब फ प· न ध द थ त· क्ष श ष स ह म र व ल क्ष इति॥ एवं बोधिपक्षाश्च धर्मा भगवत्या सार्धं सप्तत्रिंशत्॥ ॥

जिह्वाक्षिश्रोत्रनासास्तु गतिदिनकरे दैवता पूजनीया षट्त्रिंशच्चाक्षरराशिप्रकृतिगुणवशाद्बोधिपक्षाश्च धर्माः॥ षट्त्रिंशद्धातुभेदाः सकलनवगता ज्ञानपश्चिह्नमुद्रा षट्त्रिंशद्योगतत्त्वा रूपवनितलगतास्त्वत्र वै योगिनीनां॥ १५४ ॥

एवं षट्त्रिंशद्धातुभेदाः॥ अ आ इ ई ऋ ॠ उ ऊ ऌ ॡ अं अः॥ अ आ ए ऐ अर् आर् ओ औ अल् आल् अं अः॥ ह हा य या र रा व वा ल ला ह हः॥ इति षट्त्रिंशद्धातुभेदा एताः सकलनवगताः ज्ञानपः। षट्त्रिंशच्चिह्नानि षट्त्रिंशन्मुद्राः॥ एवं प्रत्येकाक्षरेण जनिता निस्वरसहितेन षट्त्रिंशद्योगतत्त्वानि। एवं योगिनीकुलतत्त्वानि॥ भगवत्या सार्धं सर्वे सप्तत्रिंशदात्मकं वेदितव्यमित्यवनितलगतानीति नियमः॥ शेषाणि सु

कल्पानि न भवन्ति॥ नानाव्यंजनधर्मत्वादिति एवं षड्विंशत्॥ कुलमण्डलानां वर्जनं योगिनीनां पूजा प्रतिपूर्णिमायां कर्त्तव्येति तथागतनियमः॥ ॥

तोयार्घं गन्धधूपं कुसुममपि फलं चाक्षतानि प्रदीपो नैवेद्यं चात्र वस्त्रं भवति हि दशके चक्रमेलापके च॥ शुक्रं मूत्रं च मज्जा विडपि च पिशितं कालजं पित्तरक्तं अन्त्रं चर्माणि राजन् भवति दशविधं चक्रमेलापके च॥ १५५ ॥

इदानीं चक्रमेलापके अर्घादि कथ्यते॥ तोयेत्यादिना॥ तोयपात्रं। अर्घपात्रं। गन्धपात्रं। धूपपात्रं। पुष्पपात्रं। फलपात्रं। अक्षतपात्रं। प्रदीपपात्रं। नैवेद्यपात्रं। वस्त्रपात्रं। एवं दशविधे पूजाद्रव्यं। गणचक्रमेलापके पूजार्थं मण्डलचक्रेपि॥ तथाध्यात्मद्रव्यं दशविधं भवति॥ शुक्रं मूत्रं च मज्जा विट् पिशितं कालजं पित्तं रक्तं अन्त्रं चर्माणि भवति दशविधं चक्रमेलापके योगिनीनां पूजाकर्मार्थं॥ राजन्निति सम्बोधं॥ ॥ २३५

वज्रे खड्गश्च तारा: शतदलकमलं पंचमं चक्रचिह्नं वीणा दर्शश्च पात्रं भवति नरपते पुष्पमाला च वस्त्रं॥ वंशो धर्मोदयो वै भवति नरपते शब्दवज्रादिचिह्नं एवं वै कर्त्रिकाद्यं कलश इति तथा कन्दुकं पीतवस्त्रं॥ १५६ ॥

इदानीं तारादिकुलोत्पन्नानां षड्विंशच्चिह्नान्युच्यन्ते॥ इह गणचक्रे वा प्रविष्टानां ग्रामे वा नगरे वा स्थितानां योगिनीनां॥ यस्याः ललाटे वा उभयस्कन्धे वा वामे स्तने वा कटिप्रदेशे वा कायवर्णोत्तरा॥ एवं परवर्णान्तरमधिगतं भवति॥ तच्चिह्नं वर्णतो वेदितव्यं॥ यत् पुनर्हस्तपादतले भवति तद्रेखाभिर्वेदितव्यं॥ तेन यो

गिनीनांकरग्रहणात्पनारीउरूषलक्षणेष्विभिनस्यं।।येनपरस्त्रियोपिहस्तंस्वकीयेलक्षणार्थंसमर्पयंति।।तेनव्यपदेशेननासांशारीरस्वकांहस्तपाद
तलस्कंधादिलिखितंवाचिह्नंवेधितव्यमित्युपायः।।तत्रयस्यावज्रंपश्चकुजन्मस्थानेषुवर्णितोहृश्यते।।सावज्रधात्रीश्वरीकरतलेषामादेवारेखाभिः।।
तिनसाभाग्यशधर्त्तकलिनी।।एवंखड्गंनारायाः।।वाणोवारत्नेपारहारायाः।।शतदलकमलमामक्याः।।पद्मसंचकेचिह्नंलोचनायाः।।चाडेतेजठद
कपृथ्वीजलानांचिह्नानि।।तथावीणाशब्दवज्रायाः।।आदर्शोरूपवज्रायाः।।पात्रंरसवज्रायाः।।उत्पमालागन्धवज्रायाः।।वस्त्रंस्पर्शवज्रायाः।।धर्मोद
याधर्मधूतवज्रायाः।।पश्चसुजन्मस्थानेषुहस्तपादेषुबाहृश्यते।।विषयजलजानामिति।।शब्दवज्रादिचिह्नं।।एवंवैकर्णिकायामष्टविधः।।तत्रक
र्णिकाचर्चिकायाः।।कलशीवैष्णव्याः।।करंकेकंपाराज्याः।।पीतवस्त्रंकौमार्याः।।   ।।

शूचीवाअङ्कुशोवाप्रकटितनियतामत्स्यजालंतृतीयंलक्ष्मीचिह्नंशिलावैभवतिनरपतेचाष्टमंभूतजालं।।जं
आदेरक्तपात्रंदिनकरशहशंकोशकीटःकृशाश्चशस्त्रीचोपीनहीचक्षुरकइतितथापादुकाचातपत्रं।। १५७ ।।

शूचिर्वाअङ्कुशोवाऐन्द्र्याः।।मत्स्यजालंब्रह्माण्याः।।त्रिशूलंरौद्र्याः।।शिलाचतुरस्रंलक्ष्म्याः।।इत्यष्टचिह्नानि।।भूतजानामपरामजलजानामि
ति।।तथाकोषजानांदशकं।।तत्रसम्भाअलक्तपत्रंदिनकरसदृशंवर्तुलं।।सप्तम्याःकोशकीटः।।ऊर्णामाधिन्याः।।अग्निबलायाःछुरिका।।उपावछू
मारेन्याः।।क्षुरकःकुन्दायाः।।पादुकाभूजयाः।।आतपत्रंवज्रशृङ्खलायाः।।   ।।

जटालं वेणुदण्डं प्रभवति दशकं क्रोधजानां सुचिह्नं गोष्ठं मल्लं तन्त्री भवति करतले भ्राजदी मांसखण्डं ॥ वीरो
पाशञ्च कारण्डं भवति च शिखिनः पिच्छमात्राष्टमञ्च षड्विंशच्चिह्नभेदाः प्रवरभुवितले योगिना पूजनीया ॥ १५८ ॥

जटालं रौद्रास्याः । वेणुदण्डमग्निवक्त्रायाः ॥ एवं भवति दशकं क्रोधजानां स्वचिह्नं द्विधा कर्मेन्द्रियाणामिति ॥ तथा आसुरीणां चिह्नं ॥ गोष्ठं श्वाना
स्यायाः । मल्लमिति सरावं शूकरास्यायाः ॥ तन्त्री जम्बुकास्यायाः ॥ भ्राजदीव्या घ्रास्यायाः ॥ मांसखण्डं काकास्यायाः ॥ वीरोपाशं किंनरा गृध्रास्यायाः ॥ का
रण्डं गरुडास्यायाः ॥ मयूरपिच्छं उलूकास्यायाः ॥ इत्यष्टचिह्नानि ॥ उरवाषष्टगारभ्या ॥ अष्टकुलानां दृश्यन्ते ॥ एवं षड्विंशच्चिह्नानि यासां दृश्यन्ते तास्त
त्कुलिन्यः ॥ तेन चिह्नेन ज्ञात्वा पूजनीया इति ॥ योगिनीनां नियमः ॥ ॥

भूयः शृङ्गादिचिह्नं भवति तृणवशा उत्पलं वा हलं स्यात् क्षत्रियापारत्नपद्मं भवति नरपतेर्लिखनी रत्नमाला ॥ वैश्यायाः
स्याद्देवं जलचरसहितं ताम्रपात्रं द्विजाभ्यामात्रश्चिह्नं च मुण्डी डमरुकपट्टं मौलिरेवाक्षसूत्रम् ॥ १५९ ॥

भूयः पुनः शृङ्गादिचिह्नं नारादीनां उच्यते ॥ इह शृङ्गतृणवशात् ॥ नाराकुलजानां उत्पलं वा हलं वा संदृश्यते ॥ क्षत्रियायाः पारदरकुलजायाः ॥ रत्नपद्मं
रेखनी रत्नमाला ॥ वैश्यायाः लोचनाकुलजायाः ॥ जलचरं शंखः ॥ ताम्रपात्रं द्विजाभ्याः ॥ मामकीकुलजायाः ॥ एवं पूर्वापरं मातुः चिह्नं चतुर्णां ॥ डमरुकं
पट्टं डोम्ब्या वज्रधात्वीश्वर्याः कुलजायाः ॥ तथा मौलिर्वाऽक्षसूत्रं च राजन्याः प्रज्ञापारमिताकुलजायाः ॥ एवं लक्षोदेस्कन्धेवाक घाम्बा ॥ हस्तपादे तु वा यस्या

मध्येस्थितं हृदयेन ग्रहेवालिखितेपूजये तस्मात तदुज्ज्वलिनी योगिनोवेदितव्या तयापद्मंतंस्तमयपङ्क्षांत तक्षणीपंपावहसन्त्रावर्तिनत्पर्यवस्यति॥ तन्ता
रेवचरत्वेतेनतस्मयपङ्क्षेणाभवतीतिनियमः॥ ॥

विष्ठामूत्रेचचक्रकंभवतिसंपिण्डितंदेवतीनांचतुष्कं कर्णेनासाक्षिजिह्वागुदमपिचभगेशब्दवज्रादिषट्कं॥ पूयःश्ले
ष्माचयूकाकृमकलसिवशालोमकेशाष्टकंच अन्त्रेपित्तास्थिमज्जाविविधतनुगतेकालजंकुस्फुसेच॥ १६० ॥

इदानींविष्ठादीनांसमयषट्कानांपृथिव्यादिदेवताविशुद्धिरुच्यते॥ इहविष्ठामूत्रचक्रकंसंपिण्डितंयथासंख्यंपृथिव्यप्तेजोवायुदेवतीनांचतुष्कंभव
तीति॥ शुक्रंवज्रधात्वीश्वरीआकाशधातुरन्त्यापि॥ एवंकर्णेनासाक्षिजिह्वागुदंभगंशब्दगन्धरूपरसस्पर्शधर्मधातुदेवीनांसमयषट्कं॥ शब्द
वज्रादिषट्कमिति॥ एवंपूयः श्लेष्मा यूका। कृमिकः॥ लशिवसालोमानिकेशाइति॥ समयाष्टकंचयथासंख्यं। चर्चिका। वैष्णावी। वाराही। कौमा
री। ऐन्द्री। ब्रह्माणी। रौद्री। महालक्ष्मीयोगिनीनां अष्टानामिति॥ तथान्त्रेपित्तं। अस्थीनि। मज्जाविविधतनुगतेसर्वसत्त्वानांतनुगतेकालजं
कुस्फुसे॥ ॥

नाडीचर्माग्निचक्रंभवतिचदशकंमेदशुक्रंनदेन्द्र कर्णेनासाक्षिवक्रेखगतमपिमलंपायुमध्येभगेच॥ कक्षाग्र
स्थाङ्काघोभवतिनरपतेचाष्टकाश्मश्रुरीणां योगिन्योऽष्टाष्टकाःस्युःसहनखदशनाद्वादशाङ्गाःकपाले॥ १६१॥

नाडीचर्मरोमचतुष्कं भेदे एवं दशकं भवति अत्रादिकं भेदपर्यन्तं यथासंख्यं॥ यम्भी मानी अतिबला वज्रशृङ्खला भृकुटी उन्मादा मारेची। ऐरावती भतिनीला। आसां क्रोधदेवतीनां समपदशकमिति॥ एवं कर्णमलं नासिकामलं अक्षिमलं उदमलं भगमलं लिङ्गमलं कक्षमलं सर्वाङ्गमलमिति समयाष्टकं॥ आतुरीणां यथासंख्यं। श्वानास्या शूकरास्या जम्बुकास्या व्याघ्रास्या। काकास्या गृध्रास्या गरुडास्या उलूकास्या॥ आसां समयाष्टकमिति तथा योगिन्यो भीमादयो याष्टाष्टकाश्चतुःषष्टिकास्तासां समया नखा त्रिविंशतिर्दन्ता द्वात्रिंशत्॥ द्वादश स्वराङ्गानि। कपालनाडीप्रवाहभेदेनेति॥ चतुःषष्टीः समयाः एवं शतजलभेदेन शतसमयाः॥ त्रिजले पञ्चजलेऽपि चैव॥ स्वभावैकैकशतजलमिति वचनात् षड्विंशत् जलानि॥ चतुःषष्टिजलानि॥ योगिनीनामेकत्वे शतजलानि भेदितव्यानीति नियमः॥ ॥

विण्मूत्रे रक्तमांसे विविधतनुगते पीठभेदे चतुष्कं कर्णो नासाक्षिजिह्वागुदमपि च भगं क्षेत्रभेदे च षट्कं॥ भूयाभाः
केशसीम्नोः क्षितितलनिलये चाष्टछन्दोहभेदा अत्राद्यामेदसीम्नो दिशति चनृपे मेलापकस्य प्रभेदाः॥ १६२॥ २३७

इदानीं पीठादिभिः समयविशुद्धिरुच्यते॥ विण्मूत्ररक्तमांसमिति॥ सकलसत्त्वानां विविधानां तनुगतपीठभेदे चतुष्कं॥ कर्णनासाक्षिजिह्वागुदभगमिति षट्कं॥ क्षेत्रभेदे भवति। तथा भूयश्लेष्मा पूयकाकमिले क्षिवसा लोमकेशा इत्यष्टौ छन्दोहभेदाः॥ तथाऽस्रं पित्तं अस्थीति मज्जा कालजं ऊरुस्नायुनाडीचर्मरोमचतुष्कं भेदैर्दशकं॥ मेलापकस्य भेदाः॥ ॥

कर्णादन्ताष्टकाये खलु विविधमला निर्मलानप्रभेदाः कालाग्नीन्द्वर्कराहुप्रकटितनियते पीठभेदे चतुष्कं॥ भीमाः

सोमश्च मन्त्रीभृगुशनिफणिनः क्षेत्रभेदे च षट्कं पृथ्वी तोयाग्निवाताः क्षितिजशलिलजा वातजा वह्निजाश्च॥ १६३ ॥
अष्टौ छन्दोहभेदाः पुनरपि च तथा षड्रसा वर्णभेदाः स्पर्शः शब्दस्तथैव प्रकृतिति तदशमेलापकस्य प्रभेदाः॥ पृथ्वी तो-
याग्निवाय्वः क्षयमपि पुरतो वामसव्ये च पूर्वे वर्णादीनां चतुर्णां विदिशि निधनताष्टश्मशानप्रभेदाः॥ १६४ ॥
तथा कर्णमलं। घ्राणमलं। अक्षिमलं। जिह्वामलं। भगमलं। गुदमलं। कक्षमलं। अष्टाङ्गमलमिति॥ अष्टौ श्मशानप्रभेदाः॥ तथा वाह्ये लोक-
धातौ पीठादिविशुद्ध्यास्मसमया उच्यन्ते॥ इह कालाग्निः। इन्दुः। अर्कः। राहुः। पीठभेदे समयचतुष्कं। लोचनादीनाम्। भोमः। शुक्रश्च मन्त्री भृगु-
शनिः फणीति केतुः॥ सर्वे रूपवज्रादीनां क्षेत्रभेदसमयाः॥ तथा पृथ्वी तोयं तेजो वायुः क्षितिजाः सलिलजाः॥ वह्निजाः। वातजाश्च। इत्यष्टौ
स्थावरजङ्गमाभूता छन्दोहभेदे भूतजातानां समयाइति॥ पुनरपि च तन्नः षड्रसाः॥ गन्धः। वर्णः। शब्दः। स्पर्शः। इति दशमेलापकस्य भेदाः॥ औ-
षधजानामिति। पृथिव्यादीनां चतुष्कं वर्णादीनामपि षट्कः॥ स्वाशानिः स्वासाभ्यामिति श्मशानस्य प्रभेदाः॥ आसुरीणां अष्टौ समया इति पीठादि
वाह्याभ्यन्तरसमयविशुद्धिनियमः॥ ॥

पीठं तारादिवेश्म स्फुटरवकुलिशाद्यं तथा क्षेत्रयुक्तं छन्दोहं चर्च्चिकाद्यं प्रभवति तृपमेलापके जन्मिकाद्यं। श्वा-
नास्याद्यं श्मशानं परमशुभिगतं स्थलपीठं सगुह्यं मातृवेश्म द्विधा तत्प्रकटितमवनौ चान्त्यजं चान्त्यजन्मे॥ १६५ ॥

पीठं स्त्रीगुह्यपद्मं प्रभवति सनं यत्र वज्रेण योपपीठं क्षेत्रं छन्दोहमेलापकश्चेति भुवनेन द्धदेवं समस्तं ॥ पीठं वामाङ्गपू
र्णं ह्यपरमपि तथा दक्षिणं चोपपीठं एवं क्षेत्रादि सर्वं करचरणगतं चाङ्गुलीकान्तसीम्नः ॥ १५६ ॥

इदानीं पीठादिस्थानान्युच्यन्ते । पीठमित्यादिना ॥ इह सामान्येन बालानां देशभ्रमणार्थं जालन्धरादिना पीठादिकमुक्तं ॥ तदेव सर्वव्यापकं न भवति कार्ध्वें शाहजलात्रिपुतरेफनगर्भामपि तिष्ठन्ति योगिनीनां ॥ येनात्र परमादिबुद्धे सर्वपृथ्वीव्यापकत्वात् ॥ यो ग्रामादिचीनादिविषये यथापि पीठादीनि सन्ति तान्येव लघुतन्त्रान्तरे सादेशितानि सर्वेन गर्भा पीठादिभुक्तानि । एवं नारादिवेश्म चतुर्विधं । तथा शादवज्राग्रं वेश्म क्षेत्रं षोडशविधं । चर्चिकायं वेश्म छन्दोहमष्टविधं मेलापके यक्षिकायं वेश्म दशविधं । श्मशानास्याग्रं वेश्मं श्मशानाष्टविधं । परमशून्यविगते मूलपीठं सगुणं तत्र वेश्मविधानत्र कृदिनसर्वतो चान्त्यजं चान्त्यजं वेडोम्बी चण्डाली गृहमिति ॥ एवं बुद्धादिकं गृहं पीठादिसंज्ञायां योगिना वेदितव्यमिति सर्वत्र नियमः ॥ इदानीं मध्यात्मपीठादिसंज्ञोच्यते । पीठमित्यादिना ॥ इह समये मेलापके पीठे सर्वत्र स्त्रीपद्मं भवति ॥ उपपीठं स्थानेन पुरुषवज्रं भवति ॥ एवं स्त्रीणां वज्रान्तं क्षेत्रं पुरुषाणामुपक्षेत्रं ॥ तथा स्त्रीणां समानवायावष्टकं छन्दोहं पुरुषाणामुपछन्दोहं ॥ एवं स्त्रीणां जिह्वालम्बनं करद्वयं पादद्वयं पायुसबीजतरं ॥ मूत्रशुक्रनाडीद्वयं तस्मात् कर्मेन्द्रियदशकं मेलापकं पुरुषाणामुपमेलापकं ॥ एवं प्राणद्वये मेढ्रे मलनिर्गमे श्रोत्रद्वये चक्षुर्द्वये मुखे गुडे च एवं श्मशानाष्टकं स्त्रीणां पुरुषाणामुपश्मशानमिति समस्तं ॥ तथा भयशरीरे प्रत्येकं पीठं वामाङ्गपूर्वं । उपपीठं पश्चिमं । दक्षिणाङ्गं । एवं द्विधा पीठं । तथा वामेन्द्रियसमूहं क्षेत्रं ॥ दक्षिणेन्द्रियसमूहमुपक्षेत्रं ॥ एवं कूर्मस्कवरंदिवद्द जघनअयचतुष्कं छन्दो

हं॥ समानउदानव्यानं नागसमूहं उपछन्दोहं। तथा वामे कर्मेन्द्रियसमूहं मेलापकं। तथा दक्षिणे कर्मेन्द्रियसमूहमुपमेलापकं॥ वामक-
र्णादिछिद्रमलनिर्गमं श्मशानं। दक्षिणमुपश्मशानमिति॥ तथा करचरणादिगतमैंशपरविश्रब्धा॥ पूर्वे वामांसे पीठं। दक्षिणं
पश्चिममुपपीठं। तथा वामवाहुसन्धिः वामोरुकटिसन्धिः क्षेत्रं। दक्षिणमुपक्षेत्रं। वामोपवाहुसन्धिः। जानुसन्धिश्छन्दोहं॥ दक्षिण-
मुपछन्दोहं। तथा करपादसन्धिद्वये वामे मेलापकं दक्षिणमुपमेलापकं॥ वामाङ्गुलिनखानि श्मशानं। दक्षिणमुपश्मशानं। अथवा उ-
भयवाहुसन्धिद्वयं क्षेत्रं उरुसन्धिद्वयमुपक्षेत्रं। एवं छन्दोहादिकमपि करचरणगतमपि चाङ्गुलिकान्तसीमाः इति समयमेला-
पके पीठादिसमयसंज्ञा योगिना वेदितव्या॥ ॥

देव्योर्ब्धिस्मृत्युपस्थानतव भवति ते कालचक्रप्रसिद्धे प्रज्ञाबोध्यङ्गमाना त्वपरमपि तथा शब्दवज्रादिषट्कं। अब्धिः
सम्यक्प्रहाणान्यपरजलधयश्चर्द्धिपादाष्टकं स्यात्पंच क्रोधा बलानि प्रकटित नियतानीन्द्रियाण्येव पञ्च॥ १६३॥

इदानीं सप्तत्रिंशद्बोधिपाक्षिकधर्मैर्योगिनीनां विशुद्धिरुच्यते। देव्योब्धिरित्यादिना॥ इह चतस्रो देव्यो यथाक्रमेण। कायानुस्मृत्युपस्था-
ने लोचना। वेदनानुस्मृत्युपस्थाने पाण्डरा इति। पश्चिमदक्षिणे। चित्तानुस्मृत्युपस्थाने मामकी। धर्मानुस्मृत्युपस्थाने तारेति। वामपूर्वे का-
यभेदेन पीठोपपीठद्वयमिति॥ कायचक्रे प्रसिद्धं॥ नान्यस्मिन्तन्त्रे प्रसिद्धं गोपितं भगवतेत्यर्थः॥ तथा सप्तबोध्यङ्गानां मध्ये स्वं बोध्य

ङ्गं मानावज्रधात्वीश्वरी जलपीठ उपेक्षासंबोध्यङ्गमिति॥ अपरमपि तथा शब्दवज्रादिबद्धमिति॥ स्मृतिसंबोध्यङ्गं शब्दवज्रा॥ धर्मप्रविचयसंबोध्यङ्गं स्पर्शवज्रा॥ वीर्यसंबोध्यङ्गं रूपवज्रा। उपधेर्वै कायभेदात्॥ तथा प्रीतिसंबोध्यङ्गं गन्धवज्रा॥ प्रश्रब्धिसंबोध्यङ्गं रसवज्रा। समाधिसंबोध्यङ्गं धर्मधातुवज्रेति। एवंविधा। तथाब्धि सम्यक्प्रहाणानीति॥ अनुत्पन्नानां पापानामनुत्पादाय प्रहाणं चर्चिका। उत्पन्नानां पापानां प्रहाणं कुशलमूलं वैष्णवी॥ अनुत्पन्नानां कुशलानां प्रहाणं कुशलोत्पादने माहेश्वरी॥ उत्पन्नानां कुशलानां वृद्ध्यत्वपरिणामनाप्रहाणं महालक्ष्मीः॥ उपधदेहस्थत्वात्॥ अपर जलधपश्चतत्त्वोदेशः ऋद्धिपादा भवन्ति॥ तत्र छन्दऋद्धिपादो ब्रह्माणी॥ वीर्यऋद्धिपादः ऐन्द्री। चित्तऋद्धिपादो वाराही। मीमांसाऋद्धिपादः कौमारीति छन्दोहभेदहत्स्थकं स्यात्॥ तथा पञ्च कोषबलानीति इह श्रद्धाबलमनिनीला। वीर्यबलमनिबला। स्मृतिबलं वज्रशृङ्खला॥ समाधिबलं मानी। प्रज्ञाबलं तु चन्द्रसूर्यमेलापकं। तथा प्रकृतितनियतानीन्द्रियाण्येवं पञ्चेति॥ तथा श्रद्धेन्द्रियं स्तम्भी। वीर्येन्द्रियं मारीची। स्मृतीन्द्रियं यम्भी। समाधीन्द्रियं भ्रजदी॥ प्रज्ञेन्द्रियं रैडाक्षीति मेलापकमेवं दशाकं॥ ॥

सम्यग्ज्ञानाष्टाङ्गमार्गो भवति नरपते चाष्टके देहजानां सप्तत्रिंशत्प्रभेदैस्त्रिभुवननिलये बोधिपक्षाश्च धर्माः॥ योगिन्यस्ताः समस्ताः क्षितिजलनिलये योगिनो वेदितव्या एवं पीठादि सर्वं भवति नरपते बाह्यदेहे च तद्वत्॥ १६८ ॥

सम्यग्ज्ञानाष्टाङ्गमार्गो भवति नरपते चाष्टकं देहजानामिति॥ इह सम्यग्दृष्टिः श्वानास्या। सम्यक्संकल्पः काकास्या। सम्यग्वाग्व्याघ्रास्या। सम्यक्कर्मान्त उलूका

स्या। सम्यगाजीवो जम्बुकास्या॥ सम्यग्व्यायामो गरुडास्या। सम्यक्स्मृतिः शूकरास्या। सम्यक्समाधि गृध्रास्येति॥ एवं सप्तत्रिंशत्प्रभेदैस्त्रिभुवननिलये बोधिपाक्षिकाधर्मा ये॥ योगिन्यस्ताः क्षितितलनिलये योगिनो वेदितव्या डोम्ब्यादयः॥ एवं सप्तत्रिंशद्बोधिपाक्षिकधर्मैर्विशोधितं पीठादिकं धर्मकायलक्षणं भवति॥ नरपतेर्वा येदेहे च तद्वदिति सर्वत्र नियमः॥ ॥

बौद्धः शैवोऽथ नग्नो भगवदिति तथा स्नातको ब्राह्मणो वा कापाली लुञ्चकेशो भवति शितपटः क्षेत्रपालस्तु कौलः॥ मौनी चोन्मत्तरूपोऽप्यकलुषहृदयः परिडिनश्चात्र एव योगी सिध्यस्य हेतोर्लवनमिव जले लब्धतत्त्वोतितृप्तः॥ १५८॥

इदानीमेषामाराधनार्थं योगिनां चर्याधर्म उच्यते॥ बौद्धेत्यादिना॥ इह कालचक्रतन्त्रराजमण्डलेऽभिषिक्तः सर्वे मण्डले स्वभिषिक्तस्तीर्थिकानामपि साधकः॥ देवतीदेवतीनां हरिहरादीनां चर्च्चिकादीनां मण्डलविशोधितानां तेन योगी लब्धतत्त्वाभिषेकः॥ बौद्धो वा भवतु साधनाय ज्ञानस्य बौद्धिकस्य वा कर्मप्रसवस्य शैवो वाऽथ नग्नो भवतु परमहंसः॥ भगवतो वा स्नातको वेति॥ तथा ब्राह्मणो वा। कापाली वा लुञ्चकेशः क्षपणको वा। भवतु शितपटो वा क्षेत्रपालो वा भवतु शुद्धः॥ मौनी वा॥ उन्मत्तरूपो वा॥ कौलो वा अकलुषहृदयः परिडिनश्चात्रो वा योगी सिद्ध्यर्थहेतोः सकलतृणानिधिर्लब्धतत्त्वो नरेन्द्रयोरेवं तेमनसस्तां चर्यां करोतु यावत्सिद्धिर्भवति॥ तेनो लोकानिकानां करोतु सामर्थ्यतः सकाशादिति तथागतनियमः॥ ॥

इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां द्वादशसाहस्रिकायां विमलप्रभायां प्रतिष्ठागणचक्रविधियोगचर्यामहोद्देशः पंचमः॥ ॥

अङ्गुष्ठात्तर्जनीया पुनरपि च तथा मध्यमानामिका च तस्यान्ते वै कनिष्ठा सकलगुणनिधिर्लब्धतत्त्वो नरेन्द्रः॥ मुद्रार्थं नामभेदो
भवति गुणवशादङ्गुलीनां क्रमेण बन्धो क्षे वज्रबन्धो भवति नियमतो मुष्टिबन्धे च तद्वत्॥ १७० ॥

देवेशोकरमुद्राभिस्थापितायेनदृष्टिभिः॥ प्रणम्य कालचक्रं तं वक्ष्ये मुद्रादिलक्षणं॥ यथोद्धृतं महातन्त्रात्स्वल्पतन्त्रे स्वयाग्मिना॥ वितनोमि टीकया सर्वं
मुद्रादृष्ट्यङ्गहोमकमिति॥ इह मुद्राबन्धार्थं स्वाङ्गुष्ठकादिपञ्चाङ्गुलीनां संज्ञा इति प्रथमाङ्गुष्ठः॥ ततो द्वितीया तर्जनी तृतीया मध्यमा च तुर्या अनामि
का तस्या अनामिकाया अन्ते कनिष्ठा सकलगुणविधिराकाशधातुत्वात्॥ योगिनां वेदितव्या आचार्योपदेशेनेति। एवं मुद्राबन्धार्थं नामभेदो भवति गुणा
वशात्॥ गन्धा। रूपा। रसा। स्पर्शा। शब्द गुणवशादिति क्रमेण॥ एवं बन्धो क्षे सति वज्रबन्ध इति भवति॥ नियमितो मुष्टिबन्धे कृते सति वज्रमुष्टि
बन्ध इति नियमः॥ तद्वदेवेति वचनात्॥ ॥

मूर्ध्नी वज्रासनस्थो भवति जिनपते वज्रमुद्रोरुमूर्ध्नि पर्यङ्के वामहस्तो भवति भुवि गतो दक्षिणो जानुदेशात्॥ अस्य
शीर्षेक्षोभ्यमुद्रास्वपि वरदकरो दक्षिणोरत्रपाणो वामोर्ध्वे सव्यहस्तो भवति नरपतोत्तानकं पद्मपाणेः॥ १७१ ॥
वामे पर्यङ्कमूर्ध्नि ह्युपरि करतलं चाभयं खड्गपाणेः सव्ये मुष्टावसव्या खलु पुनरपरा तर्जनीमुष्टिबन्धे॥ मुद्रा
वैरोचनस्य मुष्ट हृदयगता चापरा चक्रमुद्रा तर्जन्यङ्गुष्ठयोगः प्रकट इह भवेन्मध्यमादेः प्रसारः॥ १७२ ॥

इदानीं जिनपतेर्मुद्रोच्यते॥ इहाभयकरेण वज्रमुष्टिबन्धो अङ्गुष्ठो मूर्ध्या निपीडितो सव्यावसव्योरूर्द्ध्वि वज्रासनस्थे वज्रमुद्रा भवति॥ इदानीमक्षोभ्यमुद्रोच्यते॥ पूर्वपर्यङ्कं कृत्वा तत्पर्यङ्के वामहस्तो भवत्युत्तानको दक्षिणोऽपि विगतो दक्षिणजानुदेशात् भूस्पर्शं यावत्॥ एवं भूस्पर्शाक्षोभ्यमुद्रेति॥ अपिच्चैतेनैव क्रमेण किं तूत्तानको दक्षिणकरो रत्नपाणेर्वरदमुद्रेति॥ एवं पर्यङ्के वामहस्तोर्ध्वेन सव्यहस्तः समगतो उत्तानकः पद्मपाणेरमिताभस्य समाधिमुद्रेति॥ एवं वामकरतलमुत्तानकं पर्यङ्कमूर्ध्नि अपरं दक्षिणकरतलं दक्षिणजानूपरि अभयप्रदं॥ खड्गपाणेरमोघसिद्धेरभयमुद्रेति॥ एवं सव्यमुष्ट्यावसव्यमुष्टौ स्थानजेनी वामा सा उत्तरपरं ऊर्द्ध्वमुष्टिबन्धेन जेनी प्रविष्टा इयं बोधश्रीमुद्रा वैरोचनस्य। स्फुरद्धृदयगता॥ तथा चापरा धर्मचक्रमुद्रा तर्जन्यङ्गुष्ठयोगो वामे दक्षिणकरेऽपि कटकहस्तवद्भवेत् वामवलयनखमेलापके दक्षिणनखमेलापकं देशनायोगेन मध्यपादे; प्रसारः॥ अनामिकायाः कनिष्ठायाः किञ्चिदूर्ध्वमिति हृदयप्रदेशे धर्मचक्रमुद्रा॥ एवं षट्तथागतानां नियमः॥ ॥

वामे हस्तेऽस्तु पूर्णो विमलशशधरो दक्षिणे वज्रसूर्यः सूर्येन्दोः संपुटस्थं भयकरकुलिशं क्रोधजं पञ्चसूकं॥ ध्यात्वा
ङ्गे स्पर्शनीयं समुकुटशिरसा रश्मपादान्तमेव एषा श्रीदिव्यमुद्रा कलुषमलहरा कालचक्रस्य राजन्॥ १७३ ॥

इदानीं दिव्यमुद्रोच्यते॥ इह स्वशरीरे महाकवचार्थं वामे हस्ते तु पूर्णो विमलशशधर इति॥ इह अकारादिपञ्चदशस्वरात्मकं चन्द्रमण्डलं वामे हस्ते तु पूर्णं विमलशशधरं पञ्चदशकलापरिपूर्णमिति॥ अइऋउऌ। अए अऐ ओ अल हयरवला इति स्वराः॥ एवं दक्षिणहस्ते वज्रसूर्यः

पञ्चदशाक्षरात्मकः॥ आकारादयाह॥ आ ऌ औ आ ऋ ऐ आ ॡ ऊ ॠ ई आ इतिहृदः संपूर्णः॥ अनयोः स्कंधेयोः सर्व्वोत्पत्तिं त्रिवज्रभयंकरं फलं वज्रं कोभजमिति कुंकारजं पञ्चशूकं ध्यात्वा तेन वज्रेण वक्ष्यमाणया वज्रमुद्रयास्य वीजं स्पर्शनीयं॥ सत्त्वज हृदि निउष्णीषसहितं शिरसा स्पर्शयामासे पादनखपर्यन्तमेव॥ एषा श्रीदिव्यमुद्रा सर्व्वरक्षाकृत् त्रयमलहरा कालचक्रस्य राजत्॥ ॥

यत्किंचिद्वाह्यवस्तु क्षितिजसलिलजं गर्भजं स्वेदजाद्यं मन्त्रेपात्तं सवीर्य्यं तदमपि चरणं मुद्रयास्पर्शनीयं॥ यद्यत्कार्य्यं पयोगं भवति तु रणवशात्तस्य तद्योजनीयं भूम्यां यं मण्डलार्थं चरणमपि गतो योगिना नाडनीयं॥ १०४ ॥

तथा अनया मुद्रया यत्किंचिद्ग्राह्यं वस्तु क्षितिजं सलिलजं गर्भजं वा स्वेदजं वा आदिशब्देन अण्डजं वा समन्त्रं॥ तथा वैपात्तं सवीर्यं मांसैः सह वक्ष्यमाणाक्रमेण शोधनीयं बोधनीयं प्रदीपनीयमिति॥ एवं तदमपि चरणं देवतामूर्त्तौ स्वचरणं गमनार्थं यत्र यत्कार्य्यं प्रयोगं यद्वस्तु भवति तु रणवशात् सत्त्वरजस्तमोगम्यादिविषयवशात्॥ तस्य कार्यस्य तन्मुद्रया स्पृष्ट्वा योजनीयं भूम्यां यं मण्डलार्थं चरणमपि गन्तव्यं योगिना ताडनीयमनया मुद्रयेति दिव्यमुद्रा॥ ॥

हस्ताभ्यां वज्रबन्धो भवति खलु महाक्रोधराजस्य मुद्रा तर्जन्या यत्र बन्धं त्रिभुवनविजया मुष्टिबन्धेन भर्त्तुः॥ चित्तोक्ता रास्तु शेषाः प्रकटितनियता देवतादेवतीनां हस्ताभ्यां वज्रबन्धो भवति च सफलाकारमुद्रा परीणां॥ १०५ ॥

इदानीं क्रोधनाथस्य मुद्रोच्यते॥ इह हस्ताभ्यां वज्रबन्ध इति॥ इह सव्यहस्तो वामहस्तमणिबन्धोपरि गत्वाऽधः प्रविश्य बाहूपबाहुसन्ध्युपरि व
ज्रमुष्टिना स्थितः॥ एवं वामहस्तोपि वज्रबन्धे भवति खलमणा क्रोधनाथस्य मुद्रा वज्रवेगस्येति॥ तथा तर्जन्या घण्टाबन्ध इति॥ इह तर्ज
न्योः परस्परमङ्कुशबन्धः॥ अनन्तरतिकनिष्ठयोर्द्वयोर्बन्धः करपृष्ठयोगेन मुष्टिबन्धोऽङ्गुष्ठो मुष्टिमध्ये एवं त्रिभुवनविजयाभङ्गी
स्त्रैलोक्यविजयस्य हृदये स्थितेति॥ चिह्नाद्या राज्ञि शेषाः प्रकटितनियता देवतादेवतीनामिति॥ तथा नागानां मुद्रा हस्ताभ्यां
वज्रबन्ध इति॥ इह वामबाहूपबाहुसन्ध्युपरि दक्षिणबाहूपबाहुसन्धिबन्धेन वामकरे पबाहुसन्धिं दक्षिणकरे पबाहु
सन्ध्युपरि वामदक्षिणहस्तौ चलत्फणाकारौ एवं चलत्फणाकारमुद्रा फणीनां एवं सव्यावर्जेनापि वेदितव्येति॥ ॥

श्लिष्टाङ्गुष्ठौ कनिष्ठौ कमलदलसमे मध्यमे सारिते च तर्जन्यौ द्वेऽर्द्धवक्रे स्वकरतलगतेऽनामिके कुञ्चिते

च॥ मूर्द्धे यस्यै चिह्नका भवति हि ज्वलितो वज्रिणा दर्शनीया आकाराङ्गुलीकाग्रभवकरतलेऽङ्गुष्ठकाग्राः समस्ताः॥ १२६॥

इदानीं चिह्नमुद्रोच्यते॥ श्लिष्टेत्यादिना॥ इह पश्चपृष्ठकवज्रमुद्रायाः करसम्पुटं कृत्वाऽङ्गुष्ठौ श्लिष्टौ कनिष्ठिके द्वे
श्लिष्टे कमलदलसमेन मध्यमे द्वे प्रसारिते मध्ये तर्जन्यौ द्वे वक्रेऽर्द्धचन्द्राकारे मध्यमयोः पृष्ठभागे स्वकरतलगतेऽना

निकेजङ्घिने ऽधः ॥ एवं मुद्रेयं पद्मपुष्पिका भवति हि जलिशो वज्रिणो दर्शनीयेति ॥ दिव्यमुद्रा पीयं पूर्वोक्तेति ॥ तथा आराकाराङ्गुलीका उभमध्द्र
गता अङ्गुष्ठकाग्राः समस्ताद् अन्यपरा वज्रमुद्रा प्रज्ञालिङ्गनायेति ॥ ॥
द्वौ हस्तौ वज्रबन्धौ भवति हि जलिशं वज्रमुष्ट्या सबन्धा मुष्ट्यर्द्धं तीक्ष्णा खड्गे भवति शरसमे तर्जनी मध्यमे च ॥ तर्जन्याग्रा
स्त्रिश्लिष्टाः पुनरपि विरला स्वर्द्धमुष्ट्या त्रिशूले श्रीकन्यौ मुष्टिबन्धौ भवति भयकरा श्रीकनिष्ठार्द्धन्वकाः ॥ १७७ ॥
तथा द्वौ हस्तौ वज्रबन्धौ पूर्ववद्भवति हि वज्रमुष्ट्या ॥ जलिशो दक्षिणाङ्गुर्द्धकनया ॥ वामे ऽधो मुष्ट्या परशा भवति ॥ तथा मुष्ट्यर्द्धमनामिकाकनि
ष्ठा मुष्टिमध्ये अङ्गुष्ठमेव मुष्ट्यर्द्धं तीक्ष्णा खड्गे भवति ॥ शरसमे तर्जनी मध्यमे वश्लिष्टे हस्तोर्द्धं खड्गमुद्रा ॥ तथाङ्गुष्ठमुष्ट्यर्द्धं तर्जन्याग्राह
ति ॥ तर्जनी मध्यमाऽनामिका त्रिशूलाकारा विरला पुनरर्द्धमुष्ट्या त्रिशूलमुद्रा विषमार्थे सप्तमीति सर्वत्र ॥ तथा श्रीकन्यौ मुष्टिबन्धौ भवति क
निर्द्धं वज्राकारा भयकरा पुनस्तन्नामिति कर्त्तिकामुद्रा ॥ ॥
कर्णोर्द्धं मुष्टिबन्धे भवति वरकरे ऽङ्गुष्ठकं मध्यमोर्द्धं तर्जन्यत्यन्त्यवक्रा भवति रूपतथैवाङ्कुशो मुष्टिबन्धः ॥ स्त्रे
तर्जन्यमायाया भवति शरसमा मध्यमोर्द्धश्च जङ्घे तिर्यग्मुष्टिश्च दरोऽङ्गुसमकरतले ऽङ्गुष्ठसारः कुठारः ॥ १७८ ॥
कर्णोर्द्धं मुष्टिबन्धो वरशरमुद्रायां अङ्गुष्ठं मध्यमोर्द्धं तर्जन्यावक्रांतिशरमुद्रा ॥ अङ्कुशो वज्रमुष्टिबन्धस्तर्जनी मुष्ट्युर्द्धमङ्कुशाकारा वक्रात्यन्त्यमित्य

ङ्कुशमुद्रा॥ तथा कनिष्ठाङ्गुष्ठाभ्यां मुष्टिः तर्जनीअनामेऽधः शरसमाश्लिष्टेन योरुपरि मध्यमाङ्गुले एवं कुन्तमुद्रा॥ तथा तिर्यग्मुष्टिश्च वाहुप्रसारादतो
मुद्रा भवति॥ तथाङ्गुष्ठमकरतले ऊर्द्ध्वमङ्गुष्ठप्रसारात् तिर्यग्विभागेन तर्जन्या पार्श्वतमः श्लिष्टा एवं कुठारमुद्रा भवति॥ ॥

ऊर्द्ध्वमुष्टिद्वयं स्यादखुरपतिगजस्याजिने तर्जनीयं दंष्ट्रायां मुष्टिबन्धोऽप्युभयकरतले चार्द्धचन्द्रो कनिष्ठा॥ वामे वाहु
प्रसारे भवति करतले चोर्द्ध्वगं स्फेटके च खट्वाङ्गे छिद्रमुष्टिर्भवति च त्रिपनास्कन्धसारा कनिष्ठा॥ १७९ ॥

तथा ऊर्द्ध्वमुष्टिद्वयं स्यादखुरपतिगजो विनायकः तस्य चर्ममुद्रायाम् ऊर्द्ध्वतर्जनीमुष्टिद्वये वीतिगजे चर्ममुद्रा॥ तथा दंष्ट्रायां मुष्टिबन्धोऽप्युभ
यकरतलेऽर्द्धचन्द्राकारे कनिष्ठस्याबस्य पृष्ठवदर्शयेत्॥ एवं दंष्ट्रामुद्रेति॥ दक्षिणहस्ते चिह्नमुद्रा गजचर्मदंष्ट्रामुद्रा निषमः॥ इदानीं वा
मे हस्ते चिह्नमुद्रोच्यते॥ इह वामे वाहुप्रसारो भवति करतलम् ऊर्द्ध्वगम् अभयप्रद करतलवत्॥ स्फेटके फलके एवं फलकमुद्रा॥ ॥ तथा खट्वा
ङ्गे छिद्रमुष्टिस्तर्जनीमध्यमाऽनामाङ्गुष्ठाः श्लिष्टाः स्कन्धस्थाने कनिष्ठोर्द्ध्वप्रसारिता एवं खट्वाङ्गमुद्रेति॥ ॥

अङ्गुल्याश्लिष्टपाणिः कमलदलमिव श्रीकपाले कृतोर्द्ध्वं पानावज्ञानमुष्टिर्भवति धनुषि वै वामबाहुप्रसारः॥ तर्ज
न्यारूढवक्रो भवति च नियता मध्यमा वज्रपाणे रत्ने बन्धोऽङ्गुलीनां भवति नृपविकाशश्च पद्मे च तासो॥ १८० ॥

तर्जन्यङ्गुष्ठयोगो भवति जलचरेऽङ्गुष्ठकाधश्च मुष्टिः आदर्शे मेरुखं स्यात्सुसमकरतलं साङ्गुलीकं सछिद्रं ॥ त
र्जन्या धूर्ध्वं चक्राक्रमपरिरचिताङ्गुष्ठकष्टं खलीयामङ्गुष्ठायाश्च नस्त्रः शिरसि समस्तखं जश्चिनाधः कनिष्ठा ॥ १०१॥
तथा कपाले अङ्गुल्यच्छिद्रपाणिः कमलदलवत् कपालमुद्राउत्तानकेति ॥ तथा प्रसारितपाणाउत्ताना मुष्टिरूर्ध्वं मुष्टिरेवं वज्रमुद्रा
तथा वाममुष्ट्यूर्ध्वं तर्जनीमात्रत्वा वकामध्यमाद्वयोर्मध्ये छिद्रं एवं वज्रपाशः ॥ एकहस्ते मुद्रेयं ॥ अपराहस्तद्वयेन वरुणामुद्रेयं
दक्षिणायामपयेन वज्राङ्कुशेन दृश्यते ॥ एवं पाशमुद्रेति ॥ तथा बन्धोमेलापकः ॥ पञ्चाङ्गुलीनां मध्ये मध्यमां कृत्वा ऊर्ध्वपा
णाविनिरत्नमुद्रा ॥ वामहस्ते पद्ममुद्रायामङ्गुष्ठश्लिष्टे तर्जन्यादिसु एवमङ्गुलीनां विकाशश्च तद्दलकमलवत् उभयह
स्ताभ्यां अष्टदले भवति ॥ एवं पद्ममुद्रेति ॥ तथा डमरुके मध्यमानामिकाभ्यां मुष्टिबन्धः ॥ अङ्कुशाकारेण तर्जनी अङ्गुष्ठन
खापरि कनिष्ठार्ध्वं चक्रेति ॥ तथा उदरे मुष्टिबन्ध इति ॥ चक्रे सर्वाङ्गुलीनामाराकारेण प्रसार एकहस्ते उभयहस्तकरत
लसंपुट इति ॥ तथा तर्जनीअङ्गुष्ठयोर्योगोऽङ्गुष्ठाधः कनिष्ठादिमुष्टिरङ्गुष्ठतर्जनी प्रसारिता शंखमुद्रेति ॥ आदर्शामि
रुखं ससमकरतलं वामेति दर्पणमुद्रायां अङ्गुलीकमच्छिद्रं तथा तर्जन्या दिकं कृत्वा कनिष्ठापर्यन्तमङ्गुष्ठोर्ध्वं तर्जनी
वकाक्रराङ्गलाकारेण तदुपरि मध्यमा मध्यमोपरि अनामा अनामोपरि कनिष्ठा एवं शृङ्खलामुद्रेति ॥ तथा ब्रह्मशिरसि अ

ङ्गुष्ठायाश्च तस्याः समभूरवाबन्धयोगेनाधोमुखा कनिष्ठाङ्गुष्ठिनेति शिरोमुद्रा॥ ॥

हस्ताभ्यां शङ्खमुद्रा भवति हि मुकुटे तर्जनीद्वन्द्वयोगः पंचाङ्गुल्येकयोगोऽपि च करतलयोः पृष्ठतः कुण्डलस्य॥ पाणौ पृष्ठेऽङ्गुलीनां क्रमपरिरचितं बन्धनं कण्ठिकायां अङ्गुल्यस्यास्वयोगो भयकरकुटिलाग्रतर्जन्योर्मेखलायां॥ १८२ ॥

तथा हस्ताभ्यां शंखमुद्रा श्लिष्टा मुकुटे भवति हस्तद्वयतर्जनीद्वन्द्वयोगः॥ उभयहस्तयोर्विषमकरतलदेशः पञ्चाङ्गुलीनां पृष्ठतः कुण्डले स्थिति॥ कुण्डलमुद्रा॥ तथा पाण्योः पृष्ठेऽङ्गुलीनां क्रमपरिरचितपरस्परं बन्धनं कण्ठिकायामेवं कण्ठिकामुद्रा॥ तथा मेखलायां अङ्गुल्योऽनामामध्यमातर्जन्यो वामसव्ययोरङ्गुल्यग्रे मेलापकः कनिष्ठाङ्गुष्ठायामुष्टिबन्ध इति मेखलामुद्रा॥ ॥

अङ्गुष्ठौ मध्यमे द्वे वलयविमक्तौ नूपुरे मुष्टिबन्धात् वक्ते केयूरयुग्मे भवति च कटके तर्जनीद्वन्द्वयोगः॥ अङ्गुष्ठो डाकिनीनां भवति वरकुले तर्जनीत्रपिकानां गन्धर्वीराणां करणीनां क्रमपरिरचिता मध्यमानामिका वा॥ १८३ ॥

तथोभयहस्तयोरङ्गुष्ठे द्वे मध्यमे द्वे श्लिष्टे ताभ्यां वलयइवकृते नूपुरे शेषाङ्गुलीभिर्मुष्टिबन्ध इति नूपुरमुद्रा॥ तथा केयूरे कटके वाऽङ्गुष्ठयोगस्तर्जनीयोगो वलयइव भवतीति भगवतश्चिह्नमुद्रा॥ इत्यनीजलमुद्रोच्यते॥ अङ्गुष्ठस्यापिमा॥ इह सर्वासां डाकिनीनां साधारणमङ्गुष्ठदर्शनं वज्रमुष्टय

रिङ्फलंमुद्राभवति॥ तथावज्रमुष्ट्युपरितर्जनीप्रसारितात्तत्स्थकानांपक्षाणांफलमुद्रा॥ तथागन्धर्वाणांमुष्टिबन्धात्प्रसार्यदर्शितात्फलंभवति॥
एवंकृरीनामनामिकाफलंभवति॥ ॥

भूतानांश्रीकनिष्ठाप्रवरकरतलंराक्षसानांफलंस्यात् सिद्धानांमुष्टिबन्धोभवतिवरफलंपर्वसन्धिःस्वराणां॥ पञ्चाङ्गु
ल्यर्द्धचन्द्रवक्राऽभयकरतलंजातिमुद्रानखीनां तर्जन्यौद्वेऽर्द्धवक्रेखलुशिरसिगतेशृङ्गिणांमुष्टिबन्धात्॥ १८४॥

भूतानांकनिष्ठादर्शितात्फलंभवति॥ तथोर्द्ध्वंचतुरङ्गुलीभिर्मुष्टिबन्धःकरतलंप्रकटितंदर्शितंराक्षसानांफलंस्यात्॥ सिद्धानांमुष्टिबन्धोदर्शित-
फलंभवति॥ तथाऽसुराणांबाहूपबाहुपर्वसन्धिःफलं॥ तथाप्रेतराक्षसस्यहस्तपृष्ठतले॥ तथोपबाहुकरसन्धिदर्शितान्नराणांफलंस्यात्॥
एवमष्टविधामुद्रावामहस्तेनदर्शनीयाऽष्टफलजातानामिति॥ इदानींयतिर्ऋषीनांजातिमुद्रोच्यते॥ पञ्चेत्यादिना॥ इहपञ्चाङ्गुल्यर्द्धवक्रासित- २४४
नखाकारेणजातिमुद्रानखीनामेककरतलेऽभयदा तथातर्जन्यौद्वेऽर्द्धवक्रेऽर्द्धचन्द्राकारेणाभयकरमुष्ट्युपरिशिरसिदर्शिताच्छृङ्गिणांमुष्टिबन्धा-
दितिशृङ्गिणांमुद्रा॥ ॥

वज्रेऽन्योन्यैककनिष्ठेविषमकरतलेपक्षयोगोऽरगजानांपञ्चाङ्गुल्यर्द्धवक्राभवतिहिकरिणांजातिमुद्राविशिष्टा॥ तर्जन्य-
न्त्याःप्रसाराःप्रतिदिवसवनौचापवेधश्चश्लिष्टेज्वालायांश्लिष्टज्येष्ठौवरकरतलयोस्तर्जनीसारितान्या॥ १८५॥

तथा वृद्धेऽन्योन्यं कनिष्ठे विषमकरतले पृष्ठयोगेन तर्जनीमध्यमाभ्यां नामिकाऽङ्गुष्ठयोरुरस्योग इत्येवं गरुडमुद्रा॥ तथा पश्चाङ्गुल्योऽग्रपर्ववक्रादर्शनाज्जातिमुद्रा भवति॥ तथा ज्वालामुद्रायां मध्यमानामाकनिष्ठाप्रसारिता उभयकरे तर्जन्योर्द्वेऽन्योन्यं ग्रन्थिते शिरस्तउपर्यधोमुखेनाङ्गुष्ठे [illegible]ष्ठाविति॥ वरकरतलयोस्तेनैव प्रकारेण किन्तु तर्जनीसारितांस्यादिति या ज्वालामुद्रेति जातिमुद्रा तिर्यङ्मुखीनां दर्शनीयेति नियमः॥ ॥

तर्जन्या सारिते वै कथितमपि भवेत्स्वागतं योगिनीवद्याभ्यां स्वस्वागतं च प्रवदति शुभगा क्षेममङ्गुष्ठबन्धात्॥ अङ्गुल्याश्छोटिकायाः कथयति नियतं श्रेष्ठमत्रीत्वमत्र अङ्गुष्ठानामिकाभ्यां सह सममसुरया तर्पणं ते करोति॥ १८६ ॥

इदानीं वीरवीरेश्वरीणां परस्परसंभाषणमुद्रा उच्यते॥ अङ्गुल्येत्यादिना॥ इह यत्र क्वचिद्दर्शनमात्रेणाङ्गुष्ठं बद्धा ऊर्द्ध्वमुखीं तर्जनीमङ्गुष्ठाभिमुखांश्लिष्टां दर्शयेत्॥ तस्या दर्शने सति स्वागतं कथितं भवेत् योगिनो योगिना वा योगिन्या वा इति॥ द्वाभ्यां तर्जनीमध्यमाभ्यां पृष्ठतः संयुक्ताभ्यां स्वागतं कथितं भवति॥ तथा प्रवदति शुभगा क्षेमं वामाङ्गुष्ठमुष्टिबन्धादिति॥ तथाङ्गुल्या छोटिकया अङ्गुष्ठतर्जन्योः कथयति नियतं श्रेष्ठमैत्रीत्वमेवेति॥ अङ्गुष्ठानामिकाभ्यां छोटिकां कृत्वा कथयति समसमय सुरया तर्पणं ते करोति॥ ॥

सर्वाङ्गुल्यूर्द्ध्वसारात्प्रवदति शुभगा स्वागतं योगिनश्च वामाङ्कस्पर्शनेन प्रकटयति सदा बन्धुरेको ममत्वं॥ योनौ स्पर्शे वभर्त्रीप्यधरकुचयुगालोकनेवेतरेवेश्च अङ्गुल्यन्योऽन्यबन्धात्कथयति समयं मध्यमाङ्गुष्ठसारात्॥ १८७ ॥

तथाभिवादनयोगेन सर्वाङ्गुल्यप्रसारात् प्रवदति शुभगा स्वागतं योगिनश्च॥ तथा वामाङ्गस्पर्शनेन प्रकटयति सहावस्थे रेको मम त्वं॥ तथा योनोऽस्पर्शेश्च भज्ञौ॥ तथाऽधरजवशुमालेख्वनेवाभत्र्मीकथित इति॥ नेरेवेश्वेति॥ अङ्गुल्योस्त्वथादिति कराभ्यां संपुटं कृत्वा कनिष्ठाधाक्लिश्चोऽन्योन्यवन्धाभ्यां तोवध्वा तर्जन्यानामिकावध्वा दङ्गुष्ठमध्यमाप्रसारात्॥ समयमेलापकं कथयति संभाषणा शुभा॥ ॥

ओष्ठचुम्बनेच पर्यम्बे वदति शिरसि करस्थूयमानेऽतिमूर्खो दंष्ट्रामध्ये कनिष्ठा प्रकटयति भयं तर्जनी कम्बुरेखा॥ अङ्गुष्ठमुष्टिवन्धाद्गु विकरचरणास्फालने भक्षयामि जिह्वापार्श्वे च भुक्तं क्षुधरदशनयोस्ताडितेनेव भुक्तम्॥ १८८ ॥

इदानीं निर्भर्त्सनशुभवत्यते॥ ओष्ठ इत्यादिना॥ इह यदा पवजत्रचित् इति काढष्टा सती साधकं दृष्ट्वा ओष्ठादिकं वक्रं दर्शयति॥ तत्र ओष्ठवक्रे भ्रूविवेकेनैव वक्रे तथा शिरसि करस्थूयमाने वदत्यति महामूर्खस्त्वं यतशुभसंकेतकं न जानासि॥ तथा यदि दंष्ट्रामध्ये कनिष्ठारोपिता तथा नतासाकनिष्ठाभयं प्रकटयति॥ अथवा तर्जनी हृदये शुरेखयारोपिता कथयति भयमिति॥ तथाङ्गुष्ठमुष्टिवन्धं कृत्वा तस्मान्मुष्टिवन्धाज्जिनेनैवं शुविस्फालनात्करचरणाभ्यां स्फालनेन सति भक्षयामीति वदति शुभसंकेतानभिज्ञात्वादिति निर्भर्त्सनशुभः॥ तथा भोजनार्थं जिह्वास्पर्शेन च भुक्तमनामिकयेति॥ तथा वामकरेण दरदशनयोस्ताडितेन भुक्तमिति॥ ॥

पार्ष्णौ पृष्ठे च गच्छ प्रवदति नियतं संमुखे वा तिष्ठ तिष्ठ जानूरूमर्दने वै कथयति शुभगा ध्येव विश्रामय[illegible]ं॥ निद्रां पाद प्रसारात् ऊरुस्तनमर्दने जानुयुग्मप्रसारात् सर्वाङ्गस्पृश्यमाने वदन गगनकरे नास्ति मेलापको मे॥ १८९ ॥

तथापाणौपृष्ठेदर्शितेसर्वतिगच्छेतिप्रवदतीतिमतं॥ स्तंमुखेदर्शितेस्थितितिष्ठतिष्ठेतिवदतीति॥ तथाजानुमर्दनेऊरुमर्दनेसतिकथयतिसुभगांघविश्रामयत्वं॥ तथानिर्जीवादप्रसारतऊर्वीतिनियतंददाति॥ तथाऊरुमस्तकोपरतंजानुगुल्मप्रसारयतीतिनियमः॥ तथापदिसर्वाङ्गेस्वकंवामहस्तेनस्पृशतीतिवदनेवामहस्तंददाति॥ एवंक्रियमाणेनास्तिमेलापकोमेत्वयासार्द्धमितिवदतिस्वाम्यादिनारक्षितत्वादिति॥ ॥

अन्योन्यं हस्तिबन्धे वदति मम गृहे चक्रमेलापकोऽद्य अङ्गुष्ठानामिकाग्राद्बहुविधसमये स्तर्पयामो यथेष्टं॥ पादे करादूयमाने गमनमपि तथा वाद्यमेलापकं च तर्जन्याऽन्ये प्रबन्धे स्त्वपहरति भयं वज्रमिवस्त्वनये॥ १९० ॥

तथास्वकीयहस्तेऽन्योन्यंबन्धेऽङ्गुष्ठतर्जनीमध्येविनिसृत्यतदावदतिउद्द्याऽद्यममगृहेचक्रमेलापकोभविष्यतीतित्वमपितिष्ठेत्यर्थः॥ अङ्गुष्ठानामिकाग्रादर्शितेबहुविधसमयेत्सतर्पयाम्मायथेष्टमितिवदति॥ तथापादेकरादूयमानेसतिगमनमपिकथयतिवाद्यचक्रमेलापकेत्वमप्यागच्छेत्यभिप्रायः॥ तथातर्जन्याहुंकाकारेणान्योन्यबन्धेसतिभयमपहरतिवज्रमिवस्त्वमवेयेति॥ एवंसमयमेलापकज्ञानियमः॥ ॥

केशच्छेदे स्वदन्तैः वदति नरवशी पातनीयस्त्वमत्र अन्योन्यं दन्तघृष्टे भवपिशितमिदं भक्षनीय मयाद्य॥ जिह्वोष्ठे ताडिते च वदति वरतनौ रक्तपानं करोमि ओष्ठे सन्दश्यमानेऽप्युदर गत मिदं भक्षयामस्त वात्रम्॥ १९१ ॥

इदानीमन्यत्कुञ्चनामुद्रा उच्यते ॥ केशोत्पाटिनी ॥ इह यदा साधको मिथ्याहंकारेण मानं करोति ॥ प्रतिमुद्रां वा दर्शयति सामर्थ्यं विना तथा सामर्थ्येन का-
स्य केशान् छेदयति स्वदन्तैरेवं केशच्छेदे स्वदन्तैः कृते सति ॥ इदं वदति मुद्रया हे नरपशो यावज्जीवं स्वमवमपेति ॥ तथाऽन्योन्यं दन्तैर्दन्तान् घृष्यति तं दृ-
ष्ट्वा सतीदं वदति तव पिशितमिदं भक्षयिष्यं मया हे नरपशो इति ॥ तथा जिह्वोष्ठलालिते सति वदति तव तनोः रक्तपानं करोमीति ॥ तथा ओष्ठदन्तैः सन्दश्यमाने
पि वदत्युदरगतमिदं भक्षयामस्त्वत्कायं हे नरपशो क्व गच्छसीति मुद्रां दर्शयति कुञ्चा सति तेन सामर्थ्यरहितेन प्रतिमुद्रा न दर्शनीया ॥ तासामभिवादनं
कृत्वा हृदये वामकरतलं दत्त्वा वामावर्तेन परिभ्राम्य स्वकायं ततो वामहस्तेनोर्द्ध्वप्रणामं कृत्वा गन्तव्यं ताभिः सार्द्धं वादो न कर्तव्य इति बालयोगिनां नियमं यद्-
दानितत्तेन करणीयमन्यथा मरणं प्राप्नोति स्यादिति सामर्थ्ययुक्तेति भगवतो नियमः ॥ ॥ इदानीं परस्परमुद्रादर्शने प्रतिमुद्रालक्षणमुच्यते ॥
इह कालचक्रभगवतो वामसव्यभुजाभ्यां या विंशतिभुजानि तत्स्वरूपा मुद्राः ॥ तत्र परस्परं मुद्राप्रतिमुद्रेति ॥ वज्रवज्रघण्टयोः खड्गफलकयोः त्रिशूलख-
ट्वाङ्गयोः ॥ कर्त्रिकाकपालयोः ॥ बाणचापयोः ॥ अङ्कुशपाशयोः ॥ डमरुकरत्नयोः ॥ मुद्गरपद्मयोः ॥ चक्रशंखयोः ॥ कुन्तदर्पणयोः ॥ परशुब्रह्मकपा-
लयोः ॥ पर्शुब्रलवक्कयोः ॥ गजचर्मतर्जन्योः ॥ डक्कटकुण्डलयोः ॥ कण्ठिकारुचकयोः ॥ मेखलानूपुरयोः ॥ भूङ्गीनरखाः ॥ नागगरुडयोः ॥ हस्तपादयो-
ः ॥ मुखमुण्डयोः ॥ भगलिङ्गयोः ॥ स्तनाण्डयोः ॥ नेत्रभ्रुवोः ॥ तिलककज्जलयोः ॥ प्रकोपक्षीरवामोक्षणयोः ॥ जानूर्वोः ॥ कण्ठललाटयोः ॥ नाभिहृदयोः
शीमन्तशीर्द्धरेखयोः ॥ दंष्ट्राकनीयस्योः ॥ अङ्गुष्ठानामिकयोः ॥ तर्जनीमध्यमयोः ॥ एवमनेकमुद्रादर्शिते प्रतिमुद्राभणनेकाभवति प्रज्ञोपायधर्मेण पृथिव्या-
दिनेत्वभेदेन सर्वत्रयोगिनां जदिनेत्येति नियमः ॥ ॥

लास्यायोगेन लास्या भवति नरपते हास्ययोगेन हास्या नृत्यायोगेन नृत्या भवति बहुविधा वाद्ययोगेन वाद्या ॥ गीतायो
गेन गीता वरविविधगुणा गन्धयोगेन गन्धा मालायोगेन माला भवति गुणावशाद्धूपयोगेन धूपा ॥ १९२ ॥

इदानीं लास्याद्या मुद्राऽनन्ताः तासां स्वभावं ज्ञात्वा सर्वास्ता वेदितव्याः ॥ तन यथा लास्यायोगेन लास्या भवति ॥ नरपते हास्ययोगेन हास्या नृत्यायोगेन नृत्याभ
वति ॥ बहुविधा वाद्ययोगेन वाद्या गीतायोगेन गीता वरविविधगुणा गन्धयोगेन गन्धा मालायोगेन माला भवति गुणवशाद्धूपयोगेन धूपा ॥ ॥

दीपाकारेण दीपा खलु निहितनमा पात्रमुद्रा स्मृता स्यादित्येवं सर्वमुद्राः पुनरपि च ततः पञ्चमुद्रैर्विभिन्नाऽस्या मु
द्रास्त्वनन्ताः सकलगुणगता योगिना वेदितव्या यद्यद्वस्तु स्वभावो भवति भुवितले तत्स्वभावश्च मुद्राः ॥ १९३ ॥

दीपाकारेण दीपा खलु निहितनमा पात्रमुद्राऽस्मृता स्यात् ॥ इत्येवं सर्वमुद्राः पुनरपि च ततः पञ्चभेदैर्विभिन्नाऽस्या मुद्रास्त्वनन्ताः सकलनतगुणगता योगिना वेदित
व्या ॥ यद्यद्वस्तु स्वभावो भवति भुवितले तत्स्वभावास्तु मुद्रा इत्यतः ॥ यावन्तो दृष्टिविक्षेपास्तावन्मुद्राः प्रकीर्तिताः ॥ मुद्रायाः प्रतिमुद्रायां कः समर्थो वधारि
तुं ॥ अभिज्ञा योगिनां यावन्तो न्यपते समाधिनायानानावन्तो हिकवादर्थं प्रतिमुद्रां तद्दर्शयेदिति मुद्रासंकेतनियमः ॥ ॥

तिर्य्यग्दृष्ट्वा च दूती कथयति सुभगस्यागतस्त्वेङ्कितञ्च प्रयुक्तं योगिनः स्यात् शिरसि गतकरस्येक्षणेन द्विशो मे ॥ क्षेम

सिप्यूर्द्धदृष्ट्या क्षितितलगतया तिष्ठ विश्राममय त्वं गर्भ त्वं चक्रदृष्ट्या कथयति सुरतं रागदृष्ट्या च दूती॥ १९४ ॥

इदानीं दृष्टिसंकेतेनउच्यते॥ तिर्यगित्यादिना॥ इह यत्र योगिनो दर्शने दूतीति योगिनी तिर्यग्दृष्टिं दर्शयति तया दृष्ट्या कथयति तु भगस्येति योगिन आगतो स्विज
नः स्थानात् किमिति पृच्छति॥ ततः प्रत्युक्ते योगिनः स्यात् शिरसि वामकरगते स्वश्चरणात् द्विशो वेस्थानागमनकथने॥ भीमसे प्यूर्द्धदृष्ट्या कथयति क्षिति
तलगतया तिष्ठ विश्राममयत्वमिति कथयति॥ गच्छ त्वं वक्रदृष्ट्येति कथयति॥ रागदृष्ट्या सुरतं कुर्विति कथयति दूती॥ ॥

मित्रे मे सौम्यदृष्ट्या कथयति तु भगस्याभयं क्रोधदृष्ट्या क्रूरोहं केशदृष्ट्या कथयति तु भगस्येङ्गितैः सत्स्वभावं॥ ऊर्णादृष्ट्या
उन्नामं प्रकटयति तरां योगिनी घ्राणदृष्ट्या सौभाग्यमोष्ठदृष्ट्या वहति निजचषुगालोचने हंसतुण्डा॥ १९५ ॥

मित्रं मे त्वं सौम्यदृष्ट्या कथयतीति संभावनादृष्टिनियमः॥ इदानीं भयदृष्ट्यपउच्यते॥ इह यदा भ्रूकुटीं कृत्वा क्रोधदृष्टिं दर्शयति तदा तया क्रोधदृष्ट्या भङ्ग्या
योगिनो भयं प्रकटयति॥ अज्ञात्वादिति॥ तथा केशदृष्ट्या क्रूरोऽहमिति कथयति तु भगस्य योगिनः॥ स्वस्वभावमेभिरिङ्गितैरिति॥ तथा ऊर्णादृष्ट्या उन्नामाह
मिति प्रकटयति॥ तथा तरां प्रकटयति घ्राणदृष्ट्या॥ ओष्ठदृष्ट्या सौभाग्यं स्वकीयं प्रकटयति॥ तथा स्वज चषुगलालोकने हंसतुण्डेति वदति॥ ॥

हृद्दृष्ट्या भावितात्मा वदति ऋजुयुगालोकने हं प्रचण्डा शक्ताहं स्कन्धदृष्ट्या सनखकरतलालोकने राक्षसी च॥ पृष्ठाना

के भुजङ्गीप्यहमपि समयी नाभिं दृष्ट्वा नरेन्द्र शुभ्राहं तत्प्य दृष्ट्वा प्यहमपि सुरते दुर्जया क्रोधदृष्ट्वा ॥ १९६ ॥

हृदयं दृष्ट्वा भाविनीनामिति वदति ॥ तथा भुजङ्गमालोकनेऽहं प्रवरेति वदति ॥ तथा स्कन्धं दृष्ट्वा शक्ताहमिति वदति ॥ तथा सनखकरतलालोकने राक्षसी चाहमिति वदति ॥ तथा हस्तालोकनेन नागिनीभाहमिति वदति ॥ तथा नाभिं दृष्ट्वाऽहं समयिनीति वदति ॥ नरेन्द्रेत्यामन्त्रणं ॥ तथा तल्प दृष्ट्वा शुभ्राहमिति वदति ॥ तथा ऊरुं दृष्ट्वा सुरते दुर्जयाहमिति कथयति ॥ ॥

सिद्धाहं जानु दृष्ट्वा कथयति नियतं चर्चिका पाद दृष्ट्वा पादाहस्तावलोके त्वहमपि भुवने वज्रकायैकधीरा ॥ सर्वाङ्गुल्यस्य दृष्ट्वा त्रिभुवननिलये सर्वगा विश्वमाता दूतीनामेव दृष्टिः क्षितितलनिलये योगिना वेदितव्या ॥ १९७ ॥

तथा जानु दृष्ट्वा सिद्धाहमिति कथयति ॥ तथा पाद दृष्ट्वाहं चर्चिकेति कथयति ॥ तथा पादाङ्गुष्ठावलोकनेन हस्तेनतया दृष्ट्वाप्यहं भुवने वज्रकायैकवीरेति कथयति ॥ तथा सर्वाङ्गुल्यग्रं दृष्ट्वा पादयोस्त्रिभुवननिलये सर्वगा विश्वमाताहमिति कथयति ॥ एवं योग्यपि सामर्थ्ययुक्तमात्मस्तुतरणात् दूतीनां प्रकटयति ॥ इति ॥ एवं क्रमेण दूतीनामेव दृष्टिः उतरपि बहुविधा वेदितव्या स्वभावेरितदृष्टिसंकेतनियमः ॥ ॥ तथा घोमकायस्य भावस्य मन्त्रामतस्याग्रभरणं कुहरं वेदितव्यं प्रस्तावववशादिति ॥ यथा सैन्धवं मानयेत्युक्ते स्नाने वस्त्रे भोजने लवणं गमनेऽश्वोऽत्र प्रयुक्तमिति न्यायेन सर्वः प्रथमाक्षरसंकेतवस्तुधर्मो वेदितव्यो गगणचक्रादिकेऽसमयिसत्वमध्ये सन्ध्याभाषा नरेणोक्तो म्मकेन वा वक्तव्यं योगिन्या वा इति सर्वत्र नियमः ॥ ॥

षड्गागं देहमध्ये करचरणतनोतारमप्युत्तमाङ्गं वाग्वाक्कर्मेन्द्रियाणां गुणमपि मनस्त्विन्द्रियाणाञ्च मध्ये ॥ धात्वंशे धातु-
मध्ये सुतराविगराणा देहमध्ये न चान्यत् आचार्याय प्रदाय व्रजति भवपदं दिव्यसिद्धस्तु विज्ञः ॥ १९८ ॥

इदानीं शिष्याणां दानार्थं स्वशरीरादिविभागनियममुच्यते ॥ षडङ्गमित्यादिना ॥ इह यदा वज्राचार्यो रणाभिषेकोऽहस्तकश्चेत्क्षेपोभिषेको वानेनेयं प्रतिज्ञा क-
र्तव्या मया सर्वकाले षडंशं सर्वबन्धूनां दानं दातव्यमिति ॥ तत्र प्रथमं तावत् षडङ्गं देहमध्ये करचरणतनोरिति ॥ हस्तद्वयस्य चरणद्वयस्य तनोरेकप-
ञ्चकमध्ये षष्ठमुत्तमाङ्गं दानेन नमस्कारार्थं आचार्याय प्रदेयं बुद्धबोधिसत्त्वायतरे वेतं दत्वा व्रजति भवपदं दिव्यसिद्धस्तु विज्ञो दानदानेनेति ॥ तथा वाग्वाक्कर्मेन्द्रि-
याणां मध्ये देयापाणिपादपायुभगादीन्द्रियाणां षष्ठं वागिन्द्रियं सत्त्ववचनार्थं वाचा देयेति भगवतो नियमः ॥ तथा चक्षुःश्रोत्रघ्राणजिह्वाकायेन्द्रियाणां
मध्ये षष्ठं मनः सगुणं मायाप्रपञ्चरहितं सत्त्वार्थं देयमिति ॥ दाननियमः ॥ ॥ तथा धात्वंशमिति ॥ धातवः स्वर्णरत्नधान्यादयश्चेतनानि
द्रव्याणि तेषां विरागलक्षधातूनां षडंशं देयं योगिन्यादिपूजार्थमिति ॥ तथा सचेतनानि द्विपदचतुष्पदानि षडंशेन देयानि पंचांशपालनेन कुटुम्बभो-
गाय स्वकामयितव्यानि ॥ तथा तत्वभोगेन चान्यत् रूपभार्यादिकं मासमध्ये पक्षवारान् कामदानेन देयमिति तथा गतनियमः ॥ अन्यथा मन्त्रनये काम-
दानेन विनाऽनन्तकल्पैर्महामुद्रासिद्धिर्न भवति ॥ कर्ममुद्राज्ञानमुद्रासिद्धिरपि न भवति ॥ रागाभिभूतस्य जलप्राणादिति ॥ एवं षड्विभागदाननि-
यमः ॥

ये सत्त्वा लोकधातौ त्रिविधभवगता ज्ञानवज्राङ्कुशेन आकृष्टास्तान्समन्तान्रमकरुणायामरज्जितेचाभिषिंच्य ॥ बुद्धैर्वे

ज्ञामृतेनामलशशिवपुषा वज्रिणा लब्धमार्गाः तुष्टोने प्रेषणीया व्यपगतकलुषा वोधिचर्यानुरूपाः॥ १९९॥

इदानीं करुणाभिषेक उच्यते॥ ये सत्वा इत्यादिना॥ इह लोकधातौ षड्जातिषु ये सत्वाऽनभिषिक्तास्त्रिविधभवगतास्तान् सर्वज्ञज्ञानवज्राङ्कुशेनाकृष्य भावनामात्रात् परमकरुणया मण्डले चाभिषिंच्य तुष्टे विण्मूत्ररक्तमज्जाभिः॥ तथा वज्रामृतेन पञ्चकेनामलशशिवपुषानतो वज्रिणा लब्धमार्गाः सन्त इति भाव्य॥ ततस्ते स्वस्थाने प्रेषणीया वज्राचार्येण सर्वे व्यपगतकलुषा बोधिचर्यानुरूपा इति करुणाभिषेकनियमः॥

द्रव्याभावोऽभिषेको जिनपतिवचनेनावधूतस्य देयः एवं धूमादिमार्गः सकलगुणनिधिर्न्नाडिकायोगयुक्तः॥
सेवार्थं हस्तमुद्राः सुहृदयवशगाः सर्वदोषैर्विमुक्ता अन्येषां नैव देयं जिनवरहृदयं मातृपूजाविहीनं॥ २००॥

इदानीमवधूतस्य शिष्यस्याभिषेकनियम उच्यते॥ द्रव्याभाव इत्यादिना॥ इह यदावधूतस्य शिष्यस्य द्रव्याभावस्तदा तद्गुरुणा द्रव्याभावेऽभिषेको जिनपतिवचनेनावधूतस्य देयो यथानुक्रमेण सप्ताभिषेकस्तेनो देयः॥ कलशादिकस्त्रिविधः॥ एवं चतुर्थो धूमादिमार्गो देय इति कथनीयो वाचेति॥ तथा सकलगुणनिधिर्नाडिकायोगयुक्तो महाक्षरसुखक्षणो वाचा कथनीयः॥ तस्य सेवार्थं कर्ममुद्राऽभावे सति हस्तमुद्रा नियमो देयः॥ सुहृदयवशात् सा हस्तमुद्रा सर्वदोषैर्विमुक्ता बोधिचित्तस्थिरीकरणायेति नियमः॥ अन्येषां पुनर्गृहस्थानां नैव देयं जिनवरहृदयं वज्रपदं मातृपूजाविहीनमिति तथागतसेकनियमः॥ ॥

सेकान्ते श्रीघटानां मृदुमनुजसुखदं कञ्चुकं वस्त्रयुक्तं देयं श्रीयोगिनीभ्यस्त्वपरमपि तथा कंचुकं वस्त्रयुग्मं ॥ द्वारिनेभ्यः
प्रदेयं सकलगणाञ्जलायाम्पशान्त्यानथान्यत् अन्ते होमं प्रकृत्य सुहृदयकमले ज्ञानसत्वं प्रविश्य ॥ २०१ ॥

इदानीं मण्डलविसर्जनमुच्यते ॥ सेकान्ते इत्यादिना ॥ इह सेकावसाने घटवस्त्रयुग्मलं सकञ्चुलीकं यद्देयं परिदत्तं तद्योगिनीभ्यो परक्षमालिकाभ्यो देयं अ
परमपि तथा कञ्चुकं वस्त्रयुग्मं ॥ प्रत्येकद्वारस्थेभ्यः प्रदेयं रक्षपालेभ्यः ज्ञाग्यथाविभवतोऽञ्जयादिकं देयमिति नियमः ॥ तथा सकलगणाञ्जलायान्य
शान्त्यात्तथान्यत् गणचक्रे वीरवीरेश्वरीभ्य इति ॥ ततो गणचक्रं विसर्ज्य अन्ते होमं प्रकृत्याचार्यः पूर्ववत् ॥ पूजां कृत्वा पूर्वद्वारे भगवतोऽभिमुखो वज्रव
ज्रघण्टां गृहीत्वा वज्रबन्धेन स्वहृदयकमले ज्ञानसत्वं प्रवेशय ॥ ॥

स्वस्थाने लौकिकान्वै सकलमपि रजो वाहयेत्कुङ्कुनाद्यं ताम्बूलं गन्धपुष्पं कुसुमफलसमं शाटिकां कन्यकानां ॥ दत्वाचा २४९
र्यैः सशिष्यैः सकलगणकुलं तर्पयित्वा यथेष्टं शिष्यस्याज्ञां प्रदाय प्रवरकरुणया प्रेषयेत्स्वस्वधाम्नि ॥ २०२ ॥

स्वस्थाने लौकिकान् वै इन्द्रादीन् ततोऽप्यवस्थपवेरास्वकरेण वा वज्रेण वा ब्रह्मसूत्रमार्गेण महासुखचक्रवज्रं यावत् लोपयेत् ॥ ततः स्वशिरसि रजस्तृति
मात्रं दत्वा पद्मादिकं लोपयेत् ॥ इति मण्डलविसर्जननियमः ॥ ततः सकलं रजो गजे परिधृत्य चामरध्वजपूजासहितं नीत्वा ऽब्धनद्यां सङ्गमिन्यां यत्र कलशेनानीतं
तं तं कलशमुदकपूर्णं कृत्वा ऽन्तर्गजस्कन्धे स्थाप्य मण्डलगृहमानयेत् ॥ गजाभावे सुखासने स्थाप्य रोपणं कृत्वा नेयमिति रजो विसर्जनं ॥ ततो मण्डलगृहमागत्य

गोमयेनोपलिप्ते मण्डलगृहे दशाकुमारिकां पञ्चवर्षादारभ्य द्वादशवार्षिकीं यावद्दुग्धेन घृतेन पायसेन खण्डलड्डुकाद्यैर्मधुराहारैः पूर्वाह्णे संतर्प्य ततस्ताम्बूल
गन्धधूपं कुङ्कुमपुष्पफलस्रग्वस्त्रादिकं कलशग्रीवावेष्टितां कन्यकानामिति कुमारिकाणां दत्वाचार्यः सशिष्यः सकलगणाकुलं वीरभोजेन तर्पयित्वा यथे
ष्टमिति॥तत्र वीरभोजे विधिरयं॥इत्याचार्यपरीक्षायां त्रिधा वज्राचार्यः॥उत्तमो मध्यमोऽधम इति॥तद्यथा॥दशतत्वपरिज्ञाता क्रियाणां भिक्षुरुत्तमः॥
मध्यमः श्रामणेराद्यो गृहस्थस्त्वधमस्तयोरिति नियमात्तत्र तेषां भिक्षुश्चेल्लकगृहस्थानां एकसंकरं सामान्येन ज्येष्ठकनिष्ठत्वं वाऽभिषेकतः॥तत
स्मादभिषिक्तवज्रधरपंक्तिः पूर्वाभिमुखी भवति॥कर्त्तव्यां वा चेल्लकपङ्क्तिरुत्तराभिमुखी गृहस्थाचार्यपङ्क्तिर्दक्षिणाभिमुखी॥एवं भिक्षुणीपंक्तिः॥म
हल्लायापंक्तिः॥उपासिकापंक्तिः पृथक्॥तेषां ज्येष्ठकनिष्ठादिना आसनानि देयानि॥तत्र भिक्षूणां यो ज्येष्ठः स एकेन किन्तु मूर्खः॥लघुको महाचार्यो
स्तत्त्वदेशकस्तयोर्यस्तत्त्वदेशकः स वीरभोजे गणनायकः॥ज्येष्ठोऽन्यगृहे पृथक्संतर्पणीयः॥एवमन्येऽपि ज्येष्ठाधर्मदेशका उपदेशका इति
सत्वार्थकरणेऽशक्तत्वादिति॥अन्येपुनश्चेल्लकगृहस्थाः प्रागभिषिक्ताभिक्षोर्वज्रधरस्य ज्येष्ठा न भवन्ति॥यावदभिज्ञानोत्पद्यते॥अथ विवादं क
रोति॥कश्चित्तदा सामर्थ्यं पृच्छ्यते यदि दर्शयति॥अभिज्ञादिकं तदा स गणचक्रनायक इति॥अथ मिथ्याभिषेकाभिमानः कलहं करोति संवर्त्तिं सत्का
तदा स्वगृहान्निर्घाटयेत्॥अथ निर्वादिनो दण्डमङ्गीकरोति तेषां खानपानाद्दिको दण्डो देयो दण्डाधिपतिना॥एवं भिक्षुचेल्लकगृहस्थानां यथा
नुक्रमेण खानपानादिकं देयं तदेव सर्वं प्राक्स्थापनीयं॥तेषां मध्ये मण्डलं कृत्वा कालचक्रभगवतः॥प्रथमपङ्क्तिकां खानपानादिकं दत्वा ततो
भिक्षवादीनामाचार्याणामन्येषामभिषिक्तानां तेषु मूलेषु स्थितानां देयं॥एवं सकलगणाकुलं तर्पयित्वा यथेष्टं तत आचार्यः शिष्यस्याज्ञाप्रदा

यसंघदानार्थं तदात्मशक्त्या संघाय दक्षिणां दत्वा प्रवरगणं कुलमानन्दितं प्रेषयेत् स्वस्वधाम्नि इति ॥ वीरभोज्यनियमः ॥ ॥

शत्रुः सिंहो गजेन्द्रो हुरिरुरगपतिस्तस्करा पाशबन्धः क्षुब्धाम्भोधिः पिशाचामरणभयहरा व्याधिरिन्द्रोपसर्गः ॥ दारिद्र्यं स्त्री
वियोगः क्षुभितनृपभयं वज्रपातोऽर्थनाशो नाशं तस्य प्रयान्ति प्रतिदिनचरणं यः स्मरे योगिनीनां ॥ २०९ ॥

श्रीमदादिबुद्धोद्धृते श्रीमन्महाकालचक्रेऽभिषेकपटलस्तृतीयः ॥ ॥ इदानीं सर्वभयोपद्रवनाशमन्त्रोच्यते ॥ शत्रुरित्यादिना ॥ इह कश्चिद्यः कुल
पुत्रो मण्डलं वर्त्तयित्वाऽभिषेकं गृहीत्वा प्रतिदिनं चरणं योगिनीनां पूर्वोक्तानां ॥ अध्यात्मं स्ववध्वादीनां चरणं स्मरति ॥ तस्य सर्वाणि भयानि नाशं प्रया
न्ति ॥ शत्रुभयं सिंहभयं वह्निभयं उरगभयं तस्करभयं पाशबन्धभयं क्षुब्धसमुद्रभयं पिशाचभयं व्याधिभयं इन्द्रोपद्रवभयं दारिद्र्यदुःखभ
यं स्त्रीवियोगदुःखभयं क्षुभितनृपतिभयं वज्रपातभयं अर्थनाशभयं ॥ एवं षोडशभयान्यन्यान्यपि नाशं प्रयान्ति ॥ एषां विस्तारं प्रथमपटले २५०
स्तुतिद्वारेण कथितं तेनात्र न प्रकाशितं ॥ एवं कालचक्रमण्डलेऽभिषिक्तः सर्वयोगिनीयोगतन्त्रेष्वभिषिक्तो भवति ॥ सर्वतन्त्राणां देशकः सर्वमन्त्राणा
मनुज्ञापकः सर्वसिद्धीनां साधकः ॥ यथा मञ्जुश्री भगवान् यथा कालचक्र आदिबुद्धस्तथा वज्राचार्योऽयं स्वयं मोक्षार्थिभिः कालचक्रतन्त्रदेशक इति परमा
दिबुद्धानुसारेणाभिषेकपटले टीका लिखिता ॥ ॥ इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां विमलप्रभायां द्वादश
साहस्रिकायां उद्राहृष्टिमण्डलविसर्जनवीरभोज्यविधिमहोद्देशः षष्ठः ॥ ॥ समाप्तेयं टीका अभिषेकपटलस्य ॥ ॥

आगमंप्रत्ययादेषोलोकधातुकमण्डलः॥पुनरध्यात्मनिप्रोक्तआत्मप्रत्यययोगतः॥तत्रप्रत्ययतःशुद्धंरजोमण्डलमादिशेत्॥गम्भीरार्थप्रकाशार्थंभ
गवान्प्रत्ययत्रये॥एवंप्रत्ययितैःकथंपुनरयंसंस्येननोगृह्यतेसंवृत्यापरमार्थतोपिगदितःसेकार्थतत्वक्रमः॥यत्सत्वेनदिहाभिषेकपटलेनाथागताभ्या
गतश्रेयःश्रीभिरलंकृतेरतिफलंमोक्षस्यसौख्यस्यच॥तस्मादीजादस्मात्प्रभवतिमनःकल्पविटपोमहारागासेकात्त्रिभुवनभवःसर्पतितनः॥फलं
सौख्यंभूयःफलतिनदतव्यापिवहुधाःस्वर्गकल्पातीतोत्सवरणरागाढिःनधियो॥अस्यत्वेसेकस्तुखवारिधिवारिवेलाविषेपदोलातडितस्यक
तोवकाशः॥गाहेतेतेनवडवानलवत्समुद्रसेकंमहारतसुखज्वलनेरतृप्तः॥लोकाध्यात्मप्रथमनिखनकान्तदृष्टाभिषेकप्रान्तेपरंभवभयहरं
लेखमिन्वातुकेन॥दत्तेनायेयदिहसकलंतेनसेकोदितश्रीः·वीर्योत्साहस्थिरहृदयतासाधनायास्तुलोकः॥ ॥

लब्धः सप्ताभिषेको जिनजनकमयाकुम्भगुह्याभिषेको प्रज्ञाज्ञानाभिषेको भवभयमथनो योगगम्यश्चतुर्थः । भूयः पृ
च्छामि सम्यक् जिनवरसहितं साधनं विश्वभर्तुः श्रुत्वासोऽचन्द्रवाक्यं गदति जिनपतिः साधनं वज्रिराज्ञः ॥ १ ॥

नमः श्रीकालचक्राय ॥ उग्रज्ञानविनिर्मितेन भगवता दुर्दान्तसत्वाः सदारूपं भैरवभीषणांगनमर्दपदपङ्क्तिसंतर्जनाः ॥ भाषासर्वरुता परस्थितिगता सन्मार्गसंदेशिकी सत्वानामधिमुक्तिचित्तवशतो यस्यैव तस्मै नमः ॥ सर्वाकारवरोपेतः कायो नानाधिमुक्तितः ॥ दृश्यते स्वस्वभावेन संवित्निर्माणलक्षणः ॥ सर्वसत्वरुतेनैकद्धिमात्मनो यः प्रकाशते ॥ सत्वाशयवशेनैष कायः संभोगलक्षणः ॥ नानित्यो नापि नित्यो यो नैको नानेकलक्षणः ॥ न भावो नाप्यभावो यो सो धर्मकायो निराश्रयः ॥ शून्यताकरुणाभिन्नो रागारागविवर्जितः ॥ प्रज्ञानाप्युपायो यो सौ कायः स्वाभाविकोऽपरः ॥ कालचक्रमिति ख्यातं चतुःकायात्मकं शिवं ॥ प्रणिपत्य सर्वभावेन मञ्जुश्रीबोदितिनच ॥ साधनापटले टीका पुण्डरीकेन लिख्यते ॥ मया निर्मितकायेन लोकेशानाज्ञाधारिणा ॥ इह श्रीमति कलापग्रामे दक्षिणे मलयोद्याने श्रीकालचक्रमण्डलगृहपूर्वद्वारावस्थितेन रत्नमण्डपे रत्नसिंहासनस्थो मञ्जुश्रीर्भगवान् निर्मितकायो यशोनरेन्द्रः सूर्यरथाध्येषितः सन् परमादिबुद्धात् साधनापटले सुचन्द्राध्येषणं तद्भगवतः प्रतिवचनं प्रथमवृत्तेन महापर्षदः प्रकाशयति स्म ॥ लब्धः सप्ताभिषेको जिनजनकमयाकुम्भगुह्याभिषेकः प्रज्ञाज्ञानाभिषेको भवभयमथनो योगगम्यश्चतुर्थः ॥ भूयः पृच्छामि सम्यक् जिनवरसहितं साधनं विश्वभर्तुः श्रुत्वासो चन्द्रवाक्यं गदति जिनपतिः साधनं वज्रिराज्ञेति ॥ इह वृत्ते पदद्वयेन सुचन्द्राध्येषणे साधनापटलदेशनाय ॥ ततश्चतुर्थपदमारभ्य यावत्परिसमाप्तिस्तावद्भगवतः प्रतिवचनमिति ॥ इदानीं श्रुत्वासो चन्द्रवाक्यं गदति जिनपतिः शाक्यमुनिर्भगवान् कालचक्रसमाधिसमापन्नः साधनं वज्रिराज्ञः श्रीकालचक्रे भगवतः चकारस्त्वाक्षोभ्यादितथागतानां वज्रपाण्यादिबोधिस

त्वानां शब्दवज्रादि विषयदेवीनां॥ उष्णीषादि महाक्रोधराजानां अतिनीलादि क्रोधदेवीनां चर्चिकादि मातॄणां विष्ण्वादि देवानां जयादि नागराजानां। स्थानास्था
दि प्रवराणां। अस्मिकं साधनमन्येषामपि गदति जिनपतिर्लौकिकसिद्धिसाधनायाकनिष्ठभुवनपर्यन्तं रूपभावनयेति॥ भगवतो नियमः॥ ॥

चन्द्राङ्कयुग्मपादं शिखिविगणमुदधीः श्रीमुखं विश्ववर्णं षट्स्कन्धं पूर्वबाहुं जिनकरकमलं शून्यषड्वह्निपर्वं॥ यमास्योमार
रुद्रशशिरविहुतभुग्मरुडेत्रास्यमानं नीलाकान्तं नेमेकं त्वभवभवसमं साधयेत्कालचक्रम्॥ २ ॥

इदानीं कालविशुद्ध्या भगवतो रूपकल्पनोद्देश उच्यते॥ चन्द्राङ्कमित्यादिना इहादिबुद्धे भगवानाह॥ दिनं सूर्यो रजो वज्री भावभेदैर्निशा शशी॥ अकंमयं तयोरैक्यं कालचक्रं महत्
सुखमिति॥ तथाऽपरतन्त्रान्तरेऽपि भगवता सामान्येनोक्तं॥ दिनस्तु भगवान्वज्री नक्तं प्रज्ञा प्रकीर्त्तिता॥ आदित्यो हि यथा रुद्रस्तथा चन्द्र उमा मता॥ एवं रूपे चन्द्रादि
यानिशाभेदेनाहो एवं काल इत्युच्यते॥ तस्य चक्रं षट्शताधिकैकविंशतिसहस्रश्वासात्मकं द्वादशाङ्गप्रतीत्यलक्षणं संसारचक्रं लौकिकसंवृत्योत्पादक्षयेन तु भूतं
सर्वसत्त्वानां॥ तथा चाह॥ कालः सृजति भूतानि कालः संहरते सदा॥ कालो हि भगवान्वज्री अहोरात्रस्वरूपवानिति॥ एवमस्य कालचक्रस्य साधनमुत्पादक्षयविनाशार्थं
योगिभिः कर्त्तव्यं वक्ष्यमाणक्रमेणेति॥ रूपकल्पनानियमः॥ चन्द्राङ्कमित्यादि॥ द्वादशलग्नात्मकं अहोरात्रमेकाङ्कं॥ तस्य षट्षड्लग्नात्मकं वादक्षिणाचरणयुग्म
पादमिति॥ तत्र चतुर्लग्नात्मकं वामदक्षिणमध्यकण्ठं शिखिविगणमिति त्रिकण्ठं॥ एवं त्रित्रिलग्नात्मकं पूर्वदक्षिणपश्चिमोत्तरवक्त्रचतुष्कमुदधिरिति॥ चतुर्मुखं
विश्ववर्णं वक्ष्यमाणमिति॥ एवं द्विद्विलग्नात्मकं वामेदक्षिणे च पूर्वापरं मध्यस्कन्धं षट्स्कन्धमिति॥ तथा प्रत्येकमासात्मका द्वादशभुजास्तैर्भुजैः पूर्वबाहुमि

ति॥ एवं प्रत्येकार्द्धलग्नं॥ पक्षभेदेन चतुर्विंशतिकरं जिनकरकमलमिति॥ एवं षष्टिषष्टिप्रत्येकमभ्यासात्मकेन दिनभेदेन षष्ट्युत्तरत्रिशतानाङ्गुलीपर्वं प्रत्येककरे पञ्चाङ्गुलीत्रिपर्वभेदेन पञ्चदशपर्वाणि चतुर्विंशतिकरे षष्ट्युत्तरशतत्रयं भवति॥ एवं भ्रमपदहृत्पर्वं पादाभ्यां मारसद्रमिति॥ स्कन्धं केशाग्रं तु देवप्रवमारं॥ रागद्वेषमोहमानात्मकं रुद्रं शङ्करं विहुतभुञ्जमरडलेत्रास्यमानं॥ लीलया क्रान्तं येन कालचक्रेणानेकमभवभवसमेतं निर्वाणभयेकलोलीभूतं त्रिरावरणातः॥ एवं साधयेत् कालचक्रमिति॥ भगवतो नियमः॥ ॥

उद्याने पर्वते वा जिनवरभवने शून्यदेवालये च सिद्धस्थाने श्मशाने सरसि सरिति निलये तत्प्रभूत्या तथैव॥ यस्मिंश्चित्तप्रतोषो भवति नरपतेः साधनं तत्र कुर्यात् कृत्वा पूर्वोक्तरक्षां खलु मृदुशयने चासने चोपविश्य॥ २ ॥

इदानीमस्य साधनास्थानमुच्यते॥ उद्यान इत्यादिना॥ इह लौकिककर्मसाधना उक्तेषु स्थाने भवति॥ उद्याने वश्याकृष्ट्यर्थं साधनं कायान्तरी॥ पर्वते वा स्तम्भनमोहनकीलनार्थं। जिनवरभवने साधिस्थाने महाचैत्ये ऽष्टमहासिद्ध्यर्थं॥ शून्यदेवतालये चोच्चाटनविद्वेषणार्थं॥ चकारात् महोदधितटे वा सिद्धिस्थाने कर्मभुजासिद्ध्यर्थं॥ श्मशाने मारणार्थं सरसि सरिति निलये शान्तिपुष्ट्यर्थं तत्प्रभृत्यामिति तडागवाप्यभूमिगृहे वा त्रैलोक्यराज्यसाधनार्थं॥ सर्वं कर्मानुरूपेण यस्मिन् देशे चित्तप्रतोषो भवति नरपतेः साधनं तत्र प्रकुर्यात्॥ तथा चाह॥ धार्मिको यत्र भूपालः प्रजा यत्रैव भक्तिता॥ भूभृतोर्विग्रहो नास्ति तत्र योगं समारभेदिति॥ कृत्वा पूर्वोक्तरक्षामित्यभिषेकपटलोक्तरक्षां कृत्वा॥ खलु मृदुसयने चासने चोपविश्येति स्थाननियमः॥ ॥

आदौ हृच्चन्द्रमध्ये दशादिशि विविधाम्भावयेत्तत्त्वरश्मिन् कृत्वा वज्रादिशुद्धिं पुनरपि गगने स्फारितानां जिनानां ॥ कृत्वा पू
जां विचित्रां बहुभयकलुषं सञ्चितं देशयित्वा कर्त्तव्यं साधकेन त्रिशरणगमनं कायवाक्चित्तशुद्ध्या ॥ ४ ॥

इदानीं वज्रशुद्ध्यादिरुच्यते ॥ आदावित्यादिना ॥ इह योगिना पूर्वोक्तरक्षाकर्म्म मारनिर्घाटनञ्च ॥ ततः साधनापटलोक्तविधिना देवतारूपमात्मानं कृ[illegible]
कारेण कृत्वा स्वहृदये यंकारपरिणतमष्टदलरक्तपद्मे ॥ तदुपरि कर्णिकायां भंकारपरिणते चन्द्रमण्डले तस्य मध्ये तत्त्वमिति संवृत्या हूँकारजं वज्रं पञ्च
शूकं तस्य रश्मीन् विविधान् पंचवर्णान् भावयेद्योगी ॥ पूर्वं कृत्वा वज्रादिशुद्धिं पश्चात्तत्त्वालिकया तेस्वप्रक्षिप्तया वाक्शुद्धिर्भवति ॥ तथा पूर्वोक्तयादि
ष्मुद्रया शिरसादारभ्य यावत्पादतलेनावदात्मानं संस्पर्शयेत् ॥ एवं कायशुद्धिः ॥ एवं कृत्वा वज्रादिशुद्धिं ततश्चन्द्रमण्डले वज्ररश्मिभिर्गगनतलेन
थागतान् प्रतिबोध्य तेषां स्फारितानां जिनानां पूजार्थं नानारश्मीन् पुनराकृष्य स्वहृदये चन्द्रवज्रप्रविष्टान् विभाव्य ततश्चन्द्रमण्डलाद्दश पूजादेवीनां
बीजाक्षराणि ध्यायात् ॥ [illegible] इत्येभिर्बीजाक्षरैर्निष्पन्ना यथासंख्यं नृत्या । वाद्या । गन्धा । माला । धूपा । दी
पा । नैवेद्या । अक्षता । लास्या । हास्या । गीता । कामा । इत्यादिभिस्तथागतानां पूजां कृत्वाऽभिषेकपटलो
क्तविधिनानेनावक्ष्यमाणक्रमेण बहुविधकलुषं संचितं देशयित्वा आदौतेन नः कर्त्तव्यं साधकेन त्रिशरणगमनं कायवाक्चित्तविशुद्ध्येति नियमः ॥ ॥
संबुद्धैर्बोधिसत्त्वैर्बहुविधकुशलं यत्कृतं चार्य्यसंघैः अनुमोदे तत्समस्तं व्यपगतकलुषं बोधिचर्यानुरूपः ॥ बुद्धं

धर्म्मं च संघं भवभयहरणं बोधिसीम्नः प्रयामि संबुद्धो हं भवामि प्रणिधिमिति करोम्यत्र सत्वार्थहेतोः॥ १ ॥

इदानीं पापदेशनावशानेऽनुत्तममनुमोदयेत्॥ संबुद्धैर्बोधिसत्वैर्बहुविधकुशलं यत्कृतं चार्यसंघैरनुमोदे तत्समस्तं ह्यपगतकलुषो बोधिचर्यानुरक्तो मसत्वी॥ ततस्त्रिशरणं गच्छति॥ ॐ बुद्धं धर्मं च संघं भवभयहरणं बोधिसीम्नः प्रयामि॥ त्रिशरणगमनपश्चान्निर्याननं कृत्वा ततः सत्वार्थाय प्रणिधानं करोतीति॥ संबुद्धो हं भवामि प्रणिधिमिति करोम्यत्र सत्वार्थहेतोरिति॥ एवं वन्दना पूजना पापदेशनानुमोदना तथागतानामध्येषणा याचनानुत्तमपरिणामनेति॥ एवं सप्तविधां पूजां कृत्वा नवत्रीणि मूलानि स्मरेत्॥ बोधिचित्तोत्पादः॥ आशयविशुद्धिः॥ अहंकारममकारपरित्यागश्चेत्यक्षम्॥ ततो दशपारमितां विभावयेत्॥ पुण्यज्ञानशीलसम्भारार्थं॥ दानपारमिता॥ एवं शीलक्षान्तिवीर्यध्यानप्रज्ञोपायप्रणिधिबलज्ञानपारमितां विचिन्त्य॥ ततो ब्रह्मविहारान् स्मरेत्॥ मैत्रीकरुणामुदितोपेक्षामिति॥ ततश्चत्वारि संग्रहवस्तूनि चिन्तयेत्॥ दानं प्रियवाक्यमर्थचर्या समानार्थतामिति॥ ततो दशाकुशलपरित्यागं विभावयेत्॥ प्राणातिपातमदत्तादानं काममिथ्याचारं मृषावादं पारुष्यं पैशून्यं संभिन्नप्रलापं अभिध्यां व्यापादं मिथ्यादृष्टिं चेति॥ एवं कौकृत्यस्त्यानमिद्धौद्धत्यविचिकित्सेति॥ पश्चादावरणानि परित्यजेदेतेन रागद्वेषमोहमानक्लेशान् परित्यजति॥ एवं कामाश्रवं भवाश्रवं अविद्याश्रवं दृष्ट्याश्रवं त्यक्त्वा ततश्चतुर्विमोक्षं विभावयेत्॥ शून्यतामनिमित्तमप्रणिहितमनभिसंस्कारमिति विभाव्य त्रैधातुकं सचराचरं विचारयेत्॥ अनया गाथया॥ अभावे भावनाभावो भावना नैव भावना॥ इति भावो न भावः स्यात् भावना नोपलभ्यते॥ इति

॥ अस्यार्थो विभज्यमानो वक्तव्यः॥

शून्यभावाद्विहीनं सकलजगदिदं वस्तुरूपस्वभावं तस्माद्बुद्धो न बोधिः परहितकरुणाचानिमित्तं प्रतिज्ञा॥ एवं वा

समस्तं तदपि नरपते कायवाक्चित्तवज्रं ध्यातव्यं बोधिसत्वैरपरिमिततराणां मण्डलं मण्डलेशः ॥ ६ ॥

इदानीं पुनर्भवग्रहणाय शून्यतालक्षणमुच्यते ॥ शून्यमित्यादिना ॥ शून्यं भावादिहीनं सकलजगदिदं वस्तुरूपस्वभावं यत्तस्मान्महाशून्यात्स्व[illegible]न बोधिः प
रहितकरुणेन ॥ एवं चानिमित्तप्रतिभासप्रभवे यं जगतो हितायेति ॥ एवं ज्ञात्वा समस्तं उक्तत्वात् ॥ तदपि नरपते कायवाक्चित्तवज्रं ध्यातव्यं बोधिसत्वैरपरिमि
ततराणां मण्डलं मण्डलेशामिति ॥ कायवाक्चित्तमण्डले कायवाक्चित्तवज्रं ध्यातव्यं येनापरलौकिकफलसाधनाय सर्वसत्वसंदर्शनायेति ॥ भगवतो निर्म
मः ॥

॥ तोयेनाग्नेर्विनाशं प्रथममिह यतिः कारयेद्देहमध्ये पश्चात्तोयं धरित्री भवति लवणवत्तोयमध्ये प्रविष्टा ॥ अन्त
र्धानं हि वायुर्व्रजति नभसि तच्छोषयित्वा स्वराशिं चित्तं वह्नौ तमोन्ते विषयविरहिते स्थापयेन्मध्यभूमौ ॥ ७ ॥

इदानीं लोकोत्तरस्कन्धग्रहणाय सांसारिकस्कन्धपरित्यागाय समाधिरुच्यते ॥ तोयेनेत्यादिना ॥ इह मर्त्ये गर्भजानां मरणकाले तोयेनाग्नेर्विनाशः क्रियते ॥
अतस्तेनैव समाधिना तोयेनाग्नेर्विनाशं प्रथममिह यतिः कारयेद्देहमध्ये ॥ पश्चादग्नेरभावात् धरित्री कठिनतां त्यक्त्वा लवणवद्द्रवीभूता तोयं भवति तोयमध्ये
प्रविष्टा ॥ ततो वायुना समस्तं तोयं शोषयित्वा नभस्यन्तर्धानं प्रयाति ॥ एवं धातुसमूहस्य विनाशे शीघ्रं तनश्चित्तं वह्नौ तमोन्ते आकाशधातौ सर्वाकारबिम्बे
विषयविरहिते स्थापयेन्मध्यभूमौ ॥ आलयविज्ञानमिति ॥ तत इदं मन्त्रमुच्चारयेत् ॥ ॐ शून्यताज्ञानवज्रस्वभावात्मकोहं ॥ ॐ अनिमित्तज्ञानवज्रस्वभा

वात्मकोऽहं ॐ अप्रणिहितज्ञानवज्रस्वभावात्मकोऽहं॥ ॐ अनभिसंस्कारज्ञानवज्रस्वभावात्मकोऽहं॥ इत्युच्चार्य्यैवं धातुकं परमार्थधर्मतातीतेन शून्यताविम्बं
विभावयेदिति तथागतनियमः॥ ॥ इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां द्वादशसाहस्रिकायां विमलप्रभायां स्नानरक्षापा
पदेशनादिमहोद्देशः प्रथमः॥ ॥

शून्ये वाय्वग्नितोयावनिखुरनगाजेन्दुसूर्याग्नयश्च कूटागारं समन्तात्स्फुरदमलकरं वज्रजं पञ्जरं वा॥ तन्म
ध्ये वज्रभूमौ मणिकरनिकरे मण्डलं विस्फुरन्तं ॐकारज्ञानजातं जिनवरकमले चन्द्रसूर्यासनश्च॥ १ ॥

इदानीं पूर्वे प्रणिधानपरिपूरणाय धर्मचक्रप्रवर्त्तनार्थं गर्भावक्रमणन्यायेन भगवतउत्पत्तिक्रमेण साधनमुच्यते॥ शून्यमित्यादिना॥ इह वाह्ये अध्यात्मनि
उत्पत्तिनिमित्तमनन्ताकाशधातुः प्रज्ञाधर्मोदये त्रिकोणं वाह्ये वर्त्तुलं दशाकारवज्रमये मर्त्ये मातृशरीरमध्यात्मनि तत्र वाह्ये वायुमण्डलं मध्ये धन्वाकारं नि
र्यग्मोनेन चतुर्लक्षयोजनं यंकारबीजपरिणतं कृष्णमधऊर्द्धं हूँकारपरिणतविश्ववज्रद्वयसहितं ध्वजाङ्कितं॥ तदुपरि त्रिलक्षयोजनायामं रँकार
परिणतं त्रिकोणं वह्निमण्डलं अधऊर्द्धं हूँकारपरिणतं विश्ववज्रद्वयसहितं रक्तं स्वस्तिकाङ्कितं॥ तदुपरि तोयमण्डलं द्विलक्षयोजनं वँकारपरिण
तं शुक्लमधऊर्द्धं हूँकारपरिणतं विश्ववज्रद्वयसहितं पद्मलाञ्छितं वृत्तं॥ तदुपरि लँकारपरिणतं पृथ्वीमण्डलं चतुरस्रं पीतवर्णमधऊर्द्धं हूँ
कारपरिणतविश्ववज्रद्वयसहितं॥ वज्रलाञ्छितं लक्षयोजनं॥ तदुपरि मेंकारपरिणतं वज्रमयं महामेरुमधो विस्तारेण षोडशसहस्रं॥ ऊर्द्धं पञ्चा
शत्सहस्रं तन्मध्ये विश्वाब्जे मेरुप्रमाणेन क्षँकारपरिणतं॥ तस्य त्रिभागिका कर्णिकातुल्य सार्द्धद्वादशसहस्रयोजनायामा तन्क्षँकारपरिणतात उप

रिहुंकारपरिगतं चन्द्रमण्डलं कर्णिकातत्पं तदुपरि विसर्गपरिगते स्फुर्समण्डलं॥ तदुपरि अग्निदिशि त्रिराहुमण्डलं नीलवर्णं बिन्दुपरिगते
एवं समस्तमेकलोलीभूते ह्म्ल्व्र्यूँ इति बीजाक्षरं विभाव्य॥ ततो लोकधातुं निष्पन्नं चिन्तयेदिति वाह्ये॥ अथात्मनि मानुशरीरे ललाटे पूर्वोक्तविधिना
वायुमण्डलं कण्ठे तेजोमण्डलं धूं हृदये तोयमण्डलं नाभौ पृथ्वीमण्डलं॥ नाभेरुर्ध्वं स्वक कमलोपर्यन्तं महामेरुः॥ तदुपरि कमलं भगवतः कमलमिव॥
विश्ववज्रकवाहि स्वस्तिको नो अथ चन्द्रसूर्यराहुमण्डलानि तदुपरि कमलकर्णिकायां समाहर रश्मिषामिति॥ एवं तदुपरि कूटागारं समन्तात्स्फुरदमल
करवज्रं हूँकारजं वज्रपञ्जरं च॥ मातृयोनौ सङ्कलितं कमलमिति ज्ञापकात्॥ तेनैव वज्रमयपञ्जरं वा तन्मध्ये वज्रभूमौ हूँकारपरिगतं ओंका
रपरिगतं धामशिकरनिकरैर्मण्डलं विस्फुरन्तं॥ ओंकारं ज्ञानजातं जिनवरकमलं चन्द्रसूर्यासनानामिति॥ चित्तमण्डले भूवलमात्रं॥ ॥

वाह्ये वा मण्डले वेदुरकमलमिसं चन्द्रसूर्यैर्विहीने वाह्ये दिक्कोणभागे दिनकरकमलं धारसंधेरथेव॥ ग
केदारेषु राजन्मणिकनकमयैस्तोरणैश्च क्रमशोतेष्व[illegible]स्तम्भैश्च गर्भे कुलिशमयपुरसंभोगचक्रं जिनस्य॥ ९॥

मवाह्ये वा मण्डले॥ समुद्रवलयान्ते षोडशदलकमलमिदं कमलाष्टकं चन्द्रसूर्यैर्विहीनं तस्मैव वाह्यिकायमण्डले वा षड्वलयान्ते दिनकरकमलमिति वाद
त्रकमलं चन्द्रसूर्यैर्विहीने एवं चतुष्करे रथाच्च एवं कायमण्डलं॥ चतुर्लक्षयोजनायामं॥ वायुमण्डलं तदूर्ध्वं॥ चित्तमण्डलं तस्याप्यूर्ध्वं महासुखचक्रं
तस्याप्यूर्ध्वं भगवतः पद्मं॥ पद्मत्रिभागिका कर्णिकायां चन्द्रादित्यराहुमण्डलानि तस्यैव मध्यात्मनि तदुपरि कमलान्तः॥ अथ ऊर्ध्वं हृदयाद् तदुपरि कमलं शिरोय

वत्॥अथवा हृदयाद्बाहूपबाहुनखान्तं यावत्॥ मानुषशरीरे विकल्पभावादिति नियमः॥ एवं प्रत्येकमण्डले चतुष्कं तु द्वाराणि॥ एवं द्वादश द्वाराणि॥ अर्कवा
रेष्ठ राजत्रित्रिसंबोधने॥ मणिकनकमयैस्तोरणैश्च कायमण्डलबाह्ये अष्टश्मशानैश्च॥ गर्भे अष्टदलमध्ये॥ षोडशकलाभेदेन षोडशदलमध्ये ऽवि
शमयं बोधिचित्तमयं शुभसंभोगचक्रं जिनस्येति॥ अस्य कायधातुभिर्विशुद्धि ज्ञानपटले वक्ष्या॥ अत्र मूलतन्त्रानुसारेण धर्मस्कन्धविशुद्धिरुच्य
ते॥ अत्र भगवानाह॥ शुद्धधर्ममहासंधेश्चित्तवाक्कायमण्डलं॥ चतुर्ब्रह्मविहारैश्च वज्रसूत्रचतुष्टयं॥ चतुर्भिः स्मृत्युपस्थानैश्चतुरस्रं समन्ततः
द्वादशाङ्गनिरोधेन द्वाराणि द्वादशानि च॥ भूमिभिर्द्वादशैस्तद्वत्तोरणानि शुभानि च॥ आर्याष्टाङ्गिकमार्गैश्च श्मशानान्यष्टदिक्षु वै॥ शून्यताषोडशा
स्तम्भाः कूटागारस्तु धातुभिः॥ निर्व्यूहाष्टविमोक्षैश्च रूपिभिश्चाष्टभित्तयः॥ कपोतालम्बकश्चैव चित्तवाक्कायभेदतः॥ शीलादिपञ्चभिः स्कन्धैः
पञ्चवर्णविशोधिते॥ त्रिप्रकारास्त्रियानैश्च पञ्चश्रद्धेन्द्रियादिभिः॥ श्रद्धादिभिर्बलैः पञ्च चित्तवाक्कायमण्डले॥ समाधिधारिणीभिश्च वेदिकामण्डलत्र
ये॥ दशपारमितापूर्णैर्विचित्रा रत्नपट्टिका॥ हारार्द्धहारा वैरोचिकैर्धर्मैरष्टादशभिरेव ते॥ वज्रलीवशिताभिश्च कुशीलैः कपिशीर्षकं॥ शून्यतादिविमो
क्षैश्च पटहादिध्वनिपूरितं॥ ऋद्धिपादैर्ध्वजाकीर्णं प्रहारैर्दर्पणोज्ज्वलं॥ बोध्यङ्गैश्चामरैर्युतं नवाङ्गैः स्रग्दाममण्डितं॥ चतुर्भिः संग्रहैः कोणं विश्व
वज्रैरलंकृते॥ स्वचित्तं सत्त्वचक्ररत्नैर्द्वारनिर्व्यूहसन्धिषु॥ पञ्चाभिज्ञामहावल्लयैर्वेष्टितं पञ्चभिः सदा॥ सर्वाकारज्ञताबोधवज्रावल्याभिवेष्टितं
प्रत्येकचक्रषोडशज्ञानवज्रार्चिर्मालया॥ प्रज्ञोपायविभागेन चन्द्रसूर्यैस्तथोदितं॥ चित्तवाक्कायसंशुद्धं धर्मचक्रं महापटं॥ दुन्दुभिर्बोधिरत्नश्च त
च्चिन्तामणिकादिकं॥ एतत् श्रीकालचक्रस्य मण्डलं धर्मधातुकं॥ सर्वसंपत्करं ध्यात्वा आदिकायान्ततो न्यसेदिति॥ गर्भशोधनाविधिर्भगवतो गर्भा

२५५

वक्रमसंकाशे॥ ॥आद्याकायेन्दुसूर्येन्दुकुलिशसहिताः पञ्चकादर्शकाद्यैर्युक्तैनेपंचरश्मीनस्फुरदमलकरं भाव
येत्कालचक्रं॥ वज्रालंकारदेहं जिनवरकमलं सूर्यवाहुंस्तुगास्यं त्रिग्रीवं सूर्यनेत्रं विकसितवदनं वार्द्धदंष्ट्राकरालं॥ १०॥

इदानीं बाह्ये देवतानिष्पत्तिरध्यात्मनि गर्भनिष्पत्तिरुच्यते॥ आधारस्यादिना॥ इह मण्डलकर्णिकोपरि चन्द्रसूर्यराहुमण्डलोपरि चन्द्रमण्डले॥ आद्याका
त्रिंशल्लक्षणार्थो॥ वामदक्षिणावर्त्तेन देयात्रिंशात्स्वरविन्दुविसर्गश्चेति॥ कात्रिंशत्न अ इ ऋ उ ऌ इति प्रथमकलापञ्चके॥ ततोत्तराभेदेन आ ऐ आ ॠ
ओ आ ल्लि इति द्वितीयकलापञ्चकं॥ ततोऽपरादेशेन हृ ए व ले इति तृतीयकलापञ्चकं॥ पञ्चदशकलान्ते बिन्दुः॥ अं इति षोडशो वामावर्त्तेन॥ ततो दक्षिणावर्त्ते
न ऋ आ प्रतिपदादिकलोदयाः॥ ह्रावारायाह्॥ आ लृ औ आः ऐ आ ल्ह ऊ ॠ ई आ। इति पंचदश अमान्ते विसर्गः॥ अः इति षोडशस्वराः॥ एतानि
द्वात्रिंशन्महापुरुषलक्षणानि चन्द्रांशे गर्भाधाने॥ शुक्रधातौ विनिनियमः॥ ततः कायाअर्कमण्डले चत्वारिंशदेकव्यञ्जनात्मानः॥ चत्वारिंशत् संभूताः
तत्र हयरवलेन षड्वर्गाः॥ पञ्चविंशद्ध्वनि॥ तथाधिपोच्चारणवशात्॥ ल व य ड ढ मृ स्ते न्त्र ब ष्य ड्ड ष्ठ ल व हृ ष्य हृ स्त भ्र श्च ङ्कु ण ध द्ध त्त ष्फ्रु
च भ्र म्प ह ष्ठ ड्ड ड्ढ ग्ग च ब्भ ज्जु त्त क ख्व ग्घ हः इति चत्वारिंशद्दक्षिणावर्त्तेन पृथिव्यादिभेदेन संभूताः॥ ततो वामावर्त्तेन ङ प ग ख क
ण ञ ज छ च। ण ढ ड ठ ट। म भ ब फ प। न ध द थ त। ह्म श ष ख्श स। ह य र व ल। ढ ड य व ल। इति चत्वारिंशदेकव्यञ्जनात्मानः॥ एवमशीतिव्यञ्ज
नानि सूर्ये गर्भाधाने रजसीति नियमः॥ एवमाद्याः कायेन्दुसूर्येऽपि कुलिशसहितास्तयोः॥ सूर्यमण्डले चन्द्रः सूर्योपरि चन्द्रमध्ये हूँकारं वज्राङ्कं व
न्ध॥ एवं रजो परिशुक्रो शुक्रमध्ये आलयविज्ञानं गन्धर्वसत्त्वं॥ ततः पञ्चकादर्शकाद्यैरिति॥ ततश्चन्द्रः शुक्रं स्वराचितं॥ आदर्शज्ञानं रूपस्क

न्धजनके वैरोचनः॥ सूर्ये रजोव्यञ्जनान्विते॥ समताज्ञानं वेदनास्कन्धजनको रत्नसंभवः॥ प्रत्यवेक्षणा गन्धर्वसत्त्वे हूँकारान्विते संज्ञास्क
न्धजनकोऽमिताभः॥ तेषामेकत्वं प्राणवायुः॥ हीकारान्वितः॥ कृत्यानुष्ठानज्ञानं संस्कारस्कन्धजनकोऽमोघसिद्धिस्ततः सर्वाङ्गावयवपरिपू
र्णं विज्ञानं हूँकारान्वितं तु विशुद्धधर्मधातुज्ञानं॥ विज्ञानस्कन्धजनकोऽक्षोभ्य इति पञ्चज्ञानात्मकं बाह्येऽध्यात्मनि च॥ एषामेकलोलीभूतं
बीजं स्वराणां बिन्दुः व्यञ्जनानां विसर्गः॥ विज्ञानस्यानाहतं॥ प्राणस्य अकारः॥ इत्युक्तक्रमेण भगवन्तं ध्यानं पञ्चरश्मीन् स्फुरद्दमलम
रं भावयेत्॥ कालचक्रमिति॥ बाह्ये गर्भे च कायनिष्पत्तिनियमः॥ ॥ इदानीं देवताविग्रहे कालविभागेन संस्थानमुच्यते॥ व
क्त्रादि॥ इह देवतानामुत्पादकाले सर्वालंकारसहित उत्पादसे च नानाशरीरावयवा नानावर्णाः॥ नानासंस्थानाश्चोत्पद्यन्ते॥ अतो वज्रा
लंकारदेहं जिनकरकमलं चतुर्विंशतिकरं॥ सूर्य इति द्वादशबाहुं॥ युगास्यं चतुर्मुखं॥ त्रिग्रीवं कादशानेत्रं विकसितवदनं चार्ध
दंष्ट्राकरालमिति॥ कायनिष्पत्तौ कायविज्ञानाधिपतेर्लक्षणं मध्ये मण्डलकमलकर्णिकायां शरीरान्तभूतो देवताविन्यासो मण्डला
कार उच्यते॥ ॥

श्रीमत्योंकारजाते जिनपतिकमले चन्द्रसूर्याग्निमूर्ध्नि रुद्रानङ्गद्वयोर्हि स्तुललितवरणालीढपादं जिनेन्द्रं॥
मारौ रक्ते च सव्ये वरचरणतले धृक्नाम्नि च रुद्रो मध्ये सव्यावसव्यं भ्रमररविनिभं चन्द्रवर्णं च कण्ठं॥ ११ ॥

श्रीमतिओंकारजाते जिनपतिकमले हृत्कमले चन्द्रसूर्याग्निमूर्ध्नि ललनारसनावधूतीमूर्ध्नि रुद्रानङ्गयोर्द्वयोर्मारस्कन्दयमयो यो वामदक्षिणाप्रवा

हृयोः॥ हृदिभुललितचरणालीढपादं जिनेन्द्रमिति॥ तत्र मारः कामदेवः पञ्चपुष्पबाणधनुर्हस्तः॥ पाशाङ्कुशधरश्चतुर्भुज एकवक्त्रो रक्तवर्णः॥ सव्ये पादतले रक्तवर्णः॥ तथा रुद्रस्त्रिनेत्र एकाननश्चतुर्भुजः॥ त्रिशूलडमरुकपालखट्वाङ्गधरो वामपादतले शुक्ले शुक्ल इति॥ एवं नीलाङ्गं तथा मध्यकण्ठं नीलं दक्षिणो रविनिभं रक्तं॥ अवसव्यं वामं चन्द्रवर्णं शुक्लमेवं विकण्ठं पूर्वोक्तविधानात्॥ पूर्वमुखं कृष्णं दंष्ट्राकरालोग्रं॥ दक्षिणं सरागं रक्तं वामं प्रशान्तं शुक्लं॥ पश्चिमं समाधिस्थं पीतं॥ जटामुकुटे विश्ववज्रं॥ अर्द्धचन्द्रं वज्रसत्वमुकुटं॥ वज्रमणिवज्रकुण्डलवज्रकण्ठिकावज्ररुचकवज्रमेखलावज्रनूपुरवज्रपट्टवज्रमाला व्याघ्रचर्माम्बरधरं॥ ॥

स्कन्धं नीले च रक्तं शशधरधवलं दक्षिणे चोत्तरे च द्वौ द्वौ सव्यावसव्ये सितरविवपुषो राहुवच्चन्द्रवर्णाः॥ तद्वेद्वे
अष्टैकेन प्रहरणसहिताः पाणयश्च क्रमेण पञ्चाङ्गुल्यास्त्रिपर्वाः शशिकरकमले पञ्चवर्णाः स्फुरन्त्यः॥१२॥

तथा दक्षिणस्कन्धं प्रथमं नीलं द्वितीयं रक्तं तृतीयं शुक्लं॥ एवमुत्तरे च॥ एवं द्वौ बाहू नीलौ द्वौ रक्तौ द्वौ शुक्लौ दक्षिणे चोत्तरे च॥ एवं कराश्चत्वारः कृष्णाः चत्वारो रक्ताः॥ चत्वारः शुक्लाः॥ दक्षिणे चोत्तरे च॥ ते च वक्ष्यमाणप्रहरणैः सहिताः॥ एवं प्रत्येककरे पञ्चाङ्गुल्यस्ताः प्रत्येकास्त्रिपर्वाः॥ अङ्गुष्ठ पीतः॥ तर्जनी शुक्ला॥ मध्यमा रक्ता। अनामिका कृष्णा। कनिष्ठा हरिताः॥ हस्ततलात् सर्वाङ्गुलीनां प्रथमपर्वपंक्तिः कृष्णा॥ द्वितीया रक्ता। तृतीया शुक्लेति॥ एवं शशिकरकमले प्रत्येकपञ्चवर्णास्तामुद्रिकाभिः स्फुरन्त्यः॥ इत्यविद्यासंस्कारविज्ञानानुप्रवेशनियमो गर्भे तृतीयमासः प्रथमसमाप्तः॥ ॥

कृष्णे रक्ते च शुक्ले प्रवरकरतले संस्थितं चास्त्रवृन्दं वज्रं खड्गं त्रिशूलं भुवनभयकरा कर्त्रिका वह्निवाणाः ॥ तस्माद्वज्रां-
कुशो वैसरवडमरुको मुद्गरश्चक्रमेव कुन्तो दण्डः कुठारो रविकरकमले दक्षिणे वज्रिणाश्च ॥ १३ ॥

इदानीमस्त्रवृन्दमुच्यते ॥ कृष्णा इत्यादिना ॥ कृष्णाकरतलचतुष्के । प्रथमे वज्रं । द्वितीये खड्गः । तृतीये त्रिशूलं । चतुर्थे कर्त्रिकेति ॥ तथा रक्ते करतलचतुष्के ॥ प्रथमे ऽग्निवाणाः । द्वितीये वज्राङ्कुशः । तृतीये रणातडमरुकः । चतुर्थे मुद्गरः । इति ॥ तृतीये शुक्ले करतलचतुष्के ॥ प्रथमे करतले चक्रं । द्वितीये कुन्तः । तृतीये दण्डः । चतुर्थे पर्शुरिति ॥ दक्षिणे ऽस्त्रवृन्दं । रविकरकमले दक्षिणे । वज्रिणाश्चेति ॥ ॥

घण्टा खेटं च खट्वाङ्ग विकसितमुखं रक्तपूर्णं कपालं कोदण्डं पाशरत्नं कमलजलचरौ दर्पणः शृङ्खला च ॥ वेदासं २५७
ब्रह्मणो यच्छिरकमलमलं वामहस्ते जिनस्य कुवन्त्यो दीनवक्त्रं धृतचरणतले मारुरुद्रस्य देव्यौ ॥ १४ ॥

इदानीं वामकृष्णाकरतलचतुष्के चिह्नमुच्यते ॥ प्रथमे वज्रघण्टा । द्वितीये खेटं । तृतीये खट्वाङ्गं विकसितमुखं । चतुर्थे रक्तपूर्णकपालमिति ॥ तथा रक्ते करतलचतुष्के ॥ प्रथमे कोदण्डं । द्वितीये पाशः । तृतीये मणिरत्नं । चतुर्थे श्वेतकमलमिति ॥ तथा शुक्ले करतलचतुष्के ॥ प्रथमकरतले जलचर इति शंखः ॥ द्वितीये दर्पणः । तृतीये वज्रशृङ्खला । चतुर्थे ब्रह्मशिर इति ॥ एवं वेदास्यं ब्रह्मणो यच्छिरकमलमलं भूषणं वामहस्ते जिनस्येति ॥ तत्र मारुरुद्रसंनिधाने कुवन्त्यो दीनवक्त्रं धृतचरणतले मारुरुद्रयोः स्वदेव्यौ ॥ रतिर्मारस्य । उमा रुद्रस्येति अक्षोभ्यप्रवेशः ॥ ॥

हेमाभावेदवक्त्रावसुकरकमलालालिताविश्वमातासव्येकर्त्र्यङ्कुशौवैसरवडमरुकश्चाक्षसूत्रंक्रमेण॥वामेशुक्ति-
श्चपाशःशातदलकमलंदिव्यरत्नंतथैवप्रत्यालीढार्कनेत्राजिनपतिमुकुटामुद्रितामुद्रिताभिः॥ १७ ॥

इदानींविश्वमातालक्षणमुच्यते॥हेमाभेत्यादिना॥तत्रैकसमरसाच्चन्द्रशुक्रस्वभावेनभगवतउत्पादः सूर्यरजःस्वभावेनदेव्याउत्पादः॥तत्रश्वेतरूपाधर्मीचन्द्रः॥रक्तपीतधर्मीसूर्यः।तेनहेमाभावेदवक्त्राचतुर्मुखावसुकरकमलाअष्टभुजाओग्रेनआलिङ्गिताविश्वमाता॥तस्याःप्रथमकरेदक्षिणेकर्त्रिका।द्वितीयेऽङ्कुशः।तृतीयेसरवडमरुकः।चतुर्थेअक्षसूत्रमिति॥वामप्रथमकरेशुक्तिः।द्वितीयेपाशः।तृतीयेशतदलकमलंधवलं।चतुर्थेदिव्यरत्नंतथैवच॥एवमालीढाभगवान्प्रत्यालीढाविश्वमाता॥अर्कनेत्राद्वादशनेत्राजिनपतिमुकुटावज्रसत्त्वमुकुटा।मुद्रितापञ्चमुद्राभिःसमापत्तिस्था॥

अष्टौदेव्योऽष्टपत्रेवसुकरकमलावेदवक्त्रार्कनेत्राःकोणेतासांचतस्थुस्त्वहिचमरधरावज्रभेदैर्जिनस्य॥ईशे
नैरृत्यकोणेशिखिनिचयपवनेधर्मशंखश्चगण्डीरत्नंचिन्तामणिःस्याद्भवतिखलुतथाकल्पवृक्षःक्रमेण॥ १८ ॥

तस्याविश्वमातुर्ज्ञानपारमितायाः॥अन्तर्भाविताअपरपारमिता॥दानादयः॥पारमिताष्टौपत्रेऽष्टदेव्यः॥तावसुकरकमलाष्टभुजाः॥वेदवक्त्राश्चतुर्मुखाः॥अर्कनेत्राद्वादशलोचनाः॥तासांमध्येचतस्थोऽहिचमरधराः॥अष्टभुजैरष्टचमरधराः॥चतुःकोणेवज्रभेदैर्जिनस्येति॥अग्नेयोकृष्णानैरृत्येरक्ता।वायव्येपीता॥ईशानेशुक्ला॥एवंतासांपृष्ठतईशेधर्मशंखःशुक्लः।नैरृत्येधर्मगण्डीरक्ता।शिखिनिचिन्तामणिःकृष्णः॥वायव्येकल्पवृक्षः

पीमः॥ इति॥ एवं पूर्वपत्रे कृष्णा। दक्षिणे रक्ता। उत्तरे श्वेता। पश्चिमे पीतदीप्तिरिति॥ यथा भगवतो ऽष्टभेदश्चतुर्दिक्षु भेदेन तथा देवीनां विश्वमातुः॥ प्रथमे मुखं हेमाभं। दक्षिणं शुक्लं। वामं रक्तं। पश्चिमे नीलं। एवं पीतानां देवीनां। शुक्लानां शुक्लं। पूर्वं दक्षिणे कृष्णं। पश्चिमे रक्तं वामं पीतं॥ रक्तानां प्रथमं रक्तं। दक्षिणं पीतं। वामं नीलं। पश्चिमं शुक्लं। कृष्णानां पूर्वं कृष्णं। दक्षिणं रक्तं। वामं शुक्लं। पश्चिमं पीतं। इति गर्भपद्मे देवीनां यथा भगवत्या अलंकाराः पञ्चमुद्रास्तथा ज्ञातव्या इति नियमः॥ ॥

कृष्णाया धूपपात्रं प्रथमकरतले शीतपात्रं द्वितीये पिष्टं रक्तं तृतीये समदशशधरं सव्यहस्ते चतुर्थे। वामे घण्टा
च पद्मं सुरतरुकुसुमं पुष्पमालाक्रमेण रक्ताया दीपहारौ समुकुटकटकं दक्षिणे वामहस्ते॥ १७ ॥

इदानीं कृष्णादीनां देवीनां सव्यवामहस्तेषु चिह्नमुच्यते॥ कृष्णेत्यादि॥ कृष्णाया धूपपात्रं प्रथमकरतले शीतपात्रं चन्दनपात्रं द्वितीये पिष्टं रक्तं कुंकुमपात्रं॥ तृतीये समदशशधरं कस्तुरिकासहितं कर्पूरपात्रं चतुर्थे॥ इति दक्षिणकरेषु॥ वामे प्रथमहस्ते घण्टा द्वितीये पद्मं तृतीये सुरतरुकुसुमं चतुर्थे नाना पुष्पमालाक्रमेणेति॥ पूर्वपत्रे॥ रक्तदीप्तायाः प्रथमहस्ते सव्ये प्रदीपः द्वितीये हारः। तृतीये मुकुटः। चतुर्थे कटकमिति सव्ये॥ ॥

वस्त्रं वेमे खला च स्फुरदमलकरं कुण्डलं नूपुरं च पीतायाः शङ्खवेणुमणिडमरुकः सव्यहस्ते क्रमेण॥ वा
मे वीणा च ढक्का प्रगुणरणरणत्किंकिणीका काहली च दध्याम्बौषध्यपानं त्वमृतरसफलं भुक्तपात्रं सितायाः॥ १८ ॥

तथा वामहस्ते प्रथमे वस्त्रं। द्वितीये मेखला। तृतीये रत्नकुण्डलं। चतुर्थे नूपुरमिति॥ तथा पीतदीप्तायाः सव्ये प्रथमकरे शंखः। द्वितीये वेणुः। तृतीये मणि
:। डमरुकश्चतुर्थे इति॥ वामे प्रथमे वीणा। द्वितीये ढक्का। तृतीये रत्नकस्थिका। चतुर्थे काहलाचक्रमेरोति॥ तथाश्वेतदीप्तायाः। प्रथमे हस्ते
दुग्धपात्रं। द्वितीये ऽम्बुपात्रं। तृतीये दिव्यौषधी। चतुर्थे मद्यपात्रं। वामे प्रथमहस्ते ऽमृतपात्रं। द्वितीये सिद्धरसपात्रं। तृतीये ऽमृतफलं। चतुर्थे भक्ष
पात्रं॥ सितायाः इति वज्रसत्त्वनिष्पत्तिः स्वमुद्रासहिता॥ इदानीं नामरूपाद्युत्पादाय महारागेवेतेषु सत्त्वलोकमाधृत्य बुद्धदेशनायां भाजनमभिसंबो
ध्यसुरतक्षणिनां स्वकाये ऽक्षोभ्यादिजिनसमूहं प्रवेश्याकाशादिधातुसमूहं उलूषविद्या चक्षुरादिरूपादिविषयस्वभावेन देवतास्वरूपाविभूतं
पुनरपि तं स्वकायान्निश्चार्य विश्वमातरि यथावदन्ते भावयेत्॥ ततस्तथैव निश्चार्य पुनरपि मण्डलचक्राकारात् तथागतान् सर्वान् स्वकाये प्र
वेश्य चन्द्रद्वयापन्नान् स्वकुलिशेनोत्सृज्य स्वविद्याकमलोदरे तत्परावृत्तं देवतादेवतीगणमण्डलं आधाराधेयलक्षणं अक्षोभ्याधिपतिं ध्या
त्वा पूर्वं भगवतः काये प्रवेशयेत्॥ ॥

दिक्पत्रेष्वधिबुद्धाः खलु सवनयना वह्निवक्त्रर्तुहस्ताः कोणे तारादिदेव्यः पुनरपि च तयोरष्टकश्चोऽकुम्भाः॥ कृष्णा
रक्ता च पीता शशधरधवला देवता देवतां च कृष्णा स्वैनेतुरक्ता त्वथ विदिगगते रक्तपीते ऽर्कमूर्ध्नि॥ १५ ॥

ततो दिक्पत्रेष्वधिबुद्धाश्चत्वारः खलु नवनयना वह्निवक्त्राश्चितुभ्याः॥ समुहस्ताः षड्भुजाः स्फारणीयाः। तत्र पूर्वपद्मे सूर्यमूर्ध्ने अमोघसिद्धिः कृष्ण
:॥ दक्षिणावर्त्तेन कृष्णारक्तसितवदनः॥ दक्षिणे रत्नसंभवो रक्तवर्णः॥ दक्षिणावर्त्तेन रक्तसितकृष्णाननः॥ उत्तरे ऽमिताभः॥ अक्षो दक्षिणाव

र्त्ते नसितकृष्णारक्ताननः ॥ पश्चिमे वैरोचनः पीतो दक्षिणावर्त्ते नपीनसितकृष्णाननः ॥ इति चत्वारः सूर्यमण्डले ॥ दिनस्तु भगवान्वज्रीति ज्ञापकात्
अग्नेय्यां तारा अमोघसिद्धिवत् ॥ नैरृत्ये पाण्डरा रत्नसम्भववत् ॥ ईशाने मामकी अमिताभवत् ॥ वायव्ये लोचना वैरोचनवत् ॥ इति चतस्रश्चन्द्रम
ण्डले ॥ ततः प्रज्ञाप्रकीर्त्तिनेति ज्ञापकात् ॥ पुनरपि च तयोर्देवतादेव्योर्मध्येऽष्टकक्षाख्याष्टामृतकलशाः ॥ सर्वे कृष्णारक्ताश्च पीताशशधरधवला दे
वतादेवतीचेति ॥ पूर्वद्वारेऽमितवलक्रोधः ॥ वर्णमुखभुजतः ॥ अमोघसिद्धिवत् कृष्णः ॥ दक्षिणद्वारे जम्भको रत्नसंभववत् वर्णमुखभुजेनारक्तः
पश्चिमद्वारे स्तम्भको वैरोचनवत् ॥ मुखवर्णभुजतः पीतः ॥ उत्तरे मानकोऽमिताभवत् वर्णमुखभुजतः शुक्लः ॥ ऊर्द्ध्वे उष्णीषो अक्षोभ्यवत् वर्णमु
खभुजतः श्यामः ॥ किन्त्वेते क्रोधा आलीढाः ॥ क्रोधदेव्यः प्रत्यालीढा इति ॥ चतुर्थे मासे नामरूपोन्यादकोले रूपं चतुर्भूतात्मकं ॥ सा च स्तुदकपृ
थ्वीधात्वात्मकं ॥ इति नरस्कन्धधातुक्रोधानां उत्सर्गः ॥ ॥

वैगर्भोपाश्च वृत्तो दिशि विदिशि गतास्पर्शवज्रादयश्च पूर्वे सव्येऽपसव्ये परदिशि कमले विश्वभद्रस्तथैव ॥ श्रीमान्वै
वज्रपाणिः खलु रवकुलिशाद्यक्रोधात्क्रमेण जम्भस्तम्भश्च मानस्त्वतिवलडभियो वारपालं स पूर्वे ॥ २० ॥

ततः पञ्चमे मासि षडायतनोत्पादकाले खगर्भादीनुत्सृजेत् ॥ वैगर्भोपाश्च भिन्नाविति ॥ इह वायुजस्य प्राणो वैगर्भोऽमोघसिद्धिवत् संस्कानतः ॥ एवं दक्षि
णाद्वारस्य सव्ये तेजोजस्य चक्षुः क्षितिगर्भो रत्नसंभववत् संस्कानतः ॥ एवं तेजोधातुजस्य रसवज्रा पाण्डरावत् ॥ नैरृत्यकोणे पश्चिमद्वारसव्ये ॥ पूर्वद्वारस्य सव्ये
घ्राणाकारभिन्नो दिशीति ॥ विदिक्षिगतानाग्नेयकोणे वायुजस्य स्पर्शवज्रा तारावत् संस्कानतः ॥ पृथिवीजस्य कायेन्द्रियं सर्वनीवरणविष्कम्भी वैरोचनवत् ॥ एवं पृ

थीजन्मा गन्धवज्रा वायुकोणे लोचनावत्॥ उत्तरद्वारस्थे उदकजन्मा जिह्वालोकेश्वरोऽमिताभवत्॥ हमानेउदकजन्मा रूपवज्रा मामकीवत्॥ अथो ज्ञानधातुजन्मे मनः समन्तभद्रो नीलवर्णो स्त्रिमुखः षड्भुजो वर्णामः कालचक्रवत्॥ पूर्वद्वारस्य वामे प्राकारभित्तौ॥ एवं ज्ञानधातुजन्या शब्दवज्रा उत्तरद्वारवामे समन्तभद्रवत् संस्थानतः॥ ऊर्द्ध्वे आकाशधातुजन्मे श्रोत्रे वज्रपाणिः रक्षोभ्यवत् इणामो दक्षिणद्वारवामे॥ एवमाकाशधातुजा माधर्मधातुवज्रा पश्चिमद्वारस्य वामे वज्रपाणिवत् संस्थानतः॥ एवं षडायतने पश्चिमे मांसे सप्तैः स्पर्श इति व्यापकात्॥ स्पर्शादयो विषया एवं द्वादशायतनेनोत्सर्गो क्षितौ प्रमात्रा कायवज्रस्य अवकाश॥ अथेमा देवता देवस्य पूर्वोत्तरा ऊर्द्ध्वस्थाश्चन्द्रमण्डले देयाः शुक्लधर्मित्वात् एवमादूदकधातूनामथ विदिक्षिगताः कोणादेवश्चन्द्रेनर्कप्रज्ञाप्रकीर्जितेति वचनात्॥ एवं रक्ता पीता दक्षिणपश्चिमा देवता देव्योऽधस्ताश्च सूर्यमण्डले ज्ञानतेजःपृथ्वीधातूनां रजोधर्मित्वात्॥ अथ दिक्षिगताः देवताः सर्वदितनु भगवान् वज्रीति वचनात्॥ एवं यो भगवतोऽभिमुखः स नायको दिक्षु विदिक्षु देवी नायिका भगवतोऽभिमुखीति॥ पराङ्मुखोऽनुनायक इति॥ ॥

प्रज्ञोत्सङ्गे ह्युपायः शशधरकमले देवतानाञ्च देवी अन्योन्यालिङ्गितौ तौ स्वकरसलिलजैः स्वस्वचिह्नाङ्कितैश्च॥ यश्चिह्नं
यस्य सव्ये प्रथमकरतले सास्य मुद्रा ज्ञाहीना प्रज्ञोपायेन चक्रं परमकुरवगात्तेंपमवज्रासनाद्यं॥ २१ ॥

अतः प्रज्ञोत्सङ्गे ह्युपायोऽनुनायकः शशधरकमले कोणभागे विदिक्षु॥ एवं देवतानामुपायानामुत्सङ्गे देवी अनुनायिका सूर्यमण्डले दिक्षु॥ अन्योन्यालिङ्गितौ तौ स्वकरसलिलजैः स्वस्वचिह्नाङ्कितैर्वक्ष्यमाणैर्यश्चिह्नं यस्य सव्ये प्रथमकरतले सास्य मुद्रा ज्ञाहीना प्रज्ञा चिह्नं वामेऽपि दक्षिणेऽपि साधारणं रत्नं खड्गश्चेति॥

एवं धूम्रीपरं वामदक्षिणे। अथ ऊर्ध्वं प्रज्ञोपायेन चक्रं परमसुखगतं वज्रासनाख्यउपायनायकं। पद्मासनाद्यो देवीगणनायकमिति निगमनः॥ ॥

कृष्णानां खड्गकर्त्री भुवनभयगतं सव्यहस्ते त्रिशूलं वामे खेटं कपालं भवति करतले श्वेतखट्वाङ्गमेव॥ पाशौ वज्रा-
ङ्कुशौ वै सरवडमरुकः सव्यहस्ते क्रमेण वामे कोदण्डपाशौ स्फुरदमलमणिर्लोहितानां तथैव॥ २२ ॥

इदानीं चिह्नान्युच्यन्ते॥ कृष्णानामित्यादिना॥ षड्भुजस्कन्धविशुद्ध्या षट्चिह्नानि॥ तत्र कृष्णानां संस्कारकुलजानां प्रथमे दक्षिणकरे खड्गः॥ द्वितीये कर्त्तृका। तृतीये त्रिशूलं। वामे प्रथमे खेटः॥ द्वितीये कपालं। तृतीयकरतले श्वेतखट्वाङ्गं॥ अमोघसिद्धतारा॥ अमितबलखगर्भस्पर्शवज्राणामिति॥ तथा लोहितानां सव्ये प्रथमहस्तेऽग्निबाणः। द्वितीये वज्राङ्कुशः। तृतीये सरवडमरुकः॥ क्रमेणेति॥ वामे प्रथमे चापं। द्वितीये वज्रपाशः। तृतीये स्फुरदमल- २६०
मणिरत्नं। नवष्टके वेदनाकुलजानां रत्नसंभवपारुएजम्भकक्षितिगर्भरूपवज्राणामिति॥ ॥

पीतानां चक्रदण्डं भयकरकुलिशं सव्यहस्ते क्रमेण श्रीशंखः शृंखलौ वै भवति च सरवावज्रघण्टा च वामे॥ सव्ये श्री-
तुंगरावे शशधरधवलानाञ्च कुन्तत्रिशूलं वामे श्वेते च पद्मं शतदलसहितं दर्पणं चाक्षसूत्रम्॥ २३ ॥

एवंरूपकुलजानां सव्ये प्रथमहस्ते चक्रं॥ द्वितीये दण्डः॥ तृतीये भयकरकुलिशः॥ वामे प्रथमे शंखः। द्वितीये वज्रशृंखला॥ तृतीये सरवावज्रघण्टा। एवं पीता

नां वैरोचनलोचनाख्यम्मकसर्वनीवरणविष्कम्भी। गन्धवज्राणामिति॥ तथा सेकजलजानां श्वेतानां सव्ये प्रथमसहस्ते मुद्गरः॥ द्वितीये कुन्तः। तृतीये त्रिशूलं। वामे प्रथमे श्वेतं शान्तदस्तपद्मं। द्वितीये दर्पणं। तृतीये अभयमुद्रं अमिताभनामकिम मालकलोकेश्वररूपवज्राणामिति॥ ॥

वज्रं कर्त्री कुठारः प्रभवति हरितानां च सव्ये क्रमेण वामे घण्टाकपालं सकलगुणनिधिर्ब्रह्मवक्त्रं तदेव॥ नीलानां
त्वेदितव्यं प्रकृतिगुणवशाद्देवतानां च तद्वत् कृष्णारक्ताच पञ्चक्रान्तकनकनिभा पूर्वभूम्यादिदेशे॥ २४ ॥

तथा विज्ञानजलजानां हरितानां प्रथमे सव्ये वज्रं। द्वितीये कर्त्री। तृतीये परशुः। वामे प्रथमे घण्टा। द्वितीये कपालं। तृतीये ब्रह्मशिरः। अमी अक्षोभ्यवज्रधात्वीश्वरीअ ह्रीमयवज्रपाणिधर्मधातुवज्राणामिति॥ एवं नीलानामपि ज्ञानजलजानां वज्रसत्त्वविश्वमातासुम्भराजसमन्तभद्रशब्दवज्राणामिति॥ विद्नि पमः अथवा नारायणः समन्तभद्रस्थाने लेया। खट्वाङ्गस्थाने ब्रह्मशिरःस्थाने चेति॥ ॥

अष्टौ भूम्यादिदेवी जिनपतिकमले वर्जयित्वा कदाचित् श्रीचक्रे गर्भमध्ये भवति नरपते पञ्चविंशात्मकत्वं। ज्ञात्वा
शाक्तिं स्वचित्ते व्ययमपि भगवान् योगिभिर्भावनीयः सेकार्थं मण्डलं वा भवति जलवशाद्वाह्यचक्रप्रहीनं॥ २५ ॥

अष्टौ भूम्यादिदेवीर्वर्जयित्वा अष्टोपचारधर्मशंखादिकं च जिनपतिकमले कदाचित्॥ श्रीचक्रे विजमण्डले गर्भमध्ये भवति नरपते पञ्चविंशात्मकत्वाद

पविष्टोऽपि तदा भगवान् भवति स्थीसमाजवत् ॥ अत्र दोषो नास्ति निरन्वयत्वात् ॥ एवं ज्ञात्वा शाक्तिः स्वचित्ते साधकेरयमपि भगवान् योगिभिर्भावनीयः ॥ सेकार्थं मण्डलं च भवति जलवशात् प्रस्रवक्रप्रहीने । अत्र सहजसुखं वज्रसत्वेष्ठकं गर्भप्रविष्टं प्रथममासेऽविद्या द्वितीये संस्कारः । तृतीये विज्ञानं । चतुर्थे रूपं । रूपसम्बन्धि षडायतनं । स्पर्शादिकं षष्ठं मासं यावत् जलवशादिति भगवतो नियमः ॥ एवं हृदये चित्तमण्डलं च पञ्च पञ्चधात्वात्मकं ॥ ततः सप्तमे मासि वेदनोत्पादकालेन नीयमाना वायुमण्डले कालनाडी देवी नाठत्सर्गः ॥ नव वायुमण्डलं कण्ठनिर्माणचक्रपर्यन्तं चतुरस्रं प्राणेन तु निर्माणचक्रेन चतुर्विधानां योगगर्भे प्रथमपरिमण्डले चतुरस्रः ॥ द्वितीयेऽष्टौ । तृतीये षोडश । चित्तवाक्कायस्वभावेन । ततश्चतुर्थपरिमण्डले त्रिवज्रसाधारणा चतुःषष्टिनाड्यः ॥ तत्र षष्टिमण्डलबाह्येऽन्याश्चतस्रः भद्रा ॥ एवं कण्ठे तु हृत्तं बाह्येऽन्यः ॥ त्रिंशत् द्विभेदः ॥ एवं निर्माणचक्रे द्वात्रिंशोऽष्टप्रहरभेदबाह्येऽन्यः ॥ द्वितीयपरिमण्डलस्थाः ॥ चतुःषष्टिभिः सार्द्धं उत्सृजेदिति नियमः ॥ आकरणात् ॥ ॥ २६१

बाह्ये वाष्टाष्टकेनाष्टसु कमलदलेष्वष्टदिग्देवतीभिः योगिन्यश्चर्चिकायाः शशिरविसहिता वेष्टितव्याप्तिनेत्राः ॥ पूर्वो
क्तेश्चर्चिकाग्नौ खगपतिगमना शूकरी सम्मुखं च ॥ २६ ॥

इदानीं वायुमण्डले देवतोत्सर्ग उच्यते ॥ बाह्ये इत्यादिना ॥ इह चित्तमण्डलबाह्ये वायुमण्डले तस्मिन् बाह्ये चाष्टाष्टकेनाष्टसु कमलदलेष्वष्टदिग्योगिनीभिः सार्द्धं योगिन्यश्चर्चिकायाः शशिरविसहिता स्वस्ववाहनस्था वेदहस्ताश्चतुर्भुजा[illegible]नेत्रा नानावक्त्रा भवन्ति ॥ तत्र पूर्वे चर्चिका । एकवक्त्रा कृष्णा ॥ अग्नौ खगप

निगमनोक्ते वैष्णवी॥ शङ्करी। खरामुखी वरक्तवर्णा। याम्यैनैऋत्ये। वरुणेऽपरे ऽच्छी पीता। वायव्ये पश्चिम क्रोञ्चला रौप्यपीता॥ ॥

रौद्री लक्ष्मीसूक्तरेशा ब्रह्हरराससहिता लिङ्गितो नायकाना योगिन्यो ऽष्टाष्टकाया कमलदलगता नायिकावर्णवर्णा॥ पूर्वा-
द्यो कर्णिकाया च प्रथमकरतला च्छूलचक्रं गदा च तुण्डं खड्गं श्च शक्तिं वामकर कमले दक्षिणे चाङ्कुशौ वै॥ २७ ॥

उत्तरे रौद्री शुक्ला एकवक्त्रा। ईशाने लक्ष्मी शुक्ला। एवं यथा नायिका कर्णिकास्थानस्था वर्णसंस्थानतः॥ तासां पत्रस्थो देव्यः॥ एवं योगिन्योऽष्टाष्टकायाः कमलदलगता नायिकावर्णवर्णाः॥ इदानीं चर्चिकादीनां यथाक्रमेणायुधजर्येन विहायुध्यन्ते॥ पूर्वादा विन्यादिना। इह पूर्वं चर्चिकायाः प्रथमहस्ते कर्णिका द्वितीये शूलं। वैष्णव्याश्चक्रं गदा॥ वाराह्या दण्डः खड्गः। कौमार्याः शक्तिः पङ्कुशाः॥ ॥

वज्रं पाशश्च पद्मं तदमलनिभो ब्रह्मदण्डत्रिशूलं नानारत्नैर्निबद्धः सरवडमरुकः पद्ममेवाक्षसूत्रं॥ वामे शक्ति-
श्च खड्गागमपि च कमलं कम्बुकः शंखला च खेटौ वै रत्नपाशौ प्रगुणशरशरण वज्रघण्टा च चापे॥ २८ ॥

ऐन्द्र्या वज्रं पाशः। ब्रह्माण्याः पद्मब्रह्मदण्डः। रौद्र्यास्त्रिशूलं डमरुकः। महालक्ष्म्याः पद्ममक्षसूत्रं चेति सव्यहस्तद्वये। एवं पञ्चदेवीनामपि। ततो वामहस्तद्वये पूर्वादि यथाक्रमेण चर्चिकायाः प्रथमे वामकरे कपालं। द्वितीये खट्वाङ्गं। वैष्णव्याः कमलं शंखः। वाराह्याः शंखलाखेटं। कौमार्या रत्नपाशः। ऐन्द्र्या घण्टाचापं॥ ॥

जरठीपात्रं च खट्वाङ्गमहिरपि च नतस्तोयजं रत्नमेवं योगिन्योऽष्टाष्टकायाः कमलवसुदले शास्त्रहस्ताश्च सन्तु ॥ भीमा
याकालदंष्ट्राज्वलदनलमुखा वाडवेगा प्रचण्डा रौद्राक्षी स्थूलनाशा कमलवसुदले चर्चिकायाः स्वदिक्षु ॥ २९ ॥

ब्रह्मण्याः जरठिकापात्रं । रौद्र्याः खट्वाङ्ग सर्पः । महालक्ष्म्याः कमलं रत्नमेव च । एवं योगिन्योऽष्टाष्टकायाः कमलवसुदले शास्त्रहस्ताश्च सन्तु ॥ यथानायिका न्यथेति नियमः ॥ इदानीं तासां नामानि भवन्ति ॥ तत्र चर्चिकादिकमलदलेषु पूर्वादिदक्षिणावर्तेन चर्चिकादीनां यन्त्रे देव्यो वेदितव्याः ॥ तत्र प्रथमपत्रे भीमा ॥ एवं द्वितीयादौ उग्रा । कालदंष्ट्रा ज्वलदनलमुखा । वाडवेगा । प्रचण्डा रौद्राक्षी । स्थूलनाशा । कमलाष्टदलेषु चर्चिकायाः स्वदिक्षु ॥ ॥

श्रीर्मायाकीर्तिलक्ष्म्यौ तु परमविजया श्रीजया श्रीजयन्ती श्रीचक्री चाष्टमा वै कमलवसुदले वैशावीदिक्प्रदेशे ॥ कंका
लीकालरात्रीप्रजपितवदना कालजिह्वा कराली काली घोरा विरूपा कमलवसुदले शंकरी यन्त्रदेवी ॥ ३० ॥

वैष्णव्याः प्रथमपत्रादौ श्रीःमायाः । कीर्ति । लक्ष्मी । विजया । श्रीजया । श्रीजयन्ती । श्रीचक्री । चाष्टमा वै कमलवसुदले वैशावीदिक्प्रदेशेऽग्नौ ॥ तन्नो वाराह्याः प्रथमपत्रादौ । कङ्काली । कालरात्री । प्रजपितवदना । कालजिह्वा । कराली । काली । घोरा । विरूपा । इति कमलवसुदले शंकरी यन्त्रदेवी दक्षिणे ॥ ॥

यस्या नक्रजमारीमृगपतिगमना रत्नमालातुनेत्रा ह्रीनाभद्राकौपेवेवरशिखिगमना नायिका यन्त्रराजन् ॥ वज्राभा

वज्रगात्रा वरकनकवती चोर्वशी चित्रलेखा रम्भाहल्या सुतारा कमलवसुदलेष्टकरी यन्त्रे देवी ।। ३१ ।।

तथाकोणार्थः पूर्वपत्रादौ पद्मा। अनङ्गा। कुमारी। मृगपतिगमना। रत्नमाया। सुनेत्रा। क्षीनाभङ्गा। अकोपेता। वरद्विरदगमना नायिका पत्रराजन्गौ नेत्रस्थे
तथाष्टेश्राः पूर्वपत्रादौ वज्राभा। वज्रगात्रा। कनकवती। उर्वशी। चित्रलेखा। रम्भा। अहल्या। सुतारा कमलवसुदले वस्त्रहस्ताधिदैवे पश्चिमे।। ।।

सावित्री पद्मनेत्रा खलु जलजवती वृद्धि वागीश्वरी त्वि गायत्री विद्युदेव स्मृतिरपि कमले वेदवक्त्राधिदैवे।। गौरी
गंगा च नित्या तु परमतुरिता तोतना लक्ष्मणाच्च पिङ्गा कृष्णा तथाष्टौ कमलवसुदले नायकीयन्त्ररौद्री।। ३२ ।।

ततोष्टलक्ष्म्यः पूर्वपत्रादौ सावित्री। पद्मनेत्रा। जलजवती। वृद्धिः। वागीश्वरी। गायत्री। विद्युत्। स्मृति। अपि कमले वेदवक्त्राधिदैवे।। वामकेनतो रौद्याः पूर्वपत्रादौ गौरी। गंगा। नित्या। तुरिता। तोमला। लक्ष्मणा। पिङ्गला। कृष्णा। तथाष्टौ कमलवसुदले नायिकायन्त्रे रौद्री त्तुत्तरे।। ।।

श्रीश्रेना चन्द्रलेखा शशधरवदना हंसवर्णा धृतिश्च पद्मेशा तारनेत्रा विमलशशधरा वीशपद्मे सचिह्ना।। तवोर्ध
सूर्यपद्मे दनुकमलतया पावकः परतस्त्वश्च यक्षाः शाकोऽब्धिवक्त्रः पशुपतिरुदधिः श्रीशोऽग्रश्च विष्णुः।। ३३ ।।
ततोलक्ष्म्याः पूर्वपत्रादौ श्रीश्रेना। चन्द्रलेखा। शशधरवदना हंसवर्णा धृति। पद्मेशा। तारनेत्रा विमलशशधरा। ईशपद्मे सचिह्ना। इति चतुःषष्ठि योगिन्यश्च चि

कादीनां पद्मदलेष्ववास्त्ररावलेनाथिका इति वेदत्राङ्केन त्र्यश्राङ्केपि सर्वेकायवज्रनिष्पत्तिः ॥ तन्त्रायत्तुह्यकमलानां कार्यानिष्पत्तौ वेदितव्यं चतुरस्रं पानि हस्तमा

दिषु द्वादशान्तर्थीद्वादशकमलानि । कर्णेच केकिवाचकेवे ॥ अष्टाविंशद्दलानि नाडीदेवतास्तुत्यो उन्नसज्जयेत् ॥ अष्टमेमासेन वाल्पिकल्पयेदिति ॥ लक्ष्मा वाहे

कापनरव्लेनाद्वाशान्तमेव पूर्वद्वारस्य सकाभा गर्भाप्राकारभित्तौरवगर्भादिवत् ॥ नैरृत्यादेयायथासंख्यं उक्ष्यते ॥ दन्तक इति ॥ नैर्ऋत्यः । पूर्वद्वारस्य येवत्

इति वास्तुराग्नेय्यां ॥ यम इति दक्षिणद्वारवामे सव्येपावकः ॥ नैरृत्ये मुस्खः । पश्चिमद्वारवामे यक्षः । सव्येशकः । वायव्ये ब्रह्मा । उत्तरद्वारवामे रुद्रः । दक्षि

णे सुभद्रः ॥ ईशाने गणपतिः । पूर्वद्वारवामे विष्णुरिति सर्वे चतुर्भुजाः ॥ ॥

खड्गं वीराङ्कमेन्द्रः सुरनरदनुजत्रसं दण्डखड्गश्च शक्तिः दण्डः शक्तिश्च जन्तोर्मणिरपि च गदा वज्रमेवाग्निवाणाः ॥
ऋष्टिश्चाप्यक्षसूत्रं भवति करमलेष्वर्लवाराश्च पाशौ रत्नं पर्शुश्च वज्रं भवति हरिकरे चक्रदण्डश्च सव्ये ॥ २४ ॥

लिनायकोऽचित्तश्चित्तवशो नायकीभूस्वभावज्ञानधर्मिणी । विश्वमाता इति न्यायः ॥ ॥ धर्मामायावा शुद्धा स्वहृदयकमले नाभिचक्रे स्थिता वरु
डः केशैः शुभार्यो भिक्षुचरणानलेमारद्वन्द्वेऽश्वमारः ॥ शंखो गतडीमणिश्च क्रम इति च तथा कायवज्रादिभिश्च क्रम्या वाष्टास्तु नाडी जयविजयये देवी

धि चित्तादिना च॥ १०३ ॥ ॥इदानीं धर्मादीनां विशुद्धिरुच्यते॥धर्मेत्यादि॥इह हृदयकमले समानादिवायूनां आधारभूता अष्ट नाड्यस्ताभिर्धर्मादिदेव्यः॥कृष्णादी ग्राम्याः॥शुद्धा अवधूती संखिनीभ्यां कलाबिन्दुरूपिरोधेण शुद्धे दशवायुनिरोधेनेति॥हृद्ग्रीवामपादनले च ब्रः ङ्केशाक्षयेन शुद्धः॥सव्यपादनले मारो मारस्कन्धक्षयेण शुद्धः॥शंखः कायावरणक्षयेण शुद्धः॥गण्डीवा गावरणक्षयेण शुद्धा॥मणिश्चित्तावरणक्षयेण शुद्धः॥कल्पद्रुमो ज्ञानावरणक्षयेण शुद्धः॥कल्पद्रुमो ज्ञानावरणक्षयेण शुद्ध इति॥कायवज्रादिभिश्च जम्भावाह्वानाङ्कैरिति॥इह मज्जानिरोधेन जम्भघटं॥वामदक्षिणाभेदेन विशुद्धं॥एवं सर्वत्र वामदक्षिणाभेदेन वेदितव्यं॥तथा रक्तनिरोधेन जम्भघटं॥एवं मूत्राभावेन जम्भघटं॥तथा विष्ठाभावेन जम्भघटं॥एवं जयघटः शुक्राभावेन॥विजयघटो रजोऽभावेन इत्यष्टौ घटाः शुद्धाः कपालानि च॥ ॥

संस्कारोऽमोघसिद्धिर्विमलमणिकरो वेदनाचामिताभः संज्ञारूपं हि चक्री शशिपलनियमैर्मूर्त्तविद्यौ विशुद्धाः॥षड्दे
व्यो धातुभिर्वै विषयभवविषयिभिर्बोधिसत्त्वाः सविद्याः पञ्चक्रोधावलैर्वै खलु पुनरपराश्चेन्द्रियैः पञ्चवाच्यैः॥ १०४ ॥ २८१

इदानीं स्कन्धानां शुद्धिरुच्यते॥इह स्कन्धजिनधर्मैर्निरुद्धे सति॥अन्ये ते संस्कारादयः॥तेन विशुद्धः संस्कारोऽमोघसिद्धिः॥संस्कारावरणक्षयेण॥विमलमणिकरो रत्नसंभवो वेदना॥च-रः समुच्चयार्थः॥एवममिताभः संज्ञारूपस्कन्धश्चक्रीति वैरोचनः॥एते पुनरक्षोभ्यादयः शशीति शुक्रं॥पललं मांसं रुधिरं एवं विट्छिन्नैभिर्विशुद्धैर्निरावरणैः पञ्चस्कन्धा विज्ञानादयो विशुद्धा भवन्तीति॥एवं षड्देव्यो विश्वमाता वज्रधात्वीश्वरी तारा पाण्डरा मामकी लोचनेति धातुभिरिति॥ज्ञानाकाशवायुतेजउदकपृथ्वीधातुभिर्निरुद्धैरन्ये धातवो विशुद्धा भवन्तीति॥विषयविषयिभिरिति॥रूपादिषड्विषयैश्चक्षुरादि

भिर्विषयिभिर्विशुद्धे रूपे ते रूपादयोऽपे ते चक्षुरादयो विशुद्धा रूपवज्रादिभिः सार्द्धं क्षितिगर्भादयो बोधिसत्वाः सभार्याः शुद्धाः पञ्चकोधावलेरिति
श्रद्धावलं वीर्यवलं स्मृतिवलं समाधिवलं प्रज्ञावलं॥ अश्रद्धा अवीर्य अस्मृति असमाधि अप्रज्ञानामावरणक्षयेणाश्रद्धादी। निवलानि भवन्ति॥ तेर्वलैर्वि
शुद्धाः॥ उष्णीषविघ्नान्तक प्रज्ञान्तक पद्मान्तक यमान्तका। क्रोधराजानः शुद्धा इति॥ खड्ग उतरपराः सुम्भराज नीलदण्ड। टक्कि। अचल। महाबला। पञ्च-
कर्मेन्द्रिये भगवान् पाणिपाद पायुभिः कर्मेन्द्रियक्रियाभिः॥ रोज्ञाक्ष्याद्यभिः सार्द्धं परिशुद्धा इति॥ ॥

चामुण्डाद्यष्टमासैः कमलदलगताः सूर्यलग्नाघटीभिर्दैत्याद्याः सूर्यमासैः कमलदलगतानाडिकाश्वाससंख्यैः॥ नागा
श्वराद्याश्चतस्रः क्षितिगुणानृपतिभिर्नाडिकाभिर्विशुद्धा एवं चेष्टादयस्ताः प्रकृतिपरावशात्कायकृत्यैर्विशुद्धाः॥ १०५ ॥

चामुण्डाद्या अष्टयोगैः कमलदलगताः सूर्यलग्नैर्घटीभिः षष्टिभिर्भाद्रपदप्रथमतस्रः अन्यपत्रविशुद्धानि मीराच कावरणक्षयेणान्यास्ताश्च र्त्विकादयो भी
माद्यपर्यन्ति शुद्धाः॥ दैत्याद्या इति॥ नैर्ऋत्य वायव्य मिष्ठकुवेर समुद्र गरोन्द्र शक्र ब्रह्म रुद्र यक्ष विरूपाक्षमा इति॥ भाद्रपदाश्वेत्रवैशाखज्येष्ठाषाढश्रावणाभा
द्राश्विनकार्त्तिकमार्गशिरः पौषमाघफाल्गुनानामावरणक्षयेण शुद्धाः॥ तेषां कमलदलगताः षष्ठ्युत्तरत्रिंशतं तास्यादि उक्तं नाडिकाश्वाससंख्यैर्दिनैः ष
ष्ठ्युत्तरत्रिंशतदिनावरणक्षयेण शुद्धा अन्ये ते देवा अन्त्याःनाः॥ मन्त्रदेवा इति शुद्धाः॥ नागाश्वराद्याश्चतस्रो क्षितिगुणानृपतिभिर्नाडिकाभिर्विशुद्धाः प्रज्ञोपायभे
देन द्वितुणां॥ एवं चेष्टादय इति॥ इह रेष्ठा षड्विंशत् प्रतीच्छा षड्विंशत् पूर्वोक्ताः प्रकृतिपरावशात् कायकृत्यैर्विशुद्धाः॥ कायकृत्यावरणक्षयेन

इत्यन्यास्ता इन्द्रादयः शुद्धाः॥ ॥केशैः शुद्धाः समस्तास्त्रिभुवनगगनं लोमभिर्भूतवृन्दं नखैर्वज्रा राशिभर्तुः प्रकृतिगुणवशाद्धातुभिर्वात्ममुद्रा॥

वज्रैर्वध्यात्ममुद्राः परिजनहृदये संस्थिताश्चक्रमूर्ध्नि श्रीवज्री विश्वमाता त्रिविधभगवताश्चाक्षरज्ञानयोगात्॥ १०६ ॥

केशैः सिद्धाः समस्ता निरावरणा लोमभिः सार्द्धत्रिकोटिभिः श्मशाने भूतवृन्दं विशुद्धमेव मन्येते सिद्धाः। अन्ये भूता इति शुद्धाः॥ नखैश्चतुर्विंशतिभिर्निरावरणैर्वज्रादीन्यस्त्रा राशिभर्तुः शुद्धानि चतुर्विंशतिविधप्रकृतेरभावादिति॥ प्रकृतिगुणवशादिति॥ प्रकृतिः पृथिव्यादिधातुसमूहस्तेषां तु गुणाः शुद्धिवशात्तेषामावरणाक्षयात्॥ अन्ये गन्धादिधातुभिः षड्भिः षडात्ममुद्रा विशुद्धा इति॥ वज्रैरिति कायवाक्चित्तज्ञानवज्रैर्जाग्रत्स्वप्नसुषुप्ततुर्यालक्षणैर्विशुद्धैर्निरावरणा वध्यात्ममुद्राः शुद्धाः॥ अन्यास्ताः कायमुद्रादयश्चतस्रो विशुद्धा इति॥ परिजनहृदय इति॥ परिजननायकहृदये संस्थिताश्चक्रमूर्ध्नि॥ श्रीवज्री सहजानन्दः परमाक्षरः॥ विश्वमाता सर्वाकारशून्यताज्ञानं त्र्यध्वदर्शनं॥ अवनष्टस्वकल्पनावरणाक्षयादिति शुद्धे॥ त्रिविधभगवताः॥ सर्वे सर्वतः सर्वदा स्कन्धादयो विशुद्धाः॥ सर्वावरणाक्षयादिति॥ भगवतो नियमः॥ त्रिभवस्य परिज्ञानं निर्वाणमिति कथ्यते॥ इह अतीतानागतवर्त्तमाने अध्वनि त्रिभवस्य यथाभूतदर्शनं परिज्ञानं तदेव त्रिभवावरणक्षये रागहेतुकलनिरोधेन संबुद्धानां योगपर्येन भवति सर्वज्ञता सर्वाकारज्ञता मार्गज्ञता मार्गाकारज्ञतावलेन॥ श्रावकप्रत्येकबुद्धानां बोधिसत्त्वानां च योगपर्येन अध्वनि यथाभूतं त्रिभवस्य परिज्ञानं भवति॥ सोपधिनिर्वाणधातुना इति॥ यथा बोधिसत्त्वानां स्वमात्रावरणानः एवं कोटिश्च रागमपि सिद्धं दशभूमीश्वरत्वे॥ ॥

श्रीशुद्धो धर्मकायो भवति खलु सुखसंभोगकायो हि धर्म्मात् भोगान्निर्माणकायो भवति जिनपतेः सर्वसत्त्वार्थहेतोः॥

तुर्यावस्था सुसुप्ता खलु पुनरपरा कायभेदानुजाग्रा एवं कायप्रभेदे विहरति च मनः प्राणिनोऽङ्गे चतुर्द्धा ॥ १०७ ॥

इदानीं शुद्धधर्मकायाप्राप्तिरुच्यते॥ शीघ्रादित्यादि॥ इह संवृत्तिसत्ये प्रतीत्योत्पन्नधर्माः क्षणिका उत्पादव्ययलक्षणा भवस्यापरिज्ञानात्॥ अविद्यावासनातस्तुर्यादयोऽवस्थाश्चतस्रः संसारिणां भवन्ति॥ तेषु कायप्रभेदेषु मनश्चतुर्द्धा विहरति॥ प्राणिनोऽङ्गे चतुर्द्धा॥ इहाधानकाले गर्भावक्रमणे शुक्रच्यवनावस्था तुर्या सा च संवृत्या महासुखमित्युक्तेनैव श्रीकारणद्वयेज्ञानं संवृत्या शुद्धकायः॥ सहजकाय इत्यर्थः॥ तस्माद्धर्मकायः॥ सुसुप्तावस्थालक्षणः॥ तस्मात्संभोगकायः स्वप्नलक्षणः॥ तस्मान्निर्माणकायजाग्रल्लक्षणः॥ कायनिष्पत्तेः प्राणनिर्गमकालात्कोलेपुनरुक्तश्चतुर्द्धा॥ एवं मण्डलेकायभेदो भवति। जिनपतेः सर्वसत्वार्थकर्त्तुः॥ संहृत्यावरणाक्षयादिति॥ त्रैधातुके परचित्तज्ञाने शुद्धानां मनो विहरति॥ पूर्वनिवासानुस्मृतेनोद्भवभवपरिज्ञानत इति॥ ॥

निर्माणे भोगकर्तृ प्रवहति हि मनः कायवागीन्द्रियैश्च संभोगे दृष्टिचिन्तां व्रजति गुणवशाद्धर्मकाये च निद्रां॥ शुद्धे सौख्यं
प्रयाति त्वनुदिनसमये विन्दुमोक्षत्रयान्ते तस्मात्तद्भावनीयं प्रतिदिनसमये योगिना चाक्षरार्थं॥ १०८ ॥

इदानीं चतुष्कायकृत्यमुच्यते॥ निर्माणमित्यादि॥ इह संसारिणां निर्माणे जाग्रदवस्थायां भोगकर्तृ प्रभवति मनः। कायवागीन्द्रियैः करणभूतैर्विषयेषु संभोगे स्वप्नावस्थायामदृष्टविषयेष्वजडेषु चिन्तां व्रजति गुणवशादिति विषयवासनावशात्॥ धर्मकाये सुसुप्तावस्थायां निद्रां च याति निरिन्द्रियं मनो भवतीत्यर्थः॥ शुद्धे तुर्यावस्थायां सौख्यं प्रयाति॥ अत्र दिनसमये निशासमये वा समय इति कालः॥ तस्मिन् काले मैथुने कृते एकस्मिन् समये विन्दुमोक्षत्रयान्ते सहजक्षणे महासुखं प्रयातीति॥

संस्थानत्वं यस्मात्तस्मात् तद्भावनीयमहर्निशि काले योगिना चाक्षरार्थमित्यक्षरार्थं वक्ष्यमाणेन षडङ्गेनेति नियमः॥ एवं सावरणधर्मे निरुद्धे निरावरणधर्मो भवत्युत्पादक्षयरहित इत्यर्थः॥ ॥

वामे प्राणप्रचारः प्रभवति च तथाकुञ्चिते दक्षिणे यत्प्रत्यालीढं पदं तत्समपदमपरालीढमप्यर्कचारात्॥ वैशाखं मण्डलं स्वे भवति वरसमं पद्मवज्रासनं च व्योमाद्ये च प्रचारः समविषमगतो पञ्चधा प्राणवायोः॥ १०२ ॥

इदानीं प्रत्यालीढपदादि विशुद्धिरुच्यते॥ वामेत्यादि॥ इह संसारिणां यथा वामनाड्यां प्राणस्य प्रचारो भवति तदा दक्षिणे संकोचो भवति॥ प्राणोपि मन्त्रदेवता॥ तेन वामप्रसारेण दक्षिणसंकोचेन वामे प्राणसंचारेण तद्भवति॥ तथाऽकुञ्चने दक्षिणे यत् प्रत्यालीढपदं तदुच्यते॥ मन्त्रदेवतायाः॥ समपदमपरा पदं लीढपदं यथासंख्यमग्निचारादिति मध्यमाचारात्॥ योगपद्येन नाडीद्वये समपदं भवेत्॥ अर्कचारादिति॥ दक्षिणचारात्॥ वामसंकोचनादालीढं भवति॥ एवं वैशाखपदं। मण्डलं चललितपदं च पद्मासनं च वज्रासनं च यत्र यथाक्रमेण वामनाड्यां दक्षिणनाड्यां वा व्योमाद्ये चेति॥ आकाशमण्डले प्राणसञ्चारे वैशाखपदं॥ वायुमण्डले प्रचारे मण्डलपदं अग्निमण्डले प्रचारे ललितपदं॥ उदकमण्डले प्रचारः पद्मासनः। पृथिवीमण्डले प्रचारे वज्रासनमिति॥ एवं समविषमगतो पञ्चधा प्राणवायोः प्रचारस्तेन विशुद्धेन देवतानां पदासनविशुद्धिः॥ प्रकम्पाभावतो भवतीति नियमः॥ एवं जातकस्य वाग्निष्पत्तिद्वितीया इति॥

॥ मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां द्वादशसाहस्रिकायां विमलप्रभायां प्राणदेवतोत्पादमहोद्देशस्तृतीयः॥ ॥

चण्डालीनाभिचक्रेज्वलतिहुतभुजंगेवर्धिकायाधिदेवेहोःकारज्ञानगर्भेतदिदनलनिभाज्ञानतेजःप्रवृद्धा॥नाभौवैरो
चनादीन्दहतिनरपतेलोचनाचक्षुरादीन्सर्वान्दग्ध्वासुचन्द्रात्स्रवतिशिरसियोविन्दुरूपंसवज्री॥ ११० ॥

प्रतिपत्त्याक्षुरेसोदयंषोडशार्धार्द्धविन्दुधृक्॥यत्तस्याधावःसम्यग्विन्दुयोगःप्रकथ्यते॥चण्डालीत्यादिना॥इहसर्वोत्पत्तिक्रमेकायनिष्पत्तिर्मण्डलराजाग्री वाङ्निष्पत्तिः॥कर्मराजाग्रीकर्मेन्द्रियक्रियाप्रवर्त्तनात्॥बोधिचित्तविन्दुनिष्पत्तिर्विन्दुयोगःप्रकश्रवनात्॥सुखोपलब्धिःसूक्ष्मयोगः॥सचनराणांषोडशवर्षान्तेभवति॥तेनतस्योपभोगायविवाहपाणिग्रहणादिकंकार्यं॥शिष्यायप्रज्ञासमर्पणंकरोत्याचार्यः॥तयातस्यसुखस्यसाधनंकर्ममुद्रयाडर्कबालजनानांज्ञानमुद्रयामध्यमानां॥महामुद्रयोत्तमयोगिनामिति॥तेनमूलतन्त्रेभगवान्षोडशाब्दांकुलीनांवारूपयौवनमण्डितां॥आलोक्यशुभितांकृत्वासिक्तांसाधनमारभेत॥कायवाक्चित्तरागांश्चललाटादिषुविन्यसेत॥स्वाहान्तैर्महाबीजैस्ततःपद्मंविशोधयेत्॥आंकारेणाष्टदलंपद्मंहूंकारजकुलिशाञ्चितं॥एवंसकुलिशंकमलंप्रज्ञायाःस्पन्दहेतुतः॥हूंकारेणस्वकंवज्रंपञ्चशूकंविभावयेत्॥तन्मध्येअष्टदलेपद्मेआःकारेणप्रकल्पयेत्॥एवंसकमलंकुलिशंकृत्वापद्मेनिवेशयेत्॥हूंफट्कुर्वंस्ततोयोगीगर्वंवज्रधरंवहन्॥भगलिङ्गंप्रतिष्ठाप्यबोधिचित्तेनचोत्सृजेत॥भावयेत्सुखविम्बन्तुवैधातुक्रमशोधतः॥चण्डालीज्वलितानाभौदहतिपञ्चतथागतान्॥लोचनाचक्षुरादींश्चदग्धेहंस्रवतेशशी॥स्रवतेविन्दुरूपेणाष्टलंश्चक्ररूपिणं॥विन्दुयोगइतिख्यातःषोडशार्द्धार्द्धविन्दुधृक्॥अकलःकलनातीतश्चतुर्थ्यानकोटिधृक्॥सूक्ष्मयोगइतिख्यातोनिःस्पन्दादिगतोर्द्धतः॥शङ्खिनीयंमहामुद्राचण्डालीसाप्रगीयते॥नाभ्यूर्द्ध्वंडोविनीयातुअवधूतिनरनासिका॥पञ्चरश्मिमयःप्राणःपञ्चमण्डलवाहकः॥नासाग्रेसर्वपद्मान्तःप्राणायामःसचस्मृतः॥वि

भक्षस्य परिज्ञाने वैधानुक्रमशोधनः ॥ प्राणो निरोधितेनैव सर्वमपसचराचरं ॥ प्रत्याहारे महामुद्रा आकाशेऽन्यलक्षणं ॥ नासिकान्तप्रदेशे च यत्रैवारोपितं म-
नः ॥ निमित्तं ते तु गर्भे ख्यानस्यां विम्बं चराचरं ॥ भावयेदखिलं तस्यां योगी ध्यानादिकं च ततः ॥ इति मूलतन्त्रे नियमः ॥ अस्मिन्तु तनः संक्षेपतउक्तः ॥ तेन मूलतन्त्रा-
नुसारेणावगन्तव्य इति भगवतो मञ्जुश्रियो नियमः ॥ वरमाली नाभिचक्रे नवहतभुजगे इति इह नाभौ नाडीचक्रे नवहतभुजंगे सप्तति नाडिकात्मके वाद-
शाराशीनाड्यात्मके । वसुष्टिमराडुलनाड्यात्मके ॥ तस्मिन् नवहतभुजंगे चर्चिकामाधिदेवे हीकारज्ञानगर्भे ज्ञानवज्राधिष्ठितेनार्डिदनलनिभा च रमाली ज्ञान-
तेजः प्रबुद्धेति संहत्या ज्ञाने काम स्तस्य तेजः कामाग्निस्तेन कामाग्निना प्रबुद्धासती नाभौ निर्माणचक्रे दहति वैरोचनादीन्पञ्च मण्डलगतान्स्वामदक्षि-
णालोचनादीन्दहति । चक्षुरादीन्द्रियाणि रूपादीन् विषयानपि ॥ मनसो धर्मधातुं ग्रहणात् ॥ सर्वेषामग्रवज्रिरिति दहनं ॥ एवं सर्वान्दग्ध्वा तु च-
न्द्रादिति जन्मबोधिवीजाक्षिरस्थवसितो हंकारो विन्दुरूपं श्रुकमागन्तुकं सवज्री बोधिचित्तमित्यर्थः ॥ शिरसः करोटकस्थानत् हृदये हृदयान्नाभौ नाभेर्गु- २८४
ह्यकमले ॥ ॥

प्रज्ञाधर्मोदयस्थं उत्तरपि सकले स्फारितं विन्दुनावै नानाहंकारयुक्तादशशातमिव ज्ञानचक्रे स्वयम्भूः ॥ कामं रू-
पं चरूपं त्रिविधमपि भवं शोषयित्वा क्रमेण पश्चाज्ज्वालार्चिषा वै त्रिभुवनसकलं ल्येकदा कर्षणीयं ॥ १११ ॥

तदेव कमलं प्रज्ञाधर्मोदय उच्यते ॥ एवं नाभिहृत्कण्ठललाटोष्णीषकमलानि प्रज्ञाधर्मोदय उच्यते ॥ एवं क्रतः सनृत्तेसि कायविन्दुः ॥ नाभौ वाग्विन्दुः ॥ हृदये चि-
त्तविन्दुः ॥ एवं प्रज्ञाधर्मोदयस्थं बोधिचित्तं उत्तरपीति यथागतं तथागते स्फारितमित्युच्यते ॥ यथा ललाटादानन्दादिभेदेनागतं विचित्राद्विभेदेन वापश्चदशा

चन्द्रकलापरिपूर्णां तथा निःस्यन्दादिभेदेन। ऊर्द्धं ललाटे गतं वै मन्त्रं स्फारितं भवति। तेन विन्दुना वैमल्येन नानालंकार उक्तमादर्शगगनमिव प्रतिसेनासमं स्थ्य ध
गतं ज्ञानचक्रे स्वयम्भूरिति॥ विन्दुयोगात् सूक्ष्मयोगोऽभूत्। सर्वं कामं रूपं यत्र रूपं त्रिविधमपि भवे शोधयित्वा क्रमेणेति॥ कायवाक्चित्तविन्दूस्यतिक्रमेण॥ प
श्चात् ज्ञानाविर्भावे इति॥ अस्तुनस्तुखरश्मिभिस्त्रिभुवनसकलमिति॥ त्रैधातुकमेकदाकर्षणीयमिति॥ योगपथेन वै कात्स्न्यज्ञाने। देवतायोगे देवतामण्डलचक्रा
कारस्फरणं। संसारिणां प्रबुद्धहितं स्फरणं बोधिचित्तनइति॥ एवं षोडशवर्षावधेर्गर्भजानां कायवाक्चित्तज्ञाननिष्पत्तिः देवतानां भावनावलेन भूज्ञानां चतु
र्विमोक्षवलेनेति॥ सहजपरमार्थसम्मतः॥ ॥

चन्द्रादित्यादिकार्यैस्त्रिविधगतिगतैः कायवज्रादिजापैः प्रत्याहारादिषड्भिः सुकनककमले कायवाक्चित्तयोगः॥ आन
न्दाद्यैस्तु वज्राब्जसमरसगतैर्भावनेयं त्रिवज्रा प्रज्ञाअचित्तविन्दोः सहजसुखवशाद्भावनाऽनाहता स्यात्॥ ११२ ॥

इदानीं मध्यात्मनि मन्त्रजापादि कथ्यते॥ चन्द्रेत्यादिना॥ इह शरीरे चन्द्र इति वामनाडी। आदित्य इति दक्षिणनाडी। आदीति अकारादिस्वरसमूहो वामे
प्राणसंचारः॥ कादीति व्यञ्जनसमूहो दक्षिणे प्राणसंचारः॥ त्रिविधगतिगत इति। वामे गतिगतः प्राणः कायवज्रजाप इत्युच्यते॥ दक्षिणगतिगतः प्रा
णो वाग्जाप इत्युच्यते॥ मध्यमागतिगतः प्राणश्चित्तजाप इत्युच्यते॥ एषां निरोधात् अनाहता सर्वज्ञभाषा भवति॥ तेनायं षडङ्गयोगो भावनीयः॥ प्रत्या
हारादिषड्भिरिति॥ प्रत्याहारस्तथा ध्यानं प्राणायामश्च धारणा॥ अनुस्मृतिः समाधिश्च षडङ्गो योग इष्यत इति॥ एभिरभ्यस्यमाने वक्ष्यमाणैः सुकन
ककमल इति॥ नाभिकमले कायवाक्चित्तयोग इति त्रिविधगतिगतस्य प्राणस्य निरोध इत्यर्थः॥ ततो निरोधादानन्दाद्यैरिति॥ आनन्दपरमविरमसह

१६२

जैर्वज्राब्जेसमरसगतैरश्रुतत्वाज्ञवेनेयंत्रिवज्राष्टकविप्रुवनिरोधइत्यर्थः॥तथामूलतन्त्रे सर्वशोत्तमम्त्रासेन गन्धोदकपुटेन वा॥कुलिशं पूजयेच्चिन्मे कालविशेषेणाहुतिकाइतिनियमः॥ततःप्रज्ञाब्जेत्तु सकमले चित्तबिन्दोः स्थितेः संतिसहजसुखवशादिति॥अक्षरसुखवशात्प्रावनाऽनाहतास्या दूर्ध्वंनेतव्यइति॥

सेवापंचामृताद्यैर्जलनिधिकुलिशे मन्त्रजापादिभिश्च प्रत्याहारादिभिःस्यात्कुलिशकमलजेनामृतेनोपसि-
द्धिः॥आनन्दाद्यैस्त्रिवज्राब्जसमरसगतैर्भावनासाधनंस्यात्प्रज्ञाब्जेऽच्युते यद्भवति खलु महासाधनंसूक्ष्मयोगात्॥११३॥

इदानींसेवादिकमुच्यते॥सेवेत्यादि॥इहादिकर्मिकेण प्रथमं सेवा कर्त्तव्या साधना विधिना॥सेवा पञ्चामृताद्यैरिति वा पञ्चामृतं।विड्‌आदिकं आदिशब्देन गोक्षादिकं तैर्भक्षितैः सेवा देवतातोषणार्थं॥अध्यात्मनि पञ्चामृतानि पञ्चस्कन्धाः॥आदिशब्देन पञ्चेन्द्रियाणि पञ्चप्रदीपाः॥तेषां निरपेक्षता सेवा शारीरद्रव्यतृष्णापरित्यागः॥तया सेवया देवता वरदा भवति॥तदृथादिभक्षितेनेति॥जलनिधिकुलिशेरिति॥कायभोगनिरपेक्षता॥वाग्भोगनिरपेक्षता॥चित्तभोगनिरपेक्षता॥च्यवनसुखनिरपेक्षता॥सेवा कायवाक्चित्तब्रह्मचर्यसंयम इत्यर्थः॥अनया देवता वरदा भवति॥नभवभोगस्पृहया इति मन्त्रजापादिभिश्चेति॥इह मन्त्रजापो नाम प्राणसंयमः॥आदिशब्देन रेचकपूरककुम्भकयोगः सदा सेवा तया देवता वरदा भवति॥तत्प्राणतापश्चितेन वा जल्पितेनेति नीतार्थः॥नियार्थे न तु नरक्षस्त्वादिना जापादिकं कर्त्तव्यं सामान्यसिद्ध्यर्थं॥इदानीमुपसाधनमुच्यते॥प्रत्येत्यादि॥इह प्रत्याहार इति॥इह संसारिणामाहारश्चक्षुरादीन्द्रियैरूपादिविषयग्रहणं तस्य परित्यागः प्रत्याहार इत्युच्यते॥अ

न्यनाविम्बेऽस्मिंश्च चक्षुरादिभिर्मांसाद्यैरन्यरूपादिविषयग्रहणमुपसाधनं॥ तथा ध्यानं प्राणायामश्च धारणा॥ कुलिशकमलजेनामृतेनाप्लुतेनो
पसाधनं नीतार्थेनावाज्येदेवतोत्सर्जनेन नेयार्थेनोपसाधनसिद्धिः॥ इदानीं साधनमुच्यते॥ आनन्देत्यादि॥ इहानन्दे विवज्राः कायवाक्चित्तविन्दवो
ऽसमरसगताभावनासाधनं स्यात्॥ हृन्नाभिगुह्येषु विन्दूनां स्थितिरित्यर्थः॥ एवं साधनं॥ ततो महासाधनं प्रज्ञासङ्गेऽद्भुतं सुखं सम्भवति॥
यदा तदा खलु महासाधनं सूक्ष्मयोगादिति॥ सुषुम्नानाडिकोर्द्धं शुक्रसंयोगान्महासाधनं इत्युच्यते नीतार्थेन॥ नेयार्थेन पुनः प्रज्ञाधर्मोद
यनासिकाग्रे सर्षपादिकमितिनियमः॥ एवं महासाधनं भवति॥ ॥

आदौ वैश्वन्यनावैरखलुरपि च ततः संग्रहश्चन्द्रविन्दोर्बिम्बोत्पत्तिश्च तस्मात्प्रवररसजले रक्षरन्यास एव॥ एषा
सामान्यसेवा जलनिधिकलिशैः साधनं मध्यमश्च अत्रोपायश्च तुर्यो भवति महदुदृष्टः साधनाङ्गं तथैव॥ ११४ ॥

इदानीं मृत्वादिमात्राभेदेन सेवादिकमुच्यते॥ आदावित्यादि॥ इहोत्पत्तिक्रमे प्रथमं श्वन्यनाबोधिरिति प्राणिनां मरणान्ते स्कन्धपरित्यागादुप
पत्तंशिकस्कन्धग्रहणा॥ यदलराले श्वन्यताभरणमेकं त्रिभवदर्शनं श्वन्यमित्युच्यते॥ खलु निश्चिते॥ ततःक्षणात्पश्चात्संग्रहश्चन्द्रविन्दो
रिति॥ इहालयविज्ञानस्य मातृगर्भे शुक्रविन्दूनां ग्रहणं नाम संग्रहः॥ ततः शुक्रादिग्रहणात्तस्माद्बिम्बोत्पत्तिर्नाम सप्तमासे गर्भनिष्पत्तिः
कायनिष्पत्तिरित्यर्थः॥ ततः प्रवररसजले इति षट्स्कन्धे चक्षुरादीनामक्षरन्यासो रूपादिविषयप्रवृत्तिरिति॥ एवं देवतासाधनेऽपि
कल्पनात्मकं भावयेदादिकर्मिकः॥ एषा सामान्यसेवा जलनिधिकलिशैरिति॥ कायवाक्चित्तज्ञानवज्रनिष्पन्नैः साधनं मध्यमं च प्रा

रानिष्पत्तिः॥ अतोपायश्चतुर्द्धा भवतीति सेवाङ्गः॥ उपसाधनाङ्गं तथैव षोडशवर्षावधेरिति नियमः॥ अत्र मृदुर्जातबालः॥ दन्तोत्थानान्म-
ध्यमबालः दन्तपातात्कुमारः॥ पुनर्दन्तोत्थानात् षोडशवर्षोर्द्ध्वं प्रौढः॥ पुत्रदुहितृजनकत्वादिति॥ एवं सर्वदेवतानां चतुर्विधमङ्गं योगिना भा-
वनीयमिति॥ लौकिकसत्यनियमः॥ इदानीं परमार्थसत्येन षडङ्गबिम्बनिष्पत्तिरुच्यते॥ इह प्रथमं शून्यताबोधिरिति॥ अन्धकारे न किंचिदपि चि-
न्तनीयं॥ ततः संग्रहश्चन्द्रबिन्दोरिति॥ बिन्दुपश्यनेन धूमादिनिमित्तग्रहणं बिम्बोत्पत्तिश्च तस्मादिति॥ तस्माद्बिन्दोर्विश्वदर्शने बिम्बोत्पत्तिः॥ प्रवर-
रसङ्केतेरिति निरुवरसोः षट्स्कन्धे रक्षरन्या सह इति॥ प्रादेशिकस्कन्धधात्वायतनादीनां निरोधः॥ अतो रूपादिभेदो भूमिलाभेन भवति॥
यावन्न द्वादशभूमीश्वरो भवति॥ ततो द्वादशाकारसत्यार्थः षोडशाकारतवित्॥ विंशत्याकारसंबोधिर्विबुद्धः सर्ववित्परः॥ इति नियमः॥

प्रत्याहारो जिनेन्द्रो भवति दशविधो ध्यानमक्षोभ्य एव प्राणायामश्च खड्गी पुनरपि दशधा धारणा रत्नपाणिः॥ डोम्ब्याश्चा- २८६
नुस्मृतिः स्यादपि कमलधरः श्रीसमाधिश्च चक्री एकैकः पञ्चभेदैः पुनरपि च यतो भिद्यते लास्यकाद्यैः॥ ११५ ॥

इदानीं षडङ्गयोग उच्यते॥ प्रत्याहार इत्यादिना॥ इह प्रत्याहार आदिकर्मणि जिनेन्द्र इति ज्ञानस्कन्धः॥ स च निमित्तभेदेन दशविधो धूममरीचि-
खद्योतदीपज्वाला चन्द्रादित्यराहुकलाबिन्दुदर्शनभेदेनाकल्पितो ज्ञानस्कन्धः॥ ध्यानमक्षोभ्य एव दशविधो विज्ञानस्कन्धो विषयविषयिणां दशाना-
मेकत्वे विश्वबिम्बध्यानमिति॥ प्राणायामश्च दशविधः खड्गीति संस्कारस्कन्धो वामदक्षिणे दशमण्डलेकलोलीभूतत्वादिति॥ पुनरपि दशधा धारणा

रत्नपाणिरिति वेदनास्कन्धः॥ धारणास्य धारणा नाभिहृत्कण्ठललाटउष्णीषकमले गतागतभेदेन दशविध इति॥ डोम्ब्यां चानुस्मृतिः स्यादपि कमलधर इति संज्ञास्कन्धो दशविधः॥ स चानुस्मृतिर्डोम्ब्यां मध्यनाड्यां दशकामावस्थाभेदत इति॥ श्रीसमाधिश्च चक्रीति॥ वैरोचनो दशविधः॥ समाधिर्दशवायूनां निरोधन इति॥ एवं भगवान् प्रतिष्ठितनिर्वाणो ऽवानेवायूनां पतनस्यार्थः॥ ॥

प्रत्याहारो दशानां विषयविषयिणामप्रवृत्तिः शरीरे प्रज्ञा तर्को विचारो रतिरचलसुखं ध्यानमप्येकचित्तं॥ प्राणायामो
द्विमार्गस्य च नलसमपि भवेन्मध्यमे प्राणवेशो विन्दौ प्राणप्रवेशो ह्युभयगतिरतो धारणा चैकचित्तं॥ ११६ ॥

इदानीं प्रत्याहारादिलक्षणमुच्यते॥ प्रत्येत्यादि॥ इह प्रत्याहारो नाम शरीरे विषयविषयिणां दशानामसम्बन्धेनाप्रवृत्तिर्विज्ञानस्य शून्यविम्बे विषयेष्वप्रवृत्तिरन्येष्वणुरादिभिः पञ्चविधैरिति॥ तथा तस्मिन्नेव विम्बे प्रज्ञेत्यालोकनं॥ तर्क इति भावग्रहणं॥ विचार इति तस्य निश्चयार्थः॥ रतिरिति विम्बासक्तिः॥ अचलसुखमिति विम्बेन सह चित्तस्यैकीकरणं॥ एवं ग्राह्यग्राहकभेदेन ध्यानं दशविधं॥ इह प्राणायामो नाम द्विमार्ग इति॥ वामदक्षिणमार्गस्य चलनं॥ निरोधो मध्यमे मार्गे प्रवेशः स च दशविधो दशमरुन्निरोधनः॥ इह विन्दाविति ललाटे प्राणप्रवेशः॥ उभयगतिहत इति गमनागमनरहितः॥ धारणा प्राणस्य ललाटे एकचित्तेनाम॥

चण्डाल्यालोकनं यत्खवति खवज्रे नौचाख्ये ऽनुस्मृतिः स्यात्प्रज्ञोपायात्मकेनाक्षरसुखवशाज्ज्ञानविम्बे समाधिर्भास्व
न्मृद्वादिभेदैस्त्रिविधमपि भवेत्साधनं विश्वभर्तुस्तिस्रो मुद्रास्त्रिमात्रास्त्रिविधगतिवशात्कर्मसंकल्पदिव्याः॥ ११७ ॥

वराङ्गल्यालोकनेन त्रिभवस्यान्तरेणानुस्मृतिर्दशविधा प्रोक्ता ॥ प्रज्ञोपायात्मकेनेति ॥ ज्ञेयज्ञानैकलोलीभूतेनाक्षरसुखवशात् ज्ञानबिम्बे समाधिश्चेति ॥ सापि दशविधा प्राणादीनामभावत इति ॥ एवं षडङ्गयोगसाधनं ॥ एतन्मृद्वादिभेदेन त्रिविधमपि भवेत् ॥ साधनं विश्वभर्तुः कालचक्रस्य तिस्रो मुद्रास्त्रिमात्रा इति त्रिविधगतिवशादिति ॥ इह बोधिचित्तस्याक्षरगतिर्मृदुमात्रा ॥ स्पन्दगतिर्मध्यमात्रा ॥ निःस्पन्दगतिरधिमात्रेति ॥ एवं कर्ममुद्राक्षरसुखदायिनी ज्ञानमुद्रा स्पन्दसुखदायिनी ॥ महामुद्रा निःस्पन्दसुखदायिनी ॥ एवं त्रिमुद्राभावना षडङ्गयोगे भगवतोक्ता ॥ इति षडङ्गयोगो भावनीयो योगिना उक्तन्यायेनेति ॥ ॥

प्रत्याहारेण योगी विषयविरहितोऽधिष्ठितः सर्वमन्त्रैः पञ्चाभिज्ञानलाभी भवति नरपते ध्यानयोगेन शुद्धः ॥ प्राणा
यामेन शुद्धः शशिरविरहितः पूज्यते बोधिसत्त्वैर्मारक्लेशादिनाशं दिशति दशबलं धारणाया बलेन ॥ ११८ ॥

इदानीं प्रत्याहारादिफलमुच्यते ॥ प्रत्येत्यादि ॥ इह प्रत्याहारेण योगी यदा विशुद्धो भवति विम्बेन स्थिरीभूतेन तदा सर्वमन्त्रैरधिष्ठीयते वचसा वरदानादिकं ददाति ॥ २८७
पञ्चाभिज्ञानलाभी भवति ॥ नरपते ध्यानयोगेन शुद्ध इति ॥ इह यदाऽनिमिषितचक्षुर्भवति तदा दिव्यचक्षुर्भवति ॥ एवं दिव्यश्रोत्रो ध्यानेन शुद्धो भवति ॥ प्राणायामेन शुद्ध इति ॥ इह यदा रविशशिमार्गरहितो योगी भवति ॥ सदा मध्यमावाहकः ॥ तदा प्राणायामेन शुद्धः सन् पूज्यते बोधिसत्त्वैः प्रसंस्यत इत्यर्थः ॥ मारक्लेशादिनाशं दिशति दशबलमिति ॥ शून्यताबिम्बं इह ग्राह्यग्राहकचित्तं दिशति धारणायाबलेनेति प्राणस्य गतागतक्षयेण एकलोलीभवति ॥ ॥

संशुद्धोऽनुस्मृतेः स्याद्विमलमसितभामण्डलं ज्ञानबिम्बं तस्माच्छुद्धः समाधेः कतिपयदिवसे सिध्यते ज्ञानदेहः ॥ प्रत्याहारा

दिभिर्विधैर्यदि भवति रसामच्चिराणामिष्टसिद्धिर्नादाभ्यासाद्दृढेनाब्जकुलिशसमरसौ साधयेद्बिन्दुरोधात् ॥ ११९ ॥

संस्तुतोऽत्र स्मृतेरिति ॥ इह तु स्मृतिर्विन्यालिङ्गनेनचित्तस्य सर्वविकल्परहितं ॥ तस्मात्सुतो यत्नात्तद्विमलं त्रभामरसत्वं भवति ॥ अपि च शब्दब्रह्मकमात्स्फुरन्ति परञ्च रवमयो निश्चरन्ति ॥ ज्ञानविन्यासदृढन्यविन्यासादिति ॥ तस्मात्सुदृढसमाधाविति ॥ इह ग्राह्यग्राहकचित्तमोभेकत्वेन यदक्षरत्वं भवति तत्सुस्थं समाधिस्थमेति ॥ तस्मात्समाधिसुयोगे मत्स्यगतः कतिपयादिवसैः स्त्रिवर्षत्रिपक्षादिवसैः सिद्ध्यते नात्र सन्देह इति ॥ यथा वशितादिकं प्राप्नोति धिसत्त्वो भवतीति प्रत्याहारादिनियमः ॥ इदानीं हठयोग उच्यते ॥ इह यदा प्रत्याहारादिभिर्विविधैर्दृष्टैः सति ॥ अक्षरक्षरणो नोत्पद्यते ॥ अपवित्रितप्राणतया रसनादाभ्यासाद्वक्ष्यमाणात् दृढेन प्राणसमध्यमार्गो वाह्यमित्याप्रज्ञाजगनकुलिशमरौ वेधविचित्तबिन्दुनिरोधादक्षरक्षरणं ॥ साधयेत्कि स्पन्दे ते ति हठयोगः ॥ ॥

सेवायामादियोगो नभसि दशविधश्चक्रिणाः क्रोधदृष्ट्याद्दृष्ट्या विघ्नान्तकः स्यादमृतपथगतन्यायो वोपसाध्येषडङ्गः ॥
प्रज्ञा स्वेच्छा तु बिन्दोरपि कुलिशमरौ अक्षरः साधने स्यात्सौरव्यानन्दे कथान्तः सहजइह महासाधने ज्ञानयोगः ॥ १२० ॥

इदानीं पूर्वनाविन्यसाधनायहृष्टिरुच्यते ॥ सेवेत्यादि ॥ इह सेवेति ॥ आदि धूमादिनिमित्तभावना ॥ तस्यां सेवायां आदियोगो धूमादिनिमित्तग्रहणं विजानेयेति स च दशविधः ॥ धूमादिना सार्द्धं प्रत्ययो भवति ॥ तेन दशविधः स च चक्रिणा इति ॥ उष्णीषस्य क्रोधदृष्ट्या इति ॥ ऊर्ध्वदृष्ट्या अनिमिषया निमित्तं भव

तिरावियोगेन चतुर्विधं॥ दिवायोगेन षड्विधं॥ ततो बिम्बं एवं विम्बपर्यन्ते सेवाङ्गं भवति प्रत्याहारेण ध्यानेनेति॥ इत्याविघ्नान्तकस्येति॥ विघ्नान्तकोऽमृतकुण्ड
लीतस्य दृष्टिरमृतस्थानगताललाटगतानेषाद इत्याविघ्नान्तकस्यामृतपथगतयोर्बोधसाधने षडङ्गः॥ चकारात् प्राणायामो धारणा कर्त्तव्या प्राणस्य वि
स्थि दृष्टे सति उपसाधनं॥ प्रकाशदृष्टेन्दुविन्दोरिति॥ इह प्रकारोङ्गे रागन्दृष्ट्वा सोऽहन्तु विन्दुः दृष्टेन्दुविन्दुः॥ तस्य प्रकाशदृष्टबोधिचित्तविन्दोरपि कुलिशमणि
गतस्य पञ्चाक्षरयोगी भवति॥ ततो नाभौ हृदये च साधने स्यादिति॥ साधनाङ्गं तृतीयं भवति॥ एवं साधनाङ्गं कर्त्तव्यं॥ सोऽयं ध्यानदृष्टेकश्चानन इति॥ इह सोऽयं ध्या
नादृष्टे न बोधिचित्तेन यत् एकक्षणः स शान्त इत्युच्यते सहज इति॥ महासाधने ज्ञानयोग इति॥ चित्तस्याक्षरसुखेन सह एकत्वमिति॥ महासाधनाङ्गं चतुर्थं
एवं ज्ञानसाधने चतुरङ्गं॥ देवतासाधने उत्पत्तिक्रमेण पूर्वोक्तं लौकिकं लोकोत्तरं तत्त्वसाधनमुत्पन्नक्रमेण॥ यथा हि सत्यद्वयं समाश्रित्य बुद्धानां धर्म
देशना॥ लोकसंवृतिसत्येन सत्येन परमार्थत इति भगवतो नियमः॥ अतः क्रमद्वयं समाश्रित्य देशना वज्रिणो मम॥ उत्पत्तिक्रमेणोत्पन्नक्रम
तोऽपरेति॥ एवं देवतासाधने विकल्पभावना॥ तत्त्वसाधने विकल्परहितैश्चतुरङ्गैरिति भावः॥ ॥ २८८

प्राणायामः समन्तात् समसुखफलदो मस्तके यावदिष्टः तस्याद्ध्वं त्यनिशोऽमरणभयकरः स्कन्धनिर्नाशहेतुः॥ उष्णीषं
भेदयित्वा परमसुखपदे योजनीयो व्रजन्वै स्कन्धाभावे तु योगी विशति समसुखं किन्तु लोकेऽप्रसिद्धः॥ १३१ ॥

इदानीं प्राणायामलक्षणमुच्यते॥ प्राणेत्यादि॥ इह शून्यताबिम्बदृष्टे सति यः प्राणायामो योगिना कर्त्तव्यः॥ स यावन्मस्तके इति शिरोव्यथां न करोति॥ स च स

महासुखफलदो भवति॥ तस्मादूर्द्ध्वमिति शिरोव्यथान्तादनिष्ठा मरणभयकरो भवति स्कन्धविनाशहेतुभूतो भवति॥ अथ योगबलेनोष्णीषं भेदयित्वा प्राणेन व्रजन् योगिना परमसुखपदे शून्यताविम्बे योजनीयो वेस्कान्तं एवं स्कन्धाभावे पि योगी व्रजति समसुखं तद्विम्बमिति योगीति योगचित्तं व्रजति॥ किन्तु लोके प्रसिद्धिरिति योगी मृतोयमिति प्राणायामनियमः॥ ॥

मध्ये प्राणप्रवेशो विषयविरहितो लिङ्गने विश्वमातुः पद्माविष्टः स्ववज्रस्फरणमपि तथेन्द्वर्कमध्ये प्रवेशः॥ सोख्यं वी-
जाप्रपाते सुरनरतिरगां योगिनां योगमेतन् मुद्रासिद्ध्यर्थहेतोः परममपि विभोः श्रीरहस्याद्रहस्यं॥ १२२ ॥

उष्णीषे पंचषट्कं भवति हि कुलिशं बाह्यषट्कं द्वितरांपवज्रं स्याद्धर्मचक्रे द्वित्रिशितमपरं तस्य चान्यत्द्वितरांपं॥ तस्याप्य-
अपरवृत्तेनुबोधं॥ ॥
न्यद्वितरांपं सहजसुखरसं भोगनिर्माणचक्रे तद्गर्भे प्येकषट्कं समसुखफलदं तत्पद्मोदरस्थं॥ १२३ ॥

इदानीं देवताविसर्जनमुच्यते॥ उष्णीषेत्यादि॥ इह मरणकाले आज्ञाश्रीकमेराज्ञाश्रीविन्दुयोगं षट्कयोगं भावयित्वा पूजां स्तुतिं कृत्वा नमस्ते वरदवज्राग्र इत्यादिना॥ ततो मरणकाले देवतानां विसर्जनायोष्णीषे पञ्चषट्कं वज्रं भावयेत् तस्य वरटके महासुखचक्रे विसर्जयेत्॥ तस्य बाह्यषट्कद्वितरापमष्टषट्कं मध्यषट्केन सार्द्धं नवषट्कं वज्रं स्याद्धर्मचक्रे हृदये॥ तस्य वरटके धमादिका विसर्जयेत्॥ द्वित्रिशितमपरं षोडशषट्कं मध्यषट्केन सार्द्धं सप्तदशषट्कं सहजे ललाटे तस्य वरटके स्कन्धधातुदेवता विसर्जयेत् तस्य चान्यद्द्वितरापमिति द्वात्रिंशत्षट्कं मध्यषट्केन सार्द्धं त्रयत्रिंशत्षट्कं संभोगकण्ठे तस्य वरटके द्वादशायतनचतुःकोणदेवता विसर्जयेत्॥ तस्याप्यन्यत् द्वितरापमिति चतुःषष्टिषट्कं मध्यषट्केन सार्द्धं पञ्चषष्टिषट्कं वज्रं निर्माणनाभिचक्रे तस्य वरटके चर्चिकादयो भीमादय

अतः षष्ठिमण्डलबाह्ये स्थलस्य अष्टकलिका एवं चासप्ततिं विसर्जयेत् इति ॥ तन्मध्ये येकपत्रकमिति ॥ तेषां गर्भे प्रागुक्तं एकपत्रकं समसुखमण्डलं दत्वा तद्धूपमोदरस्थं नवापि चाविंशत्पत्रकं दलसंख्यं तस्य वरटके मारिश्यादयो यास्ता विसर्जयेत् ॥ एवं वा दशदिशा देवाः सपरिवाराः कर्मचक्राणि वज्राणि कृत्वा तेषां वरटके शुभविसर्जयेत्तानिति ॥ नागाध्वयानास्वादयः क्रियाच ऋद्धि ॥ एवं विसर्जनं कृत्वा ततो बलिं दद्यात् त्रिसंध्यं प्राप्तकविधिना पश्चात् पूर्वविधिना शोधयित्वा तेनात्मानं प्रीणयेत् ॥ एवं साधनं कालचक्रस्यात्यन्तिकक्रमेण स्वचक्रमेण भगवतामनुष्ठेयमिति ॥ ॥

योगी प्राणातिपाते दिननिशिकलहे प्राणनाशाय उक्तो यः शब्दो वक्रहीनः प्रभवति हृदये सोऽसौ मृषावाद एव ॥ सर्वज्ञाज्ञा
न भूमेर्ग्रहणमपि च यद् योगिनस्तेयमुक्तं सोरखविन्दुप्रपातो भवति च परदारस्य सेवा विरागात् ॥ १२४ ॥

इदानीं योगचर्योच्यते ॥ योगीत्यादि ॥ इह योगिनां योगचर्या द्विधा ॥ एका बाह्या द्वितीयाऽध्यात्मिका ॥ तत्र या बाह्या सा लौकिकफलहेतोः ॥ या चाध्यात्मिका सा लोकोत्तरफलहेतोः ॥ योगिना कर्तव्येति ॥ इह योगी यत् प्राणातिपातं दिननिशि करुते ॥ तत् स्वदेहे प्राणनाश उक्तः ॥ सर्वज्ञपदलाभाय न बाह्ये प्राणातिपातः ॥ इह बाह्ये यः प्राणातिपात उक्तो दुष्टानां दमनाय स तेषां प्राणोच्छेदस्य वल्लनाकष्टः पुनस्तस्मिन्नेव काये प्रवेशनीयो योगिनेति ॥ एवं दुर्दान्तदमको भवति ॥ न दुर्दान्तात्मको भवतीति सिद्धः ॥ यः शब्दो वक्रहीन इति ॥ इह सर्वज्ञस्य वचनं सर्वं सत्यं यत् सर्वसत्त्वानां हृदये भवति स्वस्वभाषान्तरेणान्तरे वाप्रतिष्ठितं सर्वसत्त्वरुतत्वात् ॥ अप्रतिष्ठितत्वात् मृषावाद इत्युक्तः ॥ बाह्ये पुनः सत्त्वार्थं प्रति महामायामहारौद्राभूतसंहारकारिणीत्यादिवचनं सत्त्ववैनेयार्थं ॥ तथाऽरुद्वैद्विद्विषजनं तं उद्दृत्य फलदायकं ॥ तारावज्रधराकारा योषितो वज्रयोषित इत्यादिवचनं मृषावादः ॥ न पुनः सत्त्वानां व

ष्वनाय विसंवादकं वचनं बोध्यं योगिनामिति सिद्धये॥ इह शरीरे निरावरणो ज्ञाने सति सर्वशास्त्रपदादशभूमीनां पत्रग्रहणं योगिनस्तेन नेयपरिग्रहणाद्युक्तं॥ वाह्ये पुनः स-
न्त्विपकरणो विद्यावादिकमुत्पादनीयं॥ निधिरक्षकानां दुर्गतिमोचनार्थमिति॥ मोक्षं पत्युक्तं विन्दोरप्रमाणात्स्रवति सा परदारस्य सेवा॥ परदारप्रज्ञापार-
मिता संसारपारंगता। परे वज्रसत्वः संसारस्य पारंगतः॥ तस्य दारा परदारेति तस्याः सेवा विरागतो ऽक्षरसुखतो योगिनां वाह्ये पुनः सेकादिकाले दारा स्व-
भार्यादिका दत्ता तस्याः सेवा परदारस्य सेवा ऽविरागादिति॥ यथाक्रमसमयिनां विरागो न भवति समयभेद इत्यर्थः॥ ॥

द्रव

प्राणायामानलेन उबमपि शशिनः पानकं मद्यपाने उष्णीषे ऽङ्गुष्ठपर्वात् व्रजति तिथिवशात् कृष्णपक्षावसाने। उष्णी-
षादङ्गुली प्रव्रजति पुनरिदं पूर्णिमान्ते स्वचित्तं सा चर्या योगिनो वै प्रतिदिनसमये त्विष्टसिद्धिप्रदात्री॥ १२५ ॥

प्राणायामानलेनेति॥ इह प्राणनिरोधेन॥ म्पाचण्डालीज्वलिता सा प्राणायामानल इत्युच्यते॥ तेन प्राणायामानलेन द्रवमपि शशिन इति बोधिचित्तस्य द्रु-
तस्य द्रवं बिन्दुरूपं पानकं ज्वलितशुक्रं स्वेनोर्ध्वं नीयते तत्सहजानन्दजनकं॥ मद्यपाने योगिनामुक्तमिति॥ वाह्ये पुनः सेकादिकाले वाह्यदेवतानां वस्त्वर्थ-
कमिति॥ उष्णीषेऽङ्गुष्ठपर्वादिति॥ इह कामशास्त्रे श्रूयते॥ इह शुक्लपक्षे वामपादाङ्गुष्ठात् प्रतिपदादिरूपाच्चन्द्रकलादिरूपा पूर्णिमान्ते उष्णीषे
स्वचित्तमिति बोधिचित्तं व्रजति तिथिवशादिति॥ पुनरुष्णीषात् दक्षिणपादाङ्गुलिं प्रव्रजति पुनरिदं कृष्णपक्षतिथिवशात् यावत् कृष्णपक्षावसानं अमा-
न्तं॥ एवं कृष्णपक्षावसाने बोधिचित्तं पादाङ्गुष्ठे वैदिनस्य पुनरपरमासे शुक्लपक्षे वामाङ्गुष्ठे पूर्ववदिति॥ तत्राह प्रथमा तिथिः। प्रथमाङ्गुली पर्वे॥ दि-

तीया तृतीये तृतीया तृतीये॥ चतुर्थी वामपादसन्धौ॥ पञ्चमी जानुसन्धौ॥ षष्ठी कट्यूरुसन्धौ॥ सप्तमी वामकराङ्गुली प्रथमपर्वसन्धौ॥ अष्टमी मध्यमसन्धौ॥
नवमी तृतीयसन्धौ॥ दशमी करसन्धौ॥ एकादशी बाहुसन्धौ॥ द्वादशी स्कन्धबाहुसन्धौ॥ त्रयोदशी हृदये॥ चतुर्दशी कण्ठे॥ पूर्णा ललाटे॥ पूर्णान्ते। उक्तौघे
शुकस्य भवति॥ ततः कृष्णाप्रतिपत् ललाटे द्वितीया कण्ठे॥ तृतीया हृदये॥ चतुर्थी दक्षिणस्कन्धबाहुसन्धौ॥ एवं वामवद्विलोमेन दक्षिणपादाङ्गुली
नखान्ते॥ यावदमान्तं बोधिचित्तस्याचर्या योगिनोऽशेषप्रतिदिनसमये इष्टसिद्धिप्रदा भवेति॥ इत्थं बोधिचित्तस्य वामदक्षिणनाडीप्रवाहवशेन वामदक्षिणा
नगतस्य सर्वकालं मध्यमाप्रवाहेन षट्पुटचक्रादिकमलेषु अधोगमनादूर्ध्वगमने नानाचर्यासाक्षादिष्टसिद्धिर्महामुद्रासिद्धिस्तस्याः प्रकर्षेणागतीत्य प्रवेदनि
सिद्धं॥ बोधि ततः पञ्चमस्थानागतकमलनारीणां ग्रहणं नारीचर्या॥ तासु नारीचर्यासु मन्त्रजाते ब्रह्मचर्यं॥ तथा मेनते योगिना कर्तव्यमिति॥ तथा कोशो बोधिचि
त्तस्य नाडीसंचारहस्तूर्द्धरेतसो गमने कर्तव्यमिति नियमोऽमलतन्त्रे इति नारीचर्यानियमः॥ ॥

चिन्ताकांक्षा ज्वरोऽङ्गे खरतरखकमले शुद्धिरक्षाप्रवृत्तिः कम्पोन्मादश्च धर्मो प्रभवति मनसो विभ्रमस्तीव्रमूर्छा॥ धू
माद्याश्चिह्नराशाः प्रकटदशविधाः प्राणिनोऽङ्गे च वश्यो लोके नामन्मथस्य प्रभवति नियता योजितः कः सकामः॥ १२६ ॥
या बिन्दोश्च्युतधारा पतति दिननिशं मामकी सा तु रागेनो गोक्षा याश्च कुण्डेदः स्फुरणमनुदिनं नान्यमांसं कदाचित्॥ सेवा पंचा
मृतानां स्वजलशुचिगणैर्देवतैः सिद्धिकायेऽस्ये चित्तप्रवेशात् समरसकरणं मैथुनं तन्त्रयोनौ॥ १२७ ॥

दानेन्यागोधनस्याप्युन्निरपिमनसःस्वीप्रसङ्गाच्चशीलःक्षान्तिःशब्दाद्येवेशोऽप्युभयगतिविनाशोऽनिलस्येववीर्यं॥ध्यानंप्रज्ञा
चवित्तंसहजसुखगतंसर्वगासर्वभाषानस्याःसर्वार्थसिद्धिर्भवनिधनम्‌ शान्तिरव्याप्यतन्त्रः॥ १२८ ॥
एकाङ्केशक्तियुक्तेनवपदसहितेपंचविंशात्मकाद्येःध्यानेमुजादपोवेकमपियद्दिवसैःसिद्धयःसंभवन्ति॥सम्यंशा
न्तिंचवश्यंउवननिधनतांवक्रभेदैःकरोतिभूतानांमण्डलस्कोदवपुजगजलंसाधयेज्ञाविनौसो॥ १२९ ॥

इहपञ्चविंशत्यधिकशतवृत्तान्तस्तवतुष्टयंसुबोधंतेनात्रनविस्तारितमिति॥ ॥

श्वेतंशान्तिंचपुष्टिंसुमनसिजकृतेरक्तआकृष्टिवश्यंपीतःस्तम्भंचवश्यंकपुराघननिभंमारणोच्चाटनंच॥ध्यातेजन्ते
तथैवसुमनसिजकृतेकायवाक्चित्तवज्रंभूतानांमण्डलस्थंत्रिभुवननिलयेसाधयेत्कर्मभेदैः॥ १३० ॥

इदानींशान्त्याद्यर्थंदेवताभावनोच्यते॥श्वेतइत्यादि॥इहकालचक्रोभगवाननेकवीरोवाप्रज्ञोपायात्मकोवापञ्चात्मकोवायुक्तोवावक्त्रादिभेदैःशान्त्या
दिकंभवति॥यदाशान्तिंकरोतिकरोतियोगीमदायोगिनाकायवक्त्रानायकंकृत्वाश्वेतवर्णाभावयतीयथचन्द्रमण्डलेललाटस्थःश्वेतःशान्तिंपुष्टिंचकरो
ति॥रक्तआकृष्टिंवश्यंचकरोतिवाग्वज्रनायकःसूर्यमण्डलेकण्ठस्थोऽनलसिधानःसपीतःस्तम्भनंमोहनंचकरोति॥कालाग्निमण्डलेनाभिस्थोध्यानो
ज्ञानवक्त्रनायकइति॥कृष्णोमारणमुच्चाटनंचकरोतिविद्वेषंचकरोति॥हृदयेराहुमण्डलेचित्तवक्त्रनायकइति॥एवंभूतानांमण्डलस्थोदवुजगज

संसाधयेज्ज्ञा विनो साविति ॥ दैत्यभुजगानां जलमष्टविधं मदे वज्रलं सोधयेद्वक्ष्यमाणां ॥ णा दंडे नाव विस्तारिनमिति ॥ ध्यानं जप्त्वं न यो वश्यमनसिजरुतेइति ॥ एकभुव दिभुजा देवताकायादिवर्णभेदेन भाविता वक्ष्यमाणा कर्मेणाशान्त्यादिकं करोतीति ॥ एवंभूतानां मण्डलस्थमिति ॥ तो यादि समण्डलस्थं वज्रचक्रस्थं संभावयेद्धि भुवनं निःशेषकर्मभेदैरनेकैरिति नानाविधैरित्यर्थः ॥ ॥

यश्चाधिक्योऽग्निवाभ्यां मणिकरकमयाभ्यां च सव्येतराभ्यां स्कन्धाधिष्ठेभचर्मोद्धृतमपि सकलं पाटयित्वाङ्घ्रियुग्मात् ॥ दै
त्येन्द्रासृक्कपालप्रवरकरतलो मृत्युमारस्य हन्तुः क्लेशाविष्टाङ्घ्रिपाती प्यधिकजिनकरोऽस्मावनीयं परार्थं ॥ १२१ ॥

इदानीं दुष्टदमनाय गजचर्मपटार्द्धधृग् भावनोच्यते ॥ यश्चेत्यादि ॥ इह कालविशुद्ध्या वर्षस्य चतुर्विंशतिपक्षोऽथ चतुर्विंशतिकरो वज्रमालाधरः श्रीमानिति सिद्धः ॥ अस्य पुनर्गजचर्मपटार्द्धधारिणोऽधिकमासेन सहितं वर्षं त्रयोदशमासात्मकं तस्य पक्षैः षड्विंशतिभिर्भुजविशुद्धिः ॥ अतः यश्चाधिकयोऽग्निवायुजद्वयोस्ताभ्यां भुजाभ्यां मणिकनकनिभाभ्यामिति ॥ दक्षवामाभ्यां सव्येतराभ्यां स्कन्धाधिष्ठेभ इति ॥ स्कन्धचमार इव इभमलस्य पक्षयाल्लवमात्रनाचर्म तेदेवोद्धृतं सकलं पाटयित्वा स्कन्धमारेभं अङ्घ्रियुग्मात् ध्वनमङ्घ्रियुग्मे लम्बमानं गजचर्मपटमिति धृतं ॥ सव्येन शिरो वामभागे चरणं ॥ दैत्येन्द्र इति देवपुत्रमारस्तस्याधिपा प्रवृत्तिरिति ॥ असृगिति तस्य भयान्तं वमावंकपाले रुधिरं तदसृक्कपालं यस्य प्रवरकरतले स दैत्येन्द्रासृक्कपालकरतल इति ॥ मृत्युमारस्य हन्त इति ॥ मृत्युमारस्य याल्लवमात्रावरणमास्यं हन्ता यस्य मृत्युमारस्य हन्ता ॥ क्लेशाविष्टाङ्घ्रिपातीति क्लेशमारस्य याल्लवमात्रं क्लेशावरणं तं निर्दग्धं यत्तद्वृतेन तस्याङ्घ्रितले पतितं ॥ तेन क्लेशाविष्टाङ्घ्रिपाती एवं लवमात्रावरणोऽधिकजिनकर इति षड्विंशतिकरः ॥ शेषभुजे कालचक्रवत् ग्रह

रणः भरुडकपालमालाधरः। व्याघ्रचर्मनिवसनः। अक्षिकृष्णनागेन्द्रभूषणो भावनीयः परार्थमिति॥ दुर्दान्तवैनेयार्थमिति नियमः॥ ॥

मातुस्तत्त्वैवचक्रं पद्मकरकमले कर्णिकायां कपाले सूर्यादिन्दुः सुचारं चरति गतिवशाद्वादशाधिक्यमेकं॥ तस्मात्काय
प्रभेदैर्भवति जिनपतिर्विश्वमाता तथैव प्रज्ञोपायाङ्गभावैः शमसुखफलदैश्चन्द्रसूर्यप्रचारैः॥ १३२ ॥

इदानीं तस्य प्रज्ञायां लक्षणमुच्यते॥ मातुरित्यादि॥ इह कायभेदेन सूर्यः प्रज्ञा॥ चन्द्र उपायः॥ स च चन्द्रः सूर्यचारात् द्वादशाधिक्यमेकं चारं यावच्चरति मासं प्रति त्रयोदशराशीश्चरति॥ सूर्य एकराशिं चरति॥ तेन सूर्यचारवशेन मातुस्तत्त्वैकचक्रं मासमध्ये पद्मकरकमले हस्तद्वयकमले॥ तस्मिन्करकमले संध्येऽवसध्ये कर्णिकायामिति नरकपाले॥ तस्मात्कायप्रभेदैरिति चन्द्रराशिपक्षभेदैः षड्विंशतिभिः षड्विंशतिभुजो जिनपतिर्भवति विश्वमाता तथैव कायभेदैः सूर्यस्यैकराशिः॥ पक्षभेदैर्द्विभुजा विश्वमातेति॥ तस्मात्कर्केशाशेषाभयवातिवाभरणाभूषितेति॥ एवमुक्तैः प्रज्ञोपायाङ्गभावैः शमसुखफलदैरिति॥ अक्षरसुखफलदैश्चन्द्रसूर्यप्रचारैः श्वासनिश्वासरोधैर्भावनीय इति नियमः॥ ॥

एकास्यानन्तवक्त्रो बहुकरचरणोऽनेकवर्णस्तमोऽन्ते प्रज्ञोपायात्मकोऽवेदयति शमसुखं नाडिकेन्दुप्ररोधात्॥ भूम्या
दीनां समन्तादमलमखिलनिभोभेदकः शून्यरूपो लोकानामान्तो न मध्योऽस्त्वविषयविषयः स्याविनः कालचक्रः॥ १३३ ॥

इदानीं विश्वरूपभावनोच्यते॥ एकेत्यादि॥ इहैकवक्त्रो वा आदिशब्दात् त्रिमुखो वा चतुःपञ्चाननमुखो वा बहुकरचरणो ऽनेकचरणो ऽनेकास्त्रधरः। अनेकव
र्णो ऽनेकसंस्थानो विश्वमायाधरो राजा शुद्धविद्याधरो महान्॥ शून्यनाक्षरधरो भगवान् प्रज्ञोपायात्मकस्तमोन्तो निशाकाले निशायोगेन दिवाकाले दिवायोगेन
यः प्रज्ञापारमितायां योगं पश्यति॥ सर्वाकारां पश्यति निशायामभ्यवकाशे पश्यति दिवायां एवं विभावितो विश्वपर्यन्ते॥ ततो नाडिकेन्दुघृरोधादिति वाम
दक्षिणाग्रा सारोधात्॥ ददतिसमसुखमिति परमाक्षरसुखं ददाति भूम्यादीनामिति पृथिव्यादीनां धातूनां॥ अमलमणिनिभो वेधक इति॥ इहामलम
णिर्यथा स्पर्शमात्रेण पाषाणादिकं धातुकं स्वर्णं करोति न भेदको वेधक इति॥ तथा शून्यस्यैको विमलोऽभूम्यादीनां शरीरधातूनां समन्ताद्वेधक इति॥ सर्वशू
न्यतारूपीनायोनाम्नोनमध्योऽविषयविषय इति॥ विषयैर्विना विषयप्रतिभासो मायास्वप्नप्रतिभासेनोपमः साधितः कालचक्रः समसुखंददा
तीति नियमः॥ ॥ इति श्रीमदादिबुद्धसाधनमुत्पन्नक्रमे लोकमस्यविस्तारे ज्ञानपटलेवकृप्य इति॥ ॥ मूलतन्त्रानुसारिण्यां लघु
कालचक्रतन्त्रराजटीकायां द्वादशसाहस्रिकायां विमलप्रभायां उत्पन्नोत्पन्नक्रमसाधनमहोद्देशश्चतुर्थः॥ ॥

क्रोधेन्द्रं वज्रवेगं द्विधिकजिनकरं वेदवक्त्रं द्विपादं पिङ्गाक्षं पिङ्गकेशं जिनपतिमुकुटं भीषणादंष्ट्राकरालं॥ सर्पाढ्यं व्या
घ्रचर्मप्रवरनिवसनं भ्रजवन् शस्त्रहस्तं क्रोधैर्मानानिबद्धं सकलजिनजलैः पञ्चवर्णैः कपालैः॥ १२४ ॥

वज्रवेगेन समस्तम् विश्ववज्रधरं प्रभुं॥ नायकं क्रोधराजानां नानासाधनमुच्यते॥ क्रोधेन्द्रेत्यादिना॥ इह क्रोधेन्द्रं वज्रवेगं हूंकारवज्रनिष्पन्नं पूर्वोक्तसाधनविधि

कं

२८३

नाद्यधिकजिनकरमिति षड्विंशतिभुजं ॥ गजचर्मयद्धारिणं ॥ वेदवक्त्रमिति चतुर्मुखं द्विपादं पिङ्गाक्षं पिङ्गकेशं । जिनपतिमुकुटमित्यक्षोभ्यमुकुटं तीक्ष्ण
दंष्ट्राकरालं ॥ सर्पालमिति सर्पभूषणं । व्याघ्रचर्मप्रवरनिवसनं । भैरववत् शस्त्रहस्तं कालचक्रवदिति ॥ मुण्डमालानिबद्धं सह जिनकुलैर्विश्वध्वेः । प
श्ववरौः कपालैः ॥ ॥

विश्वाब्जेऽर्कसूर्यमूर्द्ध्नि स्फुरदमनकरं मण्डले विश्ववर्णे पादाभ्यां भूतनाथाक्रमितमिति वलात्संस्थितानालीढपादं ॥ भू
तानि त्रासयन्तं त्वसुरकरशिरान् ज्ञानसत्त्वैकभूतं ध्यायेन्नैवैकमासं त्रिभुवनगतं साधयेद्भूतवृन्दं ॥ १२५ ॥

इह भूतं विश्वाब्जेऽर्कसूर्यमण्डले परिस्फुरदमलकरं स्वच्छं मण्डलगृहे विश्ववर्णे एकवीरं मध्ये चतुर्द्वारे भवज्राङ्कुशवज्रवज्रपाशवज्रवज्र
घण्टायथानुक्रमेण दत्वा पादाभ्यां भूतनाथमपराजितं प्रेतनाथमाक्रमितमिति वलात्संस्थितानालीढपादं भूतादीं त्रासयन्तं गजचर्मधृतंक
रतर्जनीभ्यां ॥ असुरकरशिरांस्त्रासयन्तमिति ॥ ज्ञानसत्त्वैकभूतं ॥ एभिर्मन्त्रपदैः ॥ जः हूं वं होः ध्यायन्योगी एवैकमासं त्रिभुवनगतं
श्मशानभूमिगतं साधयेद्भूतवृन्दमिति भूतादीनां योनायकः सनयामूर्त्तीपादतले पातितः स तत्सपरिवारः सिद्धिं गच्छति ॥ प्रेतो वा राक्षसा
धिक इति भूतादिसाधननियमः ॥ ॥

नागाब्जेऽष्टरूपे त्रैष्वपि जयविजयौ पातयित्वार्कमूर्द्ध्नि पादाभ्यां स्तम्भयित्वा फणिपतिमिथुनं पत्रपत्रे स्थितानां ॥
लां तस्याग्रे च सर्वं घनजलमुदरात्सृत्य नोवैसमन्तात्ध्यानः क्रोधेन्द्र एवं कतिपयदिवसैः साधयेन्मेघवृन्दं ॥ १२६ ॥

इदानीं मेघवर्षापनाय नागराजसाधनमुच्यते ॥ नागानित्यादि ॥ इह सरवज्रवेगः क्रोधे क्रोधानलः स तु साधयेन्मेघवृन्दं ॥ कतिपयदिवसैरिति ॥ मासदिनेरेवमित्यनेन विधिना ॥ नागानष्टाष्टपत्रेष्विति ॥ अत्र पूर्वपत्रे कर्कोटः । अग्नौ पद्मः ॥ दक्षिणे वासुकिः । नैर्ऋत्ये शंखपालः । उत्तरे अनन्तः । ईशाने कुलिकः । पश्चिमे तक्षकः । वायव्ये महापद्मः । पूर्वाग्नेयौ कृष्णौ । दक्षिणनैर्ऋत्यौ रक्तौ । उत्तरेशानौ शुक्लौ । पश्चिमवायव्ये पीतौ ॥ अपि जयविजयौ हरितनीलौ नागराजानौ पातयित्वार्कं मूर्द्ध्नि अर्कमण्डले वामदक्षिणपादतलेनोर्ध्वं पुरुषाकारावधः सर्पाकारौ शिरउपरि सप्तफणाचक्रवाहौ महामणिभिः स्फुरन्तौ भुजान्तकौ पातयित्वा यत्र नागराजान् पातयित्वा तेषां लाङ्गुलाग्रं प्रत्येकं जयोपरि पूर्वोत्तराणां विजयोपरि दक्षिणापश्चिमाराणां ॥ लाङ्गुलाग्रं च सर्वं ॥ एवं पादाभ्यां स्तम्भयित्वा फणिपतिभिर्भुतं पञ्चपत्रेस्थितानां लाङ्गुलाग्रं च सर्वमिति ॥ एवं अष्टौ नागराजाः पञ्चफणिनः घनजलं मेघवृन्दमुदराम्भुष्वनो वै समन्तात् ॥ एवं क्रोधे क्रोधानलः श्मशानभूम्यां मासदिनैर्मेघवृन्दं साधयेत् ततो यथाभिलषितकाले वर्षापयति ॥ विसर्जनेनावधारयति ॥ इह नागराजसाधननियमः ॥

॥ इत्याद्यैर्देवतानां भवति नरपते साधनं देवतीनां प्रत्येकं मण्डलेऽस्मिन् भुजिन[illegible]तवशात् कर्मभेदैः समस्तैः ॥
स्तम्भे शान्तौ च वश्ये परधनहरणे मारणोच्चाटनाद्येषु विंशायोगिनीनां भवति खलु पुनर्जापहोमे सुवीजैः ॥ १७ ॥

इदानीं कर्मभेदैर्देवतासाधनमुच्यते ॥ इत्याद्यैरित्यादि ॥ इह मण्डले उक्ताद्यदपरं देवतादेवतीनां साधनं भवति नरपते प्रत्येकं मण्डलेऽस्मिन् ए

कवीरैः स्वजिनकुलवशाद्वैरोचनादिकुलवशात् कर्मभेदैः समस्तैः साधनं भवति॥ स्तम्भे शान्तौ वश्ये परबरहरणे मारणे उच्चाटनाद्ये वक्ष्यमाणसा
धनं षड्विंशद्योगिनीनामन्यासां श्मशानपर्यन्तानां भवति स्वकुलजनजीवहोमश्च स्वस्वमन्त्रबीजैर्भवति॥ ॥

शान्तौ ध्यानं च शान्तं शशधरधवला देवता शान्तरूपा रौद्रे ध्यानं च रौद्रं कृष्णघननिभा देवता शान्तरूपा॥ वश्ये ध्या
नं सरागं दिनकरवपुषा देवता रागमूर्त्तिः स्तम्भे ध्यानं समूढं वरकनकनिभा देवता तत्त्वरूपा॥ १२८ ॥

इदानीं शान्त्यादिध्यानमुच्यते॥ शान्तावित्यादि॥ इह शान्तौ ध्यानं शान्तं शशधरधवलं देवता शान्तरूपा ध्यानं चेति॥ रौद्रे मारणादौ ध्यानं रौद्रं कृष्णा
वर्णा देवता रौद्रमूर्त्तिः॥ वश्ये ध्यानं सरागं देवता रक्तवर्णा रागमूर्त्तिः॥ स्तम्भने ध्यानं मूढं देवता पीतवर्णा स्तब्धरूपेति॥ यथा शान्तौ तथा पुष्टौ ज्व
रोपशमने विषापहरणे च भवति॥ यथा मारणे तथोच्चाटने विद्वेषे ज्वरसंक्रामणे चेति॥ यथा वश्ये तथाकृष्टौ स्तोभने ज्वरोत्पादने च॥ यथा स
म्भने तथा मोहने कीलने चेति नियमः॥ ॥

शान्तिः पुष्टिश्च राजन् सकलजिनकुलैः सिध्यते देवतीभिर्विद्वेषोच्चाटनं च प्रकृतितरावशात् सिध्यते क्रोधजातिः।
वश्याद्यं भूतजातिः प्रकटदनुकुलैः कीलने चासुरीभिर्मीनृभ्यां सर्वकर्माण्युभयपरिकुले मारणं जीवनं च॥ १२९ ॥

इदानीं गणकुलैः शान्त्यादिसिद्धिरुच्यते॥ शान्तिरित्यादि॥ इह शान्तिः पुष्टिश्च सकलजिनकुलैरिति॥ इह रूपवेदनासंज्ञासंस्कारास्तानि चत्वा

रि जिनकुलानि॥ समुत्पन्नीति॥ विष्कम्भिक्षितिगर्भलोकेश्वरखगर्भ॥ एतानि वोधिसत्वकुलानि॥ एवं लोचना पाण्डरा मामकी तारा जिनकुलानि॥ गन्धवज्रा रसवज्रा रूपवज्रा स्पर्शवज्रा वोधिसत्वकुलानि॥ एभिः कुलैः शुक्लवर्णाभिर्वितैः प्रत्येकैकैश्चन्द्रमण्डले ललाटे पद्मासने उपविष्टैः सितपद्मवरदहस्तैः प्रज्ञाभिः सितोत्पलाभयहस्ताभिः शान्तिः पुष्टिश्च सिध्यति॥ राजन्नित्यामन्त्रणां कारात्रिर्विषत्वं ज्वरोपशामनं स्थैनि॥ विद्वेषोच्चाटनं च कारान्मारणां विवलं कामराणां वश्यकृति तथा वशादिति॥ क्रोधप्रकृति तथा वशात् सिध्यते क्रोधराजाभिरिति॥ क्रोधता हुंकारवज्रनानका क्रोधाः॥ फ्रेंकारक भिंजादशक्रोधभार्या हृदये रक्तमण्डले क्रोधैरालीढपादैर्वज्रपाशहस्तैर्मारणं सिध्यति खड्गश्च खड्गहस्तैः तर्जन्यैर्विद्वेषायं कृष्णवर्णैः क्रूरैरिति देवीभिः कृष्णकपालहस्ताभिः। प्रत्यालीढाभिः खड्गपाशहस्ताभिरिति सिध्यति॥ वश्यायं श्मशानजाभिरिति॥ हृच्चर्चिकादिभिरष्टदेवीभिः कण्ठमण्डले करोठविशारदपद्मभिः रक्तवर्णाभिर्धनुर्वाणहस्ताभिर्वश्यं सिध्यति॥ आकृष्यायं पाशाङ्कुशहस्ताभिः सिध्यतीति॥ प्रकटदन्तज्वलत्केशैस्तथा हुरीभिरिति॥ इहस्थानास्याष्टदेवीभिः पीतवर्णाभिः॥ नाभौ कालाग्निमण्डले पीते मण्डलपद्माभिः चक्रपर्वसहस्ताभिः स्तम्भनं सिध्यति। उत्कटकीलकहस्ताभिः कीलनं सिध्यति॥ त्रिशूलनागहस्ताभिर्मोहनं सिध्यतीति॥ मातृभ्यामिति वज्रधात्वीश्वर्या प्रज्ञापारमितया वा तत्पकमले सर्वकर्माणि सिध्यन्ति॥ उदकादिमण्डलभेदेन सितादिवर्णेन सर्वाङ्गेन प्रत्येकैकचिह्नपदेन च मारणं जीवनञ्च सिध्यति॥ वज्रासनेन विन्दुमध्ये सानन्दादेवता जीवनं भवति योगवलेन प्राणानाकृष्य तन्तुनेन विन्दुना विरका मारणं करोति पुनः प्रत्युज्जीवनं नास्ति साधकस्य॥ तेन तत्साधनं वौद्धयोगिना न कर्तव्यं॥ एव साधकस्य प्राणाकृष्टस्तिष्ठति निर्गमो भवतीति नियमः सर्वकर्मसु॥ ॥ ॥ ॥

आदौ श्रीकालचक्रं त्रिभुवनजननी यत्नतः साधनीयौ पश्चात्कर्माणि साध्यानिव भुवि निलये शान्तिकादीनि यानि॥ मात्रा पित्रा
विहीनो न हि भवति सुतः सर्वदा लोकसिद्धस्तस्माद्द्वौ साधनीयौ समसुखफलदौ नान्यथा कर्मसिद्धिः॥ १४० ॥

इदानीं सर्वकर्मसाधनानामादिकारणमुच्यते॥ आदावित्यादि॥ इह हे योगिनाथ यत्नत इति गुरूपदेशतः साधनीयः श्रीकालचक्र इति प्राणाः सुमध्यमा
यां प्रवेशितव्यः॥ तथा त्रिभुवनजननी निःशून्यताविम्बं नीतौ द्वौ विम्बप्रारौ यत्नतः साधनीयौ॥ पश्चादुक्तानि सर्वकर्माणि साध्यानि भवति भुवि नलनिलये शा
न्तिकादीनि यानि॥ अत्र दृष्टान्तः॥ मात्रा पित्रा विहीनो न हि भवति सुतः सर्वदा लोकसिद्धः॥ तस्माद्द्वौ साधनीयौ विम्बप्रारौ समसुखफलदौ नान्यथा कर्मसि
द्धिरमिति विम्बेन प्रारोना साधितेनेति नियमः॥ ॥

भर्तुर्हृत्पद्ममध्ये शशिरविशिखिविनिस्कापयेन्मूर्द्धि वज्रं हूंकारं ज्ञानजातं प्रलयघननिभं पंचशूकं सरश्मिः॥ तन्मध्ये
योऽङ्कुशास्य त्रिभुवनसकलं रश्मिभिः स्फुरयित्वा आकृष्य ज्ञानचक्रं त्रिविधभवगतं वज्रमार्गे प्रविश्य॥ १४१ ॥

इदानीं शान्त्यादिसाधनाय आदिभावनोच्यते॥ भर्तुरित्यादि॥ भर्तुरित्यादि॥ इह यदा योगी विम्बं विस्पष्टमवधत्तां प्राणगतं पश्यति तदा तद्विम्बं यादृशं विक
ल्पयेत्तादृशं पश्यति॥ तद्विम्बं भर्तुरिति॥ कालचक्रं सर्वाङ्गे निध्यायतस्तस्य हृदयपद्ममध्ये कर्णिकायां शशिरविशिखिवनीति चन्द्रसूर्यराहुयोगाग्रहमण्ड
ले आत्मके अध्यात्मनि ललनारसनावधूत्येकलोलीभूते हृत्कमले तत्र स्कापयेत् मूर्द्धि वज्रं हूंकारपरिणतं पंचशूकं प्रलयघननिभं कृष्णवर्णमि

ति स्वरश्मिपञ्चरश्मिस्फुरद्दितिन मध्ये इति तस्य वज्रस्य मध्ये वरटेफे जःकारपरिणतं वज्राङ्कुशं भावयेत्॥ ततस्तस्याङ्कुशस्य रश्मिभिर्वज्राङ्गनाकारैस्त्रिभुवनमिति त्रिधातुकं सकलं दूरस्थितं ते वज्राङ्कुशैस्त्रिभवाकारं स्वकं ज्ञानचक्रमाकृष्य त्रिविधभवगतं व्यापकं चिन्तयेत् तदवधूतीद्वारेणोष्णीषललाटकण्ठहृदयनाभिगुह्यमार्गेण प्रवेशयेत् सर्वमिति॥ ॥

सर्वं चन्द्रद्रवाभं सुजलितावदनादुत्सृजेन्मातृपद्मे तस्मिं सूर्ये प्रविष्टं भवति समरसं वादिकादिप्रहीनं॥ तन्मध्ये
ज्ञानबीजं भवति जलवशात् कर्मणः शाल्मिकादेस्तेनोत्पन्ना वा देवी भवति हि फलदा योगिनो देवता वा॥ १४२ ॥

सर्वाकारं यत्तच्चन्द्रद्रवाभमिति॥ बोधिचित्तलक्षणं स्वकुलिशवदनादुत्सृजेन्मातृपद्म इति स्ववज्रमुखाद्यथा पुरुषः स्त्रीकमले बोधिचित्तमानन्दितं क्षिपेत्तथा देवतायोगेन देव्याः पद्मे उत्सृजेत्॥ स्मात्रिनिवष्ण्या मातातां जननी यथा गर्भजातानां तथैव॥ तस्मिन् सूर्ये प्रविष्टमिति॥ इह यथा स्त्रीयोनौ रक्ते प्रविष्टं बोधिचित्तं समरसं रक्तेन सह भवति॥ तथा सूर्यमध्ये प्रविष्टं चन्द्रं समरसं मातृपद्मे भवति॥ वादिषु कं चन्द्रद्रवे कादिषु कं सूर्यरजः॥ प्राणापानमुक्तं तन्मध्ये प्राणापानमध्ये ज्ञानबीजमालयविज्ञानलक्षणं भवति जलवशादिति॥ पञ्चस्कन्धवासनावशात् सत्त्वानां स्थितिज्ञानं भवति॥ स्वकर्मणः शाल्मिकादेर्ज्ञानबीजं भवति। तेन बीजेनोत्पन्ना यथा कुमारी वा कुमारो वा भवति हि फलदो द्वादशवर्षावधेः षोडशवर्षावधेः॥ तथा देवी देवता उपायो वा योगिनां भाविता इति नियमः॥ अतो द्वादशवर्षे देवी वरदा भवति भाविता देवश्च षोडशवर्षैर्वरदो भवति॥ ततः सर्वकर्माणि सर्वसिद्धयः सर्वसौख्यानि योगिनः सिध्यन्ति॥ अन्यथा क्लेशमात्रं केवलं स्वेति सर्वतन्त्रान्तरे कालनियमो वीर्यवता सहमिश्रीभाविता त्वन्तो नान्यथाव

र्यशतावधेरितिसिद्धिर्नियमः॥ ॥जःहूंवंहोःक्रमेणाङ्कुशाइतिजलिशांवज्रपाशाश्चघण्टाॐआःहूंहोस्तथोक्रंशशिरविकलिशांचाक्षनंतद्वदे
व॥ईंम्लृंऊंल्लृंतथैवप्रकटयरवलावाप्सुवह्नोस्तुपृथ्व्योहःहूंहांहोःक्रमेणारविरपिकुलिशांचन्द्रमाकर्णिकाच॥ १४३ ॥

इदानींचिह्नोत्पादनक्रमानबीजान्युच्यन्ते॥जइत्यादि॥इहजःहूंवंहोःक्रमेणेति॥जःकारेणवज्राङ्कुशोभवतितेनपरिणतेनवज्राङ्कुशहस्तादेवीदेवोवाभवति॥ए
वंहूंकारे[illegible]वज्रंतेनवज्रहस्ताभवति॥वंकारेणपाशःतेनपाशहस्ताभवति॥होःकारेणघण्टातयाघण्टाहस्ताभवति॥ॐआःहूंहोयथोक्रमितितथेतिक्रमेण
पूर्ववत्॥ॐकारेणचन्द्रमण्डलेशशीति॥आःकारेणसूर्यमण्डलेरवीति॥हूंकारेणराहुमण्डलेकुलिशमिति॥होःकारेणकालाग्निमण्डलमक्षरंतद्वदेवेति
ईंम्लृंऊंल्लृंतथैवेति॥यथाक्रमेणईंकारमपरिणतःखड्गःतेनपरिणिष्पन्नादेवताखड्गहस्तादेवीवा॥एवंम्लृंकारेणमणिर्वीणावातेनतेजोदेवतामणिहस्ता
वीणाहस्तावादेवी॥ऊंकारेणपद्मंतेनतोयदेवतापद्महस्ताउत्पलहस्तावादेवी॥ल्लृंकारेणचक्रंचक्रेणपृथिवीदेवताचक्रहस्तादेवीवा॥एवंयरवलाअपिय
थाक्रमेणवाय्वग्नितोयपृथिवीदेवतेति॥तथाहः इतिरविमण्डलं॥हूंइतिरविमूर्ध्निवज्रंनायकस्य॥हमितिचन्द्रमण्डलं॥ह्रैंइतिचन्द्रमण्डलोपरिकर्णिका
नायिकाचिह्ननियमः॥तथोक्तमिति॥ ॥

ध्यात्वाचन्द्रार्कमध्येत्वलिकलिसहितेनोयबीजात्मकाङ्गंतेनोत्पन्नैकवक्त्रांयमकरकमलांदेवतीश्चन्द्रवर्णां॥आलृढंश्वे
तनागंसितजलजकरंचाभयाश्वेतवस्त्रंश्वेतालंकारयुक्तांप्रहसितवदनांप्रेर्षयेत्साध्यवेश्म॥ १४४ ॥

इदानीं देवतायाः साधितायाः सत्याः शान्त्यादिककर्मकरणाय देवतासमाधिरुच्यते॥ ध्यात्वेत्यादि॥ इह पूर्वोक्तमान्तु तदुपमे चन्द्रार्कमध्ये आदिकादिसहितेनोपवीजात्मकाक्रमिति॥ चकारपरिणतेषु क्तं पर्मनेनोत्पन्नेकवक्त्रा द्विभुजा देवता च वर्णा॥ आरूढश्वेतनागमिति॥ ऐरावतमारूढा॥ सितजलजकरेति॥ श्वेतपद्महस्ता देवता देवी श्वेतोत्पलहस्ता॥ अभया दक्षिणोऽभयहस्ता श्वेतवस्त्रा श्वेतालंकारयुक्ता उत्काफलाभरणा प्रहसितवदना भाव्या॥ ताश्च प्रयत्येत् साध्यवेश्मनि॥ ॥

तस्मात्साध्यं गृहीत्वा तु नरपिचुविभीमेरुडलैस्संप्रविष्टा भर्तुश्चाज्ञां प्रलब्ध्वा तु नरसृतघटे लोचनाद्याः प्रहृष्टाः॥ तं साध्यं
स्नापयन्ति प्रवरदशविधाः शान्तयः पूजयन्ति रूपाद्याः पोषयन्ति प्रकटदशबलाः स्यादयस्तोषयन्ति॥ १४५ ॥
भूतास्त्वास्त्वाभयन्ति प्रवरदशविधाः क्रोधजाः पालयन्ति नागिन्यश्च स्वयन्ति त्वनरतुवलवो वा दशालिङ्गयन्ति॥ चरुजाः
कुर्वन्ति रक्षां सकलभुवितले शान्तिपुष्ट्यर्थहेतोः एवं साध्यस्य सर्वं परमसुखकरं योगिना भावनीयं॥ १४६ ॥

अपरस्य तदर्थेनोक्तं सुबोधं॥ तस्मादित्यादिना॥ एवं साध्यस्य सर्वं परमसुखकरं योगिना भाव्यमिति पर्यन्तं॥ ॥

ॐ क्लीं श्चन्द्रादिगर्भे जवलयकलिकावारणे मे वेष्टु चापं तेनोत्पन्नार्कभासा भयकरधनुषा पूरिता कर्णवारणा॥ प्रत्याली
ढश्वरूपा कमलशरधरा प्रेषयेत् साध्यवेश्म साध्यं हृन्नाभितपूर्शिर शिववदनेन ताडयित्वा शरेण॥ १४७ ॥

कण्ठे पाशेन बद्ध्वाङ्कुशभिन्नमपि नयामण्डलेनीयमानं वरडाभिर्विरूक्षहीनं कृतमपि नियतं वेष्टितं नागिनीभिः। देवभिर्ठे
ज्यमानं स्वहस्तुडमुखलैस्ताडितं क्रोधजाभिर्भूताभिर्भीष्यमानं खरनखनिहितं चैव लालास्याद्रिभिश्च॥ १४८ ॥
वज्राभिर्नष्टबुद्धिं क्षितिजलहुतभुग्वातजाभिश्च बद्धं भर्त्तुः पादे विवस्त्रं सकलमदहतं पातितं शक्तिभिश्च॥ एवं कृत्वा
तु वश्यं भुवनरपितृविभुस्त्रीषु येन तत्र साध्यं तदस्त्या पाशाङ्कुशाभ्यां भवति बहुविधा कृष्टिकर्मत्रिधातो॥ १४९ ॥

तथा हीन्द्वादित्यगर्भे इत्यादिना॥ तदस्त्या पाशाङ्कुशाभ्यां भवति बहुविधा कृष्टिकर्मत्रिधातो इति पर्यन्तं वश्याकृष्टौ वृत्तत्रयेण बोधं॥ ॥

ध्यात्वा सूर्येन्दुमध्ये कषराघननिभं दीर्घहूंकारजासि तेनोत्पन्ना निवर्णा त्वसिकरकमला तर्जनीपाशहस्ता॥ प्रत्या
लीढोग्रमूर्त्तिप्रकुपितवदना प्रेरिता साध्यवेश्म साध्यं पाशेन बद्ध्वा कुपितवदनया मण्डलद्वारनीतं॥ १५० ॥
द्रष्टे जःकारजाते त्वरपवनगतो भन्त्वाकेन साध्यं तत्राकृष्टं प्रकृत्या शिखिचलवलयं प्रेरयेद्यावदेव॥ एवमुच्चा
टनैर्वै भवति सुरपते किं पुनर्मानुषस्य विद्वेषे यस्तु हीनो बहुकृतकलहो सव्यवामे च नेयो॥ १५१ ॥

तथा विद्वेषोच्चाटने ध्यात्वा सूर्येन्दुगर्भे कषराणघननिभं दीर्घहूंकारजासि मित्यादिना वृत्तद्वयेन बोधं॥ ॥

ध्यात्वा सूर्येन्दुगर्भे नरहतिपरिणातं पीतवर्णं तु वक्त्रं तेनोत्पन्नैकवक्त्रा वरकनकनिभा शृङ्खला चक्रहस्ता॥ कूर्मे

देत्यासनस्थं त्वमिति मृदु गमना प्रेरिता साध्यवेश्म साध्यं चक्रे राभिषेकं प्रपतितस्सवनौष्टैः खलावद्धपादं॥ १५२ ॥
आनीतं मरुडलेवै जिनपतिवचसा पानधिन्याधररम्यां मेरुस्तन्मूर्ध्नि देयो वरकनकमयः स्तम्भने साध्यकाये॥ षट्स
न्धौ कीलनार्थं त्वपि जलशिरसि यैः कीलकैः कीलनीयः सर्प्पैः सन्दश्यमानः पतितरहमहो मोहने भावनीयः॥ १५३ ॥
ध्यात्वा सूर्येन्दुगर्भे तदिति परिगतं पीतवर्णं तु चक्रमित्यादि स्तम्भनकीलनमोहने वज्रयंत्रबोधं॥ ॥

ध्यात्वा सूर्येन्दुगर्भे तडिदनलनिभां कर्णिकां क्रैँ स्वभावां नेनोत्पन्ना प्रचरडा प्रलयघननिभा कर्णिका शक्तिहस्ता॥ प्रत्या
लीढा विवस्त्रा तु परि हरिनृपाः प्रेरिता साध्यवेश्म साध्यं केशे भृशं गृह्य नमपि च नयाम्मरुडले वस्त्रहीने॥ १५४ ॥
आनीते श्रीश्मशाने जिनपतिवचसा गृध्रकाकैः शृगालैः सर्वाङ्गान्पीनरक्तं पललमपि तथा भक्षितं सर्वथा तु॥ साध्य
स्यैवं समस्तं प्रवरगुविनले मारणो भावनीयं ध्यानेनानेन शंको व्रजति यमपुरं किं पुनर्गर्भजातः॥ १५५ ॥
पुनर्ध्यात्वा सूर्येन्दुगर्भे तदिदमनलनिभां कर्णिकां क्रैँ स्वभावामित्यादि मारणे वज्रयंत्रबोधं॥ ॥

शान्तौ पुष्टौ च शुक्लं भवति जलवशाध्यानमप्यम्बुबीजात् वश्याकृष्टौ च रक्तं त्वपि न तु दहनं वह्निबीजात्मकञ्च॥ विद्वेषो
च्चाटने च प्रलयघननिभं वायुबीजस्वभावं सस्तम्भे कीलनायां वरकनकनिभं भूमिबीजात्मकञ्च॥ १५६ ॥

एवं वश्यादिनवहुत्तानि स्तुबोधानि॥ जिनेन लिखितानीति॥ इदानीं शान्त्यादौ परं ध्यानमुच्यते॥ शान्तादि इत्यादि॥ इह प्रथमं तावदेकवीरमात्मानं कालचक्रं भावयेच्च तुर्विंशतिभुजं शान्त्यादि वश्यादिकर्मणि मारणादि स्तम्भनादिकर्मणि वाद्विंशतिभुजं ततो दृष्ट्याकारेण शान्तोपशाविति॥ इह कालचक्रस्य हृदये तोयमण्डले तोयबीजेनोत्पन्नचान्द्रे वं नामोपान्तिकाष्टकपालकवशादुकारकलशात्॥ तस्य ध्यानेष्टक्रमध्यानमर्ध्यं वं बीजात् शान्तोपशोषणं भवति॥ तथा वश्ये हृद्येश्वरके॥ अभिचारुके दहने वह्निबीजात्मके कण्ठे वह्निमण्डले अकारकलशादिति॥ विद्वेषोच्चाटने च ललाटे वायुबीजस्वभावे ललाटे वायुमण्डले प्राणास्य इकारकलशात्॥ स्तम्भनकीलनादिपीने भूमिबीजात्मके नाभौ पृथिवीमण्डले ऌकारकलशादिति॥ ॥

नीलाम्भेऽथ शून्यबीजाज्ज्वलति हि हरिते मारणोजीवने च पृथ्वीकलशं स्तम्भनात्जलनिधिपवने वायुकलशं च पृष्ठे नाशार्थं
वह्निकलशं त्वपि महीवलयजावशार्थं च वह्नेर्नाशार्थं तोयकलशं भवति खगमनेऽथ स्वशक्त्यं त्वदृश्य॥ १५७ ॥

